Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

PREFACE.

The manuscripts used in editing the portion comprised in this volume are the same as those referred to in the preface to the Volume I.

A. M. S.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

BIBLIOTHECA INDICA;

ECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

Nos. 229, 241, 246, 277, 300, 346, 383, 415, 416, 423, 425, 448.

THE

OBHILI'YA GRIHYA SU'TRA,

WITH A

COMMENTARY BY THE EDITOR.

EDITED BY

ANDRAKA'NTA TARKA'LAÑKA'RA.

CALCUTTA:
ID BY J. W. THOMAS, BAPTIST MISSION PRESS.
1880.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिल-गृह्यसूत्रम्।

गृह्यासङ्ग्रह-श्राद्धकल्प-तत्परिशिष्ट-सन्ध्यासूत्र-स्नानसूत्र-

तत्परिशिष्टसमेतम्।

श्रीचन्द्रकान्ततर्कालङ्कारकृतभाष्यसहितम्

तेनैव परिशोधितम्।

श्रीलश्री

वङ्गदेशीयासियातिकसोसाइत्याख्यसमाजानामनुमत्या

व्ययेन च

कलिकाताराजधान्यां

वाप्तिस्त्मिशनयन्त्रे

मुद्रितम्।

शाकाः १८०२।

For Private and Personal Use Only

शुद्धिपत्रम् ॥

गृह्यसूत्रस्य

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ ।
ाथमकाण्डं	प्रथमकाण्डिका	१	१
देत्यभिप्रायः	दित्यप्याङः	७	५
नाशङ्ख्यता	नाशङ्क्यता	१२	७
पुरुषार्थं	पुरुषार्थं	१६	२२
कृतः	कुतः ?	२१	२१
प्यन्नप्राशनादिषु	पि केषुचित्	२३	२,३
ल्प्यते	कल्प्यते	२८	२
द्यवस्था	तत्फलवाद	३३	१६
गीत	श्वेत	३४	१२
पश्चिमस्यां	पश्चिमायां (एवं परत्र)	३४	१५
शुक्ल	पीत	३४	२०
“सप्त	सप्त	३५	७
अपिच स्मर्य्यते	प्रकारान्तरं गृह्यासंग्रहे	३५	८
इति	× ×	३५	१४
वह्न	वह्न	३६	१५
प्रमा	प्रामा	४२	२१
मध्यसातुम्	मध्यवसातुम्	४३	३
“तस्मादग्न्यर्था	तस्मात्—“अग्न्यर्थाः	४३	१८
“प्राञ्चं नीत्वावर्त्य स्थाप- यन्ति”-इति स्मरणाच्च	× × × × × ×	४४	१०,११
तथा नीत्वा आवर्त्त्य सम्यक् भ्रामयित्वा च	× × ×	४४	११,१२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ ।
प्रौर्ष्ठ	प्रोष्ठ	४७	२१
ज्यैष्ठैन	ज्यैष्ठेन	४६	१
वैश्व	वैश्वा	५५	[illegible]
निरूप्य	निरुप्य	५५	६
अग्निहोत्रलक्षणां	× × × (एवं परत्र)	५८	१५,१६
लोप	अतिपात	६१	५
जुहुयात्	जुहुयात् प्रायश्चित्तमकृत्वा	६१	६
स्याग्निहोत्र	स्य सायं प्रातर्होम	६७	१२
अवणौ	अवणो	६६	२
मांस्यं स्यात्, संस्पृशेत्	माँस्यँस्यात्, सँस्पृशेत्	६६	२०
नानव	नानवे	७१	१८
वाह्यांसः	वाह्याँसः	७२	३
कारणे	करणे	७७	१५
पय्यु	पर्य्यु	७६	१०
कंसेन	कँसेन	८३	१६
तुल्यवद्व	तुल्यवद्धि	८४	२१
पुनरग्निहोत्र	पुनः सायंप्रातर्होम	८६	८
त्राद्यमग्निहोत्रहोम	त्राद्यं सायंप्रातर्होम	६०	१
श्रुयते	श्रूयते	६०	६
जुहुतात्	जुहुयात्	६०	१८
गर्ह्य	गर्ह्य	६१	२
तुष्णी	तूष्णी	६१	६
मह्मायज्ञः	ब्रह्मयज्ञः	६३	१५
पुजनम्	पूजनम्	६३	१६
खल्वा	खल्वाचा	६६	११

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ।
चानुद्य	चानद्य	९६	२०
आमेथ्या	आम्रेय्या	९७	७
तथा	"यथा	१०२	५
सन्ध्योपासनस्य	सन्ध्योपासनं	१०५	१८
प्रघान	प्रधान	१०६	८
कालभेदे	कालस्वरूपयोर्भेदे	१०६	१७
भेदे	स्वरूपयोर्भेदे	१०६	१८
इति। अपिच	इति। स्वरूपभेदस्वा-नयोर्निमूलकार्यं कथ-ति तन्त्वताम्। अपिच	१०९	६
धार	धारय	१०९	७
दन्त	दन्ते	११२	१
पांसु	पाँस्सु	११४	८
कामं	कामँ	११६	१
प्रजापत्या	प्राजापत्या	११७	१६
गोतमेन	गौतमेन (एवं परत्र)	११८	११
नवगमाच्च	नवगमात् "यावद्वय-जुरनादिष्टान्तान्म-न्त्रान्"-इतिसूत्रणाच्च।	१२६	२
श्रियते	श्रीयते	१३७	१८
संस्तूपं	सँस्तूपँ	१४०	४
पसलवि	वसलवि (एवं परत्र)	१४१	१९
तमतं	तमतां	१६२	१८
रङ्कं	रङ्क	१६४	१०
गृहस्थानां	विभक्तानां	१७७	२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ।
कञ्चुका	कम्बुका (एवं परत्र)	१८१	१७
न्तभाः	न्द्रमाः	१८८	१३
मांश	मांशः	१९२	२१
"एषावैसमन्तानामेष्ठिः" इति च ब्राह्मणम्	× × ×	१९६	२१
अतएव--"दर्शस्तत्रनिमित्तं वै कालस्वब्रह्मयात्मकः" इति स्त्रीणामावस्थाविषयं स्मरणम्।	× × × × × × × × ×	२०१	११,१२,१३
इति वाक्य	इत्याहितामेर्वि	२२०	३
कृत्वा पूर्वाह्णएव	कृत्वा अथ परिसमूहनान्तं विधाय, पूर्वाह्णएव —	२२०	१४
'आवसोः	आवसोः	२२२	१९
नात्र	'नात्र	२२३	१
'उप	उप	२२३	१
अन्यापि	अन्या तु	२२८	९
द्व्याख्यासाद्य संप्रोच्यच	ब्रह्मस्थापनानन्तरं	२३०	३
त्यर्थाल्लभ्यते	त्यर्थः	२३२	१४
पवित्रान्तर्हितां	पवित्रान्तर्हिताऽ	२३३	७
कतमं	कतमत्	२३३	१८
पिञ्जल्या	पिञ्जूल्या (एवमन्यत्र)	२४१	१
वपेत्"	वपेत्	२४१	१८
आन्वष्टक्य	अन्वष्टक्य	२४७	१
एतन	एतेन	२५२	२
इति —	× ×	२५३	११

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ।
"नरकाय प्रदातव्योदीपः सम्पूज्य देवताः"।	× × ×	२५३	१२
इति वन्निवृत्तौ	इति निवृत्तौ	२५३	१३
अन्येतु	अथवा।	२५३	१४
व्याचक्षते—	× × ×	२५३	१५
खल्वतत्	खल्वेतत्	२५४	२१
वर्हिष—	वर्हिषः	२६२	५
स्तृत्यर्थत्वात्	स्तुत्यर्थत्वात्	२६२	२२
एष	एव	२६७	७
ऐन्द्राग्मन	ऐन्द्राग्नेन	२७२	४
स्मृत्यन्तरदर्शनात्	अन्यत्राप्येवं कल्पयितु मुचितत्वात्	२७३	१७
वाधान	राधान	२७७	१४
क्षेमादौ	क्षौमादौ	२८६	७
सव्व	सर्व्व	२८७	५
आददानं	आददानां	२८७	२०
मपीत्ये	मपि त्वे	२८८	१
सम्भार्य्यमपि	सम्भार्य्यमपि तु	२८८	२
वरुणा सुराऽरविन्दानी-त्युदकनाम	"धरुणम्, सुरा, अररिन्दानि"—इत्युदकनामसु नैघण्टुककाण्डे	२८९	१२
चरणेन	अग्निं प्रदक्षिणं कृत्वा चरणेन	२९७	१
पाणिग्रहे	पाणिग्राहे	३०२	१४
वं	वध्व	३०२	१८
द्व	द्वे	३०४	१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ ।
दव	देव	३०६	६
यागयताया	वागयताया	३१९	१५
दोषा	दोषो	३२६	१९
स्यैतदर्थत्वात्	स्यैतदर्थत्वादादरार्थत्वाद्वा	३३४	१४
मह्नग्र	मह्नग्रा	३३७	२
नामसु	नाम्नि न	३३७	२
पच्यमाण	पच्यमान	३४१	७
मन्त्र	मन्त्रे	३४३	१२
कर्त्तव्या	कर्त्तव्येत्याहुः	३४८	१४
शास्त्रान्तरेषु	शास्त्रान्तरे	४४९	१४
कर्म्मणा	कर्म्मणो	३५८	४
गर्भः—	गर्भः—इति	३५९	१६
कर्म्मश्चौड़	कर्म्मचौड़	३६०	१३
पूर्व्वर्ण्णां	पूर्व्वस्यां	३९७	१७
मन्त्रकम्	व्याहृतिभिः (एवमन्यत्र)	४०१	१६
इत्याद्युक्तः	इति चैवमाद्युक्तः	४०४	२
दर्शनात्	दर्शनादितितत्त्वकारः	४१३	११
न नवमेह्नि	प्रतिपदह्नि	४१४	२
एणास्येद	एण्याइद	४१५	१२
तूष्णीमित्यर्थः	व्याहृतिभिरित्यर्थः	४२२	१४
समिध	समिध्य	४३३	२
धर्म्म	घर्म्म	४५३	५
उद्धृतादि	उद्धृताभि	४७६	३
यद्यप्येतदुदगयनोपाकरणाभिप्रायं वचनं तथाप्युपाकरणसामान्यादत्राप्येवं कल्पयितुमुचितम् ।	× × × × × + × × ×	४७९	१४,१५,१६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठ	पंक्तौ।
स्वैवएतेषां	स्वैकएवैषां	४८८	१०
श्रोत्रिय	श्रोत्रिये	५०३	८
वीणा	गन्त्री	५०५	१
स्पर्श	दर्श	५०८	१५
सम्बेशाभागो	संवेशोभोगो	५२४	१२
दशा	देशा	५२७	१०
धूनयेत्”	धूनयेत्”—इति। नचैवमपि बहुवासस्त्वदोषशङ्का कर्त्तव्या। कुतः?।	५३३	२
नचैवमपि बहुवासस्त्वदोषा शङ्का कर्त्तव्या। कुतः?	× × × ×	५३३	४
इति	× ×	५३३	७
पाय	पायस	५४४	१४
महाव्याहृतिर्भिरि	इ	५७६	३
वा षि	वर्हिषि	५८०	१०
न्यञ्चा	न्यञ्चौ	५८०	१०
ज्ञानन्	ज्ञानम्	५८४	८
मृत	मृतु	५८८	१३
त्रिसंख्याका	त्रिसंख्याकाः	६२३	११
चास्मदीये	चास्मदीयं	६३१	१
असौ—इत्येतस्मिन् स्थाने	× × × ×	६३१	१४
हेतुवन्निगदस्तु न मुख्यार्थः किन्तु स्तुतिपरएव इति प्रमाणलक्षणे दर्शितम्	× × × ×	६३६	३,४
दवणां	दरणां	६३९	१५

For Private and Personal Use Only

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ।
स्तत	स्तत	६४६	१३
उत्तानं पात्रं कृत्वा	× × × ×	६५१	१६
तथा स्मृत्यन्तरम्।	× × ×	६५२	११
इति	× ×	६५२	१२
पित्र्य	"पित्र्य	६५३	१
स्थितम्	निहितम्	६५५	५
(तन्नवत्वाच मन्त्रोपितावन्मात्रः तदीयो निवर्त्तते। तेन, "एतद्वः पितरोवासः" —इति श्राद्धकल्पोक्तेनैव मन्त्रेण वाससोनिधानं सिध्यति)। एकवचनसंयोगाच्चैकमेवात्रवासः स्यात्। अपूर्व्वं खल्वत्रवासो विधीयते। अतस्तदेकत्वमपि पश्वेकत्ववद्विवक्षितुमुचितमेव	× ×	६७१	२,३,४,५,६
भन्त्र	मन्त्र	६८१	५
ईत्य	इत्य	६८५	१३
दन्नाहार्य्यं	दन्वाहार्य्यं	६६६	१२
भूसि	भूरि	६८७	४
उभयेष	उभयेषु	६८८	१८
भिगं	भोगं	६९३	१८
कुष्ठ	उन्माद	६९६	१२
सूत्रे	सूत्र	७०६	५
यज्ञ	वास्तु	७१९	११
विप्रेष	विप्रेष	७२२	२

अशुद्धम	शुद्धम	पृष्ठे	पंक्तौ ।
मासाभि	मस्माभि	७२५ ...	१
अर्व्वाङ	अवाङ (एवं परत्र पंक्तौ)	७२८ ...	१४
"अभ्या	अभ्या	७४५ ...	२०
प्रथमो	प्रथमोद्दितीयस्य	७५७ ...	१७
इतरेषु	इतरयोः	७५७ ...	१८
तूष्णीमेव	व्याहृतिभिः	७६२ ...	८
स्नान	स्नानं	७६६ ...	५

गृह्यासंग्रहस्य ।

अशुद्धम	शुद्धम	पृष्ठे	पंक्तौ ।
परे...	पार	७७५ ...	२
प्रागल्भो	प्रगल्भो	७७५ ...	१९
कर्म्भ	कर्म्मं (एवं परत्र)... ...	७७७ ...	९
नाम्ना	नाम्ना	७७९ ...	६
अतिभयदेभि	अतिभयदेति	७८६ ...	१४
सन्धन्धात्	संबन्धात्	७८८ ...	१८
पर्णनाथ	पर्णनाथ	७९५ ...	५
स्मतं	स्मृतं...	७९६ ...	६
त्रिधा	त्रेधा (एवं परत्र)... ...	८०५ ...	१०
कणीयांश्च	कनीयांश्च	८०८ ...	१३
आचार्य्या	आचार्य्या	८०८ ...	१५
विस्फुलिङ्गेऽत्र	विस्फुलिङ्गे च	८१५ ...	१५
प्राज	"प्राज्ञ	८१८ ...	१२
तथा ॥ ९२ ॥	तथा ।	८१८ ...	१२
प्रदच्छिणम् ।	प्रदच्छिणम्" । इति ...	८१८ ...	१३
॥ ९३ ॥	॥ ९२ ॥ (एतदनुसारात्... परत्राङ्काः शोध्याः ।)	८१९ ...	६

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ ।
ग्रहणाम	ग्रहणाम्	८२४	४
मांग्निः	मान्निः	८२४	१४
सर्पिस्तैल	सर्पिस्तैलं	८२७	२
गार्भे	गार्भे	८२८	६
पूर्व्वं	पूर्व्वं	८३५	१०
माचार्य्यः	माचार्य्यैः	८४६	१५
र्थत्वात	र्थत्वात्	८५१	१८
स्वल्मा	स्वल्या	८५४	८
यस्मात्	यस्मात्	८५७	२०
पितामहाः	पितामहाः	८७६	१०
मादाय,	मादयः	८८०	१०
प्रावल्या	अर्थप्रावल्या	८८५	५
जीरन्ध्र	जीवरन्ध्र	८८७	१५
स्वस्त्रीयं	स्वस्रीयं	९१०	६
राजा	राजो	९१३	४
इत्यादि	इत्यादि	९१३	२०
इतरे	तइमे	”	”
गरान्हते	गवान्हते	९१४	२०
पूर्व्वे	पूर्व्वे	९१५	५
विघ्निष्ठ	विघ्निष्य	९१५	८
प्रति	प्राङ्	९१५	१४
वासः	नाम्नः	९१६	२०
प्रकृतादेव	प्रकृतिवदेव	९२०	१२
सव्वान्	सर्व्वान्	९३१	३
इति	इति	९३३	३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ ।
यदा	यदा	९३७	४
दैव	देव	९४५	३
नैकैकस्याश्व	नैकैकस्याश्व	९४७	२२
मन्त्रो	मन्त्रः	९५०	१४
धान	धानं	९५०	१९
निस्तारः	विस्तारः	९५४	१७
नीतान	नीतान्	९५५	१७
वेदैः	वेदैः	९५७	२२
॥ १९ ॥	।	९६४	१५
सर्व्वेएव	सर्व्वेभ्यएव	९६७	१४
प्रथम	प्रथमं	९६७	२२
इत्येवाधिकः	इत्यधिकः	९८७	१२
स्वधानिनयनीया	येभ्यः स्वधानिनयनीया	९९४	६
तदेतत्सूत्रं	तदुत्सूत्रं	९९९	१८
वेदाः	वेदः	१००२	१५
वाजिनो	वाजिनोनो	१००३	१
पितरा	'पितरा	१००४	१३
नैयमिकस्याग्दि	नैयमिकस्याग्नि	१००७	१४
वश्वदेवे	वैश्वदेवे	१००८	४
मस्य	मस्य	१०१४	५
न्नेव	न्नवे	१०२०	६
स्पष्टन्	तुष्यम्	१०२८	१४
वृद्धिदिनश्चेति	वृद्धिश्चेति	१०३०	१
अन्ये	अन्य	१०३२	२
सेचन	सेचनं	१०३६	३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ ।
विभजते-विभाग	विभजतेर्व्विभाग	१०३७	४
दत्ते	ददते	१०३७	२२
सूत्रान्तरं	सूत्रानन्तरं	१०३८	७
इत्युच्छितव्यं	इत्यूच्छितव्यं	१०४१	३
निषेध,	निषेधः,	१०४१	१६
निर्वर्त्स्यति	निवर्त्स्यति	१०४१	१६
प्राङ्मुमुख	प्राङ्मुख	१०४२	१५
पिण्डान	पिण्डान्	१०४२	१६
प्रयुयुत्त्वतं	प्रयुयुच्छितं	१०४५	२१
विप्रिष्यो	विप्रिष्यो	१०४५	२२
इहि	इति	१०४६	६
नाम्	नाम	१०४६	१०
यस्त्वर्थः	चस्त्वर्थः	१०४८	१६
प्रीयता	प्रीयन्ता	१०५०	११
आद्धान्वितः	श्रद्धान्वितः	१०५३	१६
तदेव	तदैव	१०५४	११
कार्त्स्नेन	कार्त्स्न्येन	१०५८	२
नसः	मासः	१०६३	१८
तृतीयायां	द्वितीयायां (एवं परत्र पंक्तौ)	१०६६	६
न्ववाय	न्ववाये	१०७३	१०

श्राद्धकल्प परिशिष्टस्य ।

तत्र	तच्च	१०७६	७

स्नानसूत्र परिशिष्टस्य ।

अपवित्रकै	अपवित्रकरै	१०८६	६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृह्यसूत्राणामकारादिक्रमेण सूची ।

सूत्रं ।	पृष्ठे ।
अक्षतश्चेत्	८३
अक्षतधाना-	४८५
अक्षभङ्गे	३३३
अक्षिणी नासिके	६९
अक्षीरिणो-	७०७
अग्नये स्वाहेतिपूर्व्वां	८६
अग्नये स्वाहेतिमध्ये	२५१
अग्नये स्विष्टकृते	२५३
अग्निमभिमुखो-	२२४
अग्निमाज्य-	४६७
अग्निमुपसमाधाय कुशैः ...	२३४
अग्निमुपसमाधाय परिसमूह्य	७६
अग्निमुपसमाधाय प्रायश्चित्ता-	३४०
अग्निं यजेत	५४४
अग्निः प्राश्नातु	५७३
अग्ने व्रतपतइति	४१७
अग्नौ कपाल-	५५०
अग्नौ करिष्यामी-	६३३
अग्रेण नाभिं	६०२
अङ्गुष्ठाभ्याञ्चोप-	२४२
अजः केश-	४४१
अजेन वा	७१६
अतऊर्द्ध्वं पतित-	४४१
अतऊर्द्ध्वं प्राचीनावीतिना ...	६४१
अतऊर्द्ध्वं वृद्धशीली	५२३
अतऊर्द्ध्वमसमालम्भन- ...	३७८
अत्रार्घ्यमित्याहुः	३२७
अत्रैनमाचार्य्यो-	५२१
अथ जन्यानामेको-	२९१
अथ जपति यत्ते	३८०
अथ जपत्यायमगात् ...	३९९
अथ जुहोति	३८४
अथ दर्शपूर्णमासयोः ...	१८३
अथ निह्नुते	६४८
अथ पश्चात्	२३१
अथ पितृदैवत्येषु	६७३
अथ पितृनावाहयत्येत ...	६४२
अथ पूर्णं चान्नेन	३६८
अथ पूर्व्वाह्णएव प्रातराहुतिं हुत्वाग्रेणाग्निं	२२०
अथ पूर्व्वाह्णएव प्रातराहुतिं हुत्वा दर्भान्	५७५
अथ प्रत्युपस्पर्शनानि ...	७४
अथ प्रातः सूर्य्याय स्वाहेति	८७
अथ ब्राह्मणान्	२६६
अथ भैक्षं	४२९

1

For Private and Personal Use Only

सूत्रं।	पृष्ठे।	सूत्रं।	पृष्ठे।
अथ माता शुचिना वसनेन कुमारमाच्छाद्य दक्षिणत उदञ्चं कर्त्रे	३८४	अथ सीमन्तमूर्द्ध-	३६६
		अथ सोष्यन्तीहोमः ...	३७१
		अथ संस्तूपं	१४०
अथ माता शुचिना वसनेन कुमारमाच्छाद्य दक्षिणत उदञ्चं पित्रे	३८०	अथ स्विष्टकृत-	२५२
		अथ हविर्निर्व्वपति ...	२३०
		अथ हविषउप-	२५०
अथ माता शुचिना वसनेन कुमारमाच्छाद्य पश्चादग्ने-	३९८	अथ हविष्यस्यान्नस्याग्नौ ...	८०
		अथ हविष्यस्यान्नस्योद्धृत्य ...	११६
अथ यथार्थं	३५३।३५७	अथाञ्जलिकृतो-	६५०
अथ यदस्यान्यदन्न-	२६५	अथातश्चतुर्थीकर्म्म	३३९
अथ यदहः पूर्णो भवति ...	२०३	अथातस्तृतीये	३९५
अथ यदहरुपवसथो- ...	२०४	अथातोगृह्या-	३
अथ यदहश्चन्द्रमा	१८५	अथातोहलाभियोगः ...	६७६
अथ यदाधिगच्छेत्... ...	२७८	अथातः श्रवणाकर्म्म ...	५४८
अथ यदि गृह्योग्नौ	२७२	अथातः षोड़शे	४३६
अथ यदि दधिपयो- ...	८३	अथापरं ...	३५३।५०६।६९३।७३३।
अथ यत्तत् करिष्यन् भवति पश्चात्	३९८	अथापरं बलिं	१३९
		अथापरान्	१३८
अथ यत्तत् करिष्यन् भवति पश्चादग्ने-	३८३	अथापराह्णरवा-	२१२
		अथापि रौरुकि ब्राह्मणं ...	४५६
अथ यस्याः पाणिं	२९३	अथाप्युदाहरन्ति	९०।१७८,२७७
अथ येऽस्तऊर्द्ध्वं	३८१	अथाप्लवनं	५१४
अथ बलीन् हरेत्	१३१	अथामुष्माच	६२२
अथ वाग्यतोबलीन् ...	११५	अथायसेन	४०१
अथ वीरतरेण	३६७	अथेध्मानुपकल्पयते	२०५
अथ सीमन्तकरणं	३५८	अथैतदाज्य-	२४३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं।	पृष्ठे।
अथैतद्दलिङ्गेष-	१४१
अथैतद्धविरुच्छिष्ट-	२६४
अथैनमद्भि-	२६१
अथैनामनु	३२०
अथैनामुद-	६००
अथैने अद्भिरनु	२४१
अथैने अद्भिरभ्युच्य	२४३
अथैनं त्रिः प्रदक्षिण- ...	४२६
अथैनं प्रदक्षिण	४२२
अथैनं संप्रेष्यति	४२४
अथोदपात्रान्	६४३
अथोपसीदत्यधीहि	४२७
अथोलूखलमुषले	२३०
अद्भुते कुलपत्योः	५०५
अधरएवैतां	२१७
अध्वनि चतुष्पथा-	३३२
अनड्वान् कंसो-	४६९
अनन्तराश्चवरे	५८२
अनन्तरास्व भार्य्याः	५८२
अनवेक्षमाणः	७२८
अनाज्ञातेषु यथादिष्टं ...	६७५
अनियमोवा	४६३
अनीस्वरोह	२१६
अनुगुप्ताश्चप	३३
अनुज्ञातोदारान्	५१०
अनुदारश्च	७१२
अनुप्रवचनीयेष्वेवं	४७०
अनुप्रहरति	६०५
अनुपृष्ठं पतिः	३००
अनुपृष्ठं परिक्रम्योत्तरतउप-	३८४
अनुपृष्ठं परिक्रम्योत्तरतोऽव-	३८०
अनुमतेऽनु	७८
अनुमन्त्रिता	३२०
अन्ततः प्रत्युपस्पृश्य	७४
अन्तर्ग्राम-	४४६
अन्तरेणाग्नग्राचार्य्यौ	४१८
अन्नस्य घृतमेवेति	७४३
अन्नस्य राष्ट्रिरसी-	७६२
अन्यतस्तु धनं	२१२
अन्यत्र यज्ञात्	७६८
अन्यत्र वामाच्च	६०६
अन्यत्र प्राक-	५२६
अन्यां हिरण्मस्रजः ...	५२८
अन्वष्टक्यस्थालीपाकेन ...	६६५
अपउपस्पृश्य यथार्थं ...	५८४
अपउपस्पृश्याथ	२२४
अपउपस्पृश्यैवमेवेतरयोः ... ... ६३२।६४३।६४४।६४८।६५१।	
अपत्यदायी	४५८
अपपर्य्यावृत्त्या-	६४७
अपवर्गेऽभिरूप-	३०
अपवृत्ते कर्म्मणि	२८२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं ।	पृष्ठे ।	सूत्रं ।	पृष्ठे ।
अपरस्त्रोवा	६१९	अवान्तरदेशेषु	७२१
अपरिमितं	२७१	अभिघारयत्यवदानानि ...	२५१
अपरेण कशूः	६२५	अभितस्खलार्थ्युपलिम्पन्ति	५४९
अपरेणाग्निमानडुहं ...	३१७	अभिवादनीयं	४२०
अपरेणाग्निमौदको- ...	३११	अभून्नोदूतो-...	६५५
अपाचैवोपरिष्टात्... ...	१६९	अमन्त्राणित्यौद्वाहमानिः ...	५६५
अपि वा कुम्भादा	५७	अमावस्यायां	६६६
अपि वा गोग्रास-	६१३	अमुष्मै त्वा	२३१
अपि वा नमोविष्णवइति	२२६	अमोघं	७३५
अपिवान्योब्राह्मणः ...	१५४	अयुदान्तं	३९१
अपिवान्यं मथित्वा	५२	अरण्ये प्रपदं	६८८
अपि वा वज्रयाजिन- ...	५१	अरिष्टं साम-	५८४
अपि वा यच्चियाना- ...	२७५	अरुन्धतीञ्च	३१९
अपि वाऽरण्ये कच्च- ...	६१३	अर्द्धमासमभुक्त्वा	६९१
अपि वाऽरण्ये तिष्ठे- ...	४६६	अर्य्यमणं	३०६
अपि वा सायं	५७	अलक्ष्मीनिर्णोदः	६९६
अपि वा स्थालीपाकं ...	६१२	अलाभे वा	४१७
अपि वाऽऽहिताग्ने- ...	२६०	अविमिथुनं	४४०
अपिह्न सुराः...	२७२	अविमिथुनयोः	७५०
अपः पानाय	६००	अशक्तौ वा	६९१
अप्यपरवान्ततो-	२७६	अश्वत्थादग्निभयं	७१३
अप्सु पिण्डान्	६५५	अश्वमिथुनं	४४०
अवद्यन्त्यवदानानि	६०६	अष्टकामावस्यासु	४६९
अवलेखन-	४४४	अष्टकायै स्वाहेति	६७२
अवसिक्तायाः	३१३	अष्टका रात्रिदेवता ...	५८६
अवक्रवादी	२१२	अष्टगृहीतं	७१८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं।	पृष्ठे।
अशौचापूपान्	५९४
असगोत्रान्	५११
असंस्कारं	५७०
अस्तमिते चमस-	५५१
अस्तमिते समिध-	४३१
अहरहस्तूष्णीं	५५९
अहुतस्य	२७६
अहोरात्रं	५०३

आ

सूत्रं।	पृष्ठे।
आखुराजश्चोत्करेषु ...	६८०
आगतेष्वित्येके	३२८
आग्नेयएवानाहिताग्ने- ...	२५९
आग्नेयी पित्र्या वा	५८८
आग्नेयेऽज-	४७२
आग्नेयोवाग्नीषोमीयोवा	२५९
आग्रहायण्यां	५७४
आचान्तोदकाय	७६५
आचान्तोदकाः खाण्डिकेभ्यो-	४८६
आचान्तोदकाः प्रत्यभिमृशेरन्	५७१
आचार्य्यमृत्विक्	७६८
आचार्य्यागाञ्चोदकोत्सेचन-	४८८
आचार्य्याधीनोभवान्यत्रा- ...	४४३
आचार्य्याधीनः	४५८
आचार्य्याय भैक्षं	४३१
आचार्य्यं सपरिषत्क- ...	५२०
आचितशतकामो-	७०१
आचितसहस्रकामो- ...	७४७
आच्छादयेद्गुरु-	४६९
आज्यमादित्य-	७४२
आज्यलिप्ते वा	५०८
आज्याहुतिष्वनादेशे ...	२८१
आज्याहुतिष्वाज्यमेव ...	२८०
आज्यं स्थालीपाकीयान् ...	२१०
आदितश्छन्दसोऽधीत्य ...	४८४
आदित्यश्च नान्तर्दधते ...	४५३
आदित्यदेवतो-	७१३
आदित्यव्रतन्तु	४५२
आदेशनात्	४७६
आनडुहे गोमये	४०४
आनडुहोगोमयः	३९७
आनुपूर्व्व्यग्राव्यतिहरन् ...	७२१
आमावास्येन हविषा ...	१८६
आयसान्	७३३
आश्वयुज्यां	५६१
आषोड़शाद्वर्षाद्-	४०७
आसायमाहुतेः	२७३
आसीत नक्तं	४५९
आसीनएवाग्नौ	१५३
आसीनः पितृभ्यो-	१५३
आस्थाता तेजयतु	५२१
आहृत्यार्थं मासं	३८७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं ।	पृष्ठे ।
आहुतेराहुतेस्तु सम्पातमुद- पात्रे	३४४
आहुतेराहुतेस्तु सम्पातं मूर्द्धनि	३१८
इ	
इतरदन्वाहार्य्यं	६६६
इति कौत्सः	५९१
इति गृहमेधिव्रतं	१५५
इति विकल्पः	४५४
इदमहमिमां	७५४
इन्द्राण्याः स्थालीपाकः ...	६८०
इन्द्रामवदादिति च... ...	७४०
इन्द्रायेति पुरस्तात्... ...	७२३
इन्द्रियाण्यद्भिः	६८
इमं स्तोममिति	६८३
ई	
ईहकान्	३११
उ	
उच्छिष्टोहैवातो-	७४
उत्सृजेत् कृतार्थान् ...	५७७
उत्सृज्यापा-...	४२१
उत्सृप्य नाभि-	४२२
उत्सृप्य हृदय-	४२३
उत्तमायां	६४९

सूत्रं ।	पृष्ठे ।
उत्तरतोगां	७५३
उत्तरतोऽग्ने-...	५५८
उत्तरतोऽपां पूर्णः	२३८
उत्तरतः पुरस्ताद्वा	५१४
उत्तरस्यां	६१०
उत्तरामित्येके	१८४
उत्तरार्द्धे परिवृतस्य ...	६१८
उत्थाप्य कुमारं	३३६
उदक्कूलेषु	६८८
उदक्प्रवणं	५८१
उदकपूर्व्वं	६३१
उदकसाधवीहि	४६२
उदग्द्वारं	७११
उदगग्नेरुत्सृप्य कुशली- ...	४०३
उदगग्नेरुत्सृप्य प्रक्षाल्य ...	६७
उदगग्नेरुत्सृप्य प्राङाचार्य्य-	४२५
उदगग्रैस्तृणैः...	५८१
उदगयने च	४८७
उदगयने पूर्व्वपक्षे	१९
उदञ्चं मात्रे..	३८१
उदपात्रान्तः	६७०
उद्धृताभिरद्भि-	४७६
उद्धृत्य स्थालीपाकं	३२९
उन्दनप्रभृति..	४०२
उपनयनेनैवोपनयनं ..	४४१
उपनिनयत्यपां	५५३

सूत्रं।	पृष्ठे।	सूत्रं।	पृष्ठे।
उपन्याहृत्य	५०९	ऋषभपूजा	५[illegible]५
उपमूललूनाः	२०८		
उपयातायार्घ्यं-	५२२	**ए**	
उपरि शय्यां	४४३	एककपालान्	५९४
उपरिष्टाच्चाचार्य्यस्य	४१९	एकधान्य-	४७५
उपरिष्टाद्वृत्तं	६८७	एकविंशति-	२६६
उपसन्ने	५०४	एकभूयांस्यात्म-	६९०
उपेत्यैव सनवतः	७४६	एका कर्षूः	६६९
उपेत्यायादित्य-	५१७	एकात्वर्थ्याया-	७३१
उपोपविश्य	५२०	एकैकं वानुनिधान-	१३४
उपोषिताय	४६४	एतदतद्धितं	३९१
उपोष्य तु	६८७	एतद्व्रतमर्द्धमास-	६९१
उभयतएके	४८८	एतद्यज्ञवास्त्वित्याचक्षते	२६१
उभयेषूभय-	६८८	एतमुत्थं मधुना	५७३
उभाभ्यां पाणिभ्यां	४०२	एतयैवावृता कपुच्छलं	४०१
उल्कापाते	४६६	एतयैवावृताऽपरौ	७०३
उल्मुकेन	५९९	एतयैवावृता श्यामाक	५७२
उष्णेन वाय-	३९९	एतयैवावृता स्त्रियाः	४०२
		एतयोत्तरां	४०२
ऊ		एतस्यैव	१७८
ऊर्द्धं त्रिरात्रात्	३४४	एताएवदेवता	६७८
		एतानि समावृत्तव्रतानि	५३६
ऋ		एतास्वेव देवता-	७१५
		एतेनैवावकाशेन	२७५
ऋणे प्रज्ञायमाने	६७६	एतेनैवेतराणि	४१७
ऋतेऽभगया वाचा	११३	एवमतऊर्द्धं	८९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं। पृष्ठे।

एवमप्यस्य व्रतं २७८
एवमाज्यस्य २४३
एवमितरेभ्यः ७३९
एवमितरे स्तोत्रीये ४६३
एवमेवावरे चतुर्थीपञ्चमीभ्यां ६११
एवमेवावरेषां ४०२
एवमेवाहिताग्ने- २१९
एवं खलु चरतः ४६२
एवं त्रिरभ्यात्म- ५८४
एवं त्रिः .. .. ३०८।५७०
एवं त्रिः सर्व्वाणि ४६७
एषपरिस्तरणान्यायः २३७
एषोऽतऊर्द्ध्वं २७९

ऐ

ऐन्द्रोवैन्द्राग्नोवा २५९
ऐन्द्रः स्थालीपाक- ४७०

ओ

ओषधयः सुमनसो- ३५५
ओषधिमन्तर्धाय २४१
ओषधे त्रायस्वैन- ४००

औ

औदुम्बरान् ७४१

सूत्रं। पृष्ठे।

क

कर्षूश्च ६२५
कंसमपां ४६४
कंसे रसमवासिच्य ६०८
कंसं चमसं वा २६९
कामन्तत्र संखादयेरन् .. ५७१
कामं गृह्योग्नौ ९०
काम्येष्वतऊर्द्ध्वं ६८२
काम्येषु च ६८४
काम्येषु त्रिरात्रा- ६८६
कार्त्तिकः ७३
किं पश्यसीत्युक्ता ३७०
कुमारस्य ३९२
कुमारान् ह स्म ४५६
कुरुतेत्यधियज्ञं ७६८
कुर्व्वित्युक्ते ६३४
कुशलपूतमिव २३३
कृत्वा चानुमन्त्रयेत ५४३
कृन्तत नाभि- ३७८
कृसरेणापिताय ३९७
कृसरः स्थालीपाक- ३६८
कृष्णापांसु ७०८
कृष्णाभद्रः ४५८
कृष्णावस्त्रः ४५७
कोनामासीति ४२०
कौतोमतेन ६८९

For Private and Personal Use Only

सूत्रं ।	पृष्ठे ।
कौलीलव	४४४
क्रोधान्टते	४४३
क्रीतकैर्यवैर्माषैर्वा	२८९
क्षुरकृत्यं	४४५
क्षौमदशाश्व	६२९
क्षौमशाणा	४१५
क्षौमं शाणां वा	४१६

ख

खादिरपालाशालाभे	२०७

ग

गणेष्वेकं	२५७
गन्धर्व्वासीति	५२०
गन्धैरभ्युक्षणां	५४५
गर्भद्वादशेषु	४०६
गर्भाष्टमेषु	४०६
गर्भैकादशेषु	४०६
गले बद्धः	७३
गवे वा	६५६
गाः प्रक्षाल्यमाना-	५३९
गीतवादित-	५०४
गृहद्वारं	७१२
गृहागतां	३३५
गृहानवेक्षेत	६५०
गोत्राश्रय-	४२१
गोदानिक-	४५१
गोनामभिश्च	५६३
गोमिथुनं	४४०
गोयज्ञेनैवाश्वयज्ञो-	५४५
गोयज्ञे पायस-	५४४
गोयुक्तारोहणं	४४५
गोयुक्तं रथ-	५२१
गोर्बालान्	७३९
गोष्ठे पशुकामः	७४३
गौर्दक्षिणा	३३१।३९२।४०५।४३४
गौवव	४४०
गौरपांशु	७०७

च

चतुरसीत्यनु	५१८
चतुर्गृहीतमाज्यं गृहीत्वा पश्चावत्तन्तु	२४८
चतुर्गृहीतमाज्यं गृहीत्वाष्टर्च	६१०
चतुर्थे मासि	३६२
चतुर्थ्यादित्य-	६९५
चतुरवराद्धान्	६१८
चतुरष्टको-	५९०
चरणौ न प्रसार्य्य च	७३
चरुस्थाल्यौ मेक्षणे	६२८
चरोरुद्धृत्य	६०९
चित्ययूपोपस्पर्शन-	५०७
चूड़ाकरणेन	४१८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं ।	पृष्ठे ।
ज	
जननादृशरात्रे	३८३
जननाद्यस्तृतीयो-	३७६
जपेद्वा	५०८
जातरूपेण वादाय... ...	३७६
जातशिलासु	५७८
जायाया वा पाणिं	३२
जुगुप्सेयाता-	२१७
ज्ञातिकर्म्मैतत्	२६०
ज्वलन्त्यां	७३४
ज्येष्ठसाम्नो-	४७४
त	
तत् श्रवणेनैव	५७४
ततएव वर्हिषः कुशमुष्टि-	२६०
ततएव वर्हिषः प्रादेशमात्रे	२४०
ततश्चैवातिप्रणयः	६६८
तत्र प्रागग्रेषु	५१४
तत्राग्निरूपसमाहितो- ...	३१६
तत्रावसानं	७११
तत्रास्मा-	६२७
तत्रैतदाऊः	७०
तत्रैतानि	४७४
तत्रैतान्यहरहः	५४४
तत्रैतान्याचार्य्याः	५२४
तत्रैतान्युप-	३६६

सूत्रं ।	पृष्ठे ।
तत्रैते त्रयः	५३०
तथा गन्धान्...	६३३
तथा गौतम-	५६१
तथा तिथिनक्षत्र-	४६
तथा तैलं	६४८
तथा प्रत्यवरूढ़	४६२
तथामुखैः	६१७
तथाऽऽयतं	६१७
तथा सुरभि	६४८
तथैव मेधाजननं	३७६
तदलाभे	२८६
तन्त्रीं प्रसार्य्यमाणां	५४४
तपश्च तेजश्चेति	६८५
तपस्वी	४५६
तस्मादन्वाह	४२७
तस्मादृयत्	२१७
तस्मिन् प्रत्युपाकरणे ...	४६३
तस्मिन् प्रथमं	६६१
तस्मिन्नहूता	५८२
तस्मिन्नेनां	३१७
तस्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च मांसचरुञ्च पृथङ्मेक्षणाभ्यां प्रदक्षिण-...	६०७
तस्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च मांसचरुञ्च पृथङ्मेक्षणाभ्यां प्रसव्य-	६२३

For Private and Personal Use Only

सूत्रं।	पृष्ठे।	सूत्रं।	पृष्ठे।
तस्मै प्रकलोटानञ्जला ...	३३५	तिष्ठन्नहःशेषं	४३१
तस्य कणानपरासु	७०३	तिष्ठेद्दिवा	४५९
तस्य जुहुयात्	६७२	तुरगोपायेति	७५०
तस्य जुहुयात् प्रथमा ...	५८०	तूष्णीं	४०३
तस्य जुहुयात् श्रवणाय ...	५५७	तूष्णीं चतुर्थं ...	५१७।५७०।७६४
तस्य जुहुयादानोमित्रा ...	५६१	तृतीयया चन्द्रमसि	६९४
तस्य जुहुयादेकाष्टका ...	६८०	तृतीयस्य गर्भमासस्यादि ...	३५१
तस्य दक्षिणतो-	४१९	तृतीये चरिते	४६३
तस्य देवताग्निः	३२९	तेनचैवास्य	५५
तस्य पूर्वाह्णे	७५२	तेनैनां सकेशनखा-	३४४
तस्य मुख्यान् प्राणा- ...	३८६	तेषामलाभे	२०१
तस्य मुख्यां हवि-	५६७	तेषामुत्तमः	५३१
तस्याश्चैवाञ्जनं	६२८	तेषु सायं प्रात-	४५२
तस्यादक्षिणतो-	६६९	तेषां पुरस्तात्	२२१
तस्यान्ते	४३३	तैलक्षोप-	६२९
तस्याः कुमार-	३३५	तैलपात्र-	५३४
तानखस्थानस्थान	७१४	तैषीमुत्सृजन्ति	४९०
तामिश्रान्तरेषु	७०४	तैष्याऊर्द्ध्व-	५९७
तावामेन पाणिना	४००	तौ खलु	२१७
तावुभौ तत्प्रभृति	३२६	तं तितर्पयिषेत्	२६४
तास्वनुसवन-	४५७	तं सा स्वयं	३७०
तां शाखाविशाखयोः ...	६०२	तं सोपस्तीर्णाभिधारित- ..	३०३
तां सन्धिवेला-	५९७	त्रयः पौर्णमासी-	२०१
ताः सर्वाः	५९१	त्रिर्भ्रमणां	५६९
तिर्य्यङ्ङितरजनेभ्यो- ...	७२८	त्रिरात्रमक्षार-	४३३
तिसृषु कार्त्तिक्यां	५०२	त्रिरात्रमाचार्ये	५०३

सूत्रं ।	पृष्ठे ।
त्रिरात्रोपोषितः	७३८
त्रिः फलीकृतां-	२३२
त्रीणि वा भक्तानि	६८६
त्रैयम्बक-	५९१
त्र्यम्बकइत्योद्गाह्य- ...	५९१

द

सूत्रं ।	पृष्ठे ।
दक्षिणपश्चिमे	५५१
दक्षिणपूर्व्वे	६१७
दक्षिणस्य पार्श्व-	३७४
दक्षिणाग्नौ	६६८
दक्षिणाग्नेः	६२६
दक्षिणाद्वारं...	७११
दक्षिणाप्रवणं	६२६
दक्षिणार्द्धे	६२३
दक्षिणाशिरसं	६०१
दक्षिणेन पाणिना दक्षिणमंस-मन्ववमृश्यानन्तर्हितं ...	४२२
दक्षिणेन पाणिना दक्षिणमंस-मन्वारब्धायाः	२९८
दक्षिणेन पाणिना दक्षिणमंस-मन्वालभ्य...	४२३
दक्षिणेन पाणिनापश्चादाय	३९९
दक्षिणेन पाणिनोपस्थ- ...	३४६
दक्षिणेन प्रक्रम्य	३१०
दक्षिणोत्तराण्यग्राणि ...	२७३

सूत्रं ।	पृष्ठे ।
दक्षिणं बाहुमुद्धृत्य... ..	६४
दध्नः प्राश्नन्ति	४८५
दम्पती एव	१५५
दर्भसम्मितं	७०८
दर्भान् प्रदाय	६३०
दर्शे वा पौर्णमासे वा ...	४८
दीर्घायुर्हैव	१८५
दुःस्वप्नेष्वस्य	५०६
दूरादपि	२११
दृषत्पुत्रश्च	२९३
दृषदं प्रक्षाल्य	३५५
दृश्यमानेष्वेकदा	२०१
देवताश्रयं	४२०
देवदैवत्येषु	६७४
देवसवितः	७८
दैवतमिश्रा	३९२
द्वन्द्वं पात्राणि	६५५
द्वादश महानाम्निकाः ...	४५४
द्वावुदकुम्भौ	५७८
द्वितीययादित्ये	६९४
द्वौ चेत्	७९०

ध

सूत्रं ।	पृष्ठे ।
धूमे त्र्यवरार्द्ध्याः	७३४
ध्रुवमसि	३१९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं।	पृष्ठे।
न	
न कास्तया	५३५
नमिका तु	५११
न च सोपानत्कः	७२
न चाननुचर-	५३५
न तदहः	२११
न तिष्ठन्	७०
न त्रिहाहृतं	४४१
न त्वेव न कुर्व्वीत	६१४
न द्विःपक्वं	५२५
न नावमारोहेत्	४६१
न निह्नवनं	६७०
न पक्षिमांसं	४७५
न पर्य्युषितं	५२५
न पापरोगाद्भयं	६९६
न पिबेत्	४७६
न प्रतिसायं	५३४
न प्रत्यग्द्वारं	७१२
न प्रत्यनक्त्यवदान-	२५३
न प्रवसन्नुपवसेदित्याङ्गः	२१९
न फलानि	५२७
नव षट् त्रयः	४५४
न वृक्षमारोहेत्	५३४
न मनुष्यस्य	५३३
न मालोक्तां	५२८
नमः पृथिव्या-	५७५
न रजस्वलय	५२५
नवयज्ञे	५६७
न वर्षति	५२७
न वाह्यांसः	७२
न विलोकयय्	७०
न वृषलैः	५३५
न शूद्रामुपेयात्	४७४
न सफेनाभिः	७२
न समानर्ष्यां	५२५
न सशब्दं	७१
न सुरभि	६७०
न स्रवन्ती-	४६१
न स्रुवमनु	२५९
न स्वस्तरः	६६९
न हसन्	७०
नागन्धां	५२८
नाङ्गुलीभिः	७१
नाचरिष्यन्तं	४४२
नाजातलोमग्ना	५२४
नाञ्जनाभ्यञ्जने	६६९
नातीर्थेन	७१
नात्रोल्मुक-	६६९
नादृष्टं	५३३
नानवेक्षितं	७१
नानुपस्पृश्य	४५७
नान्तरीयैकदेशस्य	७२

For Private and Personal Use Only

सूत्रं ।	पृष्ठे ।
नापरया द्वारा	५२५
नापोभ्यवयन्त्यूर्द्धं	४५३
नाप्रयतः	७१
नायज्ञीयां	२२६
नायुग्वा	५२४
नार्द्रं परिदधीत	५३२
नालङ्कारः	४४१
नाव्रतोब्राह्मणः	२७७
नाश्रुतं	५३३
नित्यप्रयुक्तानान्तु	६८७
नित्यप्रयोगः	७३१
निधाय जपत्यत्र	६४६
निर्घाते च	४९९
निष्कालनप्रवेशने	५४४
निष्ठिते सायमाश-	११२
नेत्रैरास्यो-	५२०
नैकं परिदधीत	५३२
नैकः	५३५
नैनानुपनयेयु-	४१२
नोदपान-	५२७
नोपस्पृशेद्	७०
नोपानहौ	५२७
नोष्णाभिः	७२

प

सूत्रं ।	पृष्ठे ।
पक्षान्ताउपवस्तव्याः	१८६
पञ्चम्यादित्यमुपस्थाय	६९५
पत्नी चोदकमादाय	६०१
पत्नी बर्हिषि	६२८
पत्नग्राव्रतं	२१९
परिणद्धो-	४६५
परिणहनान्ते	४६५
परिणीता	३०८
परिधीनप्येके	२३८
परिसंवत्सरानर्हि	७६९
पर्य्युक्ष्य स्थालीपाकं	२४५
पवित्रान्तर्हितां-	२३३
पशुकामोवत्समिथुनयोः	७४९
पशुस्वस्त्ययन-	६८९
पशूनाश्चेच्चिकीर्षे-	७५२
पशूनां त्वा	३९३
पश्चात्कर्षूणां	६२६
पश्चात्पतिरवस्थाय दक्षिणस्य	३५६
पश्चात्पतिरवस्थाय दक्षिणेन	३५२
पश्चात्पतिरवस्थाय युग्मन्त-	३६५
पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्य	५५६
पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदं	६८२
पश्चादग्नेरुलूखलं दृंहयित्वाव- हन्त्युदेचं	५५०
पश्चादग्नेरुलूखलं दृंहयित्वा- सकृत्	६१९

सूत्रं।	पृष्ठे।	सूत्रं।	पृष्ठं।
पश्चादग्नेर्वर्हिषि	५८०	पुरुषाधिपत्यकामो-	७४१
पश्चादग्नेः संवेष्टितं	२९६	पुरोदयात् प्रातः	५८
पश्चादग्नेः स्वस्तर-	५८०	पुष्टिकर्म्म	५८६
पश्चादुपसञ्चरः	६१८	पुष्टिकामएव संप्रजातासु	५४०
पश्चाद्दास्तीर्य्य	२३७	पुष्टिकामएव संप्रजातास्वौदु-	
पाकयज्ञेषु	२७०	म्बरेणासिना	५४१
पाणावाधाय	२८७	पुष्टिकामः प्रथमजातस्य ...	५३९
पाणिग्रहणे	२९१	पूर्णपात्रोदक्षिणा	२९६
पाणिग्राहो-	३०२	पूर्णपात्रोवमः	२७१
पादयोरन्त्यं	७६०	पूर्णहोमो-	७३९
पादावभ्युच्य	६८	पूर्व्वमन्यमपर-	७६१
पायसेन वा	७१७	पूर्व्वमाज्यमपरः	२४५
पार्णवैमास्वत्था-	४१६	पूर्व्वस्यां कर्ष्वां	६४९
पिण्डानवेक्षते	६५०	पूर्व्वस्याः कर्ष्वाः	६२४
पितृयज्ञे त्वेव	६६	पूर्व्वा माता	३०१
पीतप्रोषमधस्तात्	६००	पूर्व्वे कटान्ते	२९८
पुण्यस्त्वेवानर्द्धुको-	५२	पूर्व्वेषां चतूर्णां	२८७
पुण्ये नक्षत्रे दारान्	२८४	पूर्व्वेषु चैके	६८२
पुण्ये नक्षत्रे स्थालीपाकं ...	६७७	पूर्व्वैश्चेत् श्रुता-	४५६
पुनर्यज्ञविवाहयोश्च ...	७६९	पूर्व्वोपक्रमाः	६२५
पुमानयं	३७२	पृथगेवैतस्य	२०३
पुरस्ताच्छालायाउपलिप्तेऽग्नि-		पृषातकं	५६३
रुपसमाहितोभवति	३९६।४१७	पौर्णमासीषु च	५०१
पुरस्ताच्छालायाउपलिप्य ...	५४९	पौर्णमास्यां कृत्यं	५४८
पुरा प्रादुष्करणवेलायाः ...	५७	पौर्णमास्यां रात्रावविदासिनि	६९२
परास्तमयादग्निं	५८	पौर्णमास्यां रात्रौ	७३२

सूत्रं ।	पृष्ठे ।
प्रक्षाल्य वैनेनोद्धृत्य	२५८
प्रजापतइत्युत्तमा	६९९
प्रणीते वाग्नौ..	६५५
प्रतिजपत्योमित्युच्चै-.. ..	११४
प्रतिदिशं	५४९
प्रतितये	७४६
प्रतिष्ठिते	३७१
प्रत्यङ्माणवको-	४२६
प्रत्यनक्त्यवदान-	२५१
प्रत्यागताइमा-	५३९
प्रत्येत्याचार्य्यं	४७३
प्रथमयादित्य-	६९३
प्रथमे विकल्पः	४६९
प्रदक्षिणमग्निं	८८
प्रदक्षिणमुपचारः	६५७
प्रदक्षिणं प्रतिदिशं.. ..	७२१
प्रदोषे पायसश्चरुः ..	५५६।५७९
प्रलुश्चितायां	६०३
प्राक्कूलेषु	६८८
प्राक्शिरस-..	६००
प्राक् स्विष्टकृत-	२५४
प्रागग्रैरग्रै-	२३६
प्रागुदीच्यां दिशि न्यग्रोधशुङ्गा-	३५३
प्रागुदीच्यां दिशि यद्ब्राह्मणकुलं	३१६
प्राग्ब्रह्मचार्य्युदगग्रेषु ..	५१५
प्राङ्वोदङ्वा प्रमोन्निष्क्रम्य च-	
तुष्पथेऽग्निमुपसमाधाय..	७४१
प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य	
चतुष्पथेऽग्निमुपसमाधाय ह्वये	
राक-	७२६
प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य	
चतुष्पथे पर्व्वते वा ..	७३३
प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य-	
याप्यापो-..	४९२
प्राङ्वोदङ्वाभिप्रयाय ..	५२१
प्राङुत्क्रम्य	७२७
प्राचीमेकस्थूलां	६०६
प्राच्यउदीच्योंवा	७०७
प्राच्यूर्द्ध्वावाचीभ्यो-	७२४
प्राजनेनान्यः..	२९२
प्राजापत्या	११७
प्राणसंश्रये	४६१
प्रातरह्नस्येति	७००
प्रातः सशिरस्काप्लुतोदगग्रेषु	
दर्भेषु पश्चादग्नेरुदगग्रेषु दर्भेषु	
प्राक्शिराः	३५६
प्रातः सशिरस्काप्लुतोदगग्रेषु	
दर्भेषु पश्चादग्नेरुदगग्रेषु दर्भेषु	
प्राच्युपविशति ..	३५२।३६५
प्रादेशायामा-	६२४
प्रान्तेषु वामदेव्यं	३३४
प्रावृतां यज्ञोपवीतिनी- ..	२९५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं।	पृष्ठे।
प्रेक्षमाणो-	४१६
प्रेते वा गृहपतौ	४५
प्रोक्ते नक्षत्रे	३१८
प्रौष्ठपदीं	४७८
प्लक्षशाखावति	६०८

फ

फलानि वा	३३५

ब

बसामाज्यं	७१७
बसन्तं रात्रौ	६८३
बकुलमयुग्म-	२३५
बिष्णोर्दंष्ट्रोसी-	४००
बीरसूर्जीवसू-	३७०
बृहत्तृणी-	७०६
ब्रतन्तु भूयः	४५५
ब्रह्मचर्य्यमागा-	४२०
ब्रह्मचारी केशान्तान्	४३६
ब्रह्मचारी वेदमधीत्य	५०६
ब्रह्मचारी वेदमधीत्यान्त्यां	३१
ब्रह्मैवैकऋत्विक्	२७०
ब्राह्मणस्य तृप्तिमनु	२६५
ब्राह्मणं वा	६५६
ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा केशश्मश्रु-	५१८

सूत्रं।	पृष्ठे।
ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा जातुषान्	५६४

भ

भद्रमिति ब्रूयात्	५२६
भद्रमित्येतां ..	५२८
भावे नवा-	२३८
भावेत यज्ञसंसिद्धि-	२२५
भावेतान्नसंसिद्धि-	११६
भुक्तोच्छिष्टं	३३०
भूर्भुवःस्वरित्यभिमुखमग्निं	४४
भूयएवावदाय	५७०
भूयएवाभिपाय	७६५
भूरित्यनकाममारं	६६६

म

मण्डलद्वीप-	७१०
मधुमांसे-	४४५
मध्यमायां सव्योत्तानौ	६४६
मध्यमं पिण्डं	६५१
मध्यात् पूर्व्वार्द्धवा-	२५०
मध्येग्निमुपसमाधाय	७१६
मन्त्रवर्णोभवति	५१५
मन्त्रान्ते	२७६
मन्त्रेण तु	४०३
महाव्याहृतयः	७१६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं ।	पृष्ठे ।
महाव्याहृतयश्च	६९९
महाव्याहृतिभिराज्ये- ...	२५४
महाव्याहृतिभिश्च	२९८
महाव्याहृतीश्च	४२८
माध्याऊर्द्ध-	६७२
मातरमेवाग्रे...	४३०
माता रुद्राणां...	७६७
मातुरसपिण्डान्	५११
मात्रे चैव	३९२
मानतन्तव्यो-...	२१५
माभैर्षीर्न	७५०
मा सव्येन	३११
मासीनं	६६७
मुञ्च गां	७६६
मुञ्जकाश-	४१५
मूर्द्धाधिम-	६९७
मृदुलगैः	७०९
मेखलाधारण-	४४६
मेखलामेव	५१८
मैथुनं...	४४२

य

सूत्रं ।	पृष्ठे ।
यज्ञोपवसथिकं	२१६
यज्ञाम्नायोविदध्यात् ...	२२०
यजनीयप्रयोगः	६९७
यज्ञादेव निवर्त्तते	१७४
यज्ञोपवीतिना	८
यज्ञोपवीतं कुरुते	६२
यतोदेवीरित्यपः	७६०
यत्तद्गुह्यमेव भवति ...	३७२
यत्र वा श्वभ्राः	७१०
यत्रात्मानं	६९१
यत्रैनमर्हयिष्यन्तः स्युः ..	७५४
यथा कामयेत तथा कुर्य्यात्	५४।२१९
यथाज्येष्ठं	३९४
यथादेशश्च	२१
यथा न प्रागग्नेर्भूमिं ..	६०३
यथा न संलोकी स्यात् ..	७१२
यथा पाणिग्रहणे	२८२
यथा मांसाभिघाराः ..	६२२
यथार्थं	४०५।४३४
यथालिङ्गं वा	५१८
यदश्चन्द्रमसीति	३८२
यदपां घोरं	[illegible]६
यदर्त्तुमती	३४६
यदहरुपैष्यन्	४१३
यदहस्त्वेव चन्द्रमा-	१८७
यदा वार्हयेयुः	७५४
यदा वितुषाः स्युः	६२१
यदास्मै कुमारं	३७२
यदि नामानि	६४४
यद्यन्मीमांस्यं	६९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं	पृष्ठे।
यद्ययज्ञीयं	२२६
यद्यसि सोमी	३५४
यद्यु पश्चावत्ती	२५२
यद्यु वा उपस्तीर्णाभिघारितं	२४७
यद्यु वाउभयं	२२७
यद्यु वाल्पतरसम्भारः ...	६११
यद्येकस्मिन् काले पुनः पुनरन्नं	१७६
यद्येकस्मिन् काले ब्रीहियवौ	१७५
यद्येकस्मिन् कुले	१७६
यवमतीभिरद्भिः	५९९
यवैस्तिलार्थः	६५७
यमवरुणौ	५४५
यशसे तेजसे	५१७
यशोभक्षोसि	७६३
यशोयशोसीति	७६२
यशस्कामः पूर्व्वां	७४०
यशोसीत्याचमनीय- ...	७६२
यशोहं भवामीति	७००
यस्य त्वेषामग्रतः	१७७
यस्यात्मनि प्रसादमिच्छे-	
त्तस्मै	६९०।७३०
यस्योजघन्यं	१७७
याश्चोषधीरित्युदञ्चं	७५९
या तिरश्चीति	६९८
यानमारोहन्त्यां	३३२
यानि च शिष्टाविदध्युः ...	५३८

सूत्रं।	पृष्ठे।
यानि चानुकल्पमुदाहरिष्यामः	२११
यावन्न ह्वयेताभोजनेनैव ...	२७७
ये अप्स्वन्तरग्नयः	५१६
ये चरन्त्येकवाससोभवन्ति	४५२
येन पूषाबृहस्पते-	४०१
येन स्त्रिय-	५१७
योरोचन-	५१६
योऽर्द्धवमाग्रहायण्यास्तामि-	
श्राष्टमी	५९३
योवा तेषां	६५२
यः परमोविप्रकर्षः	१८७
र	
रुद्राहमस्मीत्येवमेव	३२०
ल	
लक्षणप्रशस्तान्	२८४
लक्षणाद्देषा	३८
लोहितपांसु	७०७
व	
वर्ज्जयेत् पूर्व्वतोश्वत्थं ...	७१३
वर्षति च	४५९
वर्षन्तं ब्रूयात	४६०
वर्हिषि स्थालीपाके	२३९
वर्हिषोन्तं	२९७
वशङ्गमौ प्रङ्क्ष्वेति	७२९

For Private and Personal Use Only

सूत्रं ।	पृष्ठे ।
वामदेव्यर्चः	६९८।७१८
वामदेव्यं गीत्वा	३३४
वामं सक्थ्यन्वष्टक्याय ...	६०७
वार्त्तश्वास्मै दण्डं प्रयच्छन् वाचयति	४२८
वार्त्तश्वास्मै दण्डं प्रयच्छन्नादिशति	४४२
वाससन्तून्	७३९
वासस्तु निदध्यात्	६७०
वास्तोष्पतइति	७१८
विदूयमाने	७४४
विद्यास्नातको-	५३०
विद्युत्स्तनयित्नु-	४९४
विद्योतमानं	४६०
विप्रोष्य ज्येष्ठस्य	३९३
विशाखानि	२०८
विश्राणिते	१८१
विष्टरपाद्यार्घ्याचमनीय- ..	७५५
व्रीहियवौ पेषये-	३७३
व्रीहियवैस्तिलमाषै- ..	३९७
वृत्तइवेति पञ्चर्चः	६९०
वृत्यविच्छित्तिकामोहरितगोमयान्	७३५
वृत्यविच्छित्तिकामः कम्बूकान्	७५०
वृद्धिपूर्त्तेषु	६५७
वृषीश्चोपदध्यात्	६२७

सूत्रं ।	पृष्ठे ।
वेद्याः सीतायाः	२८६
वैरूपान्तः	६८३
वैश्यकुलाद्वा-	५१
वंशमध्यमयोर्मणिके वा ..	५०६
व्याहृतिभिर्हुत्वा	४८०

श

सूत्रं ।	पृष्ठे ।
शर्क्करीणां	६५६
शमीपलाशमिश्रांश्च ..	२९२
शाकं व्यञ्जनमन्वाहार्य्ये ..	६७२
शादासम्मितं	७०९
शान्तिं कृत्वा	४६८
शालाग्नावनाहिताग्नेः ..	६६८
शिष्टाचारोऽतोऽन्यच्च ..	५०४
शुचौ देशे	६२९
शृतमभिघार्य्यो-	२३४
शृतानभिघार्य्योद-	५९६
शृतामभिघार्य्यो-	६०३
शृतावभिघार्य्य-	६२३
शृतावभिघार्य्यो-	६०७
शेषमवदाय	६११
श्वस्तोऽक्षतसक्तून्	५५९
श्वस्तोऽन्वष्टक्यं	६१६
श्वोभूतेऽरण्ये	४६६
श्वोभूते वा	३२९
श्रवणाग्रहायणी-	७२६

सूत्रं ।	पृष्ठे ।
श्रवणादित्येके	४७७
श्रवणामेकउपाकृत्यैन- ..	४८९
ष	
षडर्घ्यार्हाभवन्ति	७६८
स	
सएवास्य	५४
सकृत्संगृहीतान्	५५२
सकृत्संगृहीतं	३०२
सकृदयामुप-	५६९
सकृदपोनिनीय	१३३
सकृदाच्छिन्नं	६२५
सकृदेव सुफली-	६२२
सकृदा त्रिर्व्वैतेन	२५२
सत्यं विवदिषेत्	२१२
सन्धिवेलयोरुपस्थानं ...	७००
सन्ध्यां पौर्णमासी-	१८३
सन्नीतात् तृतीय-	६१०
सपायसाभ्यां	७१६
सब्रह्मचारिणा-	४७३
सब्रह्मचारिणि-	५०३
समस्ताभिश्चतुर्थीं	२९९
समस्य पञ्चमीं	३४१
समान् कृतलक्षणान् ...	२८६
समाप्तायां	५८३
समाप्तासु समिधमाधाय ...	३३७
समाप्तासूद्वहन्ति	३१५
समाप्यर्चौ सम्भवतः ...	३४७
समिधमाधायानुपर्य्युक्ष्य तथै-वोदकाञ्जलीन्	८७
समिधमाधायानुपर्य्युक्ष्य यज्ञ-वास्तु करोति	२६०
समिधमाधेह्यपोषान ...	४२४
समुपविष्टेषु	५८३
समं लोमप्र-	७०६
सम्पूयोतत्पुनात्व-	२४१
सम्भार्य्यमपि त्वेके	२८८
सम्वत्सरमप्येके	४५५
स यत्प्रथमं	१३४
स यदेवान्त्यां...	५४
सरस्वत्यनुमन्य-	७८
सर्पिस्तैलं	२३९
सर्व्वतस्त्रिवृतं	२३४
सर्व्वत्राचार्यं	४७१
सर्व्वस्य त्वेवान्नस्यैतान् ...	१६६
सर्व्वाण्यङ्गलोमानि	४४०
सर्व्वाण्येवान्वाहार्य्यवन्ति ...	२२
सर्व्वावान्ते	४६३
सर्व्वेभ्यः समवदाय	२५८
सर्व्वेभ्यः सम्भार्य्ये	२८६
सर्व्वौषधि-	५१५
सव्येन पाणिना	६४१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं ।	पृष्ठे ।
सव्येन सव्यं	४२४
सव्येनैव पाणिना दर्व्वीं	६४३
सव्येनैव पाणिना दर्भपिञ्जूलीं	६४८
सव्येनैव पाणिना सूत्रतन्तुं	६५०
सव्येनैव पाणिनोदपात्रं गृहीत्वा वसन्नपि पिण्डान्	६५१
सव्येनैव पाणिनोदपात्रं गृहीत्वा वसन्नपि पूर्व्वस्यां	६४३
सव्येनैव पाणिनोल्मुकं	६४२
सव्यं पादमवनेनिजे	७६१
सव्यं बाहुमन्वारभ्य	५५३
सव्यं बाहुमुद्धृत्य	६६
सह्यायनाश्च	७४७
साखल्यात्तएवानन्तर-	३१७
साधिके प्रक्रमे	५४९
सामसावित्रीञ्च	४८३
सायमाहुत्युपक्रमएवातऊर्द्ध्वं	५६
सायमुपस्पृश्य	४५७
सायं गाः	५६६
सावित्रमहः	४८७
सीतामाशा-	६७७
सुक्षतान् सक्तून्	५५१
सुप्ता भुक्ता क्षुत्वा	७१
सूर्पेण शेषमग्नावोप्य प्रागुदीची-	३०९
सूर्पेण शेषमग्नावोप्यानति-	५५५

सूत्रं ।	पृष्ठे ।
सूर्पे सक्तूनावपति	५५२
सोमं राजानं	४८४
सोस्य वाग्विसर्गः	४६८
सोस्यावाग्विसर्गः	३२५
संज्ञप्तायां	६०१
संवत्सरे संवत्सरे	७२५
स्तनयन्तं	४६१
स्तम्बे हैके	४०४
स्थालीपाकावृता तण्डुला-	५६३
स्थालीपाकावृतान्यत्	५५८। ५६३।५६८।५८०।५९६।६०४।६७२। ६७६।६८०
स्थालीपाकावृतावदानानां	६०८
स्थालीपाकावृतावदाय	५९६
स्थालीपाकावृता वपा-	६०३
स्थिराघातमेक-	७०८
स्नात्वालङ्कृत्या-	५१९
स्नानं	४४४
स्वगिति वाचयेत्	५२८
स्वयन्त्वेवाप्रस्यं	१७९
स्वयन्त्वेवैतान्	१५४
स्वयमिन्द्रियमोचनं	४४६
स्वयमिव तु	५१५
स्वयं जपेदजपन्त्यां	२९७
स्वरभिन्नस्त्वं	४६७
स्वस्ति ह्यासां-	५६७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं।	पृष्ठे।
स्वस्त्ययनानि	५८४
स्वस्त्ययनार्थं	७५१
स्वस्त्ययनं	७२९
स्वाध्यायविरोधिनो- ...	५३२
स्वाहाकारान्ताभिः	७४७
स्विष्टकृतस्व	६०९
स्वे च भूमिपतौ	५०३
स्त्रियास्तूष्णीं	३९६
स्वोह सायं	१५६

सूत्रं।	पृष्ठे।
ह	
हुतस्ते चाग्निणा	७५१
हविरुच्छिष्ट-	५६८
हविष्यमन्नं	३२८
हुते पतिर्धयेतं	३०६
हुत्वा चानुमन्त्र-	५९९
हुत्वा दध्न	७१९
हुत्वैतन्मेद्वग्गमनु	२५८
हुत्वोपोत्तिष्ठतः	३००
हुत्वोपोत्थायोपनिष्क्रम्य ...	३१९
हृदयस्पृशस्त्वेवापआचामेत्	७४

गृह्यसूत्रसूची समाप्ता।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ श्राद्धसूत्रसूची ।

सूत्रं ।	पृष्ठे ।
अ	
अघोराः पितरः सन्तु ...	९९३
अत्र गन्धपुष्पधूपदीपाच्छादनानां	९९३
अथ काम्यानां तिथयः ...	१०६९
अथ दृप्तीः	१०९०
अथ धर्म्माः...	१०५६
अथ पितॄनावाहयिष्यइति	९३९
अथ श्राद्धं...	८८९
अथ सपिण्डीकरणं ...	१०२३
अथाह्व्यदृप्तीः	१०६४
अथाभ्युदयिके श्राद्धे ...	१०३९
अथैकोद्दिष्टं	१०११
अध्वमैथुनश्रमस्वाध्यायान्	१०५६
अनवद्यान्	९०९
अनिन्द्येनोपामन्त्रितोनापक्रामेत्	९०५
अपउपस्पृश्यैवमेवेतरयोः	९५२
अपहताअसुरारक्षांसि ...	९४१
अपि गायत्रीमात्रसारः ...	१०६६
अपि चात्रोदाहरन्ति ...	१०५७
अभावेपि	९१०
अभिरम्यतामिति विसर्गः	१०२२
अमावस्यायां पितृभ्योदद्यात्	८९१
अमावस्यायां सर्व्वमित्यमावस्यायां...	१०७२
अयुग्मान् यथाशक्ति ...	९१६
अवेदविद्भिराक्रान्तां ...	१०५९
अश्वास्तृतीयायां	१०६९
अष्टम्यां वाणिज्यं... ...	१०७०
अष्टौ वाराहेण	१०६३
अस्तु स्वधेत्युक्ते	९९७
आ	
आचान्तेषूदकं	९९१
आमावाजस्य	१००४
आरोग्यं नवम्यां	१०७०
आवाहनादिवर्ज्जं वाग्यतः	१०५७
आवाहयेत्यनुज्ञातउशन्तस्त्वा-	९४०
आवाहयेत्यनुज्ञातोविश्वेदेवा-	९३८
आसनेषु दर्भानास्तीर्य्य ...	९३२
आसहस्रात् पंक्तिं... ...	१०६८
इ	
इति पंक्तिपावनाः ...	१०६८

For Private and Personal Use Only

सूत्रं।	पृष्ठे।
उ	
उद्धृत्य घृतात्तमन्नं	९६९
उपतिष्ठतामित्यक्षय्यस्थाने	१०२१
ऋ	
ऋजवोदर्भाः	१०४०
ए	
एकादश पार्षतेन... ...	१०६३
एके यतीन्...	९०६
एकैकमुभयत्र वा... ...	९१७
एकैकस्मिन्नपआसिञ्चति ...	९४३
एकैकस्मिन्नेव यवानावपति	९४३
एकैकस्यैकैकेन	९४६
एकोऽर्घ्यः	१०१५
एकं पवित्रं	१०१२
एकः पिण्डः	१०१७
एतेनैव पिण्डोव्याख्यातो-व्याख्यातः	१०३८
ओ	
ओपस्पर्शनात्	१०५७
क	
कालशाकं	१०६४
कुर्व्वित्यनुज्ञातः	९६९
कृषिः सप्तम्यां	१०७०
ख	
खड्गः...	१०६४
ग	
गृहस्थ साधून् वा ...	९०७
ग्राम्याभिरोषधीभिर्मासं...	१०६०
च	
चतुरः शाकुनेन	१०६२
चतुर्थ्यां क्षुद्रपशवः... ...	१०६९
छ	
छागोस्रमेषा आलभ्याः ...	१०६१
ज	
ज्ञातिश्रैष्ठ्यञ्च	१०७०
ज्येष्ठसामगः	१०६६
त	
तदलाभे आरण्याभिः ...	१०६०
तदहर्ब्राह्मणानामन्त्रं ...	९०२
तदहश्चत्वार्य्युदकपात्राणि	१०३३
तदहस्तत्परः	१०५६
तन्त्रं वा वैश्वदेविकं ...	९२२
तृप्ताः स्थइत्युक्ते	९८६
तृप्तिं ज्ञात्वाऽन्नं प्रकीर्य्य ...	९८४
त्रिणाचिकेतः	१०६७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं।	पृष्ठे।
त्रिमधुः	१०६७
त्रिसुपर्णः	१०६७
त्रीणि पितृणामेकं प्रेतस्य	१०३४
द	
दधिवदराक्षतमिश्राः पिण्डाः	१०४२
दध्ना माहिषेण	१०६३
दशम्यां गावः	१०७०
दातारो नोभिवर्द्धन्तां ...	१००१
दैवपूर्वं श्राद्धं कुर्व्वीत ...	९२२
दैवे वाचयित्वा	१०५०
द्यूतर्द्धिः षष्ठ्यां	१०७०
द्वादश्यां धनधान्यं ...	१०७०
द्वितीयायां स्त्रीजन्मा ...	१०६९
द्विर्नग्नशुक्ल-	९११
द्वौ वा दैवे	९१७
ध	
धर्म्मज्ञः	१०६८
न	
नव मेषमांसेन	१०६३
न स्वधां प्रयुञ्जीत	१०५१
नामीकरणं	१०१८
नात्र विश्वेदेवाः	१०२०
नान्दीमुखाः पितरः ...	१०४३
नावाहनं	१०१७
नियोज्यानामभावे ..	१०५८
प	
पञ्चमीप्रभृति वा	८६७
पञ्चम्यां पुत्रभागी	१०६९
पञ्च रौरवेण	१०६२
पञ्चाग्निः	१०६७
पत्रपुटेषु	९४६
परिचारका एकादश्यां ..	१०७०
पवित्रपाणिर्दद्यादासीनः	९३०
पात्रमालभ्य जपेत् ..	९७२
पायसेन वा	१०६३
पिण्डपितृयज्ञवदुपचारः ..	९२३
पितृनेकैकस्मिन्नेव	९४५
पित्र्ये द्विगुणांस्तु दर्भान् ..	९२९
पुत्रोऽभिरूपः	१०६९
पूताः	१०६६
पूर्णे संवत्सरे षण्मासे त्रिपक्षे वा	१०२४
प्रथमपात्रे संस्रवान् ..	९५५
प्रदक्षिणमुपचारः ..	१०४०
प्रेतपात्रं पितृपात्रेष्वासिञ्चति	१०३५
ब	
बार्ध्रीणसस्य मांसेन ..	१०६३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं।	पृष्ठे।
वैश्यस्यर्चां	९७६
ब्राह्मोढ़ापुत्रस्य	१०६८

म

मधु	१०६४
मधुव्रता इति त्र्यचं ..	९८०
मन्त्रब्राह्मणवित्	१०६७
मन्त्राध्यायिनः	१०६६
महाशल्कः..	१०६४
मातामहानाश्चैवं	९२२
मासद्वयं मत्स्यैः	१०६२
मासत्रयं हारिणेन मृगमांसेन	१०६२
मासि मासि वोऽशनमिति	१०५५
मूलफलैरद्भिर्व्वा	१०६०

य

यज्ञियवृक्षचमसेषु ..	९४१
यदहरुपपद्येत	८९७
यदहर्व्वा वह्निरापद्येत ..	१०२५
यवानादायोङ्कारं कृत्वा ..	९३०
यवैस्तिलार्थः	१०४१
यस्य व्याकुरुते शब्दान् ..	१०५७
यादिव्याआपः पयसा ..	९४८
यानि वा विद्यन्ते.. ..	९४६
युग्मानाशयेत्	१०३९
युग्वानस्तत्र म्रियन्ते ..	१०७१

सूत्रं।	पृष्ठे।

ल

लोहितच्छागः	१०६४

व

वर्षासु मघाश्राद्धं.. ..	१०६५
वागीश्वरीयाज्ञिकस्य ..	१०५८
वाच्यतामित्यनुज्ञातः ..	९९६
वाजे वाजे..	१००३
विश्वे देवाः प्रीयन्तामिति	९९९
वृद्धान्	९०८
व्याहृतिपूर्व्वां	९८०

श

शस्त्रहतस्य चतुर्दश्यां ..	१०७१
शाकेनापि नापरपक्षमति-क्रामेत्..	१०५४
शाखाध्यायी	१०६६
शेषाणि क्रीत्वा	१०६१
श्रद्धान्वितः श्राद्धं कुर्व्वीत	१०५३
श्रोत्रियान्..	९०८

ष

षट्छागेन..	१०६२
षडङ्गवित्..	१०६६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रं ।	पृष्ठे ।
स	
सकृत् सकृदपोदत्त्वा ..	९७९
सकृत सकृदपोदत्त्वा पुनर्मधु-वार्ता..	९८५
सन्त्रियुक्ते	१००२
सप्त कौर्म्मेण	१०६२
सम्पन्नमिति तृप्तिप्रश्नः ..	१०४१
सर्व्वत्र प्रश्नेषु	९३०
सर्व्वमन्नमेकत्रोद्धृत्योच्छिष्ट-समीपे	९८७
सर्व्वान् वा..	९३१
सह्याद्रेनोत्तरात्तर्पयन्ति ..	१०९१
सौवर्णराजतौदुम्बर- ..	९४६
संवत्सरन्तु गव्येन ..	१०६३
स्नातकः	१०६७
स्नातकान्	९०५
स्नातकान् शुचीनाचान्तान्	९१४
स्वकर्म्मस्थान्	९०९
स्वदितमिति तृप्तिप्रश्नः ..	१०२०
स्वर्गे लोके महीयते ..	९८३
ह	
हस्तिच्छायायाञ्च	१०६५
हुतशेषं ब्राह्मणाय दत्त्वा ..	९७१

ग्रन्थसूची ।

ग्रन्थनाम	पृष्ठतः	पृष्ठं
गृह्यसूत्रं	१	७७२
गृह्यासंग्रहः	७७३	८८८
श्राद्धकल्पः	८८९	१०७५
श्राद्धकल्पपरिशिष्टं	१०७६	१०७७
सन्ध्यासूत्रं	१०७८	१०७९
स्नानसूत्रं	१०८०	१०८२
स्नानसूत्रपरिशिष्टं	२०८३	१०८७

ग्रन्थसूची समाप्ता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृह्यसूत्राणामकारादिक्रमेण विषयसूची ।

विषयः ।	पृष्ठाङ्काः ।
अक्षतहोमः...	७२६।७२७।७२८,७२९
अक्षभङ्गादौ प्रतीकारः ...	२२२।२३४
अग्नियोनयः...	५१।५२
अग्निस्थापनप्रकारः... ...	२३।२४
अद्भुतादिषु प्रायश्चित्तं ...	५०५।५०६।५०७।५०८
अनध्यायः	४८७।४८८।४८९।४९३।४९४।४९६। ४९९।५०१।५०२।५०२।५०३।५०४
अनाम्नातेषु होमादौ विशेषः	६७५।६७६
अनुप्रवचनीयव्रतान्ते ऐन्द्रः स्थालीपाकः ...	४७०।४७१
अन्वष्टक्यश्राद्धं	६२९।६३०।६३१।६३२।६३३।६३४।६४१। ६४२।६४३।६४४।६४६।६४७।६४८।६४९। ६५०।६५१।६५२।६५५।६५६
अन्वष्टक्यं	६१६।६१७।६१८।६१९।६२१।६२२।६२३। ६२४।६२०।६२६।६२७।६२८।६२९
अन्वाहार्य्यं श्राद्धं	६६६।६६७।
अपूपाष्टका	५९३।५९४।५९५।५९६
अर्घ्यकालः	३२७।३२८
अर्घ्यप्रकारः...	७५३।७५४।७५५।७५९।७६०।७६१।७६२ ७६३।७६४।७६५।७६६।७६७।७६८
अर्घ्यार्हाः	७६८।७६९
अलक्ष्मीनिर्णोदः	६९६।६९७।६९८।६९९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः । पृष्ठाङ्काः ।

अवसानविधिः ... ... ७०६।७०७।७०८।७०९।७१०।७११।७१२ ७१३।७१४।७१५

अश्वयज्ञः ... ... ५४५।

अष्टका ... ... ५८६।५८७।५८८ ५९०।५९१

आ

आग्रहायीकर्म्म ... ... ५७४।५७५।५७७।५७८।५७९।५८०

आचमनं ... ... ६७।६८।६९।७०।७१।७२।७३।७४।७५

आचितप्रतकामस्य कर्म्म ७०१।७०३।७०४

आज्यभागहोमः २४८

आज्यसंस्कारः ... ... २३९।२४१।२४२।२४३

आज्यस्थालीपाकयोः स्थापनं २४५

आज्याहुतिषु विशेषः ... २८०।२८१।२८२

आदित्यव्रतचारिणां धर्म्माः... ४५२।४५३

आदित्यव्रताचरणे विकल्पः ४५२

आधानकालः... ... ... ३१।३२।४५।४६।४८

आधानदिने प्रातर्होमः ... ५५

आप्लवनं ... ... ५१४।५१५।५१६।५१७।५१८।५१९।५२०। ५२१।५२२

आश्वयुजीकर्म्म ... ... ५६१।५६३।५६४।५६६।५६७

इ

इध्माः ... ... २०५।२०७

इन्द्राण्याः स्थालीपाकः ... ६८०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः।	पृष्ठाङ्काः।
ई	
ईक्षकप्रतिमन्त्रणं	२११
उ	
उत्सर्गः	४९०
उत्तरविवाहः...	३१६।३१७।३१८।३१९।३२०।३२५।३३१
उदकाञ्जलयः...	७६।७८।८७
उद्वर्त्तनं	३१५।३१६
उपघातहोमः...	२४५
उपनयनकालः	४०६।४०७
उपनयनं	४१३।४१५।४१६।४१७।४१८।४१९।४२०।४२१।४२२।४२३।४२४।४२५।४२६।४२७।४२८।४२९।४३०।४३१।४३३।४३४
उपवसथः	२०४।२०५।२०७।२०८।२०९।२१०,२११।२१२।२१५।२१६।२१७।२१९,२२०
उपवासकालः...	१८३।१८४।१८५।१८६।१८७।२०१।२५३
उपस्तीर्णाभिघारितहोमः ...	२४७।२५०।२५१।२५२
उपाकर्म्म	४७८।४८०।४८३।४८४।४८५।४८६।४८८।४८९।४९२
ऋ	
ऋतौ प्रज्ञायमाने होमः ...	६७६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः । पृष्ठाङ्काः ।

क

कम्बुकहोमः ७५०
काम्येषु दीक्षाः ... ... ६८६।६८७ ६६१
कुमारस्य जन्मतिथ्यादौ कृत्यं ३६२
कृमिप्रतीकारः ... ... ७५१।७५२
कौतोमतप्रयोगः ... ... ६८८।६६०

ग

गवां पुष्टिकर्म्माणि ... ... ५३६।५४०।५४१।५४३।५४४
गृह्याग्निः ४५
गोदानादिव्रतचर्य्याकालः ... ४५१
गोदानादिव्रतधर्म्माः... ... ४४३।४४४।४४५।४४६।४४७।४५२
गोदानं... ... ... ४३६।४३७।४३८।४३६।४४०।४४१।४४२
गोयज्ञः ... ... ५४४।५४५

च

चतुर्थीकर्म्म ... ... ३३६।३४०।३४१।३४४
चतुष्पथप्रतिमन्त्रणं ३३२
चन्द्रदर्शनं ... . ३७६ ३८०।३८१।३८२
चमसः ८८
चरुः ... ... २३०।२३१।२३२।२३३।२३४
चूड़ाकरणं ... ... ३६५।३६६।३६७।३६८।३६६।४००।४०१।४०२।४०३।४०४।४०५

For Private and Personal Use Only

विषयः ।	पृष्ठाङ्काः ।
ज	
जातकर्म	३७२।३७३।३७४ ३७६।३७८
ज्ञातिकर्म	२८९।२९०
ज्येष्ठसामव्रतं	४७४।४७५।४७६।४७७
द	
दक्षिणा	२६६
दण्डोपनिधानं	७५०।७५१
दर्शपौर्णमासयोः	१८३।२८६।२५९।२६०
दारकरणकालः	२८४।५०९।५१०
दारकरणोपयुक्तस्त्रीनिर्णयः...	२८४।५११
द्विराचमननिमित्तानि ...	७५
ध	
धृतिहोमः	३२६।३२७
न	
नवयज्ञः	५६७।५६८।५६९।५७०।५७१।५७२।५७३
नामकरणं	३८३ ३८४।३८६।३८७।३९१
न्यग्रकर्म	६८२।६८३
प	
पण्यहोमः	७३८।७३९
पतिगृहमागतायां वध्वां कृत्यं	३३४।३३५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
पतितसावित्रीकाः	४११।४१२
परिणयनं	३०६
परिधयः	२३८
परिभाषा	८।१९।२१।२२।३०।३८।६६।२५९।२५७। २५८।२७९।२८०।२८१।२८२।६८२
परिसमूहनं	६८३
परिस्तरणं	२३४।२३५।२३६।२३७
पर्व्वदक्षिणा	४७२
पर्युक्षणं	७८।७९
पवित्रं	२४०।२४१
पाकयज्ञेषु विधिः	२७०।२७१।२७२
पाणिग्रहणेऽग्निस्थापनादिकं	२९१।२९२।२९३।२९४।२९५।२९६।२९७। २९८
पाणिग्रहणे आज्यहोमः ...	२९८।२९९
पाणिग्रहणं	३१३
पाणिग्राहवध्वोरवसेकः ...	३११
पिण्डपितृयज्ञः	६६५।६६६।६६७।६६८।६६९।६७०
पिण्डप्रतिपत्तिः	६५५।६५६
पित्रादिनामाज्ञाने विधिः ...	६४४
पुरीषहोमः	७४९।७५०
पुरुषाधिपत्यकामस्य कर्म्म ...	७४१।७४२।७४३।७४४
पुंसवनं	३५१।३५२।३५३।३५४।३५५।३५६।३५७
पूर्णपात्रं	२६९
पूर्णहोमः	७३९।७४०
पौर्णमास्यमावस्ययोर्लक्षणं ...	१८७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः।	पृष्ठाङ्काः।
प्रणीता	२३८
प्रपदप्रयोगः	६८८
प्रपदः	६८४।६८५
प्राचीनावीतिलक्षणं	६६
प्रोषितागतकर्म्म	३९३।३९४

ब

ब्रह्मणस्तूष्णीमुत्पादनं	२६४।२६५
ब्रह्मस्थापनं	२२०।२२१।२२४।२२५।२२६।२२७

भ

भूतप्रवाचनं	११२।११३।११४
भूरित्यनकाममारप्रयोगः ...	६९६

म

मणिकप्रतिष्ठा	५७८
महानाम्नीनां श्रावणं ...	४६३।४६४।४६५।४६६।४६७।४६८
महानाम्नीव्रतदक्षिणा ...	४६९
महानाम्नीव्रतान्तकृत्यं ...	४७०।४७१।४७३
महानाम्नीव्रतं	४५४।४५५।४५६।४५७।४५८।४५९।४६०।४६१।४६२।४६३
महाव्याहृतिहोमः	२५४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
मांसाष्टका	५९७।५९९।६००।६०१।१०२।६०३।६०४। ६०५।६०६।६०७।६०८।६०९।६१०।६११। ६१२।६१३।६१४
मेधाजननं	३७६

य

यज्ञवास्तुकरणं	२६०।२६१
यज्ञोपवीतिस्वरूपं	६४
यज्ञोपवीतं	६२
यशस्कामस्यादित्योपस्थापनं...	७००
यानारोहणं	३३२

ल

लक्षणं	३३।३८
लाजहोमः	३००।३०१।३०२।३०३।३०६ ३०८।३०९

व

वपाहोमः	६०२।६०३।६०४।६७३।६७४
वर्हिः	२०८।२०९
बलिहरणं	११५।११६।१३१।१३३।१३४।१३८।१३९। १४०।१४१।१५३।१५४।१५५।१५६।१६६। १७४।१७५।१७६।१७७।१७८।१७९।१८१
वस्त्रदशाग्रग्रन्थिबन्धनं... ...	७४६।७४७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
वास्तुकर्म्म	७१६।७१७।७१८।७१९।७२१।७२३।७२४।७२५
विवाहात्प्रभृति दम्पत्योर्नियमाः	३२६
विषवता दष्टस्य विधिः ...	७५०
वृत्तइवेति पञ्चर्चः	६९०।६९१।६९२।६९३।६९४।६९५
वृद्धिपूर्त्तश्राद्धेषु विशेषः ...	६५७
वैरूपाक्षः	६८३।६८५
वैश्वदेवः	११६।११७।५३
व्रीहियवहोमः	६८९।७२९।७३०।७३१

श

शङ्कुहोमः	७३२।७३३
शाकाष्टका	६७२
श्रवणाकर्म्म	५४८।५४९।५५०।५५१।५५२।५५३।५५५।५५६।५५७।५५८।५५९

स

सक्तुहोमः	७४७
सप्तपदीगमनं	३०९।३१०।३११
सम्भवः	३४४।३४६।३४७
सर्पिर्होमः	७३३।७३४।७३५
सायंप्रातर्होमादौ कालातिपाते विधिः	२७२।२७३।२७५।२७६।२७७।२७८
सायंप्रातर्होमौ	५६।५७।८०।८३।८६।८६।८७।८९।९०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
सावित्रचरुः	४३३
सीतायज्ञादयः	६७८।६८०
सीमन्तकरणं	३५८।३६२।३६५।३६६।३६७।३६८।३६९। ३७०
सोष्यन्तीहोमः	३७१।३७२
स्नातकविवेकः	५३०।५३१
स्नातकव्रतानि...	५२३।५२४।५२५।५२६।५२७।५२८।५२९। ५३२।५३३।५३४।५३५।५३६।५३८
स्वस्तरारोहणं	५८०।५८१।५८२।५८३।५८४
स्वस्त्ययनकामस्यादित्योपस्थानं	७००
स्विष्टकृद्धोमः...	२५२।२५३
स्त्रीलक्षणपरीक्षा	२८६।२८७।२८८

ह

हरितगोमयहोमः	७३५
हलाभियोगः	६७६।६७७
होमानादेशे विधिः	२८०।२८१।२८२

गृह्यसूत्राणां विषयसूची समाप्ता ।

For Private and Personal Use Only

गृह्यासंग्रहस्याकारादिक्रमेण विषयसूची।

विषयः।	पृष्ठाङ्काः।
अक्षतादिद्रव्याणि	८१९
अग्निजिह्वाः	७७९।७८०।७८२।७८३
अग्निधमनं	८०४।८०५
अग्निनामानि...	७७५।७७६।७७७।७७८
अग्निप्रणयनं	८०२।८०३
अग्निमुखं	७८२
अग्नेः स्वरूपं	८०३
अजिनादिधारणं	८५४
अनुदयः	८०५
अन्त्या समित्	८६०
अपराजिता	८७२
अभिरूपः	८३७
अर्घ्यः	८६३
अविदासी ह्रदः	८४६
अष्टकाविधौ कपालसंख्या ...	८६९
अष्टाङ्गार्घ्यः	८६३

आ

आग्रयण-विषयः	८८३।८८४
आचार्य्यानुमतवाक्यनिर्णयः	८२४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः।	पृष्ठाङ्काः।
आज्यं	८२६।८२७।८२८
आधानकालः	८०७

इ

इध्मादीनां द्वयीं करणं ...	८२३
इध्मः	८२२।८२३

उ

उदकुम्भधारिणोधर्म्माः ...	८४४
उदयः	८०६
उपघातहोमः	८२९
उपलेपनं	७९९।८००
उपवेशः	८१४

क

कपालं	८६९
कर्म्मक्रमः	७८९।८१६
कर्म्मणां कालातिपाते विधिः	८७१
क्षुतादौ दक्षिणश्रवणस्पर्शः	८७९

ग

गृह्या...	७८८
गोचर्म्म	७८९।७९०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
गोनामानि	८६२
गोभिलग्रन्थे पुनरुक्तादेर्ग्रहणं	८८६
चरुविधिः	८६८
चूड़ाकरणादौ निर्व्वपणाभावः	८४६
चूड़ाकरणे मुण्डनप्रकारः ...	८५०
तन्त्रधारकादिः	८००।८०१
दर्भादीनां निर्म्माल्यताविवेकः	८७६।८७८
दारलक्षणं	८४२
देवयोनिः	८१२।८१३
ध्रुवाज्यायः	८४३
नग्निकाऽनग्निके	८३६।८४०
परमेष्ठिविभक्तयोरग्न्योः प्रातराहुतिः तयोः प्रातराहुत्युपक्रमश्च	८१०
पवित्रपरिधौ	८१४
पाणिग्रहणे अग्निप्रदक्षिणप्रकारः	८४५
पाणिग्रहणे गौड़ी सुरा ...	८३६
पाणिग्रहणेतिकर्त्तव्यता ...	८४४
पारतन्त्रिककर्त्तव्याकर्त्तव्यविवेकः	८८०।८८१
पितृकार्य्ये प्रणवप्रयोगप्रकारः	८७०
पृषातकः	८६१
प्रणीता...	८२०
प्राङ्नीचादिफलं	७६१
प्राजनिनः पाणिग्राहस्यानुगमनं	८४७
प्रातर्होमकालः	८०५
बरः	७६२
बलौ चरुपाकाभावः ...	८३४
बीरतरः	८१६
ब्रह्मचारिणोव्रतादेर्व्रतनामव्रतचर्य्याकालवाचनं ...	८५१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
ब्रह्मविष्टरौ	८१६।८१७
ब्रह्मस्थापने विशेषः	८१७।८१८
ब्राह्मणादिविवाहभेदात् होम-परिणययोः क्रमभेदः ...	८४८
मधुपर्कादिपाने विधिः ...	८६२।८६४
मधुपर्कः	८६३।८६४।८६५
मन्थनयन्त्रं	८११।८१२
मन्थः	८६५
मन्त्रानुपदेशे व्याहृतिप्रयोगः	८३५
मेक्षणं	८१३।८२३
यज्ञवास्तुक्रिया	८३१।८३२
यज्ञोपवीतविधिः	८५५।८५६।८५७।८५८।८५९
लक्षणं (लेखविधिः)... ...	७९४।७९५।७९६।७९७।७९८
लाजहोमः	८४६।८४७
वपाहोमादौ व्याहृतिप्रयोगाभावः	८७०
विवाहे दाम्पत्यवाचकमन्त्राणां वरेण पाठः	८४३
वैरूपाक्षादयः...	८२१
व्याहृतिप्रसंज्ञा	८३५।८३६
व्रतान्ते ऐन्द्रचरुः	८५३
शङ्कुः	८१४
शल्ली...	८१९
श्राद्धे ब्राह्मणस्यैकत्वे विधिः...	८७४।८७५।८७६।८७८
समयाध्युषितं...	८०६
समिधः	७८५।७८६।८२३
सम्पातः	८३०
सम्पूयनं	८२६
"सर्व्वतः" शब्दस्यार्थः ...	८२०
सावित्रव्रतचर्य्याकालः ...	८५२
सीमन्ते दर्भपिञ्जूलीसंख्या ...	८१९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
सुरा	८३९
सुरोत्तमशब्दार्थः	८५१
स्तरणे विशेषः	८१६
'स्थालीपाकावृतान्यत्" इत्यस्यार्थः	८३१
स्रुक्स्रुवौ	८१३
स्त्रीस्नावनं (विवाहे)	८३८
स्त्रीलक्षणपरीक्षायां वेदिपिण्डादिग्रहणफलं ...	८४१
हविष्यं...	८७२
होमकाले पृषातकस्य स्थानं	८६१
होमविधिः	७८०।७८१।७८३।७८४।७९३।८२२
होमीयद्रव्याणां प्रोक्षणादि	८२५
होमीयाग्निः	८३७।८३८
क्षासनानि	८४९

गृह्यासंग्रहसूची समाप्ता ।

श्राद्धसूत्राणामकारादिक्रमेण विषयसूची ।

विषयः ।	पृष्ठाङ्काः ।
अक्षय्यतृप्तिः	१०६४।१०६५।१०६६।१०६७।१०६८
अग्नौकरणं	९६९
अङ्गुष्ठनिधानं...	९७६
अन्नप्रकारः	९८४
अप्प्रदानं	९७९
अर्घ्यः	९४१।९४३।९४५।९४६।९४८।९५२।९५५
आचमनादि	९९१
आभ्युदयिकश्राद्धं	१०३९।१०४०।१०४१।१०४२।१०४३। १०५०।१०५१
आमन्त्रणीयाब्राह्मणाः ...	९०५।९०६ ९०७।९०८।९०९।९१०।९११। १०५७।१०५८।१०५९।१०६६।१०६७।१०६८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः ।	पृष्ठाङ्काः ।
आमन्त्रितस्य धर्म्मः	९०५
आवाहनं	९३७ ९३८।९३९।९४०।९४१
आशीःप्रार्थनं	१००१।१००२
आसनं	९३२
एकोद्दिष्टं	१०११।१०१२।१०१५।१०१७।१०१८। १०२०।१०२१।१०२२
काम्यानां तिथयः	१०६९।१०७०।१०७१।१०७२
गन्धादिदानं	९६३
तृप्तिप्रश्नः	९८५
तृप्तिः	१०६०।१०६१।१०६२।१०६३
दक्षिणा	९९९
धर्म्माः	१०५६।१०५७।१०५८।१०५९
निषिद्धब्राह्मणाः	९११
परिभाषा	९२२।९२९।९३०।९३१
पात्रालम्भः	९७२
पिण्डदानं	९८६।९८७
पिण्डपितृयज्ञातिदेशः ...	९२३
प्रदक्षिणादि	१००४
ब्राह्मणसंख्या	९१४।९१६।९१७
ब्राह्मणामन्त्रणकालः ...	९०३
ब्राह्मणोपवेशनं	९१४
मधुवातादिजपः	९८०
मातामहश्राद्धं	९२२
विसर्ज्जनं	१००३
श्राद्धकालः :...	८९१।८९७।८९८।९०१
श्राद्धस्यावश्यकत्वं	१०५३।१०५४।१०५५
श्राव्यजपः	९८०।९८३
सपिण्डीकरणं...	१०२३।१०२४।१०२५।१०३३।१०३४। १०३५।१०३८
स्वधानिनयनीये धारादानं...	९९७
स्वधावाचनं	९९३।९९६
हुतशेषदानं	९७१

श्राद्धसूत्रसूची समाप्ता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विज्ञप्तिः ।

गोभिलसूत्रमेतदतिप्राचीनमत्यन्तप्रयोजनीयं दुष्प्राप्यञ्च श्रीमदासियातिकसमाजस्यानुमत्या व्ययेन च मुद्रितमभूत् । तदत्र, गृह्यसूत्रं, गृह्यासंग्रहनामकं गृह्यपरिशिष्टं, श्राद्धकल्पनामधेयं श्राद्धसूत्रं, तत्परिशिष्टं, सन्ध्यासूत्रं, स्नानसूत्रं, तत्परिशिष्टञ्चेति सप्त ग्रन्थामुद्रिताः। तत्राद्यं ग्रन्थत्रयं सभाष्यं मुद्रितं शिष्टं ग्रन्थचतुष्कन्तु मूलमात्रं । प्रथमग्रन्थत्रयभाष्येन पुस्तकस्य गुरुकलेवरता जातेति समाजाध्यक्षैः पराचीनग्रन्थचतुष्कस्य मूलमात्रस्यैव मुद्रणमन्वमोदि । छन्दोगपरिशिष्टापरनामधेयस्य कर्म्मप्रदीपस्य गोभिलपरिशिष्टस्यावश्यमुद्रणीयस्याप्यत्रामुद्रणे तदेव वीजं ।

तदस्य गोभिलसूत्रस्याभ्यर्हिततया दुष्प्राप्यतया च मुद्रणं स्थिरीकृत्य तत्शोधनमुद्रणार्थं मामुक्तसभा नियुक्तवती । ग्रन्थस्यातिकठिनतया च व्याख्यासहितस्यैव तस्य मुद्रणं सभा निरदिचत्। ततश्च यतमानापि संसत्तस्य कामपि व्याख्यां महतापि कालेनासादितवती । अस्माभिस्तु यतमानैर्बहुतरक्लेशेन दुर्मूल्येन च गृह्यसूत्रमात्रस्य भट्टभाष्यमेकं काशीतः क्रीतं । तदप्येकमात्रं पुस्तकमपरिशुद्धिभूयिष्ठं खण्डितञ्चेति सर्व्वथैव मुद्रणानर्हं । यदा चैवमवस्था समजनि, तदाऽनायत्या मूलमात्रस्यैव मुद्रणाय संसदाहमादिश्ये । अस्माभिस्त्वतिकठिनतरस्यैतस्य मूलमात्रस्य मुद्रणं न खल्वभीप्सितसिद्धयेऽलमिति विवेचयद्भिरभिनवं किञ्चिद्भाष्यमत्र निर्म्मित्सुभिः कतिपयसूत्राणां भाष्यं निर्म्माय समितेरालोकनपथं नीतं । तदाचर्यिलालोच्य च विचारचतुरैः सभ्यैर्विद्यासमुद्रैर्मुद्रणायास्यानुमतिरकारि । गोभिलसूत्रपाठा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्थिनान्तदर्थावगतयेऽवशिष्टसूत्राणां भाष्यरचनार्थञ्चाहमन्वरुत्सि। तदस्माभिरप्येवमुत्साहितैर्गृह्यसूत्रस्य, गृह्यासंग्रहस्य, श्राद्धकल्पस्य च भाष्यं यथाबुद्धि निरमायि। न जाने कियत्यस्माकमस्मिन् कृतकृत्यता जातेति। ग्रन्थस्य गुरुकलेवरतया च समाजाज्ञया भाष्येषु क्वचित् क्वचित् संक्षिप्ता रीतिरवलम्बितेति न ततः प्रयोगस्य पूर्णाऽवगतिरिति ध्रुवं। परन्तु यावता सूत्राणामर्थः स्पष्टमवगम्यते, तावान् विस्तरः कृतएव। तदनेन यदि मान्यायाः समितेः पाठकानाञ्च विचारचतुराणां कथञ्चित् परितोषः स्यात्, तदा वयमपि कृतकृत्याभवेम इति।

यानि पुस्तकान्यवलम्बैतस्य शोधनमकरवं तानि तावत् वर्णयामः। गृह्यसूतस्य तावदेकं पुस्तकं काशीतः क्रीतं नवीनं वङ्गाक्षरलिखितं सभाष्यमशुद्धिभूयिष्ठं खण्डितञ्च। द्वितीयमासियातिकसमितेरागतं नवीनं नागराक्षरलिखितं पूर्व्वापरखण्डितं मध्ये कियदंशमात्रं सभाष्यमशुद्धञ्च। तृतीयं तस्याएव समितेरागतं नागराक्षरलिखितं प्राचीनं परिशुद्धतरं सूत्रमात्रं। चतुर्थमपि तथाविधमेव नवीनमशुद्धञ्च। पञ्चमं स्कन्दपल्ली(कान्दापाड़ा)निवासि-रघुनाथसार्व्वभौमलिखितं वाङ्गाक्षरं प्रायः शुद्धं सूत्रमात्रमेव। षष्ठं काशीतः क्रीतं नागराक्षरलिखितं नवीनं सूत्रमात्रं शुद्धप्रायञ्च—इति षट् पुस्तकान्याहृतानि। गृह्यासंग्रहस्य त्वेकमेव पुस्तकमासियातिकसमाजस्थं नागराक्षरलिखितं दीक्षितभाष्यसहितं प्राचीनं परिशुद्धप्रायञ्चाहृतं। श्राद्धकल्पस्य त्वेकं महायशःकृतभाष्यसहितमस्मल्लिखितं वाङ्गाक्षरमभिनवमशुद्धञ्च। द्वितीयमासियातिकसमाजस्थं नागराक्षरलिखितं नातिप्राचीनं परिशुद्धं सूत्रमात्रं। तृतीयं ७ वामनदाससुखोपाध्यायमुद्रितं सूत्रमात्रमिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रीणि पुस्तकान्याहृतानि। श्राद्धकल्पपरिशिष्टस्यापि तान्येव। सन्ध्यासूत्रस्यैकमासियातिकसमाजस्थं नागराक्षरलिखितं नातिप्राचीनं परिशुद्धञ्च। द्वितीयं काशीतः क्रीतं तथाविधमेव नवीनं। तृतीयं पूर्व्ववन्मुद्रितमिति त्रीणि पुस्तकान्यहृतानि। स्नानसूत्रस्यैकं काशीतः क्रीतं नागराक्षरलिखितं नवीनं परिशुद्धप्रायञ्च। द्वितीयं पूर्व्ववन्मुद्रितमिति द्वे पुस्तके आहृते। स्नानसूत्रपरिशिष्टस्य तु पूर्व्ववन्मुद्रितमेकमेव पुस्तकमाहृतमिति। अथैतेषां पुस्तकानामिह व्यवहृतानि साङ्केतिकचिह्नानि,—

चिह्नं।	अर्थः।
सो॰प्रा॰.	आसियातिकसमितिस्थं प्राचीनपुस्तकं। (गृह्यसूत्रस्य तृतीयपुस्तकं)
सो॰ न॰.	” नवीनपुस्तकं। (गृह्यसूत्रस्य चतुर्थपुस्तकं)
सो॰ पु॰	” पुस्तकं।
सो॰ भा॰	” गृह्यसूत्रस्य द्वितीयं पुस्तकं।
का॰ क्री॰	.. काशीतः क्रीतं पुस्तकं।
मु॰	.. मुद्रितपुस्तकं।

तदत्र गृह्यसूत्रं गोभिलप्रणीतमित्यत्र न संशयलेशोपि। गृह्यासंग्रहे* कर्म्मप्रदीपे च† तथैवाभिधानात्। गृह्यासंग्रहस्तु गोभिलपुत्रस्य कृतिरित्यपि ततः‡ एवाव गम्यते। परमत्रभवतोगोभिल-

---

* पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितं।
गोभिले ये न गृह्णन्ति न ते ज्ञास्यन्ति गोभिलं। (गृ॰२ प्र॰९४ स्लो॰)

† अथातोगोभिलोक्तानामन्येषाञ्चैव कर्म्मणां।
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत्। (क॰ १ प्र॰ १ ख॰ १ स्लो॰)

‡ गोभिलाचार्य्यपुत्रस्य योधीते संग्रहं पुमान्।
सर्व्वकर्म्मसु संमूढः परां सिद्धिमवाप्नुयात। (गृ॰ २ प्र॰ ९५ स्लो॰)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुत्रस्य किं नामधेयमिति न खल्वधिगच्छामि। श्राद्धकल्पाख्यं श्राद्धसूत्रमपि गोभिलप्रणीतमिति श्रीदत्त-महायशः-शूलपाणि-वाचस्पति मिश्र-रघुनन्दनादीनां मतं। प्रसिद्धिश्चैवं। अस्माकन्तु गोभिलकृतमेवैतदित्यत्र न निश्चयः। तथाहि। छन्दोगपरिशिष्टे वृद्धिश्राद्धप्रयोगप्रारम्भे, "वशिष्ठोक्तोविधिः कृत्स्नोद्रष्टव्योऽत्र निरामिषः"—इति। अन्तेच, "इदं शास्त्रञ्च गृह्यञ्च परिसंख्यानमेवच। वशिष्ठोक्तञ्च योवेद स श्राद्धं वेद नेतरः"—इति कात्यायनेनोक्तं। एवमन्वष्टक्यकर्म्मणि गृह्योक्तस्य प्रयोगस्यासम्पूर्णतया तत्पूर्णत्वार्थं, "आसनाद्यर्घ्यपर्य्यन्तं वशिष्ठेन यथोदितं। कृत्वा कर्म्मात्र पात्रेषु उक्तं दद्यात्तिलोदकं"—इत्यपि तेनैवोक्तं। यदि गोभिलकृतमेवैतत् श्राद्धसूत्रं स्यात्, तर्हि एतस्योल्लेखमकृत्वा वशिष्ठोक्तस्य तत्र तत्रोल्लेखः कात्यायनस्यानुचितः स्यात्। गोभिलस्यैव ग्रन्थान्तरे सम्पूर्णप्रयोगस्यापेक्षित विशेषस्य चावस्थितौ तदनुल्लिख्य तथाविधन्यूनतापरिहारार्थं मुन्यन्तरीयग्रन्थस्योल्लेखनं कथमनुचितं न भवेत्। आसनाद्यर्घ्यपर्य्यन्तकर्म्मकलापः खल्वत्र सुस्पष्टमुपदिष्टोवर्त्तते। तस्मात् नेदं श्राद्धसूत्रं गोभिलप्रणीतं किन्तु वशिष्ठकृतं परिशिष्टरूपमिति तावत् प्रतिभाति। तथा, "यवैस्तिलार्थः" (४, ३, २७) इति गृह्यसूत्रस्य भाष्ये, "अन्योपि प्रातरामन्त्रितान् विप्रानित्येवमादिकः कर्म्मप्रदीपोक्तोविशेषः, वाशिष्ठश्च कल्पउपलभ्यः"—इति भट्टनारायणेनोक्तं। अनयालिखनभङ्ग्या श्राद्धसूत्रमिदं वाशिष्ठमिति तस्य मतं लक्ष्यते। इदमपि हि श्राद्धसूत्रं 'श्राद्धकल्पः'—इत्याख्यायते। अन्यश्च वाशिष्ठः कल्पोन दृश्यते। तस्मादयमेव वाशिष्ठः कल्पइति नानुचिता सम्भा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वना। परमत्रापि संशयउदेति। वशिष्ठकृतस्तावत् कश्चिद् ग्रन्थश्छन्दोगानामस्तीत्यविवादं। स च ग्रन्थः क्वचित् (भट्टभाष्यादौ) कल्पतया, क्वचित् (परिशिष्टप्रकाशादौ) छान्दोग्यगृह्यतया, क्वचिच्च (शुद्धितत्त्वादौ) परिशिष्टतया, उल्लिखितः। तत्र च, वशिष्ठकृत छन्दोगपरिशिष्टे वृषोत्सर्गस्य कालविधिरस्तीति शुद्धितत्त्वादौ व्यक्तं। अत्र तु नास्ति वृषोत्सर्गस्य कालविधिरिति नेदं शुद्धितत्त्वाद्युल्लिखितं वशिष्ठकृतच्छन्दोगपरिशिष्टं। नाप्येतत् परिशिष्टप्रकाशानुमतं छान्दोग्यगृह्यं*। गृह्यकर्म्मणां विधानस्यात्राभावात्। श्राद्धकल्पसमाख्यत्वाच्च। एवं "प्राणसम्मितइत्यादि वाशिष्ठं बाधितं यथा"—इति कात्यायनोक्तोबाधितविषयोपि† नात्रोपलभ्यते। यदि तु ग्रन्थत्रयं वशिष्ठकृतं स्यात्, ग्रन्थोयं वाशिष्ठः कल्पइति शक्यते वक्तुं‡। अथ त्वेकएव वशिष्ठकृतोग्रन्थः क्वचित् कल्पतया, क्वचित् गृह्यतया, क्वचिच्च परि-

---

* छान्दोग्य-गृह्यनामा एकोग्रन्थोऽस्माभिरुपलब्धः, तत्र गृह्यकर्म्मणामेव विधिर्न श्राद्धस्य। स च ग्रन्थोन गोभिलीयानामिति सम्भाव्यते। क्वचित् क्वचित् गोभिलगृह्यापेक्षया वैलक्षण्यस्य तत्रोपलम्भात्। छन्दोगापरसूत्रनामकं छन्दोगानां पितृमेधसूत्रमप्येकं दृष्टं। तत्र श्राद्धस्य विधिरस्ति वृषोत्सर्गस्य तु नास्ति। श्राद्धविधिरपि तत्रत्योगोभिलविलक्षणइति (सम्भावयामः) सोपि श्राद्धविधिर्न गोभिलीयानामिति।

† बाधितविषयोऽत्रैवोपलब्धव्यइत्यत्रापि न निश्चयः। अन्यत्रापि तत्सम्भवात्।

‡ "वशिष्ठोक्तं च योवेद"-इत्येकत्रैव वशिष्ठोक्तोग्रन्थोवाशिष्ठः कल्पइति भट्टनारायणस्य, छान्दोग्यगृह्यनामा इति नारायणोपाध्यायस्य च मतदर्शनात् ग्रन्थत्रयं वशिष्ठकृतमस्तीत्यत्रापि न निश्चयः। यदि तु भट्टनारायणोक्तः कल्पः शुद्धितत्त्वोक्तं छन्दोगपरिशिष्टञ्चेति ग्रन्थद्वयं वशिष्ठकृतं स्यात्, कल्पोयं वाशिष्ठोभवितुमर्हति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिष्टतया कल्पितः, न तर्ह्ययं श्राद्धकल्पोवाशिष्टोभवितुमर्हति। तदेवं निर्व्यूढं निश्चेतुमशक्यत्वात् प्रख्यातनाम्नां श्रीदत्तादीनां प्रसिद्धेश्चानुरोधः अत्राश्रितः।

गोभिलगृह्यसूत्रस्य खण्डाः केश्चित् कण्डिकानाम्ना केश्चिच्च काण्डिकानाम्ना व्यवहृताः। अस्माभिस्तु भट्टनारायण-रघुनन्दनादीनां मतमनुरुन्धानैरुत्तरएव पक्षोऽवलम्बितइति ज्ञेयं। तदस्मिन् गृह्यसूत्रे प्रपाठकनामानश्चत्वारोऽध्यायाः सन्ति। प्रथमेऽध्याये काण्डिकानामानः खण्डानव विद्यन्ते, शिष्टेष्वध्यायेषु प्रत्येकं दश। तदेवमुनचत्वारिंशद्भिः खण्डैर्व्विभक्तोयं ग्रन्थः। तत्र प्रथमेऽध्याये,—आधानकाल-सायंप्रातर्होम-वैश्वदेव-बलिकर्म्मावश्यकहोमेतिकर्त्तव्यता-दर्शपौर्णमास-ब्रह्मस्थापन-चरुश्रपण-पुनराधानव्यवस्थाः परिभाषाश्च काश्चिदभिहिताः। द्वितीयेऽध्याये,—विवाह-(गर्भधानापरनामधेय) भभ्भव-पुंसवन-सीमन्तकरण-सोष्यन्तीहोम-जातकर्म्म-(निष्क्रमणापरनामधेय) चन्द्रदर्शन-चन्द्रोपस्थान-नामकरण-जन्मतिथ्यादियाग-(प्रोषितागतकर्म्मापरनामधेय) मूर्द्धाभिघ्राण-चूड़ाकरणोपनयनविधयः प्रदर्शिताः। तृतीयेऽध्याये,—गोदानव्रत-व्रातिकव्रतादित्यव्रतौपनिषदव्रत-ज्यैष्ठसामव्रत-महानाम्निकव्रतोपाकर्म्मोत्सर्गानध्यायाद्भुतप्रायश्चित्त-(समावर्त्तनापरनामधेय) आप्लावन-स्नातकव्रत-गोपुष्टिकर्म्म-गोयज्ञाश्वयज्ञ-श्रवणाकर्म्माश्वयुजीकर्म्म-नवयज्ञाग्रहायणीकर्म्म-स्रस्तरारोहणाष्टकाकर्म्माणि व्युत्पादितानि। चतुर्थेऽध्याये,—वपाश्रयणीहोमाष्टकाकर्म्मशेषान्वष्टक्य-पिण्डपितृयज्ञान्वाहार्य्य-वपाहोम-हलाभियोग-सीतायज्ञखलयज्ञ-प्रवपणयज्ञ-प्रलवनयज्ञ-पर्य्ययणयज्ञेन्द्राणीस्थालीपाक-काम्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

होमेतिकर्त्तव्यता-दीक्षाऽनेकप्रकारकाम्यकर्म्मावसाननिर्णय-वास्तुशमन-(मधुपर्कापरनामधेय) श्रर्हणान्युपदिष्टानि । श्रसङ्गागतञ्चान्यत् ।

गोभिलः कदा प्रादुरभूत् कदा वा तेनेदं गृह्यसूत्रं निर्म्मितमिति तत्त्वतोनिश्चेतुं न शक्यते । परमयं बहुप्राचीनइत्यत्र न सन्देहः । (सम्भावयामः) यदा गोभिलोग्रन्थमेतं रचितवान्, तदा लौकिकपद्यरचनायां लोकस्य कियदौत्सुक्यमजनि । यतोऽनेन गृह्यसूत्रस्य चतुर्थप्रपाठकस्य सप्तमकाण्डिकायां त्रीणि सूत्राण्यनुष्टुप्छन्दसा निर्म्मितानि । तत्रापि द्वितीयश्लोकस्य प्रथमचरणे नवाक्षराणि* तृतीयश्लोकस्य द्वितीयचरणे सप्ताक्षराणि† इति वैदिकवदेवाक्षरसमता नास्ति । वैदिकेषु छन्दःसु खल्वेकाक्षरन्यूनाधिक्यमगणनीयमेव‡ । गोभिलपुत्रेणापि पद्यैरेव गृह्यासंग्रहोऽरचि । तत्रापि वैदिकवदेव बहुत्राक्षरन्यूनाधिक्यं गुरुलघुभावव्यत्यासश्चोपलभ्यते । तदेवमनुमीयते ; यदा गोभिल-तत्पुत्राभ्यां ग्रन्थोनिरमायि, तदा लौकिकपद्यरचनाप्रणाली न सुशृङ्खला जाता । यदयं गोभिलः पद्यत्रयमात्रं निर्म्मिमाणोपि पद्यद्वयेऽक्षरन्यूनाधिक्यं कुर्व्वन् लौकिकछन्दसोलक्षणं न सुष्ठु रचितवान् । तच्चैतन्नाशक्तिकृतं किन्तु तात्कालिकरीत्यनुगतमिति लिख्यते । ततोग्रन्थोयं मन्वादिसंहिताभ्योबहुप्राचीनः, कैव कथा पुराणादीनां । पुराणादिप्रतिपाद्यदेवार्च्चनादिकं

---

* अश्वत्थादग्निभयं विद्यात् प्लक्षाद्ब्रूयात् प्रमायुकान् ।
न्यग्रोधाच्छस्त्रसंपीड़ामक्ष्यामयमुदुम्बरात् ॥

† आदित्यदेवतोऽश्वत्थः प्लक्षोयमदेवतः ।
न्यग्रोधोवारुणोवृक्षः प्राजापत्यउदुम्बरः ॥

‡ नह्येकस्मादक्षराद्विराधयन्ति । (ताण्ड्यब्राह्मण, १५ प्र० १२ ख०)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किमप्यत्र नोपलभ्यते। गृह्यशास्त्रस्य तु पुराणेषु मन्वादिस्मृतिषु च बहुत्रोल्लेखोवर्त्तते। गोभिलग्रन्थे च 'औद्गाहमानिः'—इति, 'वार्कखण्डिः'—इति चाश्रुतपूर्व्वं ऋषिनामद्वयं श्रूयते। तावेतावृषी ईदृक्प्राचीनौ यत् परवर्त्तिग्रन्थेष्वनयोर्नामापि न श्रूयते। अतोपि गोभिलस्यातिप्राचीनत्वं ज्ञायते।

अपि च। कलौ तावद्गवालम्भोमांसदानञ्च* श्राद्धे निषिद्धं। गोभिलेन तु मध्यमाष्टकायां वास्तुकर्म्मणि च गवालम्भोविहितः। मांसचरुश्चान्वष्टक्यश्राद्धे। ततः कलेः पूर्व्वमयं ग्रन्थोनिर्म्मितइति गम्यते। गोभिलश्चास्मिन् शास्त्रे वैदिकानपि शब्दान् प्रयुक्तवान्। सुराशब्दः खल्वनेन उदकार्थे प्रयुक्तः(गृ० २ प्र० १ का० १० सू०)। स तु वैदिकएव†। एवमन्येपि शब्दाअनुसन्धेयाः। सोयं सुराशब्दः कस्मिंश्चिदतीते काले उदकार्थे व्यवहृतआसीत्। स च कालोऽतीततमः। स्मार्त्तेषु ग्रन्थेषु तददर्शनात्। उपवसतिरपि अनेन कैश्चिन्नियमैर्विशिष्टस्य नियमितस्य वस्तुनएकस्मिन्नाहारे प्रयुक्तः‡। सोपि तस्मिन्नर्थे तदानीं व्यवहृतएवेति। गृह्यसूत्रकालात् परतस्त्वयमहोरात्राभोजनार्थे व्यवहृतोऽभूत्§। रचनारीतिरपि गोभिलस्य ब्राह्मणसम्बन्धिनीं रचना-

---

* अश्वमेधं गवालम्भं सन्यासं पलपैटकं। देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्। (मलमासतत्त्वधृतवचनं)।

† सुराशब्दोहि नैघण्टुककाण्डे (१, १२) उदकनामसु पठितः। तच्च तत्र पञ्चविंशतितमं नाम।

‡ "सन्ध्यां पौर्णमासीमुपवसेत्"—इति, "अथापराह्णएवाभुक्त्वौपवसथिकं दम्पती भुञ्जीयातां"—इत्यादिसूत्रसन्दर्भादयमर्थोऽवगम्यते।

§ नित्योपवासीयोमर्त्यः सायं प्रातर्भुजिक्रियां। सन्त्यजेन्मतिमान् विप्रः सम्प्राप्ते हरिवासरे। (एकादशीतत्त्वधृतं कात्यायनवचनं)।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रीतिमनुसरति। तस्मादनुमीयते–ब्राह्मणसमये प्रादुर्भूतोऽयमिति। स चायं पारस्कराश्वलायनाभ्यामपि पूर्व्वकालीनइति ज्ञायते। यतः "प्रेते वा गृहपतौ परमेष्ठिकरणं" (१प्र० १का० १२सू०) इति सूत्रयता गोभिलेन गृहपतौ प्रेते आधानमुक्तं। "आधानस्य तु चत्वार उक्ताः कालाः पृथक् पृथक्। अन्त्या समिद्विवाहस्य विभागः परमेष्ठिनः"—(गृह्या० १प्र० ७६ श्लो०) इति गोभिलपुत्रेण विभागकालोप्याधानकालतयोक्तः। पारस्करेण तु "दायायकालएकेषां" (१का० १६सू०) इति सूत्रयता तदुभयमुपन्यस्तं। एवं "अपिवान्यं मथित्वाऽभ्यादध्यात्" (१प्र० १का० १७सू०) इत्यारणेयोऽग्निर्गोभिलेनोक्तः। "अरणिप्रदानमेके" (१का० १८सू०) इति पारस्करेणैकेषां मतमिति कृत्वा तदुपन्यस्तं। तथा "अष्टका रात्रिदेवता" (३प्र० १०का० १सू०) इति सूत्रतया गोभिलेनाष्टकाया-रात्रिदेवतात्वमुक्तं। आश्वलायनेन तु अष्टकादेवताप्रस्तावे, "रात्रिदेवतामेके" (२अ० ४क० १२सू०) इति सूत्रयता गोभिलीयं मतमेतन्निर्दिष्टं। अतः पारस्कराश्वलायनाभ्यां गोभिलः प्राचीनतमः ग्रन्थश्चायं तत्तद्ग्रन्थाभ्यामिति स्निध्यते। आश्वलायनोप्यतीव प्राचीनः, स हि शाकलसमाम्नायस्य वाष्कलसमाम्नायस्य च कल्पसूत्रं प्रणिनाय। तत्प्रणीतञ्च महाव्रतप्रयोगप्रतिपादकं कल्पसूत्रं पञ्चमारण्यकतया वेदत्वेन प्रसिद्धं*। आश्वलायनप्रोक्तं ब्राह्मणमप्यस्ति†।

* वह्वृचामध्यापकामहाव्रतप्रयोगप्रतिपादकमाश्वलायननिर्म्मितं कल्पसूत्रमरण्येऽधीयमानाः पञ्चममारण्यकमिति वेदत्वेन व्यवहरन्ति। (जै०न्या० ६ अ० २ पा० १ अ० २ व०)।

† कठशाखाश्वलायनब्राह्मणं। आश्वलायनब्राह्मणं। (मलमासतत्त्वे)।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वह्वृचां शाखाभेदोपि आश्वलायनस्य नाम्ना प्रचरति। योहि ब्राह्मणस्य प्रवक्ता यदीयकल्पसूत्रस्यारण्यकतया प्रसिद्धिः, यन्नाम्नाच वेदशाखा-प्रचारः, स तु वैदिकसमये प्रादुर्भूतोऽतीवप्राचीनइत्यत्र कः सन्देहः। गोभिलस्त्वाश्वलायनादपि पूर्व्ववर्त्तीत्यतीव प्राचीनतरोयं वैदिककालीनश्चेति।

इदञ्चात्र द्रष्टव्यं। मन्त्रभागोक्तानां मन्त्राणां विनियोगः ब्राह्मणेषु श्रुत्यादितः। ब्राह्मणोक्तमन्त्राणाञ्च विनियोगः प्रायः कल्पसूत्रेषु। गृह्यसूत्रे त्वस्मिन् उपनिषद्ब्राह्मणापरनामधेय-मन्त्रब्राह्मणोक्तानां 'देवसवितः'—इत्यादि मन्त्राणां विनियोगोऽनुशिष्टः। मन्त्र ब्राह्मणे तु सर्व्वे संस्कारमन्त्राः पठिताः। संस्काराश्चातिप्राचीनतम-कालएव सुव्यवस्थाः इति ग्रन्थोप्ययमुपनिषद्ब्राह्मणप्रचारात् परतः प्राचीनतमकालएव निर्म्मितइत्यनुमीयते।

गोभिलसूत्रेभ्यस्तदानीन्तनोलोकाचारः कियानुपलभ्यते। सचेत्थं। त्रैवर्णिकाः साग्निकाः। वैदिक-दर्शपौर्णमासादि-स्मार्त्ताष्टकादि-यज्ञादि-धर्म्माचरणपराः। शूद्राणान्तु न कोपि धर्म्मस्तत्रोपलभ्यते। शूद्रैः सह गमनमपि निषिद्धं। ब्रह्मचर्य्याश्रमस्य बाहुल्येनाचरणं। विवाहः सुव्यवस्थः। गृहस्थानां दण्डादिधारणं। उपानद्धिरण्यस्रक्कञ्चादिकं सुव्यवहृतं। रथस्य बाहुल्येन व्यवहारः। गावोधनमभ्यर्हितं। अश्वोऽप्यभ्यर्हितएव। कृषिकर्म्मणां बाहुल्येन प्रचारः। ऋणादानं प्रवृत्तं। वाणिज्यस्य विस्तारः। क्षौमशाणौर्णवसनानां व्यवहारः। कृष्णसारादि-चर्म्मणां व्यवहारः। गोयानं व्यवहृतं। शकटं व्यवहृतं। नौर्व्यवहृता। मणिकोव्यवहृतः। अपूपाः व्यवहृताः। मांसभक्षणं व्यवहृतं। विस्तृतः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पन्थाः। वंशादिनिर्म्मितं निवेशनं। इष्टका प्रचरिता। सानुचरविचरणं। ऋतुमत्याअपि विवाहः। पत्युर्दक्षिणतः स्त्रियाउपवेशनं। रात्रौ स्त्रियाबलिहरणं। गृह्येऽग्नौ पत्न्याअपि होमः। चान्तशब्दस्य पुंसि-व्यवहारः। गृहागतानां ऋत्विगादीनामर्हणं। विवाहकाले स्त्रियाअपि कस्यचित् मन्त्रस्य पाठः। पाणिग्रहणात् परं तस्मिन्नेव दिने बध्वा सह श्वशुरगृहात् प्रस्थानं। वरस्य एकेनैव रथेन वरवध्वोः स्वगृहगमनं। विवाहात् प्रभृति त्रिरात्रं वरबध्वोरक्षारलवणाशनं भूमौ सह शयनञ्च। पतिगृहमागतायाः बध्वाआनडुहे चर्म्मण्युपवेशनं। द्युतं प्रवृत्तं। वास्तुविद्या प्रचरिता। ज्योतिर्व्विद्या सुव्यवस्थिता। विवाहे सुरा-व्यवहारोऽपि गोभिलपुत्रवाक्यादवगम्यते*। सोऽयमाचारोऽतीव प्राचीनइति ग्रन्थोप्ययमतीव प्राचीनइत्यवधार्य्यते।

अपिच। वंशब्राह्मणनामा योऽयं सामवेदस्याष्टमोब्राह्मणग्रन्थः, तत्र ब्रह्मणआरभ्य सामगाचार्य्याणामनुक्रमोऽस्ति। तत्र गोभिलस्यो-ल्लेखोवर्त्तते†। अतोमन्त्रब्राह्मणप्रचारात् परतः‡ वंशब्राह्मणप्रचारा-

* गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। पाणिकर्म्मणि गौड़ी स्यात् सत्या माध्वऽधमा सुरा। (गृह्या० २ प्र० १६ श्लो०)।

† नयन्नर्य्यमभूतेः कालववादर्य्यमभूतिः कालववोभद्रशर्म्मणः कौशिकाद्भद्र-शर्म्मा कौशिकः पुष्ययशसऔदव्रजेः पुष्ययशाऔदव्रजिः शङ्कराद्गौतमात् शङ्करोगौतमोऽर्यमराधाच्च गौतमात् पूषमित्राच्च गोभिलात् पूषमित्रोगोभि-लोऽश्वमित्राद्गोभिलादश्वमित्रोगोभिलोवरुणमित्राद्गोभिलाद्वरुणमित्रोगो-भिलोमूलमित्राद्गोभिलान्मूलमित्रोगोभिलोवत्समित्राद्गोभिलाद्वत्समित्रो-गोभिलोगौल्गुलवीपुत्राद्गोभिलाद्गौल्गुलवीपुत्रोगोभिलोबृहद्वसोः पितुर्बृहद्व-सुर्गोभिलोगोभिलादेव गोभिलोराधाच्च गौतमात् समानं परं समानं परं। (वंशब्राह्मण ३ प्र०)।

‡ मन्त्रब्राह्मणोक्तानां मन्त्राणामत्र विनियोगस्य सूत्रणात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चार्व्वाक् गोभिलः प्रादुर्भूतइति ध्रुवं। ब्राह्मणानां वेदतता यद्यप्यपौरुषेयत्वं भगवतोजैमिनेरनुमतं, तथापि तेषां प्रवचनकालभेदो न शक्योऽपलपितुं। अस्मिंश्चार्थे, "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु" (पा० ४अ० ३पा० १०५ सू०) इति सूत्रयतः पाणिनेः स्वरसोऽप्यवगम्यते। अस्मात् खलु सूत्रादिदमवगम्यते; यद्ब्राह्मणकल्पाः पुराणप्रोक्ताअर्व्वाचीनप्रोक्ताश्च सन्तीति। तथाच, "पुराणप्रोक्तेष्विति किं याज्ञवल्क्यानि ब्राह्मणानि आश्मरथ्यः कल्पः। याज्ञवल्क्यादयोऽचिरकालादृत्याख्यानेषु वार्त्ता, तया व्यवहरति सूत्रकारः"—इति जयादित्येनोक्तं। एवं "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्"—इति वार्त्तिककारेणाभिहितं। तथा, "पुराणप्रोक्तेष्वित्यत्र याज्ञवल्क्यादिभ्यः प्रतिषेधोवक्तव्यः। याज्ञवल्क्यानि ब्राह्मणानि सौलभानीति। किं कारणं। तुल्यकालत्वात्। एतान्यपि तुल्यकालानीति"—इति व्याकरणमहाभाष्यं। तदनेनावगम्यते सर्व्वाणि ब्राह्मणानि नैकस्मिन् समये प्रोक्तानि, किन्तु कालभेदेन, तदमीषां कानिचित् चिरकालं प्रोक्तानि, कानिचिच्चाचिरकालमिति। ब्राह्मणाञ्च मन्त्रव्याख्यानरूपतया मन्त्रभागात् पराचीनत्वं ज्ञायते—इत्यन्यदेतत्। भगवतोवात्स्यायनस्य तु मतं ऋषिरुपदेष्टा ब्राह्मणानामिति लक्ष्यते। तथाच तेनोक्तं न्यायभाष्ये। "न भिद्यते च लौकिकाद्वाक्याद्वैदिकं वाक्यं प्रेक्षापूर्व्वकारिपुरुषप्रणीतत्वेन, तत्र लौकिकस्तावदपरीक्षकोपि न जातमात्रं कुमारकमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्य्यं चरेति, कुतएवं ऋषिरुपपन्नानवद्यवादी उपदेशार्थेन प्रयुक्तउपदिशति" (न्या० भा० ४अ० १आ० ६०सू०) इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा "यएव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति"—(न्या० भा० ४ अ० १ आ० ६२ सू०) इति। यद्यपि स्नानग्रन्थे वंशब्राह्मणोक्तस्य "नमोब्रह्मणे"—इत्यादिकस्य तर्पणे विनियोगो दृश्यते, तथापि गोभिलस्य वंशब्राह्मणप्रचारात् पराचीनत्वं न शङ्कितुमर्हं। स्नानग्रन्थस्य गोभिलपरिशिष्टरूपतया वीरमित्रोदयादावुक्तत्वात्। अतएव तद्ग्रन्थशेषे "इति गोभिलीयाः" इत्यभिधानं सङ्गच्छते। गोभिलकृतत्वे तस्य तन्नोपपद्यते।

परन्तु वंशब्राह्मणे बहवोगोभिलाउल्लिखिताः। तत्र, कतमो गोभिलोगृह्यसूत्रस्यास्य कर्त्तेति न तत्त्वतोऽधिगच्छामः। (सम्भावयामः) योयं निरूपपदोगोभिलोवृहद्वसोराचार्य्यः शिष्यश्च राधगौतमस्य, सोयं गृह्यसूत्रस्य कर्त्ता इति। यतोगोभिलकृतितयैवास्य प्रसिद्धिर्न नामान्तरेण। गृह्यासंग्रहेऽपि गोभिलतयैवास्योल्लेखः। गोभिलश्च निरूपपदः सएव। स खल्वयं गोभिलसम्प्रदायानामादिभूतः पूर्व्वतनोऽष्टमश्चेति वंशब्राह्मणप्रचारकालादपि चिरन्तनः—इति शिवं।

महर सेरपुर। १३ आषाढ़। १८०२ शकाब्दे।	तर्कालङ्कारोपनामक श्रीचन्द्रकान्तशर्म्मणः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलगृह्यसूत्रभाष्ये क्रोड़पत्राणि ।

६ पृष्ठे १० पंक्तौ "न 'गृह्यसंग्रहः' इति।" इत्यतः परं निवेश्यम् । तथाचाचार्य्यपुत्त्रआह । "पत्न्यः पुत्त्राश्च कन्याश्च जनिष्याश्चापरे सुताः। गृह्याइति समाख्याताययजमानस्य दायकाः । तेषां संस्कारयोगेन शान्तिकर्म्मक्रियासुच। आचार्य्यविहितः कल्पस्तस्माद् गृह्याइति स्थितिः"। इति ।

---

३० पृष्ठे ६ पंक्तौ "चेत्याहुः"—इत्यतः परं निवेश्यं । स खल्वयमभिरूपः,—"यत्र विद्या च वित्तञ्च सत्यं धर्म्मः शमोदमः। अभिरूपः स विज्ञेयः स्वाश्रमे योव्यवस्थितः" इति गृह्यासंग्रहोक्तो द्रष्टव्यः ।

---

३५ पृष्ठे १० पंक्तौ निवेश्यं* ।

इति । "पार्थिवी चैत्र भौमीच लेखे द्वे द्वादशाङ्गुले । एकविंशति-राग्नेयी प्रादेशिन्ये उभे स्मृते। षड़ङ्गुलान्तराः कार्य्याआग्नेयीसंहितास्तु ताः । पार्थिवायास्तु रेखायास्तिस्रस्ताउत्तरोत्तराः ।

---

३५ पृष्ठे १३ पंक्तौ निवेश्यं ।

"एषलेखविधिः प्रोक्तोगृह्याकर्म्मसु सर्व्वसु" इतिच । एतस्माद्वचनाद्

---

* यत्र यत्र 'पंक्तौ निवेश्यं'—इत्युच्यते, तत्र पंक्तिशेषे निवेशोबोध्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृह्याकर्म्मस्वयमेव लेखविधिरादरणीयः । अन्यत्र पुनः कात्यायनोक्त इति बोद्धव्यम् । एवञ्च रेखादैवतवर्णयोरपि गृह्यासंग्रहोक्तकल्प-एवाभिनिवेशः तत्रैवाभिधानात् ।

३८पृष्ठे १२पंक्तौ "समाम्नानात्"—इत्यतः परं निवेश्यम् । परमार्थतः पुनर्गृह्योक्तकर्म्मसु पारशाखिकगुणोपसंहारोनास्ति, किन्तु श्रौतेष्वेव स इति गृह्यासंग्रहभाष्ये निपुणतरमुपपादयिष्यामः ।

४६पृष्ठे ६पंक्तौ "किञ्चिदनुचितम्"—इत्यतः परं निवेश्यं । आचार्य्यपुत्रोप्येतस्माद्भेदेनैव विभागस्याधानकालत्वमाह। तथाच गृह्या-संग्रहः । "आधानस्य तु चत्वारउक्ताः कालाः पृथक् पृथक् । अन्त्या समिद्विवाहस्य विभागः परमेष्ठिनः" इति ।

५४पृष्ठे १३पंक्तौ 'रत्नेदित्येतत्'—इत्यतः परं निवेश्यं । अथैवमुत्तरसूत्रे, 'सएव'—इत्यस्यैवाग्नेः परामर्शात् 'प्रेते वा गृहपतौ'—इत्यादिकालाहितानामग्नीनां गृह्यत्वं न प्राप्नोति ? । नैष दोषः । प्राधान्यात् खल्वाचार्य्यः 'सएव' इत्याह । ततएवारभ्य खल्वसौ गृहस्थोभवति । अन्यस्याप्यग्नेर्गृह्यत्वं वास्तवमिति न शक्यं निरसि-तुम् । स्मार्त्तः खल्वग्निरेवमभिधीयते ।

परतरेण वा सूत्रेणैतत् संभंत्स्यते । कथं कृत्वा ? । यदेवान्त्यां समिधमभ्यादधाति, यदेव च जायायाः पाणिं जिघृक्षन् जुहोति, तं होममभिसंयच्छेत्—अभिमुख्येन सम्यक् कुर्य्यात्, तेन चैव होमे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नास्य प्रातराहुतिर्हुता भवतीति। सोयमित्थं परतरेणास्याभिसंबन्धः। अस्याञ्च वर्णनायामुत्तरसूत्रे 'सएव'—इति पूर्व्वप्रकृतः सर्व्वोप्यग्निः परामर्ष्टव्योभवति। कथं पुनरतिक्रम्य परसूत्रं परतरेण सूत्रेण संभंत्स्यते?। अतिक्रान्तसंबन्धस्याचार्य्यानुमतत्वादित्याह। कथं ज्ञायते?। "पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितं। गोभिले ये न गृह्णन्ति न ते ज्ञास्यन्ति गोभिलं" इति गृह्यासंग्रहवचनात्। उत्तरसूत्रएव वा 'सएव'—इति व्यवहितोपि सर्व्वाग्निः परामृश्यतामिति न किञ्चिदनुचितम्।

५७पृष्ठे २पंक्तौ 'क्रियते'—इत्यतः परं निवेश्यं।

अन्यत्र परमेष्ठिविभक्तयोरग्न्योः। तथाच गृह्यासंग्रहः। "परमेष्ठी विभक्तस्तु जुहुयादक्षतान् सकृत्। प्रातस्तूष्णीं घृतं वापि प्रातराहुत्युपक्रम."—इति।

६२पृष्ठे ११पंक्तौ 'अत्रच'—इत्यतः परं निवेश्यं।

"गोभिर्वालपवित्रेण धार्य्यमाणेन नित्यशः। न स्पृशन्तीह पापानिश्रियं गात्रेषु तिष्ठति"—इति।

१०३पृष्ठे ८पंक्तौ 'मधस्तादेव'—इत्यतः परं निवेश्यं।

अभ्युपगम्य चेमं तर्पणयोः प्रकृतिविकारभावमेतावदस्माभिर्विचारितम्। परमार्थतः पुनरनयोः प्रकृतिविकारभावएव नास्ति। कुतः?। द्वयोरेव सपरिकराभिहितत्वात्। स्नानाङ्गतर्पणं खल्वाचार्य्येण सपरिकरमभि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हितं स्नानग्रन्थे । तथैव प्रधानतर्पणं कात्यायनेन कर्म्मप्रदीपे । कः खल्वनुन्मत्तः सपरिकराभिहितयोरनयोः प्रकृतिविकारभावमाचक्षीत ! । तस्मादन्यादृशमेव तर्पणं स्नानाङ्गं सवितुरुपस्थानात् परतः करणीयमाचार्य्येणोक्तम्, अन्यादृशमेव च प्रधानं तर्पणं ब्रह्मयज्ञात् परस्तात् कर्त्तव्यं कात्यायनेनोक्तमिति न किञ्चिदनुचितम् ।

२११पृष्ठे ८पंक्तौ 'सूचयति'—इत्यतः परं निवेश्यं । उपकल्पनञ्चामीषामग्नेरुत्तरतउदगग्राणां प्राञ्चं प्राञ्चं प्रयोजनानुसारेण करणीयम् । तथाच कर्म्मप्रदीपः । "प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः । तत्तथाऽऽसादयेत् द्रव्यं यद्यथा विनियुज्यते"—इति । उपकल्पितानाञ्चामीषां वीक्षणं प्रोक्षणञ्चाद्भिः कर्त्तव्यम् । कुतः ? । "द्रव्याणामुपक्लृप्तानां होमीयानां यथाविधि । प्रसिञ्चन् वीक्षणं कुर्य्यादद्भिरभ्युक्षणन्तथा"—इति गृह्यासंग्रहवचनात् । तदिदं द्रव्यासादनं स्थण्डिलोपलेपनात् परतएव करणीयम् । तथैवाचार्य्येण सूत्रणात् । आचार्य्यपुत्रोऽपि गृह्यासंग्रहे । "भूमेः समूहनं कृत्वा गोमयेनोपलिप्य च । द्रव्याण्युत्तरतः स्थाप्य वृषीं कुर्य्यादुदङ्मुखीम्"—इत्युपलेपनात् परं द्रव्यासादनमभिधाय, पश्चाल्लक्षणकरणमग्निस्थापनादिकञ्चाभिहितवान् । एवञ्च, "पुरोडाशकपालेन तुषानुपवपति"—इत्यत्र यथा भविष्यता पुरोडाशेन कपालस्याभिसंबन्धः, तद्वदत्रापि भविष्यतैवाग्निना उत्तरस्याभिसंबन्धोबोद्धव्यः । अग्निस्थापनात् पूर्व्वमेव द्रव्यासादनस्योपदेशादनन्यगतेर्व्वचनात् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२२०पृष्ठे १३पंक्तौ 'गृह्यान्तरम्'—इत्यतःपरं निवेश्यं । सेयमसङ्गता वर्णना । कस्मात् ?। आचार्य्यपुत्राभिहितक्रमविरोधात् । तथाच गृह्यासंग्रहः । "लेखनाभ्युक्षणे कृत्वा निहितेऽग्नौ समिद्दत् । ततोभूमिग्रहं कृत्वा कुर्य्यात् परिसमूहनम् । ब्रह्माणमुपसंकल्प्य चरु-अपणमारभेत्"—इति । कर्म्मप्रदीपोक्तस्तु क्रमआधानविषयः । कुतः? । तत्रैव तदभिधानात् । गृह्यान्तरमपि अन्येषामेव नास्माकम् । कात्यायनादिभिर्हि तत् सूचितम्। ते किल काण्वादिशाखिनां सूत्रकाराः ।

२२८पृष्ठे ९पंक्तौ, 'तत्त्वकारः'—इत्यतःपरं निवेश्यं । परमार्थतः पुनर्विकल्पएवानयोर्वक्तव्यः । कथं नाम ? । पञ्चाशद्भिर्वा-कुशैर्भवेत् अपरिमितैर्वा,—इति । कुतः ? । संख्यावचनस्याप्यस्मच्छाखा-विषयत्वात्। गृह्यासंग्रहे खल्वाचार्य्यपुत्रः "पञ्चाशद्भिः कुशैर्ब्रह्मा",—इत्याह ।

२२९पृष्ठे १६पंक्तौ, 'उक्तम्'—इत्यतःपरं निवेश्यं । इदन्त्विह वक्तव्यम्। कर्म्मप्रदीपकृता पदार्थानामुपन्यासमात्रं कृतं न तु क्रमोप्यमीषामभिहितः । तथाविधवचनव्यक्तेरभावात्। तत्र, चर्व्वङ्ग-मभिधाय भूमिजपप्रकाराभिधानात् खल्वानुमानिकः क्रमः परिचि-कल्पयिषितः। स चायमाचार्य्यपुत्राभिहितप्रत्यक्षक्रमविरोधाद्भवितुं नार्हति । तथाच "लेखनाभ्युक्षणे कृत्वा"—इत्यादि पुरस्तादुदाहृतम् । तस्मादाचार्य्यपुत्रवचनात् भूमिजपं त्र्यृचेन परिसमूहनञ्च कृत्वा ब्रह्म-स्थापनं कर्त्तव्यं, ततश्चरुश्रपणमित्यादरणीयम्। न चेदेवम्, कर्म्मप्रदीप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृता दक्षिणामभिधाय चर्व्वङ्गस्याभिधानात् दक्षिणानन्तरं चरुः स्यात् । आचार्य्योऽपि ब्रह्मस्थापनात् परम्, "अथोलूखलमूषले"— इत्यादिना चरुश्रपणं सूचयिष्यति । तस्मात् 'अन्यत्' चरुश्रपणादिकम्,—इति वर्णनीयम् । अनर्थकं तर्हि; ननु 'अथोलूखलमूषले'— इति सूचयिष्यत्येव । नानर्थकम् । कुतः ? । सामान्यविशेषभावोपपत्तेः । अन्यत् चेष्टेत,—इति सामान्यतः सूचयित्वा, अथोलूखलमूषले,—इत्यादिना विशेषतः सूचणमुपपद्यते । आदरार्थत्वाच्च । आदरार्थं पुनरुपादानं खल्वाचार्य्याणां बहुलमुपलभ्यते । शास्त्रे चास्मिन् पुनरुक्तिराचार्य्यस्यानुमतेति पुरस्तान्निवेदितमस्माभिः । यत्र तु चरुर्नास्ति, तत्र, अन्यत् आज्यसंस्कारादिकम्,—इत्यभिप्रेत्य वा वचनमेतदुपपादनीयम्। द्रव्यासादनन्तु आस्तां तावदिदानीं, यावदग्निस्थापनादपि पूर्व्वं करणीयमिति पुरस्तादेव व्यवस्थापितमित्यास्तां विस्तरः ।

२३१पृष्ठे २०पंक्तौ, 'व्यपीत्यर्थः'—इत्यतःपरं निवेश्यं । प्रकारान्तरमाह गृह्यासंग्रहः । "चतुर्मुष्टिश्चरुः कार्य्यस्तूर्णामुत्तरोऽपि वा"—इति । मुष्टिः पलमिति गृह्यासंग्रहभाष्ये वक्ष्यामः ।

२३४पृष्ठे ११पंक्तौ निवेश्यं ।

अभिघारणञ्चेदं शृतं पवित्रान्तर्हितं कृत्वा करणीयम् । तथाच गृह्यासंग्रहः । "पवित्रान्तर्हितं कृत्वा चरुं प्राज्ञोऽभिघारयेत् । उद्वास्य चैव विधिना एवं तन्त्रं न लुप्यते" इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२३७पृष्ठे १८पंक्तौ 'प्रातर्होमादिभ्यः'—इत्यतः परं निवेश्यं ।
यत्र पुनश्चरुर्न क्रियते, तत्र ब्रह्मैव स्तरणकार्य्यं करोति, नत्वन्यत् परिस्तरणं करणीयम्। कुतः?। "ब्रह्माणं स्तरणं विद्याच्चरुर्यत्र न कल्पितः"—इति गृह्यासंग्रहवचनात्।

२३८पृष्ठे १२पंक्तौ, 'इति'—इत्यतः परं निवेश्यं ।
तदिमे परिधयोगृह्याकर्मसु न करणीयाः। तथाच गृह्यासंग्रहः। "परिधींस्तु न कुर्व्वीत गृह्याकर्मसु याज्ञिकः। उदकाञ्जयस्तिस्रस्ते वै परिधयः स्मृताः"—इति ।

२३९पृष्ठे २पंक्तौ, 'मन्यन्ते'—इत्यतः परं निवेश्यं ।
सेयं विहितप्रतिषिद्धा प्रणीता गृह्याकर्मसु नोपकल्पयितव्या। कुतः?। "विहितप्रतिषिद्धाच्च प्रणीतां नोपकल्पयेत्"—इति गृह्यासंग्रहवचनात्।

२४१पृष्ठे १८पंक्तौ निवेश्यं ।
"एतत् सम्पूयनं नाम पश्चादुत्पवनं स्मृतम्" ।

२४३पृष्ठे ११पंक्तौ, 'भट्टभाष्यम्'—इत्यतः परं निवेश्यं ।
गृह्यासंग्रहस्त्वाह । "आज्यानां सर्पिरादीनां संस्कारे विधिचोदिते । अनधिश्रयणं दध्नः शेषाणां श्रयणं स्मृतम्"—इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२५५पृष्ठे १४पंक्तौ निवेश्यं ।

येषान्तु प्रतिपत्त्यर्थकर्म्म स्विष्टकृदितिदर्शनम्, तेषां खल्वेतदपचारेपि शेषम्याज्येन होतव्यं भवति ।

२६३पृष्ठे १७पंक्तौ निवेश्यं ।

तदेतत् सर्व्वं पूर्व्वनिबद्धृणां मतमनुसरद्भिरस्माभिर्व्याख्यातं विचारितञ्च। परमार्थतस्तु प्रतिपत्तिरेवैतन्न भवति । कुतः?। निर्द्देशसामान्यात् । "ततएव वर्हिषः प्रादेशमात्रे पवित्रे कुरुते"—इति वदत्रापि, "ततएव वर्हिषः कुशमुष्टिमादाय"—इति निर्द्दिश्यते । अस्माच्च निर्द्देशसामान्यात् तत्रइव अत्रापि स्तृतशेषाणि वर्हींषि हृदयमागच्छन्ति । आगच्छन्ति चेत्, न युज्यते विनाकारणमुत्स्रष्टुम् । स्तृतानां वर्हिषामिदानीं प्रतिपिपातयिषितत्वादिति चेत् । न । प्रमाणाभावात् । प्रतिपत्तिप्राये वचनादिति चेत् । न । असिद्धेः । कथमसिद्धिः ? । आग्नेयादीनामप्रतिपत्तीनां सन्निहिततरत्वात् । तदेवं प्रमाणविशेषस्याभावात् विनियुक्तविनियोगेन खल्वपि युक्तोवर्णयितुम् । प्रतिपत्तिप्रायेवचनात् खल्वानुमानिकं प्रतिपत्तित्वं परिचिकल्पयिषितम्। तच्चैतत् न्यायविरोधान्न सेद्धुमर्हति । तस्मात् "विरोधे च श्रुतिविशेषादव्यक्तः शेषे"—इति सिद्धान्तात् स्तृतशेषादेव वर्हिषः कुशमुष्टिमादाय, —इति व्याख्येयम् । तदेतदाचार्य्यपुत्रः स्पष्टयाञ्चकार गृह्यासंग्रहे । "स्तृतेभ्योन प्रचिन्वीयात् यातयामं स्तृतं स्मृतम् । स्तृतशेषात्ततोगृह्य यज्ञवास्तुक्रिया तथा"—इति । यज्ञवास्तुक्रियां कृत्वा चाज्येन पूर्णाहुतिर्होतव्या । तथाच गृह्यासंग्रहः । "यज्ञवास्तुक्रियां कृत्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विधिदृष्टेन कर्म्मणा। आज्यधारामविच्छिन्नां जुहुयात् सार्व्वकामिकीम्"—इति।

२६९पृष्ठे ३पंक्तौ निवेश्यं।

सूत्रद्वयं वैतत्,—'पूर्णपात्रोदक्षिणा'—इति, 'तं ब्रह्मणे दद्यात्'—इति च। तत्र, 'पूर्णपात्रोदक्षिणा'—इत्यनेन, पूर्णपात्रं दक्षिणा भवति कर्म्मणाम्, अनुच्यमानायां दक्षिणायाम्—इत्युच्यते। कथं ज्ञायते?। अनुच्यमानायां दक्षिणायां पूर्णपात्रादिका दक्षिणा भवति,—इति कर्म्मप्रदीपवचनात्।

'तं ब्रह्मणे दद्यात्'—इत्यनेन ब्रह्मणे दक्षिणायादानमुपदिश्यते। तदनेन तत्शब्देन दक्षिणैव परामृश्यते न पूर्णपात्रम्। कस्मात्?। सन्निहिततरत्वात् दक्षिणायाः, व्यपेतत्वाच्च पूर्णपात्रस्य। अर्थवत्वाच्च। दक्षिणादानेन हि नः प्रयोजनं न पूर्णपात्रदानेन। लिङ्गव्यत्ययस्तु भवतोऽपि समानः। 'ब्रह्मणे दक्षिणा देया'—इति कात्यायनवचनाच्चैतदेवं प्रतिपत्तव्यम्। स खल्वस्पष्टानां गोभिलोक्तानां प्रतीपवत् स्पष्टमुपदेष्टा,—इत्यवोचाम।

२७०पृष्ठे १२पंक्तौ निवेश्यं।

अथ वा। एकोब्रह्मैव ऋत्विगिति ब्रह्मणे दक्षिणादाने हेतुवचनमेतत्। होताप्यस्त्यन्यऋत्विगित्याशङ्कायामुत्तरं सूत्रं प्रवर्त्स्यति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२८०पृष्ठे ३पंक्तौ 'वाभिषेकः'—इत्यतः परं निवेश्यं।
तथाच गृह्यासंग्रहः। "सर्व्वयज्ञेषु विप्राणामद्भिः पूर्णं प्रवर्त्तते। तस्मात् सुरोत्तमाह्यापोऽद्भिरेवाभिषेचयेत्"—इति।

२९१पृष्ठे २१पंक्तौ 'रित्येतत्'—इत्यतः परं निवेश्यं।
तथाच गृह्यासंग्रहः। "महानदीषु या आपः कौप्यान्याश्च ह्रदेषु च। गन्धवर्णरसैर्युक्ताभुवास्तादिति निश्चयः"—इति। तदेवं भुवाभिरद्भिः

२९२पृष्ठे २पंक्तौ 'इत्यन्ये'—इत्यतः परं निवेश्यं।
रस्तुतस्तु गन्धमाल्यैरुदकुम्भमलङ्कृत्य प्रावृतांसोधारयेत्। कथं ज्ञायते?। "गन्धमाल्यैरलङ्कृत्य सकुम्भोवाग्यतः शुचिः। धारयेत् त्रिषु वर्णेषु प्रावृतांसोद्विजोत्तमः"—इति गृह्यासंग्रहवचनात्।

२९३पृष्ठे १५पंक्तौ निवेश्यं।
अत्र च, "स्वर्णाभिरनिन्द्याभिरद्भिरक्षतमिश्रितैः। स्नानं चतुर्भिः-कलसैः स्त्रीभिः स्त्रीं यत्र स्नावनम्"—इति गृह्यासंग्रहोक्तोविशेषो द्रष्टव्यः।

२९७पृष्ठे २पंक्तौ निवेश्यं।
तथाच गृह्यासंग्रहः। "यदा निष्क्रामयेत् कन्यां वरः पाणिं जिघृक्षयन्। अग्निं प्रदक्षिणं कृत्वा कटस्तीर्णं पदंव्रजेत्। पदा प्रपद्य पन्थानं पतियानं भंजपेद्वधूः। वरोवाऽत्र जपेन्मन्त्रमाकटान्तादितिस्थितिः"—इति।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२०५पृष्ठे ३पंक्तौ, 'इति'—इत्यतः परं निवेश्यं ।

वस्तुतस्तु, "तथा लाजाञ्जलिर्बध्वा हूयतेऽङ्गुलिपर्व्वभिः"—इति गृह्या-संग्रहोक्तप्रकारेणास्माकमयं होमोभवति, न शाखान्तरोक्तप्रकारेण। स्वशाखाश्रयमुत्सृज्य परशाखाश्रयकरणस्य निषेधादिति द्रष्टव्यम्।

२०८पृष्ठे ४पंक्तौ निवेश्यं ।

"प्राजग्राहमुदग्राहं ब्रह्माणमृत्विजं तथा। एतानि वाह्यतः कृत्वा शेषाणान्तु प्रदक्षिणम्"—इति। यश्चायं होमात् परतः परिणयः, सोयं ब्राह्म्यादिषु विवाहेषु द्रष्टव्यः। गान्धर्व्वादिषु पुनर्व्विवाहेषु प्रथममेव परिणयः ततोहोमः करणीयः। तथा च गृह्यासंग्रहः। "ब्राह्म्यस्यार्षस्य दैवस्य प्राजापत्यस्य याज्ञिकैः। पूर्व्वं होमविधिः प्रोक्तः पश्चात् परिणयः स्मृतः। गान्धर्व्वासुरपैशाचाविवाहाराक्षसाश्च ये। तेषां परिणयः पूर्व्वं पश्चाद्धोमो विधीयते"—इति। स खल्वयमाचार्य्योब्राह्म्यादीन् प्रशस्तान् विवाहानभिप्रेत्य होमात् परतः परिणयनं सूचयाञ्चकार,—इति लिख्यते ।

२०९पृष्ठे १२पंक्तौ 'गृह्यान्तराच्च'—इत्यतः परं निवेश्यं ।

नैतत् समीचीनम्। कुतः?। स्वशास्त्रविरोधात्। तथा च गृह्या-संग्रहः। "एवं लाजहविः शेषं हूयते सूर्पजिह्वया"—इति। तस्मादस्माकं सूर्पजिह्वयैतद्धोतव्यं भवति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२१२पृष्ठे ७पंक्तौ, निवेश्यं ।

तथाच गृह्यासंग्रहः । 'विवाहे यो विधिः प्रोक्तोमन्त्रादाम्पत्यवाचकाः । वरस्तु तान् जपेत् सर्व्वान् ऋत्विक्राजन्यवैश्ययोः',—इति ।

२१८पृष्ठे १७पंक्तौ 'रुच्यते'—इत्यतः परं निवेश्यं ।

तथाच गृह्यासंग्रहः । "कृत्वाऽऽज्यं परिशेषेण यत् द्रव्यमुपकल्पितम् । स्रुवेणैव तु तत् स्पृष्टं सम्पातञ्चैव तं विदुः"—इति ।

२२३पृष्ठे ८पंक्तौ 'प्रमाणाभावात्'—इत्यतः परं निवेश्यं ।

वस्तुतस्तु आसुरादिविवाहोढ़ायाः प्रेतकृत्यं पितृगोत्रेण कर्त्तव्यमिति वृद्धशातातपेनोक्तम् । यथा । "आसुरादिविवाहेषु पितृगोत्रेण धर्म्मवित्"—इति । सपिण्डीकरणन्त्वस्यास्तन्मात्रादिभिः करणीयमित्याह सएव । "तन्मात्रा तत्पितामह्या तत्श्वश्र्वा वा सपिण्डनम् । आसुरादिविवाहेषु विन्नानां योषितां भवेत्"—इति । एवमपि, सपिण्डीकरणेनैकभूर्त्तित्वप्राप्तेर्हेतुत्वेनोपादानात् प्राचीनं वचनम्—चतुर्थीतः पूर्व्वमेव या संस्थिता, तद्विषयमेव पर्य्यवस्यति,—इति ध्येयम् ।

२२७पृष्ठे ७पंक्तौ निवेश्यं ।

परमार्थतस्तु, तत्र 'हविष्यमन्नम्'—इति सूत्रयन् एतदेवाक्षारलवणं व्याकरोति । तस्मात्,—"अयुक्तमम्ललवणैरपर्य्युषितमेवच । हविष्यमेतदन्नाद्यमसुरैश्चाप्यसंयुतम्"—इति गृह्यासंग्रहोक्तस्याशनं बोद्धव्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२४४पृष्ठे १५पंक्तौ 'एवायमर्थः'—इत्यतः परं निवेश्यं ।

वस्तुतस्तु, उद्वर्त्तनं नखरोमच्छेदनं मेखलायाः स्रंसनञ्च हासनमुच्यते । कथं ज्ञायते? । "उद्वर्त्तनं नखच्छेदो रोमच्छेदनमेवच । स्रंसनं मेखलायास्च हासनानि विदुर्बुधाः"—इति गृह्यासंग्रहवचनात्। एतदविद्वांसएव 'क्रामयित्वा'—इति पठन्ति । तदश्रद्धेयम् ।

२५२पृष्ठे २पंक्तौ निवेश्यं ।

वस्तुतस्तु मन्त्रानादेशे व्याहृतयः प्रयोक्तव्याभवन्ति । कुतः? । "यत्र मन्त्रान विद्यन्ते व्याहृतीस्तत्र योजयेत्"—इति गृह्यासंग्रहवचनात् । चरुश्रपणादिकमेव तूष्णीं कर्त्तव्यमिति तत्रैव ज्ञेयम्। तस्मात् व्याहृतिभिरंशस्याभिमर्शनं मन्त्रेण नाभिदेशस्य,—इत्यादरणीयम् ।

२६६पृष्ठे १पंक्तौ 'सिद्धम्) ।'—इत्यतः परं निवेश्यं ।

अथ वा । युग्मम्—इति च्छेदः । युग्ममुभयतः फलम्, तं पूर्व्वमाहृतम्,—

२६७पृष्ठे १८पंक्तौ निवेश्यम् ।

तत्र ब्रूमः । यत्तावदुक्तम्,—प्रथमएवोन्नयने तिस्रोदर्भपिञ्जल्योव्याप्रियन्ते एवमुत्तरयोः,—इति, एतद्ब्रूमः । यत् पुनरुक्तम्,—उन्नयनत्रित्वाद्दर्भपिञ्जल्योपि नवैव सम्पद्यन्ते,—इति, एतन्नानुजानीमः । किं कारणम्? । मानाभावात् । 'भूरितिदर्भपिञ्जलीभिरेव प्रथमं भुवरिति द्वितीयं स्वरिति तृतीयम्'—इति वचनात् खलु तिसृणामेव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्भपिञ्जलीनां सर्व्वैरुन्नयनैः संबन्धोऽवगम्यते। नासौ युज्यते विना-कारणमुत्स्रष्टुम् । तस्मात्—एकैकया पिञ्जल्या एकैकमुन्नयनम्,—इत्यसङ्गतं वचनन् । तथाच गृह्यासंग्रहः। "सीमन्ते दर्भपिञ्जल्यस्ति-स्रस्ताभिस्तिस्रुन्नयेत्"—इति। तस्मात् तिस्रएव दर्भपिञ्जल्यस्ताभिरेव प्रथमभुन्नयनं ताभिरेव द्वितीप ताभिरेव तृतीयमित्यास्थेयम् ।

२६८पृष्ठे २पंक्तौ 'प्रचालनम्'—इत्यतः परं निवेश्यं ।

निर्व्वपणन्त्वत्र नास्ति । तथाच गृह्यासंग्रहः । "चूड़ाकर्म्मणि सीमन्ते यस्य पाकः सदा गृहे । विवाहेचैव लाजानां नोक्तोनिर्व्वपणोविधिः" —इति ।

४०४पृष्ठे १पंक्तौ निवेश्यं ।

इति । "दक्षिणाकपर्द्दाः शिष्टात्रेयास्त्रिकपर्द्दिनः । आङ्गिरसः पञ्चचूड़ामुण्डाभृगोः शिखिनोऽन्ये" ।

४३८पृष्ठे ७पंक्तौ, 'शब्दस्यार्थः'—इत्यतः परं निवेश्य ।

वस्तुतस्तु सावित्रव्रतमष्टभिर्वर्षैर्मासैर्द्दिनैर्वा करणीयम् । कुतः? । "समामासास्त्रहोरात्रास्तुल्यास्ब्राह्मणचोदिताः । सावित्रमष्टभिर्वर्षैः कार्य्यं मासैर्द्दिनैश्च वा"—इति गृह्यासंग्रहवचनात् । तस्मात् नात्र संवत्सर-व्रताचरणनियमः । 'नाचरिष्यन्तं संवत्सरमुपनयेत्'—इति गोदाना-दिव्रतविषयम्। कथं ज्ञायते?। गोदानव्रतएव तदभिधानात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४४२पृष्ठे ११पंक्तौ निवेश्यं।

वस्तुतस्तु गोदानादिव्रतएवोपनयने नियमोयं न प्राचीनेप्युपनयने। तच्च विशेषस्याभिधानात्। अतिक्रम्याभिधानाच्चास्य। सोयमुपनयतिः सन्निहितमेवोपनयनमभिधत्ते न प्राचीनमपि। व्यक्तिवचनः खल्वयं सन्निहितां व्यक्तिं शक्नोति वदितुं, नत्वन्याम्। आग्नेयीन्यायात्। परतोवक्ष्यमाणानां धर्म्माणां यथा प्राचीनोपनयनगोचरत्वमपि, तथाऽभिहितमस्माभिः,—"वार्त्तेश्चास्मै दण्डं प्रयच्छन् वाचयति"—इत्यत्र। परतश्चैतद्वक्ष्यामः।

४८२पृष्ठे ३पंक्तौ निवेश्यं।

वस्तुतस्तु, अस्माकमुपाकरणद्वैविध्येप्युत्सर्गस्य न द्वैविध्यम्। उत्सर्गः खल्वेकएवोभयोरप्युपाकरणयोः प्रौष्ठपदे तैष्यां स्यात्। कुतः?। उभयमुपाकरणं सूचयित्वा परतस्तैष्यामुत्सर्गस्य सूचणात्तथाऽवगतेः। अतएव कात्यायनोपि 'प्रौष्ठपदे तिष्येण वहिः'—इत्यादिना तथैवाह। नचेदमुदगयनोपाकरणाभिप्रायं वचनमित्यत्र प्रमाणमस्ति। तथात्वेचोत्सर्गान्तरं नस्यादेव। अनुपदेशात्। तस्मादेकएवोत्सर्गः प्रौष्ठपदे तिष्येणेत्यवधार्य्यते। अतएवोभयमुपाकरणमुपदिश्य "उत्सर्गश्चैकएवैषां तैष्यां प्रौष्ठपदेऽपि च"—इत्येकमेवोत्सर्गमुभयेषामभिधत्ते। न च प्रौष्ठपदे हस्तेनोपाकरणकर्त्तुस्तत्रैव पुनस्तिष्येणोत्सर्गोन सम्भवतीतिवाच्यम्। वर्षान्तरे प्रौष्ठपदे हस्तेनोपाकर्त्तुर्वर्षान्तरे तत्रैव तिष्येणोत्सर्गसम्भवात्। तथा गार्ग्यः। "सिंहे रवौ तु पुष्यर्क्षे पूर्व्वाह्लेऽविवरे वहिः। छन्दोगामिलिताः कुर्य्युरुत्सर्गं स्वस्वच्छन्दसाम्। शुक्ल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पक्षेतु हस्तेन उपाकर्म्मापराह्णिकम्"—इति सिंहे रवौ पुष्यर्क्षे उत्सर्ग-मभिधाय हस्तेनोपाकरणमभिदधानएतदेवाह । अस्माद्वचनादस्माक-मुपाकरणे अपराह्णः कालः स्यात् । "अध्यायानामुपाकर्म्म कुर्य्यात् कालेऽपराह्णके । पूर्व्वाह्णे तु विसर्गः स्यादिति वेदविदोविदुः"—इति परिशिष्टवचनाच्चैतदेवं प्रतिपत्तव्यम् । गोभिलस्यैतदिति हेमाद्रिः । यदा पुनः सिंहस्थे सूर्य्ये शुक्लपक्षे योहस्तः तस्मात् प्राचीनः पुष्यः कर्कटस्थे रवौ भवति, तदा तत्रैव पुष्ये उत्सर्गः करणीयः । कुतः ? । "मासे प्रौष्ठपदे हस्तात् पुष्यः पूर्व्वोभवेद् यदा । तदा तु श्रावणे कुर्य्या-दुत्सर्गं छन्दसां द्विजः"—इति परिशिष्टोक्तेः । तथा प्रौष्ठपदे हस्तस्य दुष्टत्वे तत्रोपाकरणं निषेधति चतुर्व्वर्गचिन्तामणौ स्मृतिः । "उपा-कर्म्म न कुर्व्वन्ति क्रमात् सामर्ग्यजुर्व्विदः । ग्रहसंक्रान्तियुक्तेषु हस्तश्रवण-पर्व्वसु"–इति । तदेवम्भूतस्थले श्रावणएव हस्ते उपाकरणं कर्त्तव्यं भवति । "बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः"—इति परिशिष्टवच-नात । श्रावणे हि बह्वृचाः श्रवणेनोपाकुर्व्वन्ति । गोभिलस्यैतदिति निर्णयामृतकारः । "धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् । श्रावणं कर्म्मकुर्व्वीरन् ऋगयजुःसामपाठकाः"—इति परिशिष्टवचनान्तरेपि श्रावणं कर्म्मेति समाख्यया तथाऽवगम्यते । विशेषमाहतुर्वृद्धमनुका-त्यायनौ । "अर्द्धरात्रादधस्ताच्चेत् संक्रान्तिग्रहणं तदा । उपाकर्म्म न कुर्व्वीत परतश्चेन्न दोषकृत्"—इति ।

तस्मादियमेवावधारणा,—प्रौष्ठपदीं हस्तेनोपकृत्य देवपर्व्वाणि-गेयगानादीनि तावदधीयीत यावत् अब्दान्तरे प्रौष्ठपदे तिष्यः भवति। उदगयने चोपाकृत्योत्तरारण्यकादिकं यावत् षण्मासानधीयीत । ततः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रौष्ठपदे तिष्येण द्वयोरुत्सर्गं कुर्य्यात्। उत्सर्गात् परतस्तु यावदन्यदुपाकरणं न क्रियते, तावद्वेदं न व्याहरेदन्यत्र ब्रह्मयज्ञात्। अस्मच्छास्त्रे तथैवोपदेशात्। एवञ्च, उत्सर्गात् परमपि शुक्लपक्षेषु छन्दसामध्ययनबोधकानि यानि मन्वादिवचनान्युदाहृतानि, तानि अस्मद्व्यतिरिक्तविषयाणि बोद्धव्यानि। अस्मच्छास्त्रे प्रौष्ठपदशुक्लपक्षे तिष्येणोत्सर्गात् परतः पुनस्तत्रैव हस्तेनोपाकरणविधानात् तेषां वचनानां न खल्वत्रावकाशो भवतीति।

५१५पृष्ठे ५पंक्तौ निवेश्यं।

"क्षुण्णे द्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत्। मृत्पात्रे कुड़वोन्मानं ततस्तु स्रावयेत् पटात्। सस्याच्चूर्णद्रवः फाण्टः"—इत्युक्तलक्षणाभि

५६०पृष्ठे १पंक्तौ "य्येत्यर्थः"—इत्यतः परं निवेश्यं।

अथवा। तूष्णीमिति वचनादमन्त्रकमेवैतान् बलीन् हरेत्।

५६१पृष्ठे ८पंक्तौ 'बोद्धव्यः'—'—इत्यतः परं निवेश्यं।

सेयमसङ्गता वर्णना भट्टनारायणस्य। कस्मात्?। "दधि सर्पिश्च संपृक्तः प्रोक्तो ह्येषपृषातकः। होमकाले तु तस्याग्नेः स्थानमुत्तरपूर्व्वतः" इति गृह्यासंग्रहविरोधात्। तस्मादग्नेरुत्तरपूर्व्वतः समासादिते सतीति वर्णनीयम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

६५०पृष्ठे १८पंक्तौ निवेश्यं ।

अत्र किञ्चिद्वक्तव्यमस्ति। सूत्रतन्तु निधानञ्चेदं—"एतद्वःपितरोवासः" —इति मन्त्रमुच्चार्य्य सूचितप्रकारेण करणीयम्। कथं ज्ञायते?। पद्यमानमन्त्रकाण्डे अस्मिन्नवसरे मन्त्रस्यैतस्य पठितत्वात्। सचेन्न विनियुज्येत, अनर्थकस्तस्य पाठः स्यात्। नचार्थवानाम्नायोऽनर्थकः कर्त्तव्यः। कथन्तर्ह्यस्मिन्नर्थे सूत्रं न दृश्यते?। प्रत्येकमभिलापं सूत्रयितुं प्रवृत्तः खल्वयमाचार्य्योविनियोगं मन्त्रस्य न सूत्रयाञ्चकार। सकृद्धि त्रीन् पित्रादीनुद्दिश्य मन्त्रोयं पठितव्योभवति। लिङ्गाच्चात्रैव कर्म्मणि विनियोगं मन्त्रस्य सुज्ञानं मन्यते,—इति। कथं पुनरवगम्यते त्रीन् पित्रादीनुद्दिश्य सकृदेव मन्त्रः पठितव्यइति। बहुवचनादित्याह। 'नमोवः पितरः'—इत्यादौ खल्वस्मिन् वाक्यप्रवाहे पित्रादिषु त्रिष्वेव बहुवचनान्तपितृपदप्रयोगादत्रापि तथैवावधार्य्यते। न खल्वस्यैव पूर्व्वस्मिन् परस्मिंश्च वाक्यप्रवाहे पित्रादित्रिके बहुवचनान्तपितृपदस्य प्रयोगेऽवधृते इहैवाकस्मादर्द्धजरतीयन्यायेन एकैकस्मिन् पित्रादौ तथाप्रयोगइति शक्यमवगन्तुम्। कारणाभावात्। तस्मात् सकृदेव मन्त्रपाठः, अभिलापस्तु प्रत्येकमिति सिद्धम्।

७५७पृष्ठे १९पंक्तौ 'इत्यादिना'—इत्यतः परं निवेश्यं।

"सान्तं सुमनोयुक्तं उदकं दधिमिश्रितम्। अर्घ्यं, दधिमधुभ्याञ्च मधुपर्कोविधीयते। कांस्येनैवार्हनीयस्य निनयेदर्घ्यमञ्जलौ। कांस्यापिधानं कांस्यस्थं मधुपर्कं निवेदयेत्"—इति कर्म्मप्रदीपवचनेनच

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

७५८पृष्ठे ११पंक्तौ, 'भवति'—इत्यतः परं निवेश्यं।

अपिच। 'साचतं सुमनोयुक्तम्'-इत्यादिवचनेन द्वितीयं मधुपर्कमभिधाय 'कांस्येनैव'—इत्यादि ततपरवचनेन तस्यापि कांस्यापिधानत्वं कांस्यस्थत्वञ्च कात्यायनः प्राह। सत्वेकदेशदर्शी परवचनमजानानो-मन्यते,—द्वितीये मधुपर्के पात्रस्यानुपदेशः,—इति।

७८७पृष्ठे १०पंक्तौ निवेश्यं।

तत्र गृह्याकर्म्मस्वाचार्य्यपुत्रोक्तएवप्रकारः। कस्मात्?। "एषलेखविधिः प्रोक्तोगृह्याकर्म्मसु सर्व्वसु"—इत्युपसंहारात्। कात्यायनोक्तस्तु प्रकारः पारिशेष्यादन्यत्र निविशते इति द्रष्टव्यं।

८००पृष्ठे ५पंक्तौ "देवलवचनात्"। इत्यतः परं निवेश्यं।

पक्षकल्पेऽपि शस्त्रहतानां श्राद्धमेव चतुर्द्दश्यां भवति नान्येषां। कथं ज्ञायते?। "नैव श्राद्धं चतुर्दश्यां कुर्य्याच्छस्त्रहतादृते। पक्षश्राद्धेपि कर्त्तव्ये श्राद्धशून्यैव सा तिथिः"। इतिवचनादिति कल्पतरुप्रभृतयः। चतुर्दशीत्यागे पञ्चदशादिश्राद्धसम्पत्तये पौर्णमास्यां श्राद्धमुक्तं स्मृतिसागरे। "निखिलन्तु यदा पक्षं श्राद्धं कर्त्तुमिहेच्छति। पौर्णमासीं समारभ्य तदा श्राद्धं समाचरेत्। पौर्णमास्यान्तु पूर्व्वाह्ने श्राद्धं नान्दीमुखं चरेत्। प्रपितामहाद्य ये पूर्व्वे त्रयोनान्दीमुखास्तु ते"। इति। युक्तस्तु कार्ष्णाजिनिवचनादनयोर्विकल्पइति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। न च नित्यानित्यसंयोगविरोधः शङ्कनीयः। अस्यापि नित्यत्वे प्रमाणाभावात्। न खलु शेषाणां प्रतिपत्तिरियमित्यस्यां वर्णनायाम् अस्य नित्यत्वं शक्यतेवक्तुम्। न चाचान्यत् किमपि प्रमाणं पश्यामः। स्यादेतत्। अप्रकृतानामसंशब्दितानामसन्निहितानां कथं प्रतिपत्ति र्व्वर्ण्यते?। उच्यते। नात्यन्तमप्रकृता असन्निहितास्चात्तसक्तवः। कथम्?। इत्थम्। ये खल्वचतसक्तवो वर्षास्वहरहर्ब्बलिहरणार्थं स्थापिता स्तैरेव आग्रहायणीपर्य्यन्तं बलये हर्त्तव्याः,—इति स्थितम्। एवञ्चास्येव तेषां कियन्माचमपि प्रकृतत्वं सन्निहितत्वञ्चाग्रहायण्या। तथाच सत्यकिञ्चित्करमसंशब्दितत्वम्। अपि च। अस्मिन् शास्त्रे "पानव्यापच्च तद्वत्"— इत्यादिवत् व्यवहितस्याप्यभिसम्बन्धः आचार्य्यस्यानुमतः। कथं ज्ञायते?। आचार्य्यपुत्रवचनात्। तथा च गृह्यासंग्रहः।

"पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितम्।
गोभिले ये न गृह्णन्ति न ते ज्ञास्यन्ति गोभिलम्"।

इति। तस्मादसन्निहितानामप्यस्तु सम्बन्धः। तदत्र भवन्तो भूमिदेवाः प्रमाणम्॥०॥ ४॥०॥

उत्सृजेत् कृतार्थान् सम्भारान्॥ ५॥

अर्थः प्रयोजनम्। तच्च धूमशातनलक्षणम्। कृतोऽर्थो यैः, तान् सम्भारान् दर्भादीन् उत्सृजेत्। अर्थात्प्राप्तस्याप्युत्सर्गस्य वचनमानन्तर्य्यार्थम्। कथं नाम?। धूमशातनानन्तरक्षण एवोत्सृजेत् न क्षणमपि गृहे धारयेत्—इति॥०॥ ५॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतस्मिन् क्रमे औपवसथिकं स्थण्डिलोपलेपनादि कृत्वा,—

जातशिलासु मणिकं प्रतिष्ठापयति वास्तोष्पत इत्येतेन द्विकेन सर्चेन ॥ ६ ॥

जातशिला:,—

"घना विभिक्तताशङ्काः स्मृता जातशिलास्तु ताः"।

इत्युक्तलक्षणाः। तासु, बहुवचनात् त्रिप्रभृतिषु, मणिकमलिञ्जरं महदुदकभाण्डमित्येतत्। प्रतिष्ठापयति स्थापयति। वास्तोष्पते,—इत्येतस्यां ऋचि गीयमानेन द्विकेन साम्ना—सर्चेन प्रकृतयैव ऋचा सह वर्त्तमानेन,—इत्यर्थः। द्विकेन साम्ना ऋचा चेति यावत्। ननु, एतेन—इति शक्यमवक्तुम्, अथोच्यते,—कारणं वक्तव्यम्?। क्रमार्थमित्याह। द्विकेन सर्चेन—इत्येतावन्मात्रमुच्यते; न ज्ञायते,—किं द्विकात् पुरस्तादृक् स्यात्? आहोस्विदुपरिष्टात्? उताहोमध्ये? अथ वा प्रतिसाम? यद्वा सूत्रन्यायादुभयतः?—इति। तदेतन्निरासार्थमाचार्य्यः एतेन—इत्याह। एतेन एवम्भूतेन यथाक्रमोपन्यस्तेनेत्यर्थः। तेन, पूर्व्वं द्विकमुच्चार्य्य पश्चादृचमुच्चारयेत् ॥०॥ ६ ॥०॥

द्वावुदकुम्भौ मणिक आसिञ्चेत् समन्यायन्तीत्येतयर्चा ॥ ७ ॥

द्वौ उदकपूर्णौ कुम्भौ प्रतिष्ठापिते मणिके आसिञ्चेत् समन्यायन्ति,—इत्येतया ऋचा। ऋक्ग्रहणं सामप्रतिषेधार्थम्। अत्र

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिकुम्भम् ऋगावृत्तिर्बोद्धव्या। कस्मात्?। "भेदे मन्त्रावृत्तिः"—इति सूत्रणात्। तथा चोक्तम्। "प्रतिकुम्भमृचं पठेत्"—इति। सोऽयं मणिकसंस्कारः। एवञ्च, "मणिकाद्वा गृह्णीयात्"—इति यदुक्तं, तदेतस्मात् संस्कृतान्मणिकाद्ग्रहणीयम्। यच्च, उद-धानस्य बलिहरणमुक्तं, तदप्येतस्यैव बोद्धव्यम्।

अत्रेदं सन्दिह्यते। आग्रहायण्या ऊर्द्धं यदि मणिको नष्टो विनष्टो वा भवति, तदा किमेतावन्तं कालमपेक्ष्य पुनराग्रहा-यणामागतायामेव मणिकान्तरं संस्करणीयम्, उत यदैव विपद्यते तदैवान्यदाहृत्य?—इति। तदैव,—इति ब्रूमः। कस्मात्?। अस्य कर्म्मार्थत्वात्। तावन्तं कालं मणिकाभावे हि कर्म्मणो नाभिनिष्पत्तिः स्यात्, स्याद्वा न सुकरा भवेत्। तथा चोक्तम्।

"नष्टो विनष्टो मणिकः शिलानाशे तथैव च।
तदैवाहृत्य संस्कार्य्यो नापेक्षेदाग्रहायणीम्"।

इति। यदि पुनरन्यस्यामाग्रहायण्यामागतायामपि पूर्व्वसंस्कृत एव मणिको दृढो वर्त्तते, तदोदकुम्भासेचनमात्रं कर्त्तव्यम्। कुतः?।

"दृढ श्चेदाग्रहायण्यामावृत्तावपि कर्म्मणः।
कुम्भौ मन्त्रवदासिञ्चेत् प्रतिकुम्भमृचं पठेत्"।

इति वचनात् ॥०॥ ७ ॥०॥

प्रदोषे पायसश्चरुः ॥ ८ ॥

आग्रहायण्यामित्येव। आग्रहायण्यै त्वा जुष्टं निर्व्वपामि,—इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्व्वापः। कुतः ?। देवतान्तरस्यानुपदेशात् मन्त्रस्य चाव्यक्त-लिङ्गत्वात् श्रुताया एवाग्रहायणादेवतात्वस्य कल्पयितुमुचितत्वात्। "अनाम्नातेषु तथादेशम्"—इत्यग्रे सूत्रणाच्च ॥०॥८॥०॥

तस्य जुहुयात् प्रथमा ह्व्युवाससेति ॥ ९ ॥

व्याख्यातप्रायमेतत् ॥०॥ ९ ॥०॥

स्थालीपाकावृताऽन्यत् ॥ १० ॥

कृतभाष्यं सूत्रम् ॥०॥ १० ॥०॥

पश्चादग्ने र्वर्हिषि न्यञ्चौ पाणी प्रतिष्ठाप्य प्रतिक्षत्र इत्येता व्याहृती र्जपति ॥ ११ ॥

अग्नेः पश्चिमतः व र्हिषि कुशोपरि न्यञ्चा अधामुखौ पाणी पूर्व्वोक्त-प्रकारेण प्रतिष्ठाप्य, प्रतिक्षत्र इत्येताः प्रतिशब्दा व्याहृती र्जपति। व्याहृतिग्रहणं स्तुत्यर्थम्। अत्राग्रहायणीकर्म्मणः परिसमाप्तिः। वामदेव्यमिदानीं गातव्यम्। यदि कैश्चित् कथञ्चित् श्रवणाकर्म्म न कृतं, तदा ते त्वाग्रहायण्यां बलयो न हर्त्तव्याः, सर्व्वमन्यत् पूर्व्ववदेव करणीयम्। तथा चोक्तम्।

> "श्रवणाकर्म्म लुप्यन्चेत् कथञ्चित् सूतकादिना।
> आग्रहायणिकं कुर्य्याद्बलिवर्ज्जमशेषतः"।

इति ॥०॥ ११ ॥०॥

अथेदानीं स्वस्तरारोहणं प्रस्तूयते,—

पश्चादग्नेः स्वस्तरमास्तारयेत् ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋजुरत्रार्थः। अत्र किञ्चिद्वक्तव्यमस्ति। पश्चादग्नेरिति करण-मन्यागारनियमार्थम्। तेन, अग्न्यागार एव स्वस्तरास्तरणं कर्त्तव्यम्। एवञ्च, अग्न्युपदेशस्यान्यार्थत्वादहोमकोऽयम्—इति केचित्। पुंसवनादिवत्तु अयमपि सहोमक एव स्यात्—इति अपरे। प्राग्वसन्तादुदगयने यत् पुण्यमहः तत्र पूर्व्वमन्वाहार्य्य-श्राद्धं कृत्वा सायं बलिहरणान्ते नित्यकर्म्मणि कृते, स्वस्तरास्तरणं करणीयम्। तथा च गृह्यान्तरम्। "प्राग्वसन्तादुदगयने पुण्येऽह्नि सायं स्वस्तरमुदगग्रमास्तीर्य्य"—इत्यादि। अस्मद्गृह्यकारपरिभाषा-सिद्धमुदगयनादिमात्रं वा स्वस्तरारोहणस्य कालः स्यात्। केचि-त्तु,—"ऊर्द्ध्वं स्वस्तरशायी स्यात्"—इति वचनमालोचनमात्रेण पश्यन्तः, आग्रहायण्यङ्गत्वं स्वस्तरारोहणस्य मन्यमानाः, तत्रैवा-वसरे स्वस्तरास्तरणम्—इच्छन्ति। तदसङ्गतम्। ऊर्द्ध्वमित्यनेना-ग्रहायण्या ऊर्द्ध्वत्वमात्रस्यावगमात्।

"पारिभाषिक एव स्यात् कालो गोवाजियज्ञयोः।
अन्यस्यानुपदेशात्तु स्वस्तरारोहणस्य च"।

इति परिशिष्टवचनविरोधाच्च ॥०॥ १२ ॥०॥

उदगग्रैस्तृणैः ॥ १३ ॥

स्वस्तरमास्तारयेदिति वर्त्तते ॥०॥ १३ ॥०॥

उदक्प्रवणम् ॥ १४ ॥

उत्तरस्यां दिशि क्रमनिम्नं स्वस्तरमास्तारयेत् ॥०॥ १४ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मिन्नहतान्यास्तरणान्यास्तीर्य्य दक्षिणतो गृहपति रुपविशति ॥ १५ ॥

तस्मिन् स्रस्तरे अहतान्यखण्डितानि आस्तरणानि कम्बलादीनि आस्तीर्य्य, दक्षिणतः—स्रस्तरस्य दक्षिणे भागे, गृहपतिरुपविशति ॥ ॥०॥ १५ ॥०॥

तस्य चोत्तरतः,—

अनन्तरा अवरे यथाज्येष्ठम् ॥ १६ ॥

अवरे कनिष्ठाः, अनन्तराः अव्यवहिताः सन्तो यथाज्येष्ठं ज्येष्ठानुक्रमेणोपविशन्ति। यो यो ज्येष्ठः स स गृहपतेरनन्तरो यथा स्यादित्यर्थः।

एवं वा,—

अनन्तरा अव्यवहिताः—एकपाकोपजीविनः तद्गृह्या इत्येतत्। तदेवम्भूता अवरे यथाज्येष्ठमुपविशन्ति ॥०॥ १६ ॥०॥

तेषामप्युत्तरतः,—

अनन्तराश्च भार्य्याः सजाताः ॥ १७ ॥

अनन्तराः,—इत्युक्तार्थम्। भार्य्याः गृहपतिप्रभृतीनां पत्न्यः सजाताः सापत्या उपविशन्ति। जातमपत्यम्। चशब्दः उपवेशनक्रमविशेषद्योतनार्थः। कथं नाम?। येन क्रमेण गृहपतिप्रभृतय उपविष्टाः, तेनैव क्रमेण तेषां भार्य्या अप्युपविशेयुः। अपत्यान्यपि स्वस्याः स्वस्या मातुरुत्सङ्गे उत्तरतो वा उपविशेयुः,—इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथैवम्, अत्र यथाज्येष्ठमुपवेशनं न स्यात्? । मा भवतु, का नो हानिः । अथवा । पत्युरेव वयसा स्त्रीणां वृद्धत्वस्मरणात् पतीनाञ्च यथाज्येष्ठमुपवेशनात् भार्य्याणां स्वस्वपतिक्रमेणोपवेशने यथाज्येष्ठत्वमपि कथञ्चिदनुगृह्यत एव । परमार्थतस्तु, सजातानां भार्य्याणामुपवेशनं सूत्रयन्नाचार्य्यो नात्र यथाज्येष्ठमुपवेशनमनुजानातीत्यवगम्यते । एतदर्थं चशब्दं प्रयुक्तवान् । भार्य्याः पुनः सापत्या उपविशन्ति, न पुनरत्रापि यथाज्येष्ठत्वनियमः,—इत्यभिप्रायः । न खल्वेवमपत्यानां यथाज्येष्ठमुपवेशनं सम्भवति । अन्ये पुनरत्रापि यथाज्येष्ठमुपवेशनमिच्छन्ति ॥०॥ १७ ॥०॥

समुपविष्टेषु गृहपतिः स्वस्तरे न्यञ्चौ पाणी प्रतिष्ठाप्य स्योना पृथिवि नो भवेत्येतामृचं जपति ॥ १८ ॥

समुपविष्टेषु,—सम्यक्—प्राङ्मुखेषु उपविष्टेषु सर्व्वेष्वित्यर्थः । कस्मात्? । "प्राङ्मुखकरणञ्चानादेशे"—इति सूत्रकारवचनात् । स्पष्टमन्यत् । एतामिति स्वरवर्णसम्पादनार्थं छन्दोविज्ञानार्थमविलोपार्थञ्च । कथं नाम? । एतामेवम्भूतां सेतिकरणामेव जपतीति । अन्यथा खल्वितिकरणविलोपमपि कश्चिदाशङ्कीत ॥ ॥०॥ १८ ॥०॥

समामायाः संविशन्ति दक्षिणैः पार्श्वैः ॥ १९ ॥

समामायामेव त्वचि दक्षिणैः पार्श्वैः संविशन्ति स्वपन्ति । तस्मिन्नेव स्वस्तरे ॥०॥ १९ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं चिरभ्यात्ममावृत्त्य ॥ २० ॥

एवमनेन प्रकारेण—दक्षिणपार्श्वेनेत्यर्थः। अनन्तरोक्तं संवेशनमेव न तु स्वस्तरास्तरणमपीति द्रष्टव्यम्। चिरावृत्त्य चिःकृत्वोऽभ्यस्य। किमविशेषेणैव?। न। कथन्तर्हि?। अभ्यात्मम्। आत्मनो गृह-पतेराभिमुख्येन,—आत्मन आरभ्येत्यर्थः। कथं नाम?। येनैव क्रमेणोपविष्टाः तेनैव क्रमेण संवेशनं चिरावर्त्तयेयुः,—इति। प्रथमेन सहैव चित्वम् ॥०॥ २० ॥०॥

स्वस्त्ययनानि प्रयुज्य यथाज्ञानन् ॥ २१ ॥

स्वस्त्ययनानि अप्रतिरथादीनि यथाज्ञानं प्रयुज्य—यो यत जानाति स तदुच्चार्य्य ॥०॥ २१ ॥०॥

अरिष्टꣳ सामसंयोगमेके ॥ २२ ॥

अरिष्टं अरिष्टभङ्गाख्यं सामसंयोगं इतस्ततो विप्रकीर्णानां साम्ना-मेकीकरणं—साममसुदायं प्रयुज्य—इत्येके आचार्य्या मन्यन्ते ॥ ॥०॥ २२ ॥०॥

अप उपस्पृश्य यथार्थम् ॥ २३ ॥

अप उदकमुपस्पृश्य दक्षिणेन पाणिना स्पृष्ट्वा, यथार्थमिति कर्म्मणः परिसमाप्तिं दर्शयति। तेन वामदेव्यगानमिदानीं स्यात्। अन्ये तु,—स्वस्त्ययनात् परत एव वामदेव्यगानमिच्छन्ति। यथार्थ-मिति,—इदानीं कर्म्मणः परिसमाप्तत्वात् यस्य यदभिप्रेतं स तत्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुर्य्यात्, न तु तत्रैवावस्थाननियमः,—इति व्याकुर्व्वन्ति च। गृहपतेः किल बहवः पक्षाः स्रस्तरशयने ग्रन्थान्तरे पठ्यन्ते। स यदि सद्यःपक्षमाश्रयेत्, तदा स्रस्तरादुत्थाय अभिप्रेते शयनान्तरे शयीत। अथान्यपक्षमाश्रयेत्तर्हि तत्रैव स्वपेत्। तथा चोक्तम्।

"ऊर्द्धं स्रस्तरशायी स्यान्मासमर्द्धमथापि वा।
सप्तरात्रं त्रिरात्रं वा एकां वा सद्य एव वा।
नोर्द्धं मन्त्रप्रयोगः स्यान्नाग्न्यगारं नियम्यते।
नाहतास्तरणञ्चैव न पार्श्वञ्चापि दक्षिणम्"।

इति। प्रथमाया रात्रे रूर्द्धमन्यासु रात्रिषु स्रस्तरशयने खल्वयमुत्तरश्लोकोक्तो विशेषो द्रष्टव्यः ॥०॥ २३ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य नवमी कण्डिका ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृतीयप्रपाठके दशमी कण्डिका।

अथेदानीमष्टकाकर्म्म प्रस्तूयते,—

अष्टका रात्रिर्देवता ॥ १ ॥

अष्टका,—इत्येकवचनमधिकारार्थम्। उपरिष्टादष्टकाबहुत्वस्योपदेशात्। तथाच, या काचिदष्टका वक्ष्यमाणा सा सर्व्वाऽपि रात्रिर्देवता प्रत्येतव्या, न पुनरानन्तर्य्यादपूपाष्टकैव। रात्रि र्देवता यस्याः सेयं रात्रिर्देवता अष्टका, कर्त्तव्या,—इति सूत्रशेषः॥ ॥०॥ १ ॥०॥

सा खल्वियमष्टका,—

पुष्टिकर्म्म ॥ २ ॥

पुष्टये फलाय क्रियते, इति पुष्टिकर्म्म। आह। ननु, परस्तादप्यष्टकादेवताः सूचयिष्यन्ते, तत् किमिति पुष्टिकर्म्म,—इति मध्ये सूचयित्वा रात्रिर्देवतायाः सूचयिष्यमाणानाञ्च देवतानां व्यवायः क्रियते?। उच्यते। अष्टका रात्रिर्देवता,—इति निर्व्विशेषितमष्टकाकर्म्मोपदिश्य, पुष्टिकर्म्म,—इति परतः कुर्व्वन् नित्यत्वमस्याद्शयति। कथं नाम?। रात्रिर्देवता अष्टका कर्त्तव्या, पुष्टिः फलमप्यस्या एव भवति, न पुनः पुष्टिकाम एवाष्टकास्वधिक्रियते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथं ज्ञायते?। कर्त्तव्यचोदनायां फलाश्रवणात्। अधिकार-वेलायां तदनुपदेशाच्च। यदि पुनरष्टका पुष्टिकर्म्म,—इति कुर्य्यात्, तर्हि रात्रिसत्रन्यायेन सन्निहिततरं पुष्टिफलमेव कामयमान स्तामधिकरोति,—इत्यपि कस्यचिदाशङ्का स्यात्। सा माभूदिति खल्वाचार्य्यः अष्टका रात्रिदेवता पुष्टिकर्म्म,—इति व्यत्यासेन प्रयुङ्क्ते। काम्यतैवाष्टकानां कुतो न स्यात्?। व्यत्यासेन फलवा-दाम्नानान्नित्यत्वावगतेरिति ब्रूमः। नित्यप्रकरणेचोपदेशात्। नि-त्यानां हि श्रवणाकर्म्मादीनां प्रकरणे अष्टका उपदिश्यते। तस्मात् सापि नित्या भवितु मर्हति। तथा गौतमेनापि नित्यानामेव पुरुषसंस्काराणां मध्ये,—"अष्टका पार्व्वणश्राद्ध श्रावण्याग्रहायणी-चैत्र्याश्वयुजी"—इत्यष्टका सूचिता। कर्म्मप्रदीपेप्याह।

"संस्काराः पुरुषस्यैते स्मर्य्यन्ते गौतमादिभिः।

अतोऽष्टकादयः कार्य्याः सर्व्वे कालक्रमोदिताः"।

इति। उपदेशादेव सर्व्वेषामविशेषेण करणे सिद्धे पुनः करणोप-देशोऽवश्यंकरणमेव बोधयति। अष्टकादिप्रक्रमे तदकरणे दोष-श्रवणाच्च। तथा चोक्तम्।

"यस्त्वाधायाग्निमालस्याद्देवादीन्नैभिरिष्टवान्।

निराकर्त्ताऽमरादीनां स विज्ञेयो निराकृतिः"।

इति। तस्मादष्टका नित्येति सिद्धम्। अत्राह। यदि नामाष्टका नित्या, तर्हि पुष्टिकर्म्मापि कथं भवति?। उच्यते। अस्तु नाम नित्या, काम्यापि भविष्यति। कस्मात्?। फलोपदेशस्यार्थव-त्वात्। यद्वा। फलवाद एवायमष्टकां स्तौति, न पुनः फलमप्य-

4 E 2

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नेनोपदिश्यते। किं कारणम्?। उभयविधाने वाक्यभेदः। अथवा। नित्यत्वेऽप्यानुषङ्गिकमेव पुष्टिफलं भविष्यति।

"नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिम्"।

इति स्मरणात्। अथैवं समस्ता एव देवता उपदिश्य परत एव पुष्टिकर्म्म,—इति कुतो न सूचितम्?। परत एव वक्ष्यामः। अन्ये त्वाहुः,—"तथात्वे पुष्टिकर्म्म चतुरष्टको हेमन्तः,—इत्युत्तरसूत्रेणैकसूत्रताशङ्का स्यात्, अत स्तथा न कृतम्"—इति॥०॥ ॥ २ ॥०॥

आग्नेयी पित्र्या वा प्राजापत्यर्तुदेवता वैश्वदेवीति देवताविचाराः ॥ ३ ॥

अग्नेरियमाग्नेयी। प्रकृतत्वादष्टकेति सम्बध्यते। पितॄणामियं पित्र्या। प्रजापतेरियं प्राजापत्या। ऋतवो वसन्तादयः, ते देवता यस्याः सेयमृतदेवता। विश्वेदेवाः सर्व्वेदेवाः, तेषामियं वैश्वदेवी। वा शब्दः प्रत्येकमभिसम्बध्यते। आग्नेयी वा पित्र्या वा प्राजापत्या वा ऋतुदेवता वा वैश्वदेवी वा। इति एते देवताविचारा भवन्ति। इदमिदानीं सन्दिह्यते। किं पशुप्रोक्षणनिर्व्वापहोमेष्वेतद्विकल्पोक्तानां देवतानां मध्यादिच्छया अन्यतमस्या अभिसन्धानं कर्त्तव्यम्? आहोस्वित् सर्व्वासाम्? उताहो नैकस्या अपि? इति। नैकस्या अपि,—इति ब्रूमः। किं देवताका तर्ह्यष्टका?; न खल्वदेवताका भवितु मर्हति। उच्यते। न वयमदेवताकामष्टकामाचक्ष्महे, रात्रिदेवताकान्तु ब्रूमहे। कस्मात्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनः कारणात् सतीष्वेतद्दिकल्पोक्तास्वन्यास्वपि देवतासु रात्रिदेवतैवाष्टकाऽभ्युपगम्यते?। सूत्रप्रमाणादित्याह। अष्टका रात्रिदेवता,—इति खल्वाचार्य्येण सूचितम्। तत्प्रामाण्यात् रात्रिदेवता अष्टका अभ्युपगम्यते। ननु, आग्नेयी पित्र्या वा,—इत्येतदप्याचार्य्यस्यैव सूत्रम्?। सत्यमाचार्य्यस्यैव सूत्रमेतत्, किन्तु नैतत् देवता विधानार्थं परन्तु परमतोपन्यासार्थम्। कथं पुनरवगम्यते,—परमतोपन्यासार्थमेतदिति। शृणु यथाऽवगम्यते। अष्टका रात्रिदेवता,—इति देवतामष्टकायाः सूचयित्वा, पुष्टिकर्म्म,—इति च फलम्, आग्नेयीत्यादिकं सूचयन्नाचार्य्यः परमतमेतदिति दर्शयति। तदिदमर्थं पुष्टिकर्म्म,—इति मध्ये सूचितम्। अन्यथा देवतोपदेशानां मध्ये फलवादोपन्यासोऽनुचित एवस्यात्। यच्च,—उत्तरेण सूत्रेण सहैकसूत्रता-शङ्का निरासार्थं मध्य एव फलवादोन्यासः,—इति वर्णितम्। तदपि नातीव समीचीनम्। कस्मात्?। तदाशङ्काया अकिञ्चित् करत्वात्। एकसूत्रतायामपि क्षतेरभावाच्च। तस्मात्, अष्टका रात्रिदेवता पुष्टिकर्म्म,—इत्यनेन स्वमतमभिधाय आग्नेयीत्यादिना परमतमादर्शितम्—इत्यादरणीयम्। गृह्यान्तरेष्वेकैकमतपरतयैवैतासां देवतानामुपन्यासो दृश्यते। तथाच गृह्यान्तरम्। "तांहैके वैश्वदेवीं ब्रुवत आग्नेयीमेके * * प्राजापत्यामेके रात्रिदेवतामेके * * ऋतुदेवतामेके पितृदेवतामेके"—इति। तस्मादेता देवता नैकस्याभिमताः अपि त्वेकैका देवता एकैकस्याचार्य्यस्य। तत्र, "रात्रिदेवतामेके"—इत्येतदस्मदाचार्य्यमतस्योपन्यासः,—इति बोद्धव्यम्। अतएव,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आचार्य्येण,—"अष्टका रात्रिदेवता"—इति सूत्रयित्वा, "इति देवता विचाराः"—इति सूचितं, न देवता विकल्पाः—इति। एतासां देवतानां स्वाभिमतत्वेतु, "नवषट्त्रय इति विकल्पः"—इतिवत् "देवताविकल्पाः,—इत्येवकुर्य्यात्। तस्मात्,—देवताविचारा एवैते, न पुनरेता देवता भवन्ति। देवतात्वस्याभिरुक्तैव,—अष्टका रात्रिर्देवता,—इति। सोयमाचार्य्यस्याभिप्रायः—इत्ययमस्मदीयः पन्थाः। देवताविचारप्रकारश्च बुद्धिमद्भिरूहनीयः। ग्रन्थगौरवभयादुपारम्यतेऽस्माभिः। यच्च मन्त्रलिङ्गमग्न्यादीनामस्ति, न तद्देवताश्रुतिचोदितां रात्रिं बाधितुमीष्टे। दुर्बलं हि लिङ्गं श्रुतेरिति स्वल्वेवोचाम। यथा च, मन्त्रलिङ्गावगतापि देवता तद्धितशिष्टया देवतया बाध्यते, तथैव देवताशब्दशिष्टयापि बाधिष्यते। न्यायस्याविशेषात्। अन्येतु मन्यन्ते,—"अन्यतरस्या देवताया अभिसन्धानं न घटते। कुतः?। मध्यमाष्टकायाम्, अग्नावग्निः,—इति मन्त्रलिङ्गविरोधात्। तस्मात्, सर्व्वासामभिसन्धानं कर्त्तुं युक्तम्। अत्रापि यत्र मन्त्रान्तरेण होमः, तत्र होमकाले मन्त्रदेवतामेवाभिध्यायेत्। तथैव तत्राभिध्यातया भक्तिसाहचर्य्यात् सर्व्वा अप्येकदा देवता अभिध्याता इष्टदाश्च भवन्ति"—इति॥०॥ ३ ॥०॥

कियत्यः पुनरष्टका भवन्ति?। उच्यते,—

चतुरष्टकोहेमन्तः ॥ ४ ॥

चतस्रोऽष्टका यस्मिन्, सोऽयं चतुरष्टको हेमन्तः ऋतुविशेषः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदिदं ऋतुसंवत्सराभिप्रायं सूत्रम्। एतदुक्तं भवति। हेमन्तमासचतुष्टये चतस्रोऽष्टका भवन्ति,—इति ॥०॥ ४ ॥०॥

ताः सर्व्वाः समांसा श्चिकीर्षेत् ॥ ५ ॥

ताः सर्व्वास्तचतस्रोऽप्यष्टकाः समांसाः मांससहिता श्चिकीर्षेत् कर्त्तुमिच्छेत्। चिकीर्षेत्,—इति गुरुकरणं केनाप्युपायेन मांससम्पत्तिं कर्त्तुमिच्छेदित्युपदेशार्थम्॥०॥ ५ ॥०॥

इति कौत्सः ॥ ६ ॥

इति,—अनन्तरोक्तं,—चतस्रोऽष्टकाः—इति,तासु सर्व्वासु मांसम्—इति च, कुत्सस्यापत्यं कौत्स आचार्य्यो मन्यते ॥०॥ ६ ॥०॥

त्र्यष्टक इत्यौद्गाहमानिः ॥ ७ ॥

तिस्रोऽष्टका यस्मिन्, सोयं त्र्यष्टको हेमन्तः,—इत्यौद्गाहमानिराचार्य्यो मन्यते। उद्गाहमानस्यापत्यमौद्गाहमानिः ॥०॥ ७ ॥०॥

यथौद्गाहमानिराचार्य्यो मन्यते,—

तथा गौतमवार्कखण्डी ॥ ८ ॥

आचार्य्यावपि मन्येते। एवञ्च, औद्गाहमानि गौतम वार्कखण्डीनामाचार्य्याणामनुमत स्त्र्यष्टकपच एवास्मदाचार्य्यस्याप्यभिप्रेतः,—इत्यवगच्छामः। कस्मात्?। तिसृणामेव परतः कर्म्मोपदेशात्। अस्मिंश्च पक्षे मध्यमाष्टकैव समांसा कर्त्तव्या। कस्मात्?। प्रथमा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मतिक्रम्य मध्यमायामेव तदुपदेशात्। इतरयोर्द्रव्यान्तरोपदेशाच्च। एवमेतस्मिन् पक्षे अन्वष्टक्यमपि मध्यमायामेव भवति। कस्मात् कारणात्?। तस्याष्टकासंज्ञपितपशुसाध्यत्वात्। मध्यमाष्टकायामेव च पशुसंज्ञपनोपदेशात्। तथाच वक्ष्यति,—"वामं सक्थ्यन्वष्टक्याय निदध्यात्"—इति। तथा चोक्तम्।

"अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ।
वार्कखण्डिस्तु, सर्व्वासु कौत्सो मेनेऽष्टकासु च"।

इति। वचनस्य खल्वेतस्योक्तन्यायमूलतया त्र्यष्टकपक्ष एव गोभिलाचार्य्यस्यानुमतः,—इति, भङ्ग्यन्तरेण कात्यायनः स्पष्टयाञ्चकार। कौत्सस्य पुनराचार्य्यस्य मते सर्व्वासामेवाष्टकानां समांसत्वात् सर्व्वास्वेवान्वष्टक्यं सम्भवति,—इति द्रष्टव्यम्। तस्मादाचार्य्येण चतुर्थ्या अष्टकायाः कर्म्मासूचणात् त्र्यष्टकपक्ष एवादरणीयः। चतुरष्टकपक्षस्तु कौत्सानुमतोऽपि बहुभि र्व्विरोधादुपरोद्धव्यः। अथाच वाक्यार्थविद्भिरभिहितम्।

"अल्पानां यो विघातः स्यात् स बाधो बहुभिः स्मृतः।
प्राणसम्मित इत्यादि वा।शष्ठं बाधितं यथा।
विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम्।
तुल्यप्रमाणसत्त्वे तु न्याय एव प्रवर्त्तकः।

इति ॥०॥ ८ ॥०॥

अथेदानीं तिस्रोऽष्टकाः क्रमेणोपदेष्टुमाह,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योऽर्द्धमाग्रहायण्या स्तामिश्राष्टमी तामपूपाष्टके-त्याचक्षते ॥ ९ ॥

आग्रहायण्याः पौर्णमास्या ऊर्द्धं परतो या तामिश्रा कृष्णपक्षीया अष्टमी, (तमिश्राष्टमी,—इति केचित् पठन्ति, तत्रापि स एवार्थः) तां अपूपाष्टका,—इति आचक्षते कथयन्ति आचार्य्याः। यथेय-मपूपविधानादपूपाष्टका भण्यते, तथा मध्यमापि मांसविधाना-न्मांसाष्टका, अन्तिमाऽपि शाकविधानात् शाकाष्टकोच्यते,—इति द्रष्टव्यम्। अथैवम्,—अपूपविधानादेवाभिधाने सिद्धे 'अपूपाष्टके-त्याचक्षते',—इत्येतदवाच्यम्?। उच्यते। एवन्तर्हि गुणार्थोऽय-मनुवादो भविष्यति। कथं नाम?। ब्राह्मणभोजनार्थमप्यपूपाः कर्त्तव्याः,—इति। एवञ्च, अष्टकाविहितमन्यदपि यत् कर्म्म— श्राद्धं, तदप्यपूपैः करणीयमिति सिध्यति। तथाच पुराणेषु स्मर्य्यते।

"आद्याऽपूपैः सदा कार्य्या मांसैरन्या भवेत् सदा।
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः"।

इति ॥०॥ ९ ॥०॥

स्थालीपाकावृता तण्डुलानुपस्कृत्य चरुं श्रपयति ॥ ॥ १० ॥

स्थालीपाकरीत्या पूर्व्वोक्तया, तण्डुलानुपस्कृत्य संस्कृत्य चरु श्रप-यति ॥०॥ १० ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अष्टौ चापूपान् कपालेऽपरिवर्त्तयन् ॥ ११ ॥

अष्टसङ्ख्याकान् अपूपान् मण्डकान्। तथा चोक्तम्।

"त्रैयम्बकं करतलमपूपा मण्डकाः स्मृताः।
पालाशा गोलकाश्चैव लोहचूर्णञ्च चीवरम्"।

इति। कपाले,—

"कपालं मृण्मयं पात्रं चक्राघटितमुच्यते।
आसुरं चक्रघटितं दैवे पैत्रे च वर्ज्जयेत्"।

इत्युक्तलक्षणे, अपरिवर्त्तयन् परिवर्त्तनमकुर्व्वन्। चशब्दात् अपयति,—इत्यनुषज्यते॥०॥११॥०॥

किमेकस्मिन्नेव कपाले अष्टावपूपान् अपयति?। न। कथन्तर्हि?। उच्यते,—

एककपालान्॥ १२ ॥

एकैककपालान्—इत्यर्थः। तथाच, एकैकस्मिन् कपाले एकैकमपूपं अपयति। कथं ज्ञायते?। सूत्रारम्भस्यार्थवत्त्वादित्याह। कपाले,—इत्येतावन्मात्रसूत्रणादप्यविशेषादेकस्मिन्नेव कपाले भविष्यति, किं सूत्रान्तरारम्भेण?। तस्मात् सूत्रान्तरारम्भादवगच्छामः,—एकैकस्मिन् कपाले एकैकस्यापूपस्य अपणम्—इति। ननु, अविशेषात् द्वे त्रीणि वा कपालान्यपि प्राप्नुवन्ति?। प्राप्नुवन्तु नाम, तावताप्येकस्मिन् कपाले क्रियत एव। क्रियते चेत,—तत्रैव क्रियताम्, अलं कपालान्तरकल्पनया?। तस्मादेकैककपालान्—इत्यस्मदुक्तैव वर्णना। तथा चोक्तम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"पृथक्कपालान् कुर्व्वीत अपूपानष्टकाविधौ"।

इति ॥०॥ १२ ॥०॥

कपालप्रसङ्गात् पुरोडाशधर्म्माणामपि प्रसङ्गं कश्चिदाशङ्कीत, अत स्तन्निषेधार्थमाह,—

अमन्त्रानित्यौद्गाहमानिः ॥ १३ ॥

अमन्त्रान् मन्त्ररहितानष्टावपूपानित्यौद्गाहमानिराचार्य्यो मन्यते ॥०॥ १३ ॥०॥

अपूपानां प्रमाणेनैव कपालानामपि प्रमाणं सेत्स्यति,—इत्यभिप्रायेणापूपानामेव प्रमाणमुपदिशति,—

त्रैयम्बकप्रमाणान् ॥ १४ ॥

अष्टावपूपान् श्रपयति,—इति सम्बध्यते। त्रैयम्बकप्रमाणान् करतलप्रमाणान्—इत्यर्थः। तथा चोक्तम्। "त्रैयम्बकं करतलम्"—इति। एतस्य पुनरसम्भवे गृह्यासंग्रहोक्तं प्रमाणमपि द्रष्टव्यम्। तथाच गृह्यासंग्रहः।

"चतुर्मुष्टिश्चरुः कार्य्यश्चतुर्णामुत्तरोऽपि वा।
कपालस्य प्रमाणेन अपूपानष्टकाविधौ।
चतुर्भागं पाणितलात् कपालं याज्ञिका विदुः।
पृथक्-कपालान् कुर्व्वीत अपूपानष्टकाविधौ"।

इति ॥०॥ १४ ॥०॥

4 F 2

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शृतानभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत् ॥ १५ ॥

शृतान् पक्वानपूपान् घृतेनाभिघार्य्य अग्नेरुत्तरतोऽवतार्य्य पुनर्घृतेनाभिघारयेत्। कपालानां स्थालीपाकधर्म्मानतिदेशादेवं सूचितम्। एवञ्च, यावदुक्तत्वात् नात्राभिघारणे पवित्रान्तर्हितत्वमपेक्षितम्। चरौ तु स्थालीपाकधर्म्मातिदेशादेवैतानि प्राप्नुवन्ति ॥०॥ १५ ॥०॥

स्थालीपाकावृताऽवदाय चरोश्चापूपानाञ्चाष्टकायै स्वाहेति जुहोति ॥ १६ ॥

स्थालीपाकधर्म्मेण चरोश्च अपूपानाञ्च सर्व्वेषां पृथक् पृथगवदाय अष्टकायै स्वाहेति तन्त्रेणैव जुहोति। अत्र सन्दिह्यते। किं चरोरपूपानाञ्च सर्व्वेषां मध्येभ्योऽवदाय ततः पूर्व्वार्द्धेभ्योऽवद्यति? आहोस्विदेकैकस्य मध्यात् पूर्व्वार्द्धाच्चावदाय पुनरपरापरस्यावद्यति?। एकैकस्य मध्यात् पूर्व्वार्द्धाच्चावदाय पुनरपरापरस्यापि तथैवावद्यति,—इति प्रतिपद्यामहे। कस्मात्?। चरोश्चापूपानाञ्च,—इति चशब्दद्वयकरणात्। प्रत्येकं चशब्दबलात् प्रत्येकमेव तावत् यथोक्तावदानमवगम्यते। अवगम्यते चेत्, न युज्यते विनाकारणमुत्स्रष्टुम्। अन्यथा चरोरपूपानाञ्च,—इति कुर्य्यात् ॥०॥१६॥०॥

स्थालीपाकावृताऽन्यत् ॥ १७ ॥

कृतभाष्यमेतत्। अत्रापूपाष्टका कर्म्मणः परिसमाप्तिः ॥०॥१७॥०॥

अथेदानीं मांसाष्टकाप्रकरणं प्रस्तूयते,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैष्या ऊर्द्धमष्टम्यां गौः ॥ १८ ॥

तैषी पौषीपौर्णमासी। तस्या ऊर्द्धं—तस्याः परस्यामष्टम्यां गौरालब्धव्या,—इति सूत्रशेषः ॥०॥ १८ ॥०॥

कथमालब्धव्या ?। उच्यते,—

ताᳪ॰ सन्धिवेलासमीपं पुरस्तादग्नेरवस्थाप्योपस्थितायां जुहुयात्—यत्पशवः प्रध्यायतेति ॥ १९ ॥

रात्र्यह्नोः सन्धिरेव सन्धिवेला। सा चार्थात् पूर्व्वैव बोद्धव्या, न पश्चिमा। उषैव सन्धिवेलाशब्दार्थः,—इति केचित्। तस्याः सन्धिवेलायाः समीपं—("कालाध्वनोरत्यन्तसंयोगे"—इति द्वितीया) सन्निधावित्यर्थः। पुरस्तात् पूर्व्वस्यां दिश्यग्नेः, तां गां अवस्थाप्य प्रत्यङ्मुखीं स्थापयित्वा, उपस्थितायामागतायां सन्धिवेलायां, यत् पशवः,—इत्यनेन मन्त्रेण जुहुयात्। द्रव्यानुपदेशादाज्येन। स्रुवेण चायं होमः स्यात्। एतदुक्तं भवति। सन्धिवेलाया अल्पत्वात् तदानीं होतुं तस्याः समीपमेवाग्नेः पूर्व्वतो गामवस्थापयति, तत आगतायां सन्धिवेलायां जुहोति,—इति। ननु, उपस्थितायां गवि जुहुयात्,—इत्ययमेव सम्बन्धः कस्मान्न वर्ण्यते ?। विरोधादित्याह। कथं नाम ?। यदि नामोपस्थितायामेव गवि हूयते, न तर्ह्यग्नेः पुरस्तात्तामवस्थाप्य जुहोति। अथाग्नेः पुरस्तात्तामवस्थाप्य जुहोति, व्यक्तं तर्हि तस्यामुपस्थितायामेव न जुहोति—अपि तु अग्नेः पुरस्तादवस्थापितायामिति। अथापि स्यात्,—नेयमुपस्थितिरवस्थानाद्भिद्यते। यत् खल्वव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थापनं "पुरस्तादग्नेरवस्थाप्य"—इत्यनेन सूचितं, तत्र याऽवस्थितिः सैवोपस्थितायामित्यनेन परामृश्यते। न,—इत्युच्यते। कस्मात् न—इत्युच्यते?। शृणु, यथा न—इत्युच्यते। यदि नाम सैवावस्थितिः परामृश्येत, नूनमवस्थितायामित्यकरिष्यत्। तद-करणाच्चावगच्छामः,—नात्र सैवावस्थितिः परामृश्यते,—इति। न खल्ववस्थितिमभिप्रयन्नुपस्थितायामिति च कुर्व्वन्नाचार्य्योऽस्माकं प्रतीतिं स्थगयति,—इति युक्तमभ्युपगन्तुम्। आनर्थक्यञ्चैवमाप-द्येत। पुरस्तादग्नेरवस्थाप्य जुहुयात्,—इति ह्यभिप्रेतम्। तस्मात् सन्धिवेलायामुपस्थितायाम्—इत्यस्मदुक्त एवार्थ आदरणीयः। श्रवणमात्रादप्ययमेवार्थोऽवगम्यते। अवगम्यते चेत्, न युज्यते परि-त्यक्तुम्। अतएव, सन्धिवेलासमीपं गोरवस्थापनं सन्धिवेलायामु-पस्थितायां होमार्थम्। सन्धिवेलासमीपम्,—इत्यस्य प्रातराहु-त्यनन्तरपरतया वर्णनायाञ्च तदेवानर्थकं स्यात्। परिभाषा-बलादेव तत्प्राप्तेः। नापि सन्धिवेलासमीपमित्यनेनाञ्जस्येनैतदव-गम्यते। तस्मान्न किञ्चिदेतत्।

कश्चिदिदं सूत्रम्—उपस्थितायां गवि,—इत्यन्यथा व्याख्याय, बहुप्रकारं वर्णनाञ्चकार। "ननु, अवस्थाप्य—इत्युक्त्वा, पुनरुप-स्थितायामिति कस्मादुच्यते?। अत्राह। अस्य होमस्य पशूप-स्थापनेन सहातिसम्बन्धार्थम्। पश्वभावे स्थालीपाकं कुर्व्वीत,—इत्यस्मिन् पक्षे निवृत्तिरेव स्यात्। प्रोक्षणपर्य्यग्निकरणमन्त्रौ तु स्थालीपाकपक्षेऽप्यविरोधात् पठनीयौ। अथवा। आज्यसंस्कार-प्रतिषेधार्थम् उपस्थितायामिति पुनर्व्वचनम्। कथन्नाम?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपस्थितायां जुहुयादेव, न तावदाज्यं संस्कुर्य्यात्,—इति। अथवा। आसादनीये आसादिते कर्म्मणः कृताकृतप्रत्यवेक्षण-कर्त्तरि ब्रह्मणि चोपविष्टे तत्रापि होमस्य प्राप्तत्वात् तथा मा-भूदित्यानर्थ्यार्थं पुनर्व्वचनम्। तेन किम्?। उपस्थितायामन-न्तरमेव जुहुयादेव, न तावत् किञ्चिदपि कुर्य्यात्"—इति ॥०॥ ॥ १६ ॥०॥

हुत्वा चानुमन्त्रयेतानुत्वामातामन्यतामिति ॥२०॥

हुत्वा, अनु त्वा माता,—इति मन्त्रेण गामनुमन्त्रयेत,—अना-मिकाग्रेण स्पृशन्। हुत्वा,—इति वचनं हुत्वैवानुमन्त्रयेत न तु तन्त्रसमापनमपि कृत्वा,—इत्येवमर्थम्। चशब्दश्च यवमिश्रोदका-दीनामासादनार्थः। तेन,—यवमिश्रमुदकं, पवित्रं, क्षुरः, शाखा-विशाखे पलाशकाष्ठे, वर्हिः, इध्मः, आज्यं, समिधौ, स्रुवः,—इत्येतानि यथावदासाद्य, अनन्तरमनुमन्त्रयेतेत्यर्थः॥०॥२०॥०॥

यवमतीभिरद्भिः प्रोक्षेदष्टकायै त्वा जुष्टां प्रोक्षामीति ॥ २१ ॥

पूर्व्वमासादिताभि र्यवमतीभिरद्भि र्गां प्रोक्षेत्—प्रकर्षेण सिञ्चेत् अष्टकायै,—इति मन्त्रेण ॥०॥ २१ ॥०॥

उल्मुकेन परिहरेत् परिवाजपतिः कविरिति ॥२२॥

उल्मुकमलातमित्यनर्थान्तरम्। तेन गां परिहरेत् प्रदक्षिणी-कुर्य्यात् परिवाजपतिरिति मन्त्रेण ॥०॥ २२ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपः पानाय दद्यात् ॥ २३ ॥

तस्यै गवे पानायोदकं दद्यात्—मन्त्रानुपदेशात् व्याहृतित्रितयं जपन्। कथं ज्ञायते?।

"यत्र मन्त्रा न विद्यन्ते व्याहृतित्रितयं जपेत्।
मन्त्राणामेव चादेशे मन्त्रात् कर्म्म समाचरेत्"।

इति गृह्यासंग्रहवचनात्। एवमन्यत्रापि बोद्धव्यम्। मन्त्रानुपदेशादमन्त्रकमिति वर्णनन्तु उक्तवचनानवलोकनेनेति हेयमेव। इध्मादीनामेव केवलं तूष्णीं करणमाचार्य्यपुत्रेणोपदिष्टम् ॥०॥ ॥ २३ ॥०॥

पीतशेषमधस्तात् पशोरवसिञ्चेदात्तं देवेभ्यो हविरिति ॥ २४ ॥

तस्याः पीतावशिष्टमुदकं, पशो स्तस्या एव गो रधस्तादवसिञ्चेत् अवाचीनं सिञ्चेत् आत्तं देवेभ्यः,—इति मन्त्रेण ॥०॥ २४ ॥०॥

अथैनामुदगुत्सृप्य संज्ञपयन्ति ॥ २५ ॥

अथ,—अनन्तरमेव, एनां गां उदगुत्तरस्यामग्नेरुत्सृप्य नीत्वा सञ्ज्ञपयन्ति। कर्त्तुरनियमः। सञ्ज्ञपनं हननम् ॥०॥ २५ ॥०॥

कीदृशीं सञ्ज्ञपयन्ति?। उच्यते,—

प्राक्शिरसमुदक्पदीं देवदैवत्ये ॥ २६ ॥

प्राक्शिरसं पूर्व्वाभिमुखशिरस्कां, उदक्पदी मुदङ्मुखपदीं सञ्ज्ञपयन्ति। देवदैवत्ये,—देवानुद्दिश्य यत् क्रियते, तस्मिन् ॥०॥ ॥ २६ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणाशिरसं प्रत्यक्पदीं पितृदैवत्ये ॥ २७ ॥

पूर्व्वसूत्रव्याख्यानेनैवेदमपि सूत्रं व्याख्यातम्। सेयमष्टका-प्रसङ्गात् साधारणकर्म्मपरिभाषा क्रियते। ततश्च, देवतान्तरेषु प्रोक्षण-मन्त्रमूहेत। तेन,—वास्तुकर्म्मणि, वास्तोष्पतये त्वा जुष्टां प्रोक्षामि,—इति। पित्र्ये,—पितृभ्यस्त्वा,—इति। एव मन्यत्रापि। तथा चोक्तम्।

"ऊहः प्रोक्षणमन्त्रस्य लिङ्गदेवतयोर्वशात्"।

इति ॥०॥ २७ ॥०॥

संज्ञप्तायां जुहुयात् यत् पशुर्मायुरकृतेति* ॥ २८ ॥

तस्यां संज्ञप्तायां सत्यां जुहुयात् यत्पशुरितिमन्त्रेण॥०॥२८॥०॥

पत्नी चोदकमादाय पशोः सर्व्वाणि स्रोतांसि प्रक्षालयेत् ॥ २९ ॥

पत्नी उदकमादाय, चशब्दाद्दर्भकूर्च्चमप्यादाय, पशोर्हताया गोः सर्व्वाणि स्रोतांसि—

"सप्त तावन्मूर्द्धन्यानि तथा स्तनचतुष्टयम्।
नाभिः श्रोणि रपानञ्च गोः स्रोतांसि चतुर्द्दश"।

इत्युक्तलक्षणानि। प्रक्षालयेत्,—दर्भकूर्च्चेण स्रोतांसि प्रकर्षेणाकृष्य क्षालयेदित्यर्थः। स्रोतसां क्षालनञ्चेदं तूष्णीं करणीयम्। क्रम-स्त्वेच्छाधीन एव भवति। तथा चोक्तम्।

---

* मायुमकृतेति,—इति पाठान्तरम्।

4 G

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"चालनं दर्भकूर्चेण सर्व्वत्र श्रोतसां पशोः ।
तूष्णीमिच्छाक्रमेण स्याद्वपार्थे पार्णदारुणी" ।

इति ॥०॥ २९ ॥०॥

अग्रेण नाभिं पवित्रे अन्तर्धायानुलोममाकृत्य वपामुद्धरन्ति ॥ ३० ॥

अग्रेण नाभिं नाभेरग्रतः—अदूरप्रदेशे इत्यर्थः । पूर्व्वमासादिते पवित्रे अन्तर्धाय । द्विवचनं दलापेक्षम्,—इति भट्टनारायणः । अनुलोमं लोम्नामनुकूलं यथा भवति, तथा आकृत्य—पूर्वमासादितेन क्षुरेण पाटयित्वा, वपां मांसचर्म्मणोरन्तर्व्वर्त्तिनीं वशां उद्धरन्ति । कर्त्तुरनियमः । यद्यप्यत्र मन्त्रो नोपदिश्यते, तथापि व्याहृतिजपो न कर्त्तव्यः । कस्मात्?।

"वपाहोमे मुखेनैव होमे स्विष्टकृते तथा ।
व्याहृति र्न प्रयोक्तव्या मुखे नाप्तु च लक्षणम्" ।

इति गृह्यासंग्रहवचनात् । ननु, वपाहोम एव व्याहृतिप्रयोगनिषेधः साक्षाद्वचनादवगम्यते ? । सत्यम् । किन्तु वपाहोमे आचार्य्येण मन्त्रोपदेशात् व्याहृतिप्रयोगप्रसक्तिरेव नास्ति,—इति व्यर्थस्तत्र निषेधः । तस्मादवगच्छामः,—वपाहोमे कर्त्तव्ये यत्किञ्चित् क्रियते तदनुकूलं, तत्रैवासौ निषेधः,—इति ॥०॥ ३० ॥०॥

ताᳲशाखाविशाखयोः काष्ठयोरवसज्याभ्युक्ष्य श्रपयेत् ॥ ३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शाखा एकशाखं काष्ठम्। विशाखा नानाशाखं काष्ठम्। शाखा च विशाखा च शाखाविशाखे, तयोः—शाखाविशाखयोः काष्ठयोः। ते च काष्ठे पालाशे बोद्धव्ये। कस्मात्?। "वपार्थे पार्णदारुणी"—इति वचनात्। तयोः काष्ठयोः तां वपां अवसज्य आरोप्य, उदकेनाभ्युक्ष्य श्रपयेत् ॥०॥ ३१ ॥०॥

प्रस्नुतितायां विशसथेति ब्रूयात् ॥ ३२ ॥

प्रस्नुतितायां प्रच्युतितायां। स्नुतिर् च्यरणे,—इति स्मरणात्। प्रस्नुतितायां वपायां विशसथ,—इति ब्रूयात्। विशसथ, गां अपगतचर्मदेहां कुरुत,—इत्यर्थः। सोऽयं सहायानां प्रैषः। सहायान् खल्वेवं प्रेष्य, अन्यदपि तानवबोधयेत् ॥०॥ ३२ ॥०॥

किन्तत्?। उच्यते,—

यथा न प्रागग्नेर्भूमिं शोणितं गच्छेत् ॥ ३३ ॥

यथा येन प्रकारेण, विशस्यमानाया गोः शोणितं, प्रागग्नेर्भूमिं अग्नेः पुरस्ताद्भूमिभागं न गच्छेत् न द्रयात्,—तथा विशसथ,—इत्यर्थः। एतस्माच्च कारणादवगच्छामः,—अग्नेः समीप एव गौर्विशसनीया,—इति ॥०॥ ३३ ॥०॥

शृतामभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत् ॥ ३४ ॥

शृतां वपाम्। कृतभाष्यमन्यत् ॥०॥ ३४ ॥०॥

स्थालीपाकावृता वपामवदाय,—स्विष्टकृदावृता वाऽष्टकायै स्वाहेति जुहोति ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थालीपाकावृता,—"अथ हविष उपस्तीर्य्यावद्यति मध्यात् पूर्व्वार्द्धात्"—इत्याद्युक्तप्रकारेणेत्यर्थः। पूर्व्वमासादितेन चुरेण वपामवदाय, खिष्टकृदावृता वा कृत्स्नां वपामादाय, अष्टकायै स्वाहा,—इत्यनेन मन्त्रेण जुहोति। तथा चोक्तम्।

"चुरो मांसावदानार्थः, कृत्स्नां खिष्टकृदावृता।
वपामादाय जुहुयात् तत्र तन्त्रं समापयेत्"।

इति। अनन्तरमेवान्यस्य कर्म्मण उपदेशादेककर्म्माशङ्का माभूदिति, "तत्र तन्त्रं समापयेत्"—इत्यनेन कर्म्मणो नानात्वं स्पष्टीकृतम् ॥०॥ ३५ ॥०॥

स्थालीपाकावृताऽन्यत् स्थालीपाकावृताऽन्यत् ॥३६॥

कृतभाष्यमेतत्। अस्मादपि वचनादिदानीमेकस्य कर्म्मणः परिसमाप्तिरवगम्यते। द्विर्व्वचनं प्रपाठक समाप्ति प्रज्ञापनार्थम् ॥०॥ ३६ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये तृतीयप्रपाठकस्य दशमी काण्डिका समाप्ता ॥

समाप्तश्चायं तृतीयः प्रपाठकः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके प्रथमा काण्डिका।

वपाहोममुक्त्वा वपाश्रपण्योः पलाशशाखयोः प्रतिपत्तिमाह,—

अनुप्रहरति वपाश्रपण्यौ ॥ १ ॥

ययोः शाखाविशाखयोरवसज्य वपा अर्पिता, ते शाखाविशाखे वपाश्रपण्यौ उच्यते। ते वपाश्रपण्यौ अनु पश्चात् प्रहरति। कस्य पश्चात्?। द्रव्यासादन तदीक्षण प्रोक्षणपर्य्यन्तस्य। कस्मात्?। आरम्भसामर्थ्यादित्याह। पूर्व्वप्रपाठक परिसमाप्तौ पूर्व्वस्य कर्म्मणः तन्त्रसमापनस्याभिधानात् अग्रे च चरुश्रपणस्य सूचयिष्यमाणत्वात् इदानीं खल्वनुशब्देन चरुश्रपण-पूर्व्वकर्त्तव्यानामेव कर्म्मणां परतः,—इत्यवगम्यते। तत्र च, क्षुरः, कंसपात्रत्रयं, प्लक्षशाखावान् प्रस्तरः,—इत्येतेषामेव वैकृतानामासादनमत्राधिकम्। प्राकृतानामपि मध्ये, चरुस्थाली पवित्र मेक्षणानि इन्दश आसादयितव्यानि, विनियोगसामर्थ्यात्। सर्व्वमन्यत् प्रकृतवदेवासादयितव्यम्। प्रहरतिश्च यजतिवचनः,—इति प्रस्तर-प्रहरण-न्याये निर्णीतम्। "गार्हपत्ये प्रहरामः"—इति च श्रूयते। तथा सूत्रकारोऽप्याह। "अष्टावष्टौ सकलान्याहवनीये प्रहरेयुः"—इति। तस्मात् होमोऽयम् ॥०॥ १ ॥०॥

कथं प्रहरति?। उच्यते,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राचीमेकशूलां प्रतीचीमितराम् ॥ २ ॥

एकं शूलमग्रं यस्याः सेयमेकशूला, तां—शाखां, प्राचीं प्रागग्रां प्रहरति। इतरां विशाखां प्रतीचीं प्रहरति ॥०॥ २ ॥०॥

अवद्यन्त्यवदानानि सर्व्वाङ्गेभ्यः ॥ ३ ॥

अवदीयन्ते,—इत्यवदानानि मांसान्यभिधीयन्ते। प्रकृतस्य पशोः अवदानानि मांसानि अवद्यन्ति क्षुरेणोद्धरन्ति। बहुवचनाद्-नियतः कर्त्ता। कुतोऽवद्यन्ति?। सर्व्वाङ्गेभ्यः—

"हृ ज्जिह्वा क्रोड़ सक्थीनि यकृद्वृक्कौ गुदं स्तनाः।
श्रोणिः स्कन्धसटा पार्श्वं पश्वङ्गानि प्रचक्षते।
एकादशानामङ्गानामवदानानि संख्यया।
पार्श्वस्य वृक्कसक्थ्नोश्च द्वित्वादाहुश्चतुर्दश"।

इत्युक्तलक्षणेभ्यः। ननु, सर्व्वग्रहणं किमर्थम्?।

"हृदयं जिह्वा क्रोड़ं सव्यसक्थि पार्श्वनड़कं पार्श्वं च।
यकृदथ वृक्कौ च गुदं दक्षिणश्रोणि रितरा नाभिः"।

इति वचनान्तरोक्तानामङ्गानामेवावदानानामिह ग्रहणं माभूत, किन्तु सर्व्वेषाम्—इत्येतदर्थमिति गृहाण ॥०॥ ३ ॥०॥

सर्व्वाङ्गेभ्यः,—इत्यस्यापवादमाह,—

अन्यत्र वामाच्च सक्थ्नः क्लोम्नश्च ॥ ४ ॥

सक्थि उरुः। क्लोम तिलकम्। वृक्कादूर्द्धं पिपासास्थानं क्लोम,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्याचक्षते वैद्यकाः। वामात्—सव्यात् सक्थ्नः। क्लोमञ्चान्यत्र सर्व्वाङ्गेभ्य अवद्यन्ति। चशब्दद्वयं द्वयो स्तुल्यत्वप्रज्ञापनार्थम्। प्रयोजनञ्चास्योत्तरसूत्रे वक्ष्यामः ॥०॥ ४ ॥०॥

वामंऽसक्थ्यन्वष्टक्याय निदध्यात् ॥ ५ ॥

वामं सक्थि, अपवादसामर्थ्यात्तुल्यत्वप्रज्ञापनाच्च—क्लोम च, अन्वष्टक्याय,—तादर्थ्ये चतुर्थी, वक्ष्यमाणान्वष्टक्यकर्म्मार्थं निदध्यात् स्थापयेत् ॥०॥ ५ ॥०॥

तस्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च माऽंसचरुञ्च पृथङ्मेक्षणाभ्यां प्रदक्षिणमुदायुवन् ॥ ६ ॥

अग्निद्वये चरुद्वयस्य श्रपणं माशङ्कीत,—इति तस्मिन्नेवाग्नावित्याह। तत्राग्नौ ओदनचरुञ्च श्रपयति, मांसचरुञ्च श्रपयति—अखण्डितैरेवावदानैः। पृथक् नाना श्रपयति। किं कुर्व्वन्?। मेक्षणाभ्यां प्रदक्षिणमुदायुवन्। प्रदक्षिणं यथा भवति, तथा उदायुवन् ऊर्द्धमीषन्मिश्रयन्। ओदनचरुञ्च मांसचरुञ्च,—इत्यसमासकरणं चरुद्वयश्रपणस्य पृथक्कालत्व प्रज्ञापनार्थम्। श्रपणक्रमश्चानयोः पाठक्रमादेव कल्पनीयः ॥०॥ ६ ॥०॥

शृतावभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत् ॥ ७ ॥

व्याख्यातप्रायमेतत्। ननु, मांसचरोः स्थालीपाकधर्म्मानतिदेशात् तस्मिन्नेव चरावेतद्विधातव्यम्। तथाच, शृतमित्येकवचनं मांसचरुमिति वा कर्त्तुमुचितम्। कस्मात् द्विवचनं क्रियते?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असंमोहार्थमित्याह। अन्यथैकवचने कृते मांसचरुमिति वा सूचिते, तस्यैव चरोरभिघारणं न पुनरन्यस्यापि,—इति शिष्याः संमुह्येरन्। अथवा। यावदुक्तत्वादस्मिन्नोदनचरावपि अभिघारणे पवित्रान्तर्हितत्वं न करणीयमित्येतदर्थं शृतावविति द्विवचनं कृतम् ॥०॥ ७ ॥०॥

एतस्मिन् क्रमे आज्यभागान्तं कृत्वा,—

कंसे रसमवासिच्य ॥ ८ ॥

कंसे,—पूर्व्वमासादितानां कंसपात्राणामेकस्मिन् कंसपात्रे, रसं अवदानमांसयूषं अवासिच्य निनीय ॥०॥ ८ ॥०॥

प्लक्षशाखावति प्रस्तरेऽवदानानि कृत्वा ॥ ९ ॥

प्लक्षो वृक्षविशेषः। प्रस्तरः कुशमुष्टिः। प्लक्षस्य शाखा प्लक्षशाखा। सा यस्यास्ति सोऽयं प्लक्षशाखावान्, तस्मिन् प्लक्षशाखावति प्रस्तरे भूमौ प्रागग्रनिहिते, अवदानानि अपनीतयूषान्यवदानमांसानि, कृत्वा स्थापयित्वा ॥०॥ ९ ॥०॥

स्थालीपाकावृताऽवदानानां कंसेऽवद्यति ॥ १० ॥

स्थालीपाकावृता मध्यात् पूर्व्वार्द्धादित्युक्तया रीत्या, प्रत्येकं सर्व्वेषामवदानानां—अपनीतयूषाणां मांसानां, कंसे अपरस्मिन् कंसपात्रे,—यत्र यूषो नावसिक्तस्तस्मिन्—इत्यर्थः। अवद्यति क्षुरेणावदाय स्थापयति। अवदानानामिति संबन्धलक्षणा षष्ठी ॥०॥ १० ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्विष्टकृतश्च पृथक् ॥ ११ ॥

स्विष्टकृतः स्विष्टकृदर्थं। चशब्दात्,—स्थालीपाकाद्धृताऽवदानानां कंसे अवद्यति। किं तस्मिन्नेव कंसे?। न। कुत्र तर्हि?। पृथक्,—अन्यस्मिन् कंसे,—इत्यर्थः। अत्र च, स्विष्टकृदर्थत्वादवदानमांसानामुत्तरार्द्धपूर्व्वार्द्धेभ्योऽवदातव्यम् ॥०॥ ११ ॥०॥

चरोरुद्धृत्य विल्वमात्रमवदानैः सह यूषेण सन्नयेत् ॥ १२ ॥

चरोः प्रकृतत्वादोदनचरोः विल्वमात्रं विल्वपरिमाणं (परिमाणे मात्रट्) उद्धृत्य पूर्व्वोक्तयैव रीत्या मेक्षणेन गृहीत्वा। पात्रे स्थापयेदित्यर्थः। किमेकस्मिन्नेव पात्रे?। न। पृथक्। कथं ज्ञायते?। अत्रापि पृथगिति सम्बध्यते। कस्मात्?। मध्यमणि न्यायात्। तेन, पृथक् पृथगेव मेक्षणेनावदाय पृथक् पृथगेव पात्रे स्थापयेत्। एतदुक्तं भवति। मध्यात् पूर्व्वार्द्धादित्युक्तक्रमेण मेक्षणेन चरोर्विल्वमात्रमवदाय यत्र मांसावदानानि स्थापितानि तस्मिन् कंसपात्रे स्थापयति। एवमुत्तरार्द्धपूर्व्वार्द्धादित्युक्तरीत्या स्विष्टकृदर्थमपि चरोर्विल्वमात्रं पृथगवदाय स्विष्टकृत्कंसपात्रे पृथगेव स्थापयति,—इति। अतएव, यथा सर्व्वैरप्यवदानैर्व्विल्वमात्रमेवोद्धृतं भवति नाधिकं, तथोद्धरेदिति बोद्धव्यम्। ततश्च, तदुद्धृतं विल्वमात्रं पूर्व्वगृहीतैर्मांसावदानैः यूषेण च पूर्व्वावसिक्तेन सह सन्नयेत् सम्यगेकीकुर्य्यात् मिश्रयेदित्यर्थः ॥०॥ १२ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुर्गृहीतमाज्यं गृहीत्वाऽष्टर्चप्रथमया जुहुयाद-ग्नावग्निरिति ॥ १३ ॥

चतुर्गृहीतमाज्यं गृहीत्वा,—इत्युक्तार्थम्। अग्नावग्निरिति योऽय-मष्टर्चः,—अष्टानामृचां समाहारः, तस्य प्रथमया ऋचा जुहु-यात्। ऋगूणामपि चतुर्गृहीतमेवैतत्। कुतः?। विशेषवच-नारम्भस्यार्थवत्त्वात्। पूर्व्ववत्तेषां विशेषस्यानुपदेशाच्च। सेयमा-ज्याहुतिः ॥०॥ १३ ॥०॥

अथ चर्व्वाहुतिरभिधीयते,—

सन्नीतात् तृतीयमात्रमवदाय द्वितीयातृतीयाभ्यां जुहोति ॥ १४ ॥

यत् प्रथमपात्रे सन्नीतं मांसावदानं चर्व्ववदानं यूषञ्च, तस्मात् सन्नीतात् तृतीयमात्रं त्रिभागैकभागमित्येतत्। अवदाय गृहीत्वा, प्रकृतस्याष्टर्चस्य द्वितीया तृतीयाभ्यां ऋग्भ्यां मिलिताभ्यां जुहोति ॥०॥ १४ ॥०॥

मन्त्रान्ते स्वाहाकारः,—इति सूत्रणात् प्रतिमन्त्रमेव स्वाहाकारं कश्चिदाशङ्कीत, अतस्तदपवादार्थमिदमाह,—

उत्तरस्याꣳ स्वाहाकारं दधाति ॥ १५ ॥

उत्तरस्यां ऋचि न पूर्व्वस्यां, स्वाहाकारं दधाति करोति। तत्रैव च जुहोति ॥०॥ १५ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमेवावरे चतुर्थीपञ्चमीभ्याᳪ षष्ठीसप्तमीभ्याञ्च ॥ १६ ॥

एवमेव पूर्व्वोक्तेनैव विधिना, अपरे द्वे तृतीयमात्रे अवदाय, प्रकृतस्याष्टर्चस्य चतुर्थी पञ्चमीभ्यां ऋगभ्यां मिलिताभ्याम् एकामाहुतिं जुहोति, षष्ठी सप्तमीभ्याञ्चापराम्। अत्राप्युत्तरस्यामुत्तरस्यां स्वाहाकारं करोति, तत्रैव च जुहोति ॥०॥ १६ ॥०॥

शेषमवदाय सौविष्टकृतमष्टम्या जुहुयात् ॥ १७ ॥

शेषं स्विष्टकृदर्थमुत्तरार्द्धपूर्व्वार्द्धेभ्यो यद्गृहीतं, तदवदाय, प्रकृतस्यैवाष्टर्चस्य अष्टम्या ऋचा स्वाहाकारान्तया अग्नेरुत्तरार्द्धे पूर्व्वार्द्धे जुहुयात् ॥०॥ १७ ॥०॥

एवन्तावत् गवा यथोक्तेन विधिना यागः कर्त्तव्यः,—इत्ययं प्रथमः कल्पः। यदा पुनर्गौर्न सम्पद्यते, तदा कथं कर्त्तव्यम्?। तदिदानीमभिधीयते,—

यद्युवा अल्पसम्भारतमः स्यादपि पशुनैव कुर्य्यात्॥ ॥ १८ ॥

सम्भ्रियते,—इति सम्भारो द्रव्यम्। अल्पः सम्भारो यस्य सोऽयमल्पसम्भारः। तस्यैवातिशयस्तमप्प्रत्ययार्थः। उवै,—इति निपातौ। यद्युवा,—इति निपातसमुदायो यद्यर्थे,—इति केचित्। यदि अत्यल्पद्रव्यवान् स्यात्, अपि तदापि पशुनैव कुर्य्यादष्टकायागम्। पशुरपि छाग एव स्यात्। कस्मात्?। "अनादेशे पशु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्छागः"—इति ग्रन्थान्तरवचनात्। "छागपक्षे चरावपि"—इति च लिङ्गात्। एवकारकरणं पूर्व्वोक्तकृत्स्नविधिनियमार्थम्। तेन, अत्रापि कल्पे सर्व्व एव पूर्व्वोक्तो होमः स्यात्॥०॥१८॥०॥

छागस्याप्यसम्भवे कथं कर्त्तव्यम्?। तदुच्यते,—

अपि वा स्थालीपाकं कुर्व्वीत ॥ १९ ॥

ऋजुरक्षरार्थः। स खल्वयं स्थालीपाक ओदनचरोः परस्तान्मांसचरुस्थाने सवत्सायास्तरुण्या गोः पयसि श्रपयितव्यः। तथा चोक्तम्।

"स्थालीपाकं पशोः स्थाने कुर्य्याद् यद्यानुकल्पिकम्।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु"।

इति। पशोःस्थाने,—इति करणात् पशुकार्य्यकारित्वमस्यावगम्यते। तेन, अत्राप्यष्टर्च्चेन होमः स्यात्। एवञ्च, पशुपक्षे यावन्ति पशोरवदानानि प्रस्तरे क्रियन्ते, स्थालीपाकपक्षेऽपि तावतः पायसान् पिण्डान् तत्र कुर्व्वीत। तथा चोक्तम्।

"चरितार्था श्रुतिः कार्य्या यस्मादप्यनुकल्पशः।
अतोऽष्टर्च्चेन होमः स्याच्छागपक्षे चरावपि।
अवदानानि यावन्ति क्रियन्ते प्रस्तरे पशोः।
तावतः पायसान् पिण्डान् पश्वभावेऽपि कारयेत्"।

इति। ननु, अपि वा स्थालीपाकेन,—इति वक्तव्ये किमर्थं प्रकृतविभक्त्यतिक्रमः क्रियते?। कस्यचित् कर्म्मणोऽतिक्रमसूचनार्थमित्याह। कथं नाम?। अष्टर्च्चहोमवत्, पश्वभावेऽप्यविलोपार्थं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वपाहोमोऽपि स्थालीपाकेनैव स्यात्। अतो वपाहोमस्य निवृत्तिप्रज्ञापनार्थं प्रकृतविभक्त्यतिक्रमः क्रियते,—इति। अत एव, परिशिष्टकारेणाप्यवदानसङ्ख्यैव पायसपिण्डकरणमुपदिष्टम्॥०॥॥१९॥०॥

अपि वा गोर्ग्रासमाहरेत्॥ २० ॥

अपि वा अथ वा,—स्थालीपाकस्याप्यसम्भवे, गोः,—अविशेषेणोपदेशात् आत्मीयस्य परकीयस्य वा कस्यचिदनडुहः, ग्रासमाहरेद्द्यात्। तावताप्यष्टकाकर्म्म कृतं भवतीत्यभिप्रायः। तथा च गृह्यान्तरम्। "अप्यनडुहो यवसमाहरेत्"—इति। केचिदत्र गोशब्दस्य स्त्रीगवीपरत्वं वर्णयन्ति। ग्रस्यते,—इति ग्रासस्तृणयवसादिः। स च यावता गोर्दिवसाहारः सम्पद्यते, तावान् दातुमुचितः। कस्मात्?।

"यतः कुतश्चित् सम्प्राप्य गोभ्यो वाऽपि गवाह्निकम्।
अभावे प्रीणयन्नस्मान् श्रद्धायुक्तः प्रदास्यति"।

इति श्राद्धकरणाशक्तस्य तथा दर्शनात्॥०॥ २० ॥०॥

अपि वाऽरण्ये कक्षमुपधाय ब्रूयादेषा मेऽष्टकेति॥ ॥ २१ ॥

अपि वा, गोर्ग्रासाहरणस्याप्यसम्भवे,—इत्येतत्। अरण्ये, कक्षं बाहुमूलकोटरप्रदेशं, उपधाय,—(उप हीनार्थे) हीनाधानं कृत्वा,—कक्षतिरोधानमपनीय ऊर्द्ध्वबाहुर्भूत्वा,—इति यावत्। एषा मेऽष्टका,—इत्येतं मन्त्रं ब्रूयात् कथयेत्। तथा च, श्राद्धाशक्तौ गवाह्निकप्रदानस्याप्यसम्भवे पुराणस्मरणम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"सर्व्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः ।
सूर्य्यादिलोकपालानामिदमुच्चैः पठिष्यति ।
न मेऽस्ति वित्तं न धनं न चान्यत्
श्राद्धोपयुक्तं, स्वपितॄन्नतोऽस्मि ।
तृप्यन्तु भक्त्या पितरो, मयैतौ
भुजौ कृतौ वर्त्मनि मारुतस्य" ।

इति । तस्मादत्राप्येतत्परतया वर्णना शक्यते कर्त्तुम् । दृष्टपरिकल्पनाया न्याय्यत्वात् ।

एवं वा—

अरण्ये, कक्षं तृणमङ्कमुपधाय,—अग्निना सन्धुक्ष्य, एषा मेऽष्टकेति ब्रूयात् । तथा च गृह्यान्तरम् । "अग्निना वा कक्षमुपोषेत्"—इति ॥०॥ २१ ॥०॥

न त्वेव न कुर्व्वीत न त्वेव न कुर्व्वीत ॥ २२ ॥

नैवाष्टकां न कुर्व्वीतेति नञ्द्वयेनावश्यं करणमुपदिशति । ननु वक्तव्यं तर्हि? । अवश्यं करणस्य पूर्व्वमेव सिद्धत्वात् । उच्यते । मुख्यकल्पानुकल्पभेदात्तावदत्र पञ्चपक्षाः सूचिताः । शास्त्रान्तरेऽपि यानि पक्षान्तराण्युक्तानि,—"अपि वा अनूचानेभ्य उदकुम्भमाहरेत्"—इत्येवमादीनि, तानि वा कुर्य्यात्, न त्वेव न कुर्व्वीत,—इत्येतदर्थमिदमुच्यते । तुशब्दः स्थालीपाकपक्षेऽप्यन्वष्टक्यस्यावश्यकरणप्रज्ञापनार्थः । इतरथा, पश्वभावेन मांसाभावादस्य लोपः स्यात् । मध्यमाष्टका संज्ञपितपशुमांसेनान्वष्टक्यविधानात् । तथा चोक्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"ओदनव्यञ्जनार्थन्तु पश्वभावेऽपि पायसम्।
सद्रवं श्रपयेदेतदन्वष्टक्येऽपि कर्म्मणि"।

इति। द्विर्व्वचनमादरार्थं, मध्यमाष्टकाकर्म्मणः परिसमाप्त्यर्थं, वीप्सया सर्व्वास्वेवाष्टकासु यथासम्भवमनुकल्पप्राप्त्यर्थञ्च।

इदमिदानीं चिन्त्यते। किमेतेऽष्टकादयः पाकयज्ञाः सकृत् कर्त्तव्याः? उत प्रत्यब्दम्?—इति। तत्र, केचित् सकृदमीषां करणम्—इच्छन्ति। कस्मात्?। एतेषां पुरुषसंस्कारत्वात्, सकृत् कृतेनैव च कर्म्मणा पुरुषसंस्कारस्य वृत्तत्वात्, पुनः करणे हेतोरभावात्,—इति। अन्ये त्वाहुः;—

"तस्मादुत्सृज्य कौन्तेय! गोवृषान् प्रति वत्सरम्"।

इति पौराणिक-लिङ्गदर्शनात् आवृत्तिरेवामीषाम्। न च पुरुषसंस्कारस्य वृत्तत्वात् किमर्थमावृत्तिरिति वाच्यम्। पुरुषसंस्कारस्य वृत्तत्वेऽपि प्रत्यवायपरिहारार्थमावृत्ते र्युक्तत्वात्,—इति। वयन्तु पश्यामः। सकृदवश्यमेव करणं, आवृत्तौ तु नात्यन्तं नियमः। ततश्च, आवृत्तावभ्युदयः, अनावृत्तावपि न प्रत्यवायः। तथा चोक्तम्।

"सकृदप्यष्टकादीनि कुर्य्यात् कर्म्माणि यो द्विजः।
स पंक्तिपावनो भूत्वा लोकान् प्रैति घृतश्रुतः।

इति। अत्र खल्वपिशब्दादावृत्तिरपि अवगम्यते॥०॥ २२॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य प्रथमा काण्डिका समाप्ता॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके द्वितीया काण्डिका ।

श्वस्ततोऽन्वष्टक्यम् ॥ १ ॥

ततस्तस्मादनन्तरोपदिष्टान्मांसाष्टकाकर्म्मणः, श्वः अनागतेऽह्नि,—नवम्यामित्यर्थः । एवमेके । अष्टकाकर्म्मदिनात् परदिन एव, न नवम्या नियमः । एवमपरे । अन्वष्टक्यं कर्त्तव्यमिति वाक्यशेषः । अष्टकायाः पश्चाद्भवतीत्यन्वष्टका, तत्र साधु अन्वष्टक्यमिति कर्म्मणो नामधेयम् । कश्चित् सर्व्वत्रैवान्वष्टक्यं मन्यमानः सूत्रे ततः शब्दस्य वीप्सां कृत्वा व्याचष्टे,—ततस्ततः अन्वष्टक्यम्,—इति । तदसङ्गतम् । मांसाष्टकाकर्म्मण एवानन्तरत्वात् । वीप्साया अश्रुतत्वाच्च । सर्व्वत्रान्वष्टक्यपक्षस्याचार्य्यसम्मतत्वाभावाच्च । तदिदमधस्तादेवास्माभिरभिहितं,—"तथा गौतमवार्कखण्डी"—इत्यत्र । अथैवं ततः,—इत्यनर्थकम्, अधिकारादेव मांसाष्टकाकर्म्मणो लाभात् । नियमार्थं तर्हि । किं नियम्यते? । तस्मान्मांसाष्टकाकर्म्मण एव नान्यस्मादित्येतन्नियम्यते । किमर्थं पुनर्नियम्यते? । अधिकाशङ्का-निरासार्थमित्याह । कापुनरत्राधिकाशङ्का? । उच्यते । अन्वष्टक्यम्,—इति समाख्याबलात् सर्व्वास्वेवाष्टकासु अन्वष्टक्यं कदाचिदापातेन प्रतिभायात् कस्यचित् । सेयमधिकाशङ्का ॥०॥ १ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपरस्मिं वा ॥ २ ॥

अपरस्य:,—एकान्तरिते अहनि वा अन्वष्टक्यम् कर्त्तव्यम्। तिथिवृद्धि पक्षेऽयं विकल्प:,—इति नवम्यामन्वष्टक्यवादिन:। दिनवादिनस्त्वाहु:,—अशक्तावयं विकल्प:,—इति ॥०॥ २ ॥०॥

अथेदानीम् अन्वष्टक्यं कर्म्म विवक्षुराह,—

दक्षिणपूर्व्वेऽष्टमदेशे परिवारयन्ति ॥ ३ ॥

वेश्मनो दक्षिणपूर्व्वे अष्टमदेशे उभयदिगष्टमभागे,—आग्नेय्यामित्येतत्। परिवारयन्ति, सर्व्वतोभावेनाच्छादयन्ति कटादिभि: किञ्चित् स्थानम्। बहुवचनादनियत: कर्त्ता ॥०॥ ३ ॥०॥

कथं परिवारयन्ति?। उच्यते,—

तथाऽऽयतम् ॥ ४ ॥

तथेति दक्षिणपूर्व्वाष्टमदेशोभण्यते। दक्षिणपूर्व्वाष्टमदेशायतं यथा भवति, तथा परिवारयन्ति। आयतमायामोदैर्घ्यमित्यनर्थान्तरम् ॥०॥ ४ ॥०॥

तथामुखैः कृत्यम् ॥ ५ ॥

यद्वक्ष्यमाणं कर्म्म, तत् तथामुखै: दक्षिणपूर्व्वाष्टमदेशाभिमुखै: कृत्यं करणीयम्। लाघवार्थमेवैतत् सूचितम्। अन्यथ सूत्रणे हि दक्षिणपूर्व्वाष्टमदेशमुखैरिति सूचयितव्यं भवति ॥०॥ ५ ॥०॥

कियत्परिमितं स्थानं परिवारयन्ति?। उच्यते,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुरवरार्द्ध्यान् प्रक्रमान् ॥ ६ ॥

चत्वारोऽवरार्द्ध्याः निकृष्टा येषां, तान् चतुरवरार्द्ध्यान् प्रक्रमान् परिवारयन्ति। तदस्यातिक्रान्ततरेण सूत्रेण संबन्धो बोद्धव्यः। प्रक्रमः श्रवणाकर्म्मण्येव व्याख्यातः। एतदुक्तं भवति। सर्व्वनिकृष्टोऽयं पक्षः;—यच्चतुर्णां प्रक्रमाणां परिवारणम्,—इति। इच्छया पुनरधिकमपि परिवारयन्ति ॥०॥ ६ ॥०॥

तस्य खलु परिवृतस्य,—

पश्चादुपसञ्चारः ॥ ७ ॥

पश्चात् पश्चिमदिशि उपसञ्चारः कर्त्तव्यः। उपसञ्चरत्यनेनेत्युपसञ्चारो द्वारमुच्यते ॥०॥ ७ ॥०॥

उत्तरार्द्धे परिवृतस्य लक्षणं कृत्वाऽग्निं प्रणयन्ति ॥ ८ ॥

परिवृतस्य स्थानस्योत्तरार्द्धे पूर्व्वोक्तं लक्षणसंज्ञकं कर्म्म कृत्वा अग्निं प्रणयन्ति। बहुवचनात् कर्त्तुरनियमः। एवञ्चात्र यावदुक्तत्वाद्ब्रह्मासनादीनां निवृत्तिरवगम्यते। तथाच गृह्यासंग्रहः।

"एकाग्नौ पितृयज्ञे च ब्रह्माणं नोपकल्पयेत्।
सायं प्रातश्च होमेषु तथैव बलिकर्म्मसु"।

इति। इदमिदानीं सन्दिह्यते। किमेतदग्निप्रणयनं उपवीतिना प्राङ्मुखेन करणीयम्, उत प्राचीनावीतिना दक्षिणपूर्व्वाष्टमदिङ्मुखेन?—इति। उपवीतिना प्राङ्मुखेन,—इति ब्रूमः। कस्मात्?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"लक्षणावृदेषा सर्व्वत्र"—इति सर्व्वत्रग्रहणेन व्याप्त्यवगमात्। इह च, लक्षणं कृत्वा,—इति वचनस्यैवमर्थत्वात्। अन्यथा खल्वग्निप्रणयने लक्षणं प्राप्तमेवेति पुनर्व्वचनमनर्थकमेव स्यात्। तस्मात्, लक्षणे रेखानां प्राग्गतत्वानुरोधात् तत्र प्राङ्मुखकरणावधारणाच्च, अत्रापि प्राङ्मुख एव कुर्य्यादित्यवगच्छामः। एवञ्च, यथा अन्यत्रलक्षणमुपवीतिना क्रियते, तथा अत्राप्यस्मिन् कर्म्मण्युपवीतिनैव भवितव्यम्। उपरिष्टात् खल्वाचार्य्यः,—"अत ऊर्द्धं प्राचीनावीतिना"—इति कुर्व्वन्, अधस्तात् किञ्चित् कर्म्म प्राचीनावीतिना, किञ्चिदुपवीतिना, किञ्चिच्चोभयथैव कर्त्तव्यमित्युपदिशति। एतच्चोपरिष्टादेव व्याख्यास्यामः। अतएव कर्म्मप्रदीपः।

"दक्षिणं पातयेज्जानु देवान् परिचरन् सदा।
पातयेदितरज्जानु पितॄन् परिचरन्नपि"।

इति स्मरति। तदिदं वचनम्,—पितृकर्म्मान्तःपात्यपि देवपरिचरणं दक्षिणजानुपातेन एवं दैवकर्म्मान्तर्गतमपि पितृपरिचरणं इतरजानुपातेन करणीयम्,—इत्याह। कथं ज्ञायते?। सदा शब्दस्यैवमर्थत्वात्। एवञ्च, उपवीतित्वादावपि तथैव वर्णयितुमुचितम्। कस्मात्?। कारणस्याविशेषात्। अग्निं किल देवमाचक्षते नैरुक्ताः ॥०॥ ८ ॥०॥

पश्चादग्नेरुलूखलं दृꣳहयित्वा सकृत् संगृहीतं व्रीहिमुष्टिमवहन्ति सव्योत्तराभ्यां पाणिभ्याम् ॥ ९ ॥

उत्तरशब्द उपरितनवचनः। सव्यः पाणिरुत्तरो दक्षिणस्याधरो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ययोः पाण्योः, ताविमौ सव्योत्तरौ, ताभ्यां सव्योत्तराभ्यां पाणिभ्यां मुषलेनावहन्ति। उक्तार्थमन्यत्। सकृत् संगृहीतमिति वचनात् अनुनिर्व्वापयोश्च निवृत्तिमिच्छन्ति। व्रीहिग्रहणं हविरन्तरप्रतिषेधार्थम्। यद्यप्यत्र सकृत्संगृहीतस्य मुष्टिमात्रस्य ग्रहणम् अवगम्यते, तथापि तथा गृह्णीयात् यथा होमस्य पिण्डानाञ्चाभिनिर्वृत्तिः स्यात्। कुतः?। अदमर्थाद्ग्रहणस्य। अतएवाचार्य्यपुत्रेण,—

"चतुर्मुष्टिश्चरुः कार्य्यश्चतुर्णामुत्तरोऽपि वा"।

इति सामान्यत एवोपदिष्टम्। तदिदं हविर्निर्व्वपनादिकं प्राचीनावीती दक्षिणपूर्व्वाष्टमदिङ्मुखः कुर्य्यात्। कुतः?। पित्र्यत्वात्। कस्मात् पुनः कारणात् सत्यपि देवतानां साधारण्ये पित्र्यत्वमेव हविषः कथ्यते?। प्राधान्यादित्याह। पितॄणां खल्वत्र कर्म्मणि प्राधान्यमवगम्यते। तस्मात् पित्र्यमिदं भवितुमर्हति। प्रधानवशाद्धि नियमो वर्णयितुमुचितः। कुतः पुनरत्र पितॄणामेव प्राधान्यमवगम्यते न देवतानामपि?। तथा मुखैः कृत्यमिति वचनात्—इति ब्रूमः। अपिच। हविषः सकृद्ग्रहणात्, सव्योत्तराभ्यां पाणिभ्यामवहननात्, सकृत् फलीकरणात्, यथा मांसाभिघाराः पिण्डा भवन्ति तथा मांसच्छेदनात्, प्रसव्यमुदायवनात्, दक्षिणस्यामुद्वासनात्,—इत्येवमादिभिरुपदेशशतैः पितॄणामेवात्र प्राधान्यमवगम्यते। मनुरपि स्मरति।

"देवकार्य्यात् द्विजातीनां पितृकार्य्यं विशिष्यते।
दैवं हि पितृकार्य्याणां पूर्व्वमाप्यायनं स्मृतम्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। तस्मात् पितृणामेव प्राधान्यम्। एतच्चोपरिष्टात्तत्र तत्र स्फुटीभविष्यति।

इदमिदानीं सन्दिह्यते। किमत्र पित्र्यत्वात् पितृभ्यस्त्वा जुष्टं निर्व्वपामि,—इति मन्त्रेण निर्व्वपणम्, आहोस्वित् यावदुक्तत्वाद्-मन्त्रकम्, उताहो आचार्य्यपुत्रपरिभाषाबलात् व्याहृतिचितयेन?—इति। पितृभ्य स्त्वा जुष्टं निर्व्वपामि,—इति मन्त्रेण,—इति ब्रूमः। कस्मात्?। प्रकृतौ तथा दर्शनात्। लिङ्गाच्च। अग्नौकरण-होम-विचारश्लोके खल्वेतस्यार्थस्य लिङ्गमुपलभ्यते। तथाच कर्म्म-प्रदीपः।

"अपसव्येन वा कार्य्यो दक्षिणाभिमुखेन तु।
निरुप्य हविरन्यस्मा अन्यस्मै नहि हूयते"।

इति। एतस्मात् लिङ्गात् मन्त्रवद्ग्रहणमवगम्यते। पित्रर्थं निर्व्वापः खल्वस्य हविषः हेतुतयोपन्यस्यते। तच्चैवं सति आञ्ज-स्येनोपपद्यते। तथाच पुराणस्मरणम्।

"अग्निमान् निर्व्वपेत् पित्र्यं चरुं वा शस्यमुष्टिभिः।
पितृभ्यो निर्व्वपामीति सर्व्वं दक्षिणतोन्यसेत्"।

इति ॥०॥ ६ ॥०॥

यदा वितुषाः स्युः ॥ १० ॥

यदा यस्मिन् काले वितुषाः विगततुषाः स्युर्भवेयुः ॥०॥ १० ॥०॥

तदा,—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सकृदेव सुफलीकृतान् कुर्व्वीत ॥ ११ ॥

सकृदेवावारमेव, सुफलीकृतान्—सुशब्दः शोभनवचनः, शोभनं यथा भवति तथा फलीकृतान् निष्पन्नीकृतान् तण्डुलान् कुर्व्वीत पूर्व्वमेव खल्ववघातेन तण्डुला निष्पन्नाः। इदानीन्तु शोभनं निष्पन्नीकरणमुपदिश्यते। तेन प्रच्छट्टनमिदानीं कुर्व्वीत ॥०॥ ११ ॥०॥

अथामुष्माच्च सक्थ्नो माꣳसपेशीमवकृत्य नवायाꣳ सूनायामणुशश्छेदयेत् ॥ १२ ॥

अथ शब्द आनन्तर्य्यार्थः। अथ, तण्डुलप्रक्षालनानन्तरम्। प्रक्षालनञ्च सकृदेव स्यात् हविषः पिच्छलत्वात्। व्यवहितस्यापि बुद्ध्या सन्निकृष्य अमुष्मादित्यनेन परामर्शः। अथ शब्दः पूर्व्वप्रकृतार्थोवा। अमुष्मात् पूर्व्वप्रकृतात् मांसाष्टकायां निहितात् सक्थ्नः, चशब्दात् क्लोम्नश्च, मांसपेशीं,—मांसपेशी प्रसिद्धा, तां अवकृत्य अवच्छिद्य, नवायां सूनायां,—सूना नाम काष्ठमयः पात्रविशेषः, तस्यां सूनायां अणुशः सूक्ष्मं सूक्ष्मं कृत्वा छेदयेत् ॥०॥ १२ ॥०॥ कथं छेदयेत्?। उच्यते,—

यथा माꣳसाभिघाराः पिण्डा भविष्यन्तीति ॥ १३ ॥

यथा येन प्रकारेण मांसाभिघाराः मांसव्यञ्जनाः पिण्डा भविष्यन्ति, इति तथा छेदयेत् ॥०॥ १३ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मिन्नेवाग्नौ अपयत्योदनचरुञ्च मांसचरुञ्च पृथङ्मेक्षणाभ्यां प्रसव्यमुदायुवन् ॥ १४ ॥

प्रसव्यं अप्रदक्षिणम्। कृतभाष्यमन्यत्। अत्रापि, मांसाभावे पायसः स्यात्। तदिदमुक्तमस्माभिरधस्तादेव, "ओदनव्यञ्जनार्थन्तु"—इत्यादिना ॥०॥ १४ ॥०॥

मृतावभिघार्य्य दक्षिणोद्वास्य न प्रत्यभिघारयेत् ॥ १५ ॥

दक्षिणा दक्षिणस्याम्। गतमन्यत् ॥०॥ १५ ॥०॥

दक्षिणार्द्धे परिवृतस्य तिस्रः कर्षूः खानयेत् पूर्व्वोपक्रमाः ॥ १६ ॥

परिवृतस्य स्थानस्य दक्षिणार्द्धे दक्षिणांशे, तिस्रः त्रिसंख्याका कर्षूः केनचित् खानयेत्। अन्यस्य पुनरसम्भवे स्वयमपि खनेत्। कर्षूर्नाम अवटो गर्त्त इत्यनर्थान्तरम्। कथम्भूताः?। पूर्व्वोपक्रमाः। पूर्व्वस्यां दिश्युपक्रमो यासां ताः, तथाविधाः,—इत्यर्थः। तथाच, पूर्व्वस्यां दिश्युपक्रम्य पश्चिमायां दिशि खननं समापनीयम्। पित्र्यत्वात् प्रसव्यखननमित्यभिप्रायः। अथवा। उपक्रम्यते,—इत्युपक्रमः। पूर्व्वाकर्षूरुपक्रमो यासां कर्षूणां, ताः तथोक्ताः। तथाभूताः खानयेत्। का पुनः पूर्व्वा?। या खल्वात्मनः पुरतः क्रियते। एतदुक्तं भवति। प्रथमतः पूर्व्वां कर्षूं खानयेत्, ततो मध्यमां, तत उत्तमाम्,—इति। तथा चोक्तम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"पुरतो याऽऽत्मनः कर्षूः सा पूर्व्वा परिकीर्त्त्यते ।
मध्यमा दक्षिणेनास्यास्तद्दक्षिणत उत्तमा" ।

इति । तथाच, इमाः कर्ष्वो दक्षिणसंस्था भवन्ति । खननञ्चा-मूषां शङ्कुना करणीयम् । स च,—

"शङ्कुश्च खादिरः प्रोक्तो रजतेन विभूषितः ।
शङ्कुश्चैवोपवेशश्च द्वादशाङ्गुल इष्यते" ।

इति कर्म्मप्रदीपोक्तलक्षणः ॥०॥ १६ ॥०॥

कीदृशीः कर्षूः खानयेत् ?। उच्यते,—

प्रादेशायामाश्चतुरङ्गुलपृथ्वीस्तथाऽवखाताः ॥ १७ ॥

प्रादेशायामाः प्रादेशदीर्घाः । पृथुशब्दो धर्म्मवचनः । चतुरङ्गुलं पृथु यासां, ताः चतुरङ्गुलपृथ्वीः । पृथु पृथुत्वं परिणाहः,— इत्येतत् । तथा चतुरङ्गुलं अवखातं यासां, ताः तथाऽवखाताः । विशेषमाह कर्म्मप्रदीपः ।

"वाय्वग्निदिङ्मुखान्तास्ताः कार्य्याः सार्द्धाङ्गुलान्तराः ।
तीक्ष्णाग्रा यवमध्याश्च मध्ये नावद्दवोत्किरेत्" ।

इति ॥०॥ १७ ॥०॥

पूर्व्वस्याः कर्षाः पुरस्ताल्लक्षणं कृत्वाऽग्निं प्रणयन्ति ॥ १८ ॥

स्फुटरक्षरार्थः । अत्रापि, लक्षणग्रहणस्य पूर्व्वोक्तमेव प्रयोजनं बोद्धव्यम् । बहुवचनात् कर्त्तुरनियमः ॥०॥ १८ ॥०॥

कश्चिदत्र विशेषमाह,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपरेण कर्षूः पर्य्याहृत्य लक्षणे निदध्यात् ॥ १९ ॥

अपरया अदूरवर्त्तिन्या दिशा,—इत्यर्थे एणप् प्रत्ययान्तोऽयमपरेणशब्दः। तद्योगात् कर्षूरिति द्वितीया। तथाच, अयमर्थः। कर्षूणामदूरवर्त्तिन्या पश्चिमया दिशा, अग्निं पर्य्याहृत्य सर्व्वतोभावेनाहृत्य लक्षणे निदध्यात् ॥०॥ १९ ॥०॥

सकृदाच्छिन्नं दर्भमुष्टिं स्तृणोति ॥ २० ॥

आच्छिन्नं आ सम्यक्,—उपमूले च्छिन्नं दर्भमुष्टिं, सकृदेकवारं स्तृणोति,—"पश्चाद्वाऽऽस्तीर्य्य"—इत्युक्तया रीत्या; प्रकृतस्याग्नेस्तुर्द्दिक्षु। अत्र, आच्छिन्नमिति वचनस्यार्थवत्त्वादुपमूललूनत्वावगमात् तस्य च पित्रर्थत्वात् प्राचीनावीतिनैतत् कर्त्तव्यम्,—इत्यवगम्यते ॥०॥ २० ॥०॥

कर्षूश्च ॥ २१ ॥

स्तृणोति,—इत्यनुवर्त्तते ॥०॥ २१ ॥०॥

किमनियमेन? । न। कथन्तर्हि?—

पूर्व्वोपक्रमाः ॥ २२ ॥

व्याख्यातोऽक्षरार्थः। अत्र किञ्चिद्वक्तव्यमस्ति। कर्षूणां स्तरणं खल्विदं दक्षिणपूर्व्वाष्टमदिगग्रैः कुशैः दक्षिणान्तादारभ्यकरणीयम्। तदाह कर्म्मप्रदीपः।

"अग्न्याग्राग्रैः कुशैः कार्य्यं कर्षूणां स्तरणं घनैः।
दक्षिणान्तात्तदग्रैस्तु पितृयज्ञे परिस्तरेत्"।

4 K

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति । इदमिदानीं सन्दिह्यते । किमभितः कर्षूणां स्तरणं कर्त्तव्यम्? आहोस्विन्मध्यतः?—इति । अग्निवदभितः,—इति ब्रूमः। कुतः? । अग्निस्तरणसमभिव्याहारेणोपदेशात्तथावगतेः । अग्नेः खल्वभित एव स्तरणमिति तावन्निर्व्विवादम् । तत् सामान्यात् कर्षूणामपि तथैव स्तरणमित्ययमर्थोऽस्माकमागच्छति हृदयम् । आगच्छति चेत्, न युज्यते विनाकारण मुत्स्रष्टुम् । लेखाकरणोपपत्तेश्च । कर्षूणां मध्यतः किल लेखाकरणं व्याख्यास्यामः । तदुपपत्तये च अभितः कर्षूणां स्तरणमिति प्रति पद्यामहे । न खलु कुशैः स्तृतानां कर्षूणां मध्यतो लेखा कर्त्तुं शक्यते । अपरे पुनरेतदविद्वांसो भाषन्ते,—स्तरणमिदं कर्षूणां मध्यतः करणीयम्,—इति ॥०॥ २२ ॥०॥

पश्चात् कर्षूणाᳬ स्वस्तरमास्तारयेत् ॥ २३ ॥

व्याख्यातप्रायमेतत् ॥०॥ २३ ॥०॥

केन?—

दक्षिणाग्रैः कुशैः ॥ २४ ॥

स्पष्टार्थं सूत्रम् ॥०॥ २४ ॥०॥

कीदृशं स्वस्तरमास्तारयेत्?—

दक्षिणाप्रवणम् ॥ २५ ॥

इदमपि व्याख्यातप्रायमेव ॥०॥ २५ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृषीञ्चोपदध्यात् ॥ २६ ॥

वृषी नाम काष्ठमयी द्वादशाङ्गुलपरिमित आसनविशेषः, उपवेशस्थाख्यायते। ताञ्च उपदध्यात् स्थापयेत्। चशब्दः स्वस्तरेण सम्बन्धकरणार्थः। तेन, स्वस्तरोपरि वृष्या उपधानम्,—इति केचित्। चशब्दात् उपशब्दाच्च स्वस्तरस्योप समीपे वृषीं दध्यात्। अतएव परतः स्वस्तरोपरि द्रव्याणामासादनं सूचयिष्यते। अस्या अपि स्वस्तरोपर्य्येवासादने इदमपि तत्रैवासूचयिष्यत्, अत्रैव वा स्पष्टार्थं 'तत्र' ग्रहणमकरिष्यदाचार्य्यः। तदकरणादवगच्छामः,—नास्याः स्वस्तरोपर्य्यासादनम्,—इति। एवमपरे। तदत्र भवन्तो भूमिदेवाः प्रमाणम्। उपदध्यादिति वचनादुपधानमेवास्याः कर्त्तव्यमदृष्टार्थं, न पुनरुपवेशनार्थं तदासादनमिति नारायणोपाध्यायप्रभृतयः ॥०॥ २६ ॥०॥

तत्रास्मा आहरन्त्येकैकशः सव्यं बाहुमनु ॥ २७ ॥

तत्र,—इत्यतिक्रान्तस्य स्वस्तरस्य परामर्शो न वृष्याः। कथं ज्ञायते?। "स्वस्तरे सर्व्वमासाद्य"—इति परिशिष्टकारवचनात्। तत्र स्वस्तरे वक्ष्यमाणानि द्रव्याण्येकैकशः आहरन्ति। कथमाहरन्ति?। अस्मै सव्यं बाहुमनु। अस्मै,—इत्यत्र "षष्ठ्यर्थे चतुर्थी वक्तव्या"—इति वचनात् षष्ठ्यर्थे चतुर्थी। अस्य यजमानस्य सव्यं बाहुं अनु लक्ष्मीकृत्य,—अप्रादक्षिणेनेत्यर्थः। अथवा। अस्मै,—इति तादर्थ्ये चतुर्थी। अस्मै यजमानाय, अन्ये शिष्यादय आह-

4 K 2

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रन्ति। समान मन्यत्। अन्यस्य पुनरसम्भवे स्वयमेवाहरेत् ॥०॥ २७ ॥०॥

कानि पुनस्तानि द्रव्याणि?। उच्यते,—

चरुस्थाल्यौ मेक्षणे कंसं दर्व्वीमुदकमिति ॥ २८ ॥

ओदनचरुमांसचरुसहिते पूर्व्वोक्ते चरुस्थाल्यौ आहरन्ति। एवमुत्तरत्रापि। इतिकार-करणात् अन्येषामप्युल्लेखन पिञ्जली यव तिल पुष्पप्रभृतीनां येषामुपरिष्टाद्विनियोगः सूत्रयिष्यते, तानि-चासादयन्ति ॥०॥ २८ ॥०॥

पत्नी वर्हिषि शिलां निधाय स्थगरं पिनष्टि ॥ २९ ॥

स्थगरं चन्दनादिगन्धद्रव्यम्। तथा चोक्तम्।

"स्थगरं सुरभि ज्ञेयं चन्दनादि विलेपनम्"।

इति। स्पष्ट मन्यत् ॥०॥ २९ ॥०॥

तस्यांचैवाञ्जनं निघृष्य तिस्रो दर्भपिञ्जली रञ्जयति सव्यन्तराः ॥ ३० ॥

तस्यामेव शिलायाम्,—एव शब्दाद्वर्हिषि निहितायां, चशब्दात् प्रकृता पत्नी, अञ्जनं निघृष्य विशेषेण घर्षयित्वा। निघर्षणो-पदेशात् अञ्जनपदेन सौवीराञ्जनमभिप्रेतमित्यवगच्छामः। कुतः?। इतरस्य घर्षणानुपपत्तेः। तथा चोक्तम्।

"सौवीराञ्जनमित्युक्तं पिञ्जलीनां यदञ्जनम्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। तेनैवाञ्जनेन तिस्रः त्रिसंख्याकाः, दर्भपिञ्जलीः पूर्व्वोक्त-लक्षणाः, अञ्जयति म्रक्षयति पत्नी। किं यथेच्छम्?। न। कथन्तर्हि?। सव्यन्तराः। विशेषेणान्तरमवकाशोव्यन्तरं तत् सहिताः सव्यन्तराः। अविच्छलाकावदिति यावत्। अथवा। सव्यशब्दो नानावचनः। तेन, नानाऽन्तराः,—इति पूर्व्वोक्त एवार्थः ॥०॥ ३० ॥०॥

तैलञ्चोपकल्पयेत् ॥ ३१ ॥

चशब्दात् स्रस्तर एव। तदस्यातिक्रान्तेन स्रस्तरेण सम्बन्धो बोद्धव्यः ॥०॥ ३१ ॥०॥

क्षौमदशाञ्च ॥ ३२ ॥

अतसीसूत्रदशाञ्च स्रस्तर एवोपकल्पयेत् ॥०॥ ३२ ॥०॥

शुचौ देशे ब्राह्मणाननिन्द्यानयुग्मानुदङ्मुखानुपवेश्य ॥ ३३ ॥

शुचौ पवित्रे, देशे—गोमयेनोपलेपिते। कथं ज्ञायते?।

"शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्"।

इति मनु स्मरणात्। ब्राह्मणान् ब्राह्मणग्रहणात् क्षत्रियादिप्रतिषेधः। अनिन्द्यान्,—निन्द्याः निन्दार्हाः, ते न भवन्तीत्यनिन्द्याः, तान् अनिन्द्यान्। अयुग्मान् विषम संख्याकान्,—बहुवचनात् त्रिप्रभृतीन्, उदङ्मुखान् उपवेश्य। उपवेशनञ्चामीषां कर्षूणां दक्षिणतः स्यात्। एवं खल्वग्रतो ब्राह्मणानां कर्षूपिण्डा भवन्ति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदमिदानीं सन्दिह्यते । किमत्र वैश्वदेवार्थं ब्राह्मणमुपवेशयेत्, उत यावदुक्तत्वान्न?—इति। तत्र, अविधानादिह वैश्वदेवस्यैवाभावः,—इति केचित्। तदसङ्गतम्। कस्मात्?। वैश्वदेवपूर्व्वस्यैव श्राद्धस्य शास्त्रान्तरे विधानात्। तथाच मनुः।

"तेषामारक्षभूतन्तु दैवं पूर्व्वं नियोजयेत्।
रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्ज्जितम्"।

इति। "स्नातान् शुचीनाचान्तान् प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान् यथाशक्ति पित्र्ये"—इति, "दैवपूर्व्वं श्राद्धं कुर्वीत"—इति चास्मदीये श्राद्धकल्पे। तस्मात्,—वैश्वदेवार्थं युग्मान् ब्राह्मणान् प्राङ्मुखानुपवेश्य ततः पितृब्राह्मणानुपवेशयेत्,—इति सिद्धान्तः। तथाच कर्म्मप्रदीपः।

"खस्तरे सर्व्वमासाद्य यथावदुपयुज्यते।
दैवपूर्व्वन्ततः श्राद्धमत्वरः शुचिरारभेत्"।

इति। किमर्थं तर्हि वैश्वदेवस्यासूत्रणम्?। उच्यते। प्रधानस्य पितृयज्ञस्य सूत्रणे तदङ्गं वैश्वदेवमसूचितमपि प्राप्यत एवेति मन्यमानः खल्वाचार्य्यो नात्र वैश्वदेवं सूत्रयाञ्चकारेति लिख्यते। अथवा। अनिन्द्यानित्यनेन ब्राह्मणपरीक्षां सूचयन् दैवञ्चात्रासूत्रयन् दैवे ब्राह्मणपरीक्षायामसम्मतिं दर्शयति। तथाच मनुः।

"ब्राह्मणं न परीक्षेत दैवे कर्म्मणि धर्म्मवित्।
पित्र्ये तु कर्म्मणि प्राप्ते परीक्षेत प्रयत्नतः"।

इति ॥०॥ ३३ ॥०॥

दर्भान् प्रदाय ॥ ३४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्भानासनेषु दत्त्वा। तथा चास्मदीये श्राद्धकल्प-सूत्रम्। "आसनेषु दर्भानास्तीर्य्य"—इति। आदिशब्दोऽत्रलुप्तवत् द्रष्टव्यः। तेन दर्भादीनर्घ्यपर्य्यन्तान् प्रदाय—अर्घ्यपर्य्यन्तं कर्म्म कृत्वा,—इत्येतत्। तथाच कर्म्मप्रदीपः।

"आसनाद्यर्घ्यपर्य्यन्तं वशिष्ठेन यथोदितम्।
कृत्वा कर्म्माथ पात्रेषु उक्तं दद्यात्तिलोदकम्"।

इति ॥०॥ ३४ ॥०॥

उदकपूर्व्वन्तिलोदकं ददाति पितुर्नाम गृहीत्वाऽसावेतत्ते तिलोदकं येचात्र त्वा मनु यांश्च त्व मनु तस्मै ते स्वधेति ॥ ३५ ॥

उदकं पूर्व्वं यस्य तदुदकपूर्व्वं तिलोदकं तिलमिश्रमुदकं ददाति। एतदुक्तं भवति। प्रथमं केवलमुदकं दत्त्वा ततस्तिलमिश्रमुदकं ददाति—इति। केन मन्त्रेण ददाति?। असावेतत्ते तिलोदकमित्यनेन मन्त्रेण। किं कृत्वा?। असौ—इत्येतस्मिन् स्थाने सम्बोधनविभक्त्या पितुर्नाम गृहीत्वा उच्चार्य्य। "नामग्रहणवचनमेकदेशोत्कीर्त्तनाभिप्रायम्। तेन गोत्रादेरप्युल्लेखः"—इति वदन्ति। तथा चास्मदीयं स्नानसूत्रपरिशिष्टम्।

"गोत्रं स्वरान्तं सर्व्वत्र गोत्रस्याक्षय्यकर्म्मणि।
गोत्रस्तु तर्पणे प्रोक्तः कर्त्ता एवं न मुह्यति।
सर्व्वत्रैव पितः प्रोक्तं पिता तर्पणकर्म्मणि।
पितुरक्षय्यकाले तु कर्त्ता एवं न मुह्यति।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शर्म्मन्नर्घ्यादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि ।
शर्म्मणोऽक्षय्यकाले तु कर्त्ता एवं न मुह्यति" ।

इति । इदञ्च तिलोदकदानं पात्रेष्वेव कर्त्तव्यं न ब्राह्मणहस्तेषु । कस्मात्? । "पात्रेषु उक्तं दद्यात्तिलोदकम्"—इति वचनात् । तिलोदकदानपात्रञ्च—

"आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम् ।
पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च ।
कुलालचक्रनिष्पन्न मासुरं मृण्मयं स्मृतम् ।
तदेव हस्तघटितं स्थाल्यादि दैविकं स्मृतम्" ।

इत्युक्तलक्षणं बोद्धव्यम् । आह । किमानन्तर्य्यात् तिलोदकमेव मन्त्रेण ददाति, उत केवलोदकमपि?—इति । तिलोदकमेव,—इति ब्रूमः । कस्मात्? । आनन्तर्य्यादेव । तथाच कर्म्मप्रदीपः ।

"तूष्णीं पृथगपो दद्या न्मन्त्रेण तु तिलोदकम्" ।

इति ॥०॥ ३५ ॥०॥

अप उपस्पृश्यैवमेवेतरयोः ॥ ३६ ॥

अप उदकं, उपस्पृश्य स्पृष्ट्वा, एवमेव तूष्णीमुदकदानपूर्व्वकं मन्त्रेण तिलोदकदानं, इतरयोः पितामहप्रपितामहयोः, नाम गृहीत्वा कर्त्तव्यम् । तिलोदकदानाच्च परतो गन्धोदकमपि मन्त्रेण पात्रेष्वेव दद्यात् । तथा चोक्तम् ।

"तूष्णीं पृथगपो दद्यान्मन्त्रेण तु तिलोदकम् ।
गन्धोदकञ्च दातव्यं सन्निकर्षक्रमेण तु" ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। अत्र च, 'गन्धोदकञ्च'—इति चकारं कुर्व्वन् गन्धोदकस्यापि, तिलोदकवत् मन्त्रेण पात्रेषु दानं बोधयति। "अस्मिन्नवसरे तिलगन्धोदकैः पात्राणां पूरणं कर्त्तव्यम्। उपयोग स्त्ववनेजनार्थतया पश्चात् सूत्रयिष्यति"—इति नारायणोपाध्यायाः॥०॥ ३६॥०॥

तथा गन्धान्॥ ३७॥

तथा तेनैव प्रकारेण—नामग्रहणपूर्व्वकं मन्त्रोच्चारणेनेत्यर्थः। गन्धान्—बहुवचनात् गन्धादीन्, ददाति। दानञ्चामीषां ब्राह्मण हस्तेष्वेव न पात्रेषु। कस्मात्?। "गन्ध पुष्प धूप दीपाच्छादनानां प्रदानम्"—इत्यस्मात् श्राद्धकल्पसूत्रात्।

"गन्धान् ब्राह्मणसात् कृत्वा पुष्पाण्यृतुभवानि च।
धूपञ्चैवानुपूर्व्वेण अग्नौ कुर्य्यादतः परम्"।

इति च कर्म्मप्रदीपवचनात्॥०॥ ३७॥०॥

अग्नौ करिष्यामीत्यामन्त्रणꣳ होष्यतः॥ ३८॥

होष्यतः होमं करिष्यतो यजमानस्य 'अग्नौ करिष्यामि'—इत्यामन्त्रणं कर्त्तव्यम्। ननु, आमन्त्रणं करोति,—इति वक्तव्ये किमर्थं होष्यतः,—इति विभक्त्यतिक्रमः क्रियते?। उच्यते। आमन्त्रणं करोति,—इत्युक्ते गन्धादिप्रदानादनन्तरमेव आमन्त्रणं स्यात्। होष्यतः,—इति तु कुर्व्वन् होमं करिष्यत एव आमन्त्रणं न गन्धादिप्रदानात् परत एव,—इत्युपदिशति। तेन,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्ये अन्यदपि किञ्चित् कर्म्म अस्ति,—इत्यवगच्छामः। किं तत्?। भूमिशोधनमण्डलकरणादि। तदिदमर्थं होम्यतः,—इति विभक्त्यतिक्रमः क्रियते। एवमेके। "अग्नौ कुर्य्यादतः परम्"—इति वचनात्तत्रास्मिन्नवसरे भूमिशोधनादि। एवमपरे। तदत्र भवन्तो भूमिदेवाः प्रमाणम्।

तदिदमामन्त्रणं सर्व्वेषां ब्राह्मणानां सकृदेव स्यात्, प्रधानस्यैकस्यैव वा। कस्मात्?। "सर्व्वत्र प्रश्नेषु पङ्क्तिमूर्द्धन्यं पृच्छति सर्व्वान् वा"—इति ग्रन्थान्तरात्॥०॥ ३८॥०॥

तैश्च ब्राह्मणैः,—

कुर्व्वित्युक्ते कंसे चरू समवदाय मेक्षणेनोपघातं जुहुयात्—स्वाहा सोमाय पितृमत इति पूर्व्वां स्वाहाऽग्नये कव्यवाहनाय इत्युत्तराम्॥ ३९॥

ऋजुरत्रार्थः। अत्र किञ्चिद्वक्तव्यमस्ति। यथानिर्द्देशमेवैष होमः कर्त्तव्यः, न पुनर्मन्त्रान्ते स्वाहाकारः प्रयोक्तव्यः। परन्तु, स्वाहाकारेण हुत्वा पश्चात् सोमाय पितृमते,—इत्यादि मन्त्रशेषः समापनीयः। ॐकारस्य प्रत्येकं मन्त्रादौ न करणीयः। तथाच कर्म्मप्रदीपः।

"स्वाहां कुर्य्यान्नचात्रान्ते नचैव जुहुयाद्धविः।
स्वाहाकारेण हुत्वाऽग्नौ पश्चान्मन्त्रं समापयेत्"।

इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"नोद्धुर्य्याद्धोममन्त्राणां पृथगादिषु कुत्रचित्।
अन्येषाञ्च विकृष्टानां कालेनाचमनादिना"।

इति च। अत्राह। निर्देशसामर्थ्यादेव पूर्व्वापरत्वे सिद्धे, पूर्व्वाम्—इति, उत्तराम्—इति च, वचनमनर्थकम्। अथोच्यते, कारणं वक्तव्यम्। उच्यते। "अग्नये च सोमाय च जुहोति"—इत्यध्वर्य्युशाखादिषु देवताविपर्य्यासः श्रूयते, तन्निरासार्थमाचार्य्यः "पूर्व्वाम्" "उत्तराम्"—इत्याह।

इदमिदानीं सन्दिह्यते। किमयमग्नौकरणहोमः प्राचीनावीतिनैव कर्त्तव्यः, आहोस्विदुपवीतिना, उताहो अनियमेन?—इति। अनियमेन,—इत्याह। कस्मात्?। इतः परं प्राचीनावीतिना कृत्योपदेशात्। इतः परं खल्वाचार्य्यः प्राचीनावीतिना कृत्यमुपदिशन् अत्राग्नौकरणहोमे प्राचीनावीतित्वोपवीतित्वयोरनियमं दर्शयति। तथाच कर्म्मप्रदीपः।

"अग्नौकरणहोमश्च कर्त्तव्य उपवीतिना।
प्राङ्मुखेनैव देवेभ्यो जुहोतीति श्रुतिश्रुतेः।
अपसव्येन वा कार्य्यो दक्षिणाभिमुखेन च।
निरूप्य हविरन्यस्मा अन्यस्मै न हि हूयते"।

इति। तथाच श्रूयते। "अग्नौकरणहोमे प्राचीनावीती भूत्वा"—इत्यादि। "स उद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यः"—इति च माध्यन्दिनीये ब्राह्मणे।

"अग्निमान् निर्व्वपेत् पूर्व्वं चरुं वा शस्यमुष्टिभिः।
पितृभ्यो निर्व्वपामीति सर्व्वं दक्षिणतो न्यसेत्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति च मात्स्ये पुराणे। न खल्वस्मच्छाखायां अत्र विशेषः श्रूयते। तस्मादुभयस्वरसाद्विकल्पः,—इति परिशिष्टकृतः कात्यायनस्याभिप्रायः। हेतुवन्निगदस्तु न मुख्यार्थः किन्तु स्तुतिपर एव,—इति प्रमाणलक्षणे दर्शितम्। तस्मात्,—ऊर्द्ध्वं प्राचीनावीतित्वोपदेशात् अग्नौकरणहोमे प्राचीनावीतित्वोपवीतित्वयोरनियमः सूत्रकारस्याभिप्रायोऽस्पष्टः परिशिष्टकृता स्पष्टीकृतः,—इति भट्टनारायण शूलपाणि रघुनन्दनादिमतमादरणीयम्।

यच्च केनचिद् वर्णितम्,—“येषान्तिस्र आहुतयो हूयन्ते, येषां चाग्निः पूर्व्वमिज्यते, स्वधाकारान्ताश्च मन्त्राः, तद्विषयं प्राचीनावीतित्वम्। येषान्तु द्वे आहुती, सोमश्च पूर्व्वं हूयते, स्वाहाकारान्ताश्च मन्त्राः, तेषामुपवीतित्वम्। ‘अथोपवीती सोमं पितृमन्तमग्निं कव्यवाहनञ्च यजेत, प्राचीनावीती चेत् अग्निं पूर्व्वं, स्वाहास्थाने स्वधापदञ्च दत्त्वा जुहोति’—इति सूत्रान्तरात्”—इति। तदसङ्गतम्। अस्मद्गृह्ये सोमपूर्व्वाहुतिद्वयस्यैव सूत्रणात्। अस्मात् परिशिष्टकारेणैव द्वयोरेव पक्षयोः स्वहस्तितत्वाच्च। अपिच। अग्न्याद्याहुतित्रयपक्ष एवोपवीतित्वं दृश्यते। तथाच मत्स्य पुराणे,—

“अग्नेः सोमयमाभ्याञ्च कुर्य्यादाप्यायनं बुधः”।

इत्यभिधाय,—

“यज्ञोपवीती निर्व्वर्त्य ततः पर्य्युक्षणादिकम्।
प्राचीनावीतिना कार्य्यमतः सर्व्वं विजानता”।

इत्युक्तम्। आदिपदाद्धोम उक्तः,—इति वाचस्पति मिश्राः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा तैत्तिरीयशाखायामापस्तम्बसूत्रम्। "अथ पुनरुपवीती दक्षिणजान्वाक्राव्य मेक्षणेनोपस्तीर्य्य तेनावदायाभिघार्य्य सोमाय पितृमते स्वधानम इति दक्षिणाग्नौ जुहोति, यमायाङ्गिरसे स्वधानम इति द्वितीयाम्, अग्नये कव्यवाहनाय स्वधानम इति तृतीयाम्"—इति। तथा शांख्यायनसूत्रम्। "दक्षिण जान्वाक्राव्य यज्ञोपवीती प्रागासीनो मेक्षणेन जुहोति अग्नये कव्यवाहनाय"—इत्यादि। तस्मात्, सूत्रान्तराणि तत्तच्छाखिनामेव प्राचीनावीतित्वादिकमुपदिशन्ति नास्माकम्। यदपि शौनकवचनम्,—

"स्वाहाकारेण होमे तु भवेद्यज्ञोपवीतवान्।
तत्र प्रागग्नये हुत्वा पश्चात् सोमाय हूयते"।

इति। तदपि बह्वृचविषयम्। तथाचाश्वलायनकल्पसूत्रम्। "प्राचीनावीतीध्ममुपसमाधाय मेक्षणेनावदायावदानसम्पदा जुहुयात् सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय स्वधानम इति, स्वाहाकारेण वाऽग्निं पूर्व्वं यज्ञोपवीती"—इति।

परिशिष्टीयवचनद्वयस्य व्यवस्थितविषयत्वं गोभिलीयानामग्नौकरणहोमे उपवीतित्वञ्च ब्रुवन् परिशिष्टप्रकाशोऽप्यप्रकाशकलुषमात्मानं न वेद। न खलु व्यवस्थायां किमपि प्रमाणमुपलभामहे। शाखान्तरविषयत्वाद्वचनान्तराणाम्। न खल्वत्र व्यवस्था परिशिष्टकारेण दर्शिता। कल्प्यते,—इति चेत्, निरङ्कुशत्वात्ते मनस एवं कल्पयसि। न तु प्रमाणोपेतं कल्पयसि। एवं खल्पहस्तितैव शास्त्रमर्य्यादा स्यात्। अस्मत्परिशिष्टं खल्वेतत् कात्यायनकृतं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्म्मप्रदीपाख्यम्। कथं ज्ञायते?। अध्येतृ सम्प्रदाय प्रसिद्धेः। अतएव च्छन्दोगपरिविष्टमित्याख्यायते। भवानपि नात्र विप्रतिपद्यते। एवञ्च, अस्माकमेवैष विकल्पः कात्यायनेनोपदिष्टः—इत्यकामेनापि वक्तव्यम्। न खल्वस्मत्परिशिष्टे शाखान्तरेषां विधिरुचितोवर्णयितुम्। सोयं परिशिष्टप्रकाशः,—इत्यात्मानं ख्यापयन्, परिशिष्टञ्च दुर्व्याख्यातमसा समावृण्वन् परीक्षको भवान्,—इति किमत्र वक्तव्यम्।

अस्मद् गृह्यकारेण परतः प्राचीनावीतित्वोपदेशात् व्यक्तमग्नौ करणहोमे उपवीतित्वं दर्शितम्,—इति वर्णयन् वाचस्पतिरपि वाचोयुक्त्यनभिज्ञ एव। परतः प्राचीनावीतित्वोपदेशस्य पुरत उपवीतित्वाभिप्रायकत्वे प्रमाणाभावात्। तस्यानियममात्रपरताया एव परिशिष्टकृता स्पष्टीकृतत्वाच्च। परिशिष्टवचने सव्यापसव्ययोर्व्विकल्पः,—इति भवानेवाह।

"परिशिष्टीयं पूर्व्ववचनं पूर्व्वपक्षाभिप्रायं, उत्तरवचनन्तु सिद्धान्ताभिप्रायम्, अतएव तत्र सिद्धान्तद्योतनार्थो वाशब्दः"—इति वर्णयता महायशसाऽपि महद्दयशः प्रकटितम्। कस्मात्?। वाशब्दस्य विकल्पार्थत्वात्। श्रुति-द्वैविध्येन विकल्पस्योपपन्नतरत्वाच्च। अपिच। एवं खल्वग्नौकरणहोमेऽपि नियमतः प्राचीनावीतित्वे, 'अत ऊर्द्धं प्राचीनावीतिना'—इति सूत्रणमाचार्य्यस्यासङ्गतं स्यात्। तस्मादाचार्य्यविरुद्धोऽयं पक्षः। अलमति प्रसङ्गेन।

प्रकृतमधुनोच्यते। अनग्निमता खल्वत्र पित्र्यब्राह्मणपाणौ अग्नौ करणहोमः करणीयः। तथा चान्वष्टक्यकर्म्मणि कर्म्मप्रदीपः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"पित्र्ये यः पंक्तिमूर्द्धन्य स्तस्य पाणावनग्निमान्।
हुत्वामन्त्रवदन्येषां तूष्णीं पात्रेषु निःक्षिपेत्"।

इति। यच्च,—'अग्निमतामेवात्राधिकारः। "अन्वष्टकास्वष्टकावदग्नौ हुत्वा मात्रे पितामह्यै प्रपितामह्यै च पूर्व्ववद्ब्राह्मणान् भोजयित्वा"—इति विष्णुसूत्रे, "वह्नौ हुत्वा दद्यात्"—इति कात्यायनसूत्रे च, अग्निवचनात् विप्रपाण्यादे र्व्यवच्छेदात्। शरमयवर्हिषा कुशमयवर्हिर्बाधवत्। पितृयज्ञीयहोमस्य लौकिकाग्नौ निषेधाच्च'—इति तत्त्वकारवचनम्। तदप्यतत्त्ववचनमेव। कस्मात्?। अस्मत् परिशिष्टकारेण अस्मिन्नेव कर्म्मणि अनग्निमतोऽपि विप्रपाणौ होमोपदेशात्। आचार्य्येणापि 'जुहुयात्'—इति सूचितं, न पुनर् 'अग्नौ जुहुयात्'—इति। अग्नौ होमोपदेशस्तु कठादिशाखिविशेषाणामेव नास्माकम्। कथं ज्ञायते?। विष्णुप्रभृतीनां तत्सूत्रकारत्वात्। 'अन्वष्टकासु'—इति बहुवचनोपन्यासाच्च। मध्यमायां खल्वस्माकमन्वष्टक्यकर्म्म,—इत्यवोचाम। न खलु स्वशास्त्रोपरोधेन परशास्त्रादवणं कर्त्तुमुचितम्। तथात्वे वा, तदुक्तमात्रादिश्राद्धमप्यस्माकं स्यात्। न चैवं त्वयापि दृश्यते। तस्मादनादरणीयमेतत्।

अस्मिन्नेवावसरे पात्रेषु हुतशेषदानादिकं करणीयम्। कुतः?। "तूष्णीं पात्रेषु निःक्षिपेत्"—इत्यादि वचनात्। ब्राह्मणभोजनादिकमप्यस्मिन्नेवावसरे कर्त्तव्यम्। न च अनुपदेशात् नास्त्येव ब्राह्मणभोजनादिकम्—इति वक्तव्यम्। तस्यास्मत्श्राद्धकल्पादि सिद्धत्वात्। "यो वा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात्"—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति च लिङ्गात्। ब्राह्मणोपवेशनस्य पात्रेषु कृतशेषदानादेश्चार्थवत्त्वोपपत्तेश्च। प्रमाणान्तराणि विचारान्तराणि चास्माभिर्ग्रन्थगौरवभयादुपेक्षितानि बुद्धिमद्भिरूहणीयानि ॥०॥ ३८ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य द्वितीया काण्डिका ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके तृतीया काण्डिका ।

अत ऊर्द्धं प्राचीनावीतिना वाग्यतेन कृत्यम् ॥ १ ॥

ऋजुरत्तरार्थः । वाग्यमनोपदेशात् मनसैव मन्त्रोच्चारणम् । "वाग्यतेन,—इति लौकिक्या वाचः प्रतिषेधो न मन्त्राश्रयायाः, मन्त्रोपदेशसामर्थ्यात्"—इति केचित् । तत्तु नातीव समीचीनम् । कुतः ? । इतः पूर्व्वमपि तदविशेषात् । न खलु कृत्यमध्ये लौकिक्या वाचः कथनं शिष्टैरनुमन्यते ॥०॥ १ ॥०॥

सव्येन पाणिना दर्भपिञ्जलीं गृहीत्वा दक्षिणाग्रां लेखामुल्लिखेदपहता असुरा इति ॥ २ ॥

सव्येन वामेन पाणिना दर्भपिञ्जलीं पूर्व्वोक्तलक्षणां गृहीत्वा दक्षिणाग्रां लेखां—रेखां उल्लिखेत् कुर्य्यादित्यर्थः । (प्रत्ययार्थमात्र विवक्षा ।) अपहता इति मन्त्रेण । कस्मिन् लेखामुल्लिखेत्? । कर्षूणां मध्यतः,—इति ब्रूमः । कुतः ? । प्रकृतत्वात् । पिण्डदानार्थं हि लेखोल्लेखनम् । पिण्डाश्च कर्षूष्वेव दास्यन्ते ।

इदमिदानीं सन्दिह्यते । सव्येन पाणिना,—इत्युपादानात् ,—किं सव्येनैव पाणिना लेखोल्लेखनं कर्त्तव्यम्, आहोस्वित् सन्निधाना-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिशयात् सव्येन दर्भपिञ्जल्या ग्रहणमात्रं करणीयम्?—इति। ग्रहण-मात्रम्—इत्याह। कुतः?। सन्निधानातिशयादेव। एतदुक्तं भवति। प्रथमं सव्येन पाणिना स्तरात् दर्भपिञ्जलीमादत्ते, ततः सव्यात् हस्तात् दक्षिणेन हस्तेन दर्भपिञ्जलीं गृहीत्वा, सव्येन अन्वारभ्य लेखा-मुल्लिखेत्,—इति। एवमुत्तरत्रापि वर्णनीयम्। तथाच कर्म्मप्रदीपः।

"सव्येन पाणिनेत्येवं यदत्रासकृदीरितम्।
परिग्रहणमात्रन्तत् सव्यस्यादिशति व्रतम्।
पिञ्जल्याद्यभिसंगृह्य दक्षिणेनेतरात् करात्।
अन्वारभ्य च सव्येन कुर्य्यादुल्लेखनादिकम्"।

इति। अत्र च, तिसृणामेव कर्षूणां मध्ये लेखोल्लेखनं बोद्धव्यम्। मन्त्रावृत्तिरुक्ता ॥०॥ २ ॥०॥

सव्येनैव पाणिनोल्मुकं गृहीत्वा दक्षिणार्द्धे कर्षूणां निदध्याद्ये रूपाणि प्रतिमुञ्चमाना इति ॥ ३ ॥

व्याख्यातप्रायमेतत् ॥०॥ ३ ॥०॥

अथ पितृनावाहयत्येत पितरः सोम्यास इति ॥ ४ ॥

अथ,—इत्यानन्तर्य्यार्थम्। कर्षूषु दर्भस्तरणानन्तरमित्यर्थः। कस्मात्?। उत्तरत्र कर्षूषु दर्भेषु अवनेजनस्य पिण्डदानस्य च सूत्रणात्। "अथ शब्दोऽन्यकर्त्तृकत्वपक्षेऽपि यजमानपितृणामेव नियमार्थः"—इत्यपरे व्याचक्षते। पितॄन्,—इति बहुवचनात् पितामहप्रपितामहयोरपि ग्रहणम्। ऋज्वन्यत् ॥०॥ ४ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथोदपात्रान् कर्षूषु निदध्यात् ॥ ५ ॥

अथशब्दः पूर्व्वप्रकृतार्थः। उदपात्रान्,—इति पुंस्त्वं छान्दसम्। उदकपात्राणि,—इति केचित् पठन्ति। कर्षूषु,—इति, "अथाग्निषोमीयेन चरन्त्युत्तरवेद्याम्"—इतिवत् सामीप्ये सप्तमी। अयमर्थः। पूर्व्वपूरितान्युदकपात्राणि कर्षूणां सन्निधावानुपूर्व्व्येण स्थापयेत् ॥०॥५॥०॥

सव्येनैव पाणिनोदपात्रं गृहीत्वाऽवसलवि पूर्व्वस्यां कर्षां दर्भेषु निनयेत् पितुर्नाम गृहीत्वाऽसाववनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति ॥ ६ ॥

अवसलविशब्देन पितृतीर्थमुच्यते,—इत्यवोचाम। तेन, पितृतीर्थेन पूर्व्वस्यां कर्ष्वां दर्भेषु उदकं निनयेत्। कृतभाष्यमन्यत् ॥०॥६॥०॥

अप उपस्पृश्यैवमेवेतरयोः ॥ ७ ॥

अपरकर्षूद्वये,—इति वाक्यशेषः। व्याख्यातमन्यत् ॥०॥ ७ ॥०॥

सव्येनैव पाणिना दर्व्वीं गृहीत्वा सन्नीतात्तृतीयमात्रमवदायावसलवि पूर्व्वस्यां कर्षां दर्भेषु निदध्यात् पितुर्नाम गृहीत्वाऽसावेषते पिण्डो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति॥ ॥ ८ ॥

दर्व्वी पूर्व्वमेव व्याख्याता। तया दर्व्या, सन्नीतात्—एकीकृतात् चरुहविषः, तृतीयमात्रं तृतीयांशमवदाय यथोक्तेन प्रकारेण निदध्यात्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्व्वपेत्। श्लिष्टमन्यत्। सन्नीतात्,—इति लिङ्गात् सन्नयनं तावदवगम्यते। सन्नयनं नाम एकीकरणम्। न ज्ञायते;—केन सह कस्य सन्नयनम्—इति। तद्वक्तव्यम्। उच्यते। सर्व्वस्मात् हविषः अल्पमल्पमुद्धृत्य तेषां चरुणा सह सन्नयनं कर्त्तव्यम्। तस्माच्च सन्नीतादवदाय पिण्डा दातव्याः,—इति। कुत एतत्?।

"यावदर्थमुपादाय हविषोऽर्भकमर्भकम्।
चरुणा सह सन्नीय पिण्डान् दातुमुपक्रमेत्"।

इति कर्म्मप्रदीपवचनात्॥०॥ ८॥०॥

अप उपस्पृश्यैवमेवेतरयोः॥ ९॥

व्याख्यातोऽक्षरार्थः। अत्र च, मध्यमायां कर्ष्वां पितामहस्य पिण्डदानं, दक्षिणस्यां प्रपितामहस्य,—इति बोद्धव्यम्। तथा चोक्तम्।

"पितुरुत्तरकर्ष्वन्ते मध्यमे मध्यमस्य तु।
दक्षिणे तत्पितुश्चैव पिण्डान् पर्व्वणि निर्व्वपेत्"।

इति॥०॥ ९॥०॥

स खल्वयं यजमानः, पितृपितामहप्रपितामहानाम्—

यदि नामानि न विद्यात्;—स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं निदध्यात्, स्वधा पितृभ्योऽन्तरीक्षसद्भ्य इति द्वितीयं स्वधा पितृभ्यो दिविषद्भ्य इति तृतीयम्॥ १०॥

ऋजुरक्षरार्थः। तदनेन सूत्रेण, पित्रादिनामाज्ञाननिमित्तं मन्त्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तरमेव पिण्डदाने विधीयते,—इत्यादरणीयम्। तेन, ये चात्र त्वा,—इत्ययं मन्त्रोऽस्मिन् पक्षे निवर्त्तते। स्वधाशब्दस्य प्रदानार्थस्योपादानाच्च। अत्र च, अन्यतरस्यापि नाम्न्यज्ञायमाने सर्व्वेषामेव अनेन मन्त्रान्तरेण पिण्डदानं कर्त्तव्यम्, त्रितयसम्बन्धेनैव विधानात्। एवमेके। यस्य नाम ज्ञायते तस्य नामोच्चारणपूर्व्वकं पूर्व्वेणैव मन्त्रेण पिण्डदानम्, यस्य च नाम न ज्ञायते, तस्यैवानेन मन्त्रान्तरेण। तदेतद् यथार्थमभिप्रेतम्। एवमपरे। तदत्र भवन्तो भूमिदेवाः प्रमाणम्।

अत्र पृच्छामः। नामाज्ञाने तिलोदकादिदानं कथं कर्त्तव्यम्?—इति। तुल्यहेतुत्वादनेनैव मन्त्रान्तरेण कर्त्तव्यम्—इति केचित्। तदसङ्गतम्। कस्मात्?। अतिक्रम्य विधानात्। तिलोदकादिकं खल्वतिक्रम्य पिण्डदान एवैतन्मन्त्रान्तरमाचार्य्येण विधीयते। कः पुनरत्राभिप्रायः?। पिण्डदानमेवानेन मन्त्रान्तरेण कर्त्तव्यम्—इति। तस्मात्,—पिण्डदानप्रयोगविधिरेवायम्। तस्मात्,—अतीतं तिलोदकादिकमनागतञ्चाञ्जनादिकमनेन मन्त्रेण न देयमेव। अपर आह। मन्त्रान्तराविधानादमन्त्रकमेव तेषां दानम्—इति। तदप्युपेक्षणीयम्। कुतः?। तेषामपि समन्त्रकदानोपदेशात्। पिण्डदानवत् तत्रापि समन्त्रकत्वस्योचितत्वाच्च। आह। एवं भवता द्वावपि पक्षौ प्रतिक्षिप्तौ, कतमस्तर्ह्यत्र पक्षः?। उच्यते। अनेन मन्त्रान्तरेण तावन्न कर्त्तव्यमेव, नाप्यमन्त्रकम्। किन्तु, प्राचीनं तिलोदकादि पराचीनञ्चाञ्जनादि यथासूत्रितेनैव मन्त्रेण देयम्। ननु, "नाम गृहीत्वा"—इति तत्र तत्र सूत्रणमस्ति, नाम्न्यज्ञायमाने कथं यथासूत्रितेन मन्त्रेण दानममीषां सम्भवति?। उच्यते। नाम्न्यज्ञायमाने नामस्थाने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृथिवीषदादयः शब्दाः प्रयोक्तव्याः। कथं ज्ञायते?। शृणु यथा-ज्ञायते। पितृपितामहप्रपितामहानां नामाज्ञाने विहितेषु मन्त्रा-न्तरेषु;—पृथिवीषदिति, अन्तरीक्षसदिति, दिविषदिति च विशेष-श्रवणात् तेषामेव पित्राद्यभिधानस्थानपातित्वमवगच्छामः। तेन, पृथिवीषदेतत्ते तिलोदकं, अन्तरीक्षसदेतत्ते तिलोदकं, दिविषदेतत्ते तिलोदकम्—इति प्रयोगे विशेषः। ये चात्र त्वा मनु यांश्च त्व-मनु तस्मै ते स्वधा,—इति तु सर्व्वत्रैव प्रयोज्यम्। पिण्डदाने तु स्वधापदवन्मन्त्रान्तरविधानात् पूर्व्वस्य मन्त्रस्य निवृत्तिरेव स्यादि-त्यवोचाम। तथाच स्मरणम्।

"पृथिवीषत् पिता वाच्यस्तत्पिता चान्तरीक्षसत्।

अभिधानापरिज्ञाने दिविषत् प्रपितामहः"।

इति। तदिदं स्मरणमाचार्य्यसंवादितमर्थं वदतीत्यादरणीयम्। रघु-नन्दनस्तु छन्दोगोऽप्येतदजानानः,—"नामान्यविद्वांस्तत् पितामह-प्रपितामहेति"—इति पिण्डपितृयज्ञीयमाश्वलायनकल्पसूत्रमाकुली-कृत्य,—"नामान्यविद्वांस्तत्पितृपितामहप्रपितामहाः"—इति परिकल्प्य लिखित्वा बहुविरुद्धं वर्णयाञ्चकार॥०॥ १०॥०॥

निधाय जपत्यत्र पितरो मादयध्वं यथाभाग-मावृषायध्वमिति॥ ११॥

पिण्डान् निधाय, अत्र पितरः—इतिमन्त्रं जपति। अथ, निधाय—इत्येतदवाच्यमिति चेत्। न। प्रतिनिधानं जपप्रतिषेधार्थत्वात्। कथं नाम?। सर्व्वान् पिण्डान् निधाय जपति न प्रतिपिण्डनिधा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नम्—इति। ननु, सर्व्वेषां पिण्डानां निधानं सूचयित्वा परतः सूत्रणादेव प्रतिपिण्डनिधानं जपो न भविष्यति। एवन्तर्हि अन्यथा वर्णयिष्यामः। निधायैव जपति न पुनरन्यदपि किञ्चित् कृत्वा—इति। किमतः?।

"अवनेजनवत् पिण्डान् दत्त्वा विल्वप्रमाणकान्।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत्"।

इत्युक्तं पुनरवनेजनमत्र न कर्त्तव्यम्। एतदतः ॥०॥ ११ ॥०॥

अपपर्य्यावृत्त्य पुरोच्छ्वासादभिपर्य्यावर्त्तमानो जपेदमीमदन्त पितरो यथाभागमावृषायिषतेति ॥ ॥ १२॥

अप,—इत्यप्रादक्षिण्यार्थम्। अप्रादक्षिण्येन पर्य्यावृत्त्य परिक्रम्य, वामावर्त्तेनेत्यर्थः। "वामं पर्य्यावृत्त्य"—इति नारायणोपाध्यायः पठति। तदा व्यक्त एवार्थः। इदञ्च पर्य्यावर्त्तनं केचिदुदगन्तं मन्यन्ते। गौतमादयस्तु दक्षिणापर्य्यन्तमिच्छन्ति। तथा चोक्तम्।

"वाममावर्त्तनं केचिदुदगन्तं प्रचक्षते।
सव्यं गौतमशाण्डिल्यौ शाण्डिल्यायन एव च"।

इति। तेन उदङ्मुखो दक्षिणामुखो वा भूत्वा,—इदानीं प्राणान् संयम्य, 'पुरा' पूर्व्वं, 'उच्छ्वासात्' प्राणविमोकात्, अमीमदन्त,—इति मन्त्रं जपेत्। किं कुर्व्वन्?। अभिपर्य्यावर्त्तमानः। येनैव पथागतः, तेनैव पथा पर्य्यावर्त्तमानः। आगत्य च प्राणान् विमोचयेत्। तथा चोक्तम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"आवृत्य प्राणानायम्य पितॄन् ध्यायन् यथार्हतः ।
जपं स्तेनैव चावृत्य ततः प्राणान् विमोचयेत्" ।

इति ॥०॥ १२ ॥०॥

सव्येनैव पाणिना दर्भपिञ्जलीं गृहीत्वाऽवसलवि पूर्व्वस्यां कर्षां पिण्डे निदध्यात् पितुर्नाम गृहीत्वाऽसावेतत्त आञ्जनं ये चात्र त्वामनु याꣳश्च त्वमनु तस्मै ते स्वधेति ॥ १३ ॥

दर्भपिञ्जलीं,—पूर्व्वमञ्जनेनाञ्जितानां तिसृणामेकाम् । आञ्जनं—आ सम्यक् अञ्जनं । व्याख्यातमन्यत् ॥०॥ १३ ॥०॥

अप उपस्पृश्यैवमेवेतरयोः ॥ १४ ॥

कृतभाष्यमेतत् । अत्रापरयोर्दर्भपिञ्जल्योर्विनियोगः ॥०॥१४॥०॥

तथा तैलम् ॥ १५ ॥

तथा तेनैव प्रकारेण, तैलं,—पूर्व्वमासादितं, पिण्डेषु निदध्यात् । एतदुक्तं भवति । पितुर्नाम गृहीत्वा एतत्ते तैलं ये चात्र त्वेति पितृपिण्डे दत्त्वा अप उपस्पृश्यैवमेवेतरयोर्दद्यात् ॥०॥ १५ ॥०॥

तथा सुरभि ॥ १६ ॥

पूर्व्वसूत्रव्याख्यानेनैवेदमपि व्याख्यातम् ॥०॥ १६ ॥०॥

अथ निह्नुते ॥ १७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ,—इत्यानन्तर्य्यार्थम्। अन्यथा खल्वनुषङ्गविधानात् अञ्जन-तैलसुरभीणां प्रत्येकम्,—आनन्तर्य्यातिरेकात् सुरभिमात्रस्यैव वा निह्नवमाशङ्कीत कश्चिन्मन्दमतिरिति तन्निरासार्थमथेत्याह। अञ्जन-तैलसुरभीणि निधाय अथ अनन्तरं निह्नुते,—पिण्डान् आच्छाद्य नमस्करोति ॥०॥ १७ ॥०॥

कथं निह्नुते?। उच्यते,—

पूर्व्वस्यां कर्षां दक्षिणोत्तानौ पाणी कृत्वा नमो वः पितरो जीवाय नमो वः पितरः शूषायेति ॥ ॥ १८ ॥

जपति,—इति वक्ष्यमाणं सिंहावलोकितन्यायेन संबध्यते। दक्षिणः पाणिरुत्तानो ययोः पाण्योः तौ दक्षिणोत्तानौ। एवमुत्तरत्रापि व्याख्येयम्। स्पष्टमन्यत् ॥०॥ १८ ॥०॥

मध्यमायाꣳ सव्योत्तानौ नमो वः पितरो घोराय नमो वः पितरो रसायेति ॥ १९ ॥

जपति। मध्यमायां कर्ष्वाम्। सव्योत्तानौ पाणी कृत्वा ॥०॥ १९ ॥०॥

उत्तमायां दक्षिणोत्तानौ नमो वः पितरः स्वधायै नमो वः पितरो मन्यव इति ॥ २० ॥

इदमपि पूर्व्ववद्व्याख्येयम् ॥०॥ २० ॥०॥

4 N

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथाञ्जलिकृतो जपति नमो वः पितरः पितरो नमो व इति ॥ २१ ॥

अथशब्दः पूर्व्वप्रकृतार्थः। पूर्व्वप्रकृतं कर्षूत्रयं अभिसन्धाय, अञ्जलिकृतः सन्, नमोव इति मन्त्रं जपति। अञ्जलिकृतः,—इति व्याख्यासेन प्रयुङ्क्ते। कृताञ्जलिरित्यर्थः। "अञ्जलिश्चात्र संहतः कर्त्तव्यो न व्याकोषः। कुतः?। निह्नवे संहतस्योपयोगित्वात् व्याकोषस्य चन्द्रदर्शनाद्युपयुक्तत्वात्"—इति भट्टनारायणोपाध्यायाः॥०॥२१॥०॥

गृहानवेक्षते गृहान् नः पितरो दत्तेति ॥ २२ ॥

गृहान् पत्नीम्। एवमेके। गृहप्रार्थनयैव पत्नीप्रार्थनाया अपि चरितार्थत्वात् गृहशब्दस्य पत्न्यामरूढ़त्वाच्च निवेशनमेवार्थः। एवमपरे। तदत्र भवन्तो भूमिदेवाः प्रमाणम्॥०॥ २२ ॥०॥

पिण्डानवेक्षते सदो वः पितरो देष्मेति ॥ २३ ॥

ऋज्वर्थं सूत्रम्॥०॥ २३ ॥०॥

सव्येनैव पाणिना सूत्रतन्तुं गृहीत्वाऽवसलवि पर्व्वस्यां कर्षां पिण्डे निदध्यात् पितुर्नाम गृहीत्वाऽसावेतत्ते वासो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति ॥ २४ ॥

सूत्रतन्तुम्,—प्रकरणसामर्थ्यात् क्षौमदशाम्। व्याख्यातमन्यत्॥०॥ २४ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अप उपस्पृश्यैवमेवेतरयोः ॥ २५ ॥

कृतभाष्यमेतत् ॥०॥ २५ ॥०॥

सव्येनैव पाणिनोदपात्रं गृहीत्वाऽवसलवि पिण्डान् परिषिञ्चेदूर्जं वहन्तीरिति ॥ २६ ॥

ऋजुरक्षरार्थः। अत्र पूर्ववत् 'एवमेवेतरयोः'—इत्यकरणात् पिण्डान्—इति बहुवचनाच्च सकृदेव मन्त्रमुच्चार्य्य त्रीन् पिण्डान् परिषिञ्चेत्—इति बोद्धव्यम्। इदञ्च परिषेचनम्—

"गन्धादीन् निक्षिपेत्तूष्णीं तत आचामयेत् द्विजान्"।

इत्यादि,—

"प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः।
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत्"।

इत्यन्तकर्म्मप्रदीपोक्त-कर्म्मक्रमेण करणीयम्। एवमेके। यावदुक्तत्वादत्र कर्म्मप्रदीपोक्तः कर्म्मक्रमो न कर्त्तव्यः। एवमपरे। एतस्मिन्नेव क्रमे,—

"युग्मानेव स्वस्तिवाच्यानङ्गुष्ठग्रहणं सदा।
कृत्वा धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः"।

इति कर्म्मप्रदीपाद्युक्तम्—"उत्तानं पात्रं कृत्वा दक्षिणां ददाति"—इति श्राद्धकल्पाद्युक्तञ्च कर्म्म कुर्य्यात् ॥०॥ २६ ॥०॥

मध्यमं पिण्डं पत्नी पुत्रकामा प्राश्नीयादाधत्त पितरो गर्भमिति ॥ २७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋजुरत्तरार्थः । सा तु भोजनकाले प्राश्नीयात् न पुनरेतस्मिन्नेव-क्रमे,—इति द्रष्टव्यम् । मन्त्रञ्च पतिः पठति । कस्मात्?। 'यथेह पुरुषः स्यात्'—इति मन्त्रलिङ्गात् ॥०॥ २७ ॥०॥

यो वा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात् ॥ २८ ॥

उच्छिष्टशब्दोऽत्र भुक्तावशिष्टपाकवचनो न तु भोजनपात्रावशिष्टवचनः । यः तेषां ब्राह्मणानां उच्छिष्टभाक्—उच्छिष्टं भजते,—इत्युच्छिष्ट-भाक्—उच्छिष्टभजनार्हः, स्यात्, स 'प्राश्नीयात्—इत्यनुषज्यते । किं प्राश्नीयात्?। तेषामुच्छिष्टम् । कुतः?। उपस्थितत्वात् । वाशब्दः समुच्चये । अयमपि स्वभोजनकाल एव प्राश्नीयात् । कः पुन स्तेषा-मुच्छिष्टभाक्?। यजमानादिः,—इत्याह । कस्मात्?। "शेषमिष्टे-भ्योदत्त्वा स्वयञ्च भुञ्जीत"—इति वचनात् । तथा स्मृत्यन्तरम् । इति । तथा देवलः ।

> "निवृत्ते पितृमेधे तु दीपं प्रच्छाद्य पाणिना ।
> आचम्य पाणीन् प्रक्षाल्य ज्ञातीन् शेषेण भोजयेत् ।
> ततो ज्ञातिषु भुक्तेषु स्वान् भृत्यानपि भोजयेत् ।
> पश्चात् स्वयञ्च पत्नी च श्राद्धशेषमुदाहरेत्" ।

इति । तैत्तिरीयशाखायामापस्तम्बसूत्रम् । "सर्व्वतः समवदाय या-सावरार्द्धमश्नीयाद् यथोक्तम्"—इति । अत्र भूरिद्रव्य-कृत्स्नवाचि सर्व्वशब्दान्नियमोऽयमदृष्टार्थः,—इत्याचक्षते । श्लोकमपि उदाहरन्ति ।

> "श्राद्धं कृत्वा तु यः शेषं नान्नमश्नाति मन्दधीः ।
> लोभान्मोहाद्भयाद्वाऽपि तस्य तन्निष्फलं भवेत्" ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। क्रियमाणेयं तत्रैव प्राशितं नैवाप्राशितञ्च भवति"—इति,—

"उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्।

उपवासं तदा कुर्य्यादाघ्राय पितृसेवितम्"।

इति च श्रुतिस्मृती नियममवगमयतः। आचार्य्योऽपि "प्राश्नीयात्" —इति प्रशब्देनैतदेव दर्शयति। सेयमुच्छिष्टस्य प्रतिपत्तिः। अतो यत्रोच्छिष्टं न शिष्यते, तत्र नैष नियमः। प्रतिपत्तेः प्रतिपाद्याप्रयोजकत्वात्। यत् पुनर्यमवचनम्—

"भक्ष्यं भोज्यं तथा पेयं यत्किञ्चित् पच्यते गृहे।

न भोक्तव्यं पितॄणान्तदनिवेद्य कथञ्चन"।

इति। यच्च शङ्खवचनम्—

"यत्किञ्चित् पच्यते गेहे भक्ष्यं भोज्यमथापि वा।

अनिवेद्य न भुञ्जीत पिण्डमूले कथञ्चन"।

इति। तत् श्राद्धार्थपाकादन्यदपि यत्किञ्चिद् भक्षणार्थं गृहे पच्यते, तदपि पितॄणां निवेद्यैव भोक्तव्यम्—इत्युपदिशति। न पुनः श्राद्धशेषातिरिक्तस्य भोजनं निषेधयति। कथं ज्ञायते?। अनयोरेव श्राद्धशेषव्यतिरिक्तस्यापि पितॄणां निवेद्य भोजनोपदेशात्। यत्किञ्चित्— इति गृहे—इति च करणाच्चैवमवगच्छामः। अतएव पिण्डमूले— पिण्डान्तिके निवेदनमुपदिश्यते, न तु तेनैव पिण्डदानं ब्राह्मणभोजनं वा।

आह। कुतः पुनरियमवधारणा,—पिण्डमूले निवेदनं न ब्राह्मणभोजनार्थम्—इति। ननु, येषां पिण्डदानात् परतो ब्राह्मणभोजनं तेषां ब्राह्मणभोजनार्थमपि पिण्डमूले निवेदनं सम्भ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वति। उच्यते। सत्यं सम्भवति। न तु तेषामयमुपदेशः। केषां तर्हि?। येषां ब्राह्मणभोजनात् परतः पिण्डदानं, तेषाम्—इति ब्रूमः। कस्मात् कारणात्?।

उच्छिष्टसन्निधौ कार्य्यं पिण्डनिर्व्वपणं बुधैः"।

इति तेनैव ब्राह्मणभोजनात् परतः पिण्डदानोपदेशात्। शङ्खवचनस्य तु पूर्व्वार्द्धं शङ्खसंहितायामेवं पश्यामः,—

"पङ्क्तिविदात्मनो गेहे भक्ष्यं वाऽभक्ष्यमेव वा"।

इति। तदा व्यक्त एवायमर्थो—यः खल्वस्माभिर्व्वर्णितः। कुतः?। अभक्ष्यमपि भुञ्जतः पिण्डमूले निवेदनोपदेशात्। "शङ्खवचनं न श्राद्धेतरभोजनव्यावर्त्तकं, किन्तु यत्किञ्चित्—इति श्राद्धार्थत्वेन विशेषणीयम्। अन्यथा श्राद्धप्रतिषिद्धद्रव्याणां भक्ष्यत्वं न स्यात्। तेन श्राद्धार्थपक्वं यत्, तद्दत्त्वा न भोक्तव्यम्—इति तस्यार्थः"—इति वचनतात्पर्य्यमपर्य्यालोचयतो रघुनन्दनस्य स्वच्छन्दकल्पनान्तु नाभिनन्दामहे। प्रमाणाभावात्। युक्तेश्चाकिञ्चित्करत्वात्। भिन्नौ खल्वेतौ पदार्थौ—यत् पिण्डमूले निवेदनं,यच्च श्राद्धावशिष्टम्,—इति। साहसिकः खल्वसौ यो महर्षेरभिप्रायमनालोच्य स्वरुच्यैवान्यथा वर्णयन्नापत्रपते। अलमसदावेशेन। प्रकृतमनुसरामः।

कश्चित् पुनरन्यथेमं ग्रन्थं वर्णयाञ्चकार,—"यो वा तेषां ब्राह्मणानाम्"—इत्यादिम्। "यः तेषां ब्राह्मणानामुच्छिष्टं भजते, तस्योच्छिष्टभाजो यजमानज्येष्ठस्य पुत्रपौत्रादेः पत्नी मध्यमं पिण्डं प्राश्नीयात्"—इति। तन्मते, ज्ञातिप्रभृतीनामपि तदुच्छिष्टभाक्त्वात्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषामपि पत्न्यः प्राश्नन्तु। न चैवमिष्यते। तस्मान्न किञ्चिदेतत्॥०॥ ॥२८॥०॥

अमून्नो दूतो हविषो जातवेदा इत्युल्मुकमद्भिरभ्युक्ष्य॥ २९॥

उल्मुकं दक्षिणार्द्धे कर्षूणां स्थितम्। शिष्टमन्यत्॥०॥ २९॥०॥

द्वन्द्वं पात्राणि प्रक्षाल्य प्रत्यतिहारयेत्॥ ३०॥

पात्राणि चरुस्थाल्यादीनि प्रक्षाल्य निर्णिज्य, प्रत्यतिहारयेत्—केनचित् शिष्यादिना आनयेत्। असम्भवे स्वयमपि हरेत्। प्रतिशब्दकरणात् येन यन्नीतमासीत्, तेनैव तत् हारयेत्। अतिशब्दोऽसम्प्रतिक्षेपार्थः। तेन कालविलम्बमकुर्व्वन् हारयेत्—इत्यर्थः। "अभिहारयेत्"—इति केचित् पठन्ति। पात्राणि कथं प्रत्यतिहारयेत्?। 'द्वन्द्वं' यथा भवति, तथा प्रत्यतिहारयेत्। द्वन्द्वशः प्रक्षाल्य,—इति वा वर्णनीयम्॥०॥ ३०॥०॥

अप्सु पिण्डान् सादयेत्॥ ३१॥

उदके पिण्डान् निक्षिपेत्। पिण्डान्—इति बहुवचनं व्यत्ययपेक्षं, द्वयोरेवावशिष्टत्वात्। पत्न्याः प्राशनस्यानावश्यकत्वात्तदभावपक्षाभिप्रायं वा वर्णनीयम्। अपरे पुनरेतदविद्वांसो भाषन्ते,—"पिण्डान्—इति बहुवचनं षट् पिण्डश्राद्धविषयम्"—इति॥०॥ ३१॥०॥

प्रणीते वाऽग्नौ॥ ३२॥

'पिण्डान् सादयेत्'—इत्यनुवर्त्तते॥०॥ ३२॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणं वा भोजयेत् ॥ ३३ ॥

पिण्डान्—इत्येव ॥०॥ ३३ ॥०॥

गवे वा दद्यात् ॥ ३४ ॥

पिण्डानेव । इदमिदानीं विचार्य्यते । किमत्र मात्रादिश्राद्धं मातामहादिश्राद्धञ्चास्ति, उत यावदुक्तत्वान्न ?—इति । न,—इति ब्रूमः । कुतः ? । यावदुक्तत्वादेव । योषित्श्राद्धं खल्वस्माकमवसानदिनव्यतिरेकेण पृथक् नास्ति । तथा च कर्म्मप्रदीपः ।

"न योषिद्भ्यः पृथग् दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमात्राभ्य स्तृप्तिरासां यतः स्मृता" ।

इति । वचनबलात्तु क्वचित् क्रियते । तदप्याह, स एव ।

"मातुः प्रथमतः पिण्डं निर्व्वपेत् पुत्रिकासुतः ।
द्वितीयन्तु पितुस्तस्या स्तृतीयञ्च पितुः पितुः" ।

इति ।

"मातुः सपिण्डीकरणं पितामह्या सहोदितम्" ।

इति च । न च परशास्त्रमप्यादत्तुं शक्यते । स्वशास्त्रोपरोधप्रसङ्गात् । तस्मात्, मात्रादिश्राद्धं तावदत्र न कर्त्तव्यमेव । मातामहादिश्राद्धमप्यत्र न करणीयम् । तथा च कर्मप्रदीपेऽप्याह ।

"कर्षूसमन्वितं त्यक्त्वा तथाऽऽद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकञ्च, शेषेषु पिण्डाः स्युः षडिति स्थितिः" ।

इति । तस्मात् पित्रादित्रयाणामेवात्र श्राद्धम—इति सिद्धम् ॥०॥ ॥ ३४ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथेदानीमनेनैव श्राद्धविधिना श्राद्धान्तराण्यपि व्याख्यातानि,—इति मनसि कृत्वा, वृद्ध्यादिषु तावत् कञ्चिद्विशेषमुपदिदिक्षुराह,—

वृद्धिपूर्त्तेषु युग्मानाशयेत् ॥ ३५ ॥

"वृद्धिः पुरुषसंस्कारः,"—इति भट्टभाष्यम्। पूर्त्तम्—

"वापीकूपतड़ागादि देवतायतनानि च।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते"।

इत्याद्युक्तलक्षणम्। तेषु, पित्रर्थमपि युग्मान् ब्राह्मणान् भोजयेत्। अस्मादपि लिङ्गात् अन्वष्टक्ये ब्राह्मणभोजनमवगम्यते ॥०॥३५॥०॥

प्रदक्षिणमुपचारः ॥ ३६ ॥

प्रदक्षिणं यथा भवति, तथा दर्भासनादिक उपचारः, कर्त्तव्यः—इति सूत्रशेषः। "वृद्धिपूर्त्तेषु"—इत्यनुवर्त्तते ॥०॥३६॥०॥

यवैस्तिलार्थः ॥ ३७ ॥

तिलैर्योऽर्थः प्रयोजनं क्रियते, स यवैः कर्त्तव्यः। वृद्धिपूर्त्तेषु,—इत्येव। सोऽयं संक्षेपतः श्राद्धविधिः। विस्तरतस्तु, कर्म्मप्रदीपे वाशिष्ठे च कल्पे द्रष्टव्यः। श्राद्धमन्त्राश्च परिसंख्यानादुपलब्धव्याः। अतएव कर्म्मप्रदीपे कात्यायनेनोक्तम्।

"एष श्राद्धविधिः कृत्स्न उक्तः संक्षेपतो मया।
ये विदन्ति न मुह्यन्ति श्राद्धकर्म्मसु ते क्वचित्।
इदं शास्त्रञ्च गृह्यञ्च परिसंख्यानमेव च।
वशिष्ठोक्तञ्च यो वेद स श्राद्धं वेद नेतरः"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। इदमिदानीं सन्दिह्यते। किं ब्राह्मणभोजनमत्र प्रधानम्, आहोस्वित् पिण्डदानम्, उताहो उभयम् ?—इति। आह। शेषेण पिण्डदानविधानात् पिण्डदानं प्रतिपत्तिरेव; कस्मादियं विचारणा?। उच्यते। सत्यमत्र शेषः प्रतिपाद्यते, तथापि नासौ प्रतिपत्तिः। बलिहरणे शेषस्य प्रतिपादनेऽपि न तत्प्रतिपत्तिः,—इति यथा। किं कारणम्?। अर्थकर्मणि तस्य प्रतिपादनात्। कथं ज्ञायते?। फलार्थवादोपपत्तेः। तच्च तत्र तत्र उदाहरिष्यामः। विनाऽपि शेषं पिण्डदानदर्शनाच्च। क्व?। पिण्डपितृयज्ञादौ। ब्राह्मणभोजनस्य खल्वभावे कस्य शेषः प्रतिपादयिष्यते। ब्राह्मणभोजनस्य पुरस्तादपि केषाञ्चित् पिण्डदानविधानाच्चैवमवगच्छामः। तस्मात्,—अर्थकर्मैवासौ, न प्रतिपत्तिः। तत्रैव च शेषः प्रतिपाद्यते। अथवा। प्रतिपत्त्यर्थकर्म पिण्डदानं न प्रतिपत्तिरेव। तस्मात्,—भवति विचारणैषा। तत्र, उभयं प्रधानम्—इति भट्टनारायणप्रभृतयो मन्यन्ते। श्लोकानपि उदाहरन्ति।

"प्राधान्यं पिण्डदानस्य केचिदाहुर्मनीषिणः।
गयादौ पिण्डमात्रस्य दीयमानस्य दर्शनात्।
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः।
ब्राह्मणानां परीक्षायां महायत्नप्रदर्शनात्।
आमश्राद्धविधानस्य विना पिण्डं क्रियाविधेः।
तदालभ्याप्यनध्याय-विधानश्रवणादपि।
मतद्वैधमुपादाय मम त्वेतत् हृदि स्थितम्।
प्राधान्यमुभयोर्यस्मात् तस्मादेष समुच्चयः"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। अत्र च, निमित्ततो ब्राह्मणभोजनस्य पिण्डदानस्य चाननुष्ठानेऽपि उभयोः प्राधान्यं नानुपपन्नम्। असोमयाजिपक्षे दधिपयोयागवत्। फलश्रुतिश्चोभयत्राप्यस्ति। ब्राह्मणभोजनं प्रधानं पिण्डदानमङ्गम्—इति शूलपाणिप्रभृतयः। अन्नोत्सर्गः प्रधानम्—इति वाचस्पतिमिश्रादयः। स्मरन्ति च।

"श्राद्धं कृत्वा प्रयत्नेन त्वराक्रोधविवर्ज्जितः।
उष्णमन्नं द्विजातिभ्यः श्रद्धया प्रतिपादयेत्"।

इति। अत्र खल्वन्नोत्सर्गे श्राद्धपदं प्रयुक्तम्। तथा स्मृत्यन्तरम्।

"संस्कृतं व्यञ्जनाढ्यान्नं पयोदधिघृतान्वितम्।
श्रद्धया दीयते यस्मात्, तेन श्राद्धं निगद्यते"।

इति। अपिच। नित्यश्राद्धादौ तावत् पिण्डनिषेधोऽवगम्यते। स च प्राप्तस्यैव भवति। प्राप्तिश्चातिदेशादेव। स खल्वङ्गानामेव न प्रधानस्य। कस्मात्?। उपकारकत्वेनैवातिदेशस्य सप्तमाध्याये सिद्धान्तितत्वात्। तस्मात् पिण्डदानमङ्गमेव। अङ्गेषु फलश्रुतिरर्थवाद एव। केवलपिण्डदानविधिस्तु अङ्गभूतपिण्डदानात् कर्म्मान्तरमेव। प्रकरणाधिकरणन्यायात्,—इति श्राद्धविवेकः।

इदन्त्विह वक्तव्यम्। "मासमग्निहोत्रं जुहोति"—इति कुण्डपायिनामयने यथा अग्निहोत्रवत् जुहोति,—इति वचनव्यक्त्या नैयमिकस्याग्निहोत्रस्य धर्म्मा अतिदिश्यन्ते; प्रधानस्य होमो—योऽग्नये च प्रजापतये च,—इति, यथा वा "उद्भिदा यजेत"—इत्येवमादौ अव्यक्तयजतौ, सौमिकधर्म्मा इव प्रधाना अपि यजतयः प्रदिश्यन्ते, तयोः रूपान्तराभावात्। तद्वदत्रापि स्यात्। आनर्थक्यात् हि प्रधा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नस्यानतिदेश उक्तः। न चैवमानर्थक्यं शक्यते वक्तुम्। अथ मन्यसे,— नासौ प्रधानस्यातिदेशः। कस्य तर्हि?। अङ्गस्यैव। प्रधानं खल्वत्र जुहोतिना यजतिना च विहितं, द्रव्यदेवते पुनरङ्गे एवातिदिश्येते, अङ्गान्तरवत्—इति। एवन्तर्हि प्रकृतेऽपि श्राद्धचोदनया प्रधानं विहितम्—इति न प्रधानस्यातिदेशः, अपितु अङ्गमेव—इतिकर्त्तव्यता कलापः प्रदिश्यताम्। कथन्तर्हि पिण्डदानस्य निषेधः क्रियते?। इतिकर्त्तव्यतानिषेधाभिप्रायतया,—इति गृहाण। नायं पिण्डदानस्य निषेधः, अपितु तदितिकर्त्तव्यताया एव। तस्याश्च निषेधात् पिण्डोऽपि न दीयते। उत्तरवेदेर्निषेधात् वैश्वदेवे सुनासीरीये च यथा न अग्निः प्रणीयते, तद्वत्। अपिच। कस्मात् कारणादुभयोः प्राधान्य-पक्षे पिण्डदानस्य निषेधो न घटते,—इति तावदसौ प्रष्टव्यः। स यदि ब्रूयात्;—प्राप्तेरभावात्—इति। तं प्रति ब्रूयात्;—विध्यन्तेन प्राप्तेरभावेऽपि विध्यादितः प्राप्तिरस्त्येव। कुतः?। श्राद्धपदस्यैवैवम-र्थ्यात्। तत्र, विध्यादितः प्राप्तः पिण्डः प्रतिषिध्यमान स्तदितरकरण-मेव प्रयोजयति। सोऽयं पर्य्युदासो न निषेधः। यथा, सर्व्वस्वं दद्यात्,—इत्यत्र, भूम्यादि प्रतिषेधात् तदितरत् सर्व्वस्वमर्थः, तथै-वात्रापि पिण्डेतरत् श्राद्धमर्थः,—इति न किञ्चिदनुचितम्।

एतेन "श्राद्धं सपिण्डकं कृत्वा"—इत्यादिवचनान्यपि व्याख्या-तानि। गोवृषन्यायात् खल्वेवमुच्यते प्रसंशार्थम्। तदेवमादिवचन-वैचित्र्यमृषीणामबुद्धा न बुद्धिमद्भिर्भ्रमितव्यम्। यत् पुनरङ्गभूत पिण्डदानादितरदेव कर्म्मान्तरं प्रधानं पिण्डदानम्—इति वर्णितम्। तत्र पृच्छामः। तस्य श्राद्धत्वमिष्यते न वा?—इति। यदि तावत्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रथमः पक्षः, तदा विफलः प्रयासः । पिण्डदानस्यापि श्राद्धत्वाभ्युपगमात् । कर्म्मान्तरवचनानुपपत्तिश्च स्यात् । सति ब्राह्मणभोजने पिण्डदानमङ्गम्, असति प्रधानम्,—इति ब्रवीमि,—इति चेत् । निरङ्कुशत्वात्ते तुण्डस्यैवं ब्रवीषि, न तु प्रमाणोपेतं ब्रवीषि । रूपभेदाभावात् । यदेव खल्वस्य रूपमङ्गस्य तदेव प्रधानस्यापि,—इति सति ब्राह्मणभोजने अङ्गं, विपरीतमन्यथा,—इत्यत्र विशेषहेतुर्नास्ति । फलश्रुतेरुभयत्राप्यविशेषेणैकशेषस्य दुष्करत्वात् । अपि च । एतावतापि श्राद्धशब्दाभिधेयत्वमस्याभ्युपगच्छत्येव भवान्,—इति असतीव ब्राह्मणभोजने, सत्यपि तस्मिन् प्राधान्यमेवास्य अभ्युपगम्यताम्, कृतमर्द्धजरतीयेन । कुत्रचिदेकस्य कुत्रचिच्चान्यस्य प्राधान्ये पुनरभ्युपगम्यमाने अनेकार्थत्वमस्य कल्पनीयं स्यात् । तच्चान्याय्यम् । उत्तर इति चेन्नाचार्य्यविरोधात् । इति चेत् पश्यसि,—उत्तरः पक्षः तर्हि समाश्रयिष्यते,—इति । एतदपि न पारयसि । कस्मात्? । आचार्य्यविरोधात् । "तत् श्राद्धम्"—इति सूचयन्नाचार्य्यः पिण्डपितृयज्ञस्यापि श्राद्धत्वमुपदिशति । विरुध्यते खल्वेतद्भवताम् । पिण्डप्रधानो हि सः । तस्मात्, पिण्डमन्तरेणैव ब्राह्मणभोजनमन्तरेणापि श्राद्धदर्शनात् नैतदेकतरस्मिन्नेव पक्षे चोदयितव्यं भवति; द्वयोः समानत्वात्—इति सन्तोष्टव्यम् । समुच्चयपक्षः खल्वेवमुपोद्बलितो भवति । यस्तु, ब्राह्मणभोजनमात्रं प्रधानमाह, स कथं पिण्डदानमात्रस्य श्राद्धत्वं समर्थयितुं शक्ष्यति,—इति न विद्मः ।

यदपि शङ्खवचनमुपन्यस्तं—'श्राद्धं कृत्वा प्रयत्नेन'—इत्यादि, सोऽयं केवलान्नोत्सर्गे श्राद्धपदप्रयोगः,—इति वर्णितञ्च । तदप्यनभिज्ञवचनम् । कुतः ? ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"भोजयेदथवाऽप्येकं ब्राह्मणं पङ्क्तिपावनम्" ।

इति ।

"उच्छिष्टसन्निधौ कार्य्यं पिण्डनिर्व्वपणं बुधैः" ।

इति च ब्राह्मणभोजनं पिण्डनिर्व्वपणञ्चाभिधाय, पश्चात् तद्वचनारम्भात्। तदनेनायमपि समुच्चयपक्षमुपोद्वलयति,—इत्यवगच्छामः ।

यच्च पुलस्त्यवचनमुपदर्शितम्—'संस्कृतं व्यञ्जनाढ्यान्नम्'—इत्यादि, तस्यापि,—श्रद्धया यस्माद्त्तान्नं दीयते—तस्मादिदं कर्म्म श्राद्धमित्युच्यते,—इति वचनव्यक्त्या अन्नदानादतिरिक्तमपि किञ्चिदवगम्यत एव । तदिदम्,—"संज्ञायाम्"—इति वा, "तेन कृतम्"—इति वा, "तस्येदम्"—इति वा भवति । जयादित्यस्तु "चूड़ादिभ्य उपसङ्ख्यानम्"—इत्यभिधाय, चूड़ा प्रयोजनमस्य—चौड़म्। श्रद्धा प्रयोजनमस्य—श्राद्धम्"—इत्युदाजहार। रघुनन्दनस्तु पुलस्त्यवचनमालोचनमात्रेण पश्यन्,—श्रद्धया अन्नादेर्य्यद्दानं तत् श्राद्धमिति वैदिकप्रयोगाधीनयौगिकम्—इति वर्णयाञ्चकार । तदसङ्गतम्। कुतः ? । योगार्थस्याशब्दत्वात्। न खलु श्रद्धया अन्नादेर्दानम्—इत्ययं योगार्थः श्राद्धशब्दादवगम्यते । न खलु दानार्थे तद्धितमुपदिशन्त्याचार्य्याः । सोऽयम् अशाब्दीं व्युत्पत्तिं परिकल्प्य शिष्यान् व्यामोहयति,—इति किमत्र ब्रूमः । दर्शितञ्चास्माभिः पिण्डपितृयज्ञस्यापि श्राद्धत्वमाचार्य्यानुमतम्। तदपि न प्रस्मर्त्तव्यम्। यच्च,—

"अदैवं भोजयेत् श्राद्धं पिण्डमेकञ्च निर्व्वपेत्" ।

इति वचनम्। तत्र खल्वन्ने श्राद्धशब्दः प्रयुक्तः । यदपि,—

"आमश्राद्धं यदा कुर्य्याद् विधिज्ञः श्राद्धदः सुतः ।
तेनाग्नौ करणं कुर्य्यात् पिण्डांस्तेनैव निर्व्वपेत्" ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति वाक्यम्। तत्रापि, तेनाग्नौकरणम्—इति हेतुत्वेनोपादानम्, यतस्तेनाग्नौकरणम्, अतस्तेनैव पिण्डदानम्—इति तस्यार्थः। अग्नौकरणशेषेण पिण्डदानम्—इत्ययमत्र हेतुः। तदिदं वाक्यम्—

"आमश्राद्धं यदा कुर्य्यात् पिण्डदानं कथं तदा।
गृहादाहृत्य पक्वान्नं पिण्डं दद्यात् तिलैः सह"।

इत्येतत्पक्वाननुज्ञानार्थम्। तथा मनुः।

"सहपिण्डक्रियायान्तु कृतायामस्य धर्म्मतः।
अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः"।

इति। न च, पिण्डनिर्व्वपणं पित्रे दानम्—इति रघुनन्दनव्याख्यानं युक्तम्—इति वाच्यम्। यथाश्रुतार्थ-परित्यागे मानाभावात्। अस्य,—इति करणाच्च पिण्डदानस्यैवावगतेः। पित्रुद्देश्यकदानमात्रस्यैव तदितिकर्त्तव्यतापत्तेश्च। "न निर्व्वपति यः पिण्डम्"—इति, "पिण्डदोऽंशहरः"—इति, "पिण्डं दद्याद्धनं हरेत्"—इति, "त्रिषु पिण्डः प्रवर्त्तते"—इति, "पिण्डोदकक्रियाहेतोः"—इति, "नरकस्थाश्च तृप्यन्ति पिण्डैर्दत्तैः"—इति चैवमादिषु शतशः पिण्डदानस्य प्राधान्यावगमाच्च।

"एवं निर्व्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्"।

इति परतस्तेनैव पिण्डनिर्व्वपणस्योपसंहाराच्चैवमवगच्छामः। (उपसंहारः खल्वयं श्राद्धप्रकरणशेषे दृश्यते। तस्मात्,—पिण्डप्रदानस्यैवायमुपसंहारो न श्राद्धकर्म्मणः,—इत्यपि न शक्यते वक्तुम्।) अपिच। पिण्डदान एव पिण्डनिर्व्वपणपदं प्रयुक्तवान् मनुः,—इत्यवगच्छामः। कथं कृत्वा?। शृणु। पुरस्तात्तावत्,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"त्रींस्तु तस्माद्धविः शेषात् पिण्डान् कृत्वा समाहितः।
औदकेनैव विधिना निर्व्वपेद्दक्षिणामुखः"।

इति। परस्तादपि,—

"पिण्डनिर्व्वपणं केचित् पुरस्तादेव कुर्व्वते"।

इति,—पिण्डप्रदान एव पिण्डनिर्व्वपणपदप्रयोगो दृश्यते। अपिच। कस्यचित् पिण्डदानम्, कस्यचिच्च ब्राह्मणभोजनं प्रधानम्—इत्यतो हि कारणात् समुच्चयपक्षः प्रादुर्भवति। तत् किमत्र करिष्यन्ति अन्यतरप्राधान्यावेदकानि वचनानि। स खल्वयमलङ्कारः समुच्चयपक्षस्य न दोषः। अथवा। क्वचित् पिण्डः प्रधानम्,—यथा गयापिण्डपितृयज्ञादौ। क्वचित् ब्राह्मणभोजनम्,—यथा नित्यश्राद्धादौ। क्वचिच्चोभयम्,—यथा सपिण्डीकरणादौ। इत्यस्तु किं विस्तरेण॥०॥ २७॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य तृतीया काण्डिका॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके चतुर्थी काण्डिका।

अथेदानीं प्रसङ्गाल्लाघवाच्च अन्वष्टक्यविधिं पिण्डपितृयज्ञेऽप्यतिदिशन्नाह,—

अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञो व्याख्यातः ॥ १ ॥

अन्वष्टक्यकर्म्मणि यः स्थालीपाकः विहितः, तेनैव विधिना पिण्डपितृयज्ञो व्याख्यातः। ननु, अन्वष्टक्येन,—इति वक्तव्ये किमर्थम् अन्वष्टक्यस्थालीपाकेन,—इति स्थालीपाकग्रहणं क्रियते?। मांसचरुनिवृत्त्यर्थमित्याह। कथं नाम?। अन्वष्टक्येनेतिकृते स्थालीपाको मांसचरुश्चेतिद्वयमेव प्राप्यते। तत्र यत् पुनः स्थालीपाकग्रहणं करोति, तद्बोधयति मांसचरुरत्र नास्तीति। तर्हि पितृयज्ञः,—इति वक्तव्ये पिण्डपितृयज्ञः,—इति कथं पिण्डग्रहणं क्रियते?। उच्यते। पितृयज्ञः,—इति कृते खल्वन्वाहार्य्यादावपि अयमतिदेशः स्यात्। सचानिष्टः। पिण्डपितृयज्ञधर्म्माः खल्वेतेषु श्राद्धकल्पे अतिदिश्यते। एतस्मात् कारणात् पिण्डपितृयज्ञः,—इति सूचितम्। अथवा। पिण्डग्रहणं कुर्व्वन्नेतस्य पितृयज्ञस्य पिण्डप्रधानतां दर्शयति। कथं नाम?। पिण्डैरेव यत्र पितर इज्यन्ते सोऽयं पिण्डपितृयज्ञः। तथाच निगमः। "आहिताग्नेः पित्रर्चनं पिण्डैरेव, अपि वा ब्राह्मणान्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजयेत्"—इति पिण्डस्यासम्भवे ब्राह्मणभोजनमुपदिशति ॥०॥ ॥ १ ॥०॥

अतिदेशवशान्नवम्यामेव माभूदित्यतः कालान्तरविधानार्थमिदमाह। एवं वा।

कः पुनः पिण्डपितृयज्ञो नाम,—योऽयमन्वष्टक्यस्थालीपाकेन व्याख्यातः, को वा तस्य कालः? । उच्यते ।

अमावस्यायां तत् श्राद्धम् ॥ २ ॥

तत् पिण्डपितृयज्ञाख्यं श्राद्धममावस्यायां कर्त्तव्यमिति सूत्रशेषः। अविहिते पिण्डपितृयज्ञे कथं तत्र धर्म्मप्रदेशः—इति इदमर्थतः सूत्रं पूर्व्वं द्रष्टव्यम् ॥०॥ २ ॥०॥

अमावस्याप्रसङ्गादाह,—

इतरदन्वाहार्य्यम् ॥ ३ ॥

इतरदपरं द्वितीयमित्यर्थः। अनु पश्चादाह्रियते,—इत्यन्वाहार्य्यं नाम श्राद्धममावस्यायां कर्त्तव्यमित्यनुवर्त्तते। कस्य पश्चात्? । पिण्डपितृयज्ञपिण्डानां, तस्यैव वा,—इति ब्रूमः। कस्मात्? । उपस्थितत्वात्। अत एव पिण्डान्वाहार्य्यकम्—इत्याख्यायते। तथाच गृह्यान्तरम्।

"यत् श्राद्धं कर्म्मणामादौ या चान्ते दक्षिणा भवेत्।
अमावास्यां द्वितीयं यदन्वाहार्य्यं तदुच्यते" ॥

इत्यमावस्यायां द्वितीयस्य श्राद्धस्यान्वाहार्य्यत्वं स्मरति। न च,—

"पिण्डानां मासिकं श्राद्धमन्वाहार्य्यं विदुर्ब्बुधाः"।

For Private and Personal Use Only

इति स्मरणात् पिण्डानां पितृणामन्वाहार्य्यं मासिकतृप्तिजनकं यत्त-त्तथेति तत्त्वकारोक्तं युक्तमिति वाच्यम्। केवलान्वाहार्य्यपदे तदर्थासम्भवात्। व्युत्पत्तेरशब्दत्वाच्च। पूर्व्वोक्तगृह्यान्तरविरोधाच्च। प्रकरणञ्चैवमुपरुद्धेत। तस्मादनग्नेरमावस्याश्राद्धं नान्वाहार्य्यमित्यादरणीयम्।

तदत्र ब्राह्मणभोजनं पिण्डदानञ्च षण्णां कर्त्तव्यम्। तथा च गृह्यान्तरम्। "मध्यमं पिण्डं पत्न्यै प्रदाय ब्राह्मणान् भोजयित्वा तथैवमेतेभ्यो मातुश्च पितृभ्यस्त्रीन् पिण्डानवनेनिज्य निदध्यात्"—इति। अत्र, मध्यमं पिण्डम्—इति पिण्डपितृयज्ञविषयम्। ब्राह्मणान् भोजयित्वा,—इत्यादिकमन्वाहार्य्यश्राद्धपरम्। एतेभ्यः,—इति पिण्डपितृयज्ञोपात्ताः स्वपितरः परामृश्यन्ते। एवञ्च, पिण्डपितृयज्ञेऽपि त्रयाणामेव पिण्डदानं स्यात्। तथाच कर्म्मप्रदीपः।

"कर्षूसमन्वितं मुक्ता तथाऽऽद्यं श्राद्धषोड़शम्।
प्रत्याब्दिकञ्च, शेषेषु पिण्डाः स्युः षड़िति स्थितिः"॥

इति। कर्षूश्च पिण्डपितृयज्ञेऽप्यस्ति॥०॥ ३ ॥०॥

सकृत्कृतेनैव कृतं मामंस्त,—इत्येतदर्थमाह,—

मासीनम् ॥ ४ ॥

मासि मासि क्रियते,—इति मासीनम्। अधिकारात् श्राद्धद्वयमपि, न पुनरानन्तर्य्यातिरेकात् अन्वाहार्य्यमेव ॥०॥ ४ ॥०॥

समाप्ता प्रासङ्गिकी कथा। प्रकृतमधुनोच्यते,—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणाग्नौ हविषः संस्करणम् ॥ ५ ॥

अतिदेशस्वरसादाहिताग्नेरपि शालाग्नावेव माभूदित्येतदर्थमिदमुच्यते । यो गार्हपत्यादानीय प्रणीयते, सोऽयं दक्षिणाग्निः । ऋज्वन्यत् ॥०॥ ५ ॥०॥

ततश्चैवातिप्रणयः ॥ ६ ॥

ततस्तस्माद्दक्षिणाग्नेरेवाग्निमुद्धृत्य अतिप्रणयः पूर्वोक्तलक्षणः कर्त्तव्यः । च शब्दात् होमोऽपि तत्रैव स्यात् ॥०॥ ६ ॥०॥

शालाग्नावनाहिताग्नेः ॥ ७ ॥

अनाहिताग्नेः स्मार्त्ताग्नेः शालाग्नौ हविषः संस्करणं होमश्च कर्त्तव्यम् । अतिप्रणयश्च तस्मादेव स्यात् । ननु, एतदवाच्यं शालाग्निः खल्वेतदर्थं एव । उच्यते । दक्षिणाग्नेरुपदेशादनाहिताग्नेः पिण्डपितृयज्ञ एव न स्यादित्यपि कस्यचिदाशङ्का स्यान्मन्दमतेः । अतस्तन्निरासार्थ-मेतदुच्यते ॥०॥ ७ ॥०॥

एवन्तावत् आहिताग्निशालाग्न्योर्यों विशेषः स सूचितः, अथेदानीमु-भयसाधारणीं इतिकर्त्तव्यतां वक्तुमुपक्रमते ।

एवं वा—

किं समस्त एव अन्वष्टक्यप्रकारः सूचितविशेषव्यतिरेकेण पिण्डपितृ-यज्ञे स्यात्? । एवं खलु प्राप्तम् । एवं प्राप्ते इदमारभ्यते,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एका कर्षूः ॥ ८ ॥

कर्त्तव्या,—इति सूत्रशेषः। अतिदेशात् तिसृणां प्राप्तत्वादेकेत्युच्यते। सा खल्वियं दक्षिणाग्रा स्यात्। कस्मात्?। अन्वष्टक्यकर्म्मणि आग्नेय्यभिमुखीनां कर्षूणामाग्नेय्यभिमुखीभिः कुशैः स्तरणदर्शनात्, इह च दक्षिणाग्रैः कुशैः परिस्तरणोपदेशात् कर्ष्वा अपि दक्षिणाग्रत्वावगमात्। तथा चोक्तम्।

"दक्षिणान्तात्तदग्रैस्तु पितृयज्ञे परिस्तरेत्"।

इति। दक्षिणाग्रामिति पाठे व्यक्तमेव कर्ष्वा दक्षिणाग्रत्वम् ॥०॥८॥०॥

तस्या दक्षिणतोऽग्नेः स्थानम् ॥ ९ ॥

तस्याः कर्ष्वा दक्षिणतो दक्षिणस्यां दिशि अग्नेः स्थानं, न पुनरन्वष्टक्यकर्म्मवत् पूर्व्वतः ॥०॥ ९ ॥०॥

नात्रोल्मुकनिधानम् ॥ १० ॥

दक्षिणार्द्धे कर्षूणां यदुल्मुकनिधानं तत्रोक्तमासीत्, तदत्र न कर्त्तव्यम् ॥०॥ १० ॥०॥

न स्वस्तरः ॥ ११ ॥

तत्र कर्षूणां पश्चात् यदुक्तमासीत्, सोऽयं स्वस्तरोऽत्र न कर्त्तव्यः ॥ ॥०॥ ११ ॥०॥

नाञ्जनाभ्यञ्जने ॥ १२ ॥

अत्र कर्त्तव्ये। अञ्जनञ्च अभ्यञ्जनञ्च ते अञ्जनाभ्यञ्जने। अञ्जनं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौवीराञ्जनं व्याख्यातमेव । अभ्यज्यतेऽनेन,—इत्यभ्यञ्जनं तैलम् ॥०॥ ॥ १२ ॥०॥

न सुरभि ॥ १३ ॥

अत्र कर्त्तव्यम् ॥०॥ १३ ॥०॥

न निह्नवनम् ॥ १४ ॥

निह्नवनं नमस्कारोपलक्षितैर्मन्त्रैः—दक्षिणोत्तानौ पाणी कृत्वा,—इत्येवमादिना तत्र यदुक्तमासीत्, तदत्र न कर्त्तव्यम् । ते खल्विमे अतिदेशागता इह प्रतिषिध्यन्ते ॥०॥१४॥०॥

उदपाचान्तः ॥ १५ ॥

पिण्डपरिषेकार्थमुदपात्रमन्तो यस्य, सोऽयमुदपाचान्तः पिण्डपितृयज्ञः स्यात् । ननु, एतदवाच्यम्, अतिदेशादेव प्राप्तत्वात् । उच्यते । यावदुक्तकरणार्थमेतदुच्यते । तेन,'गन्धादीन् निःक्षिपेत्तूष्णीम्'—इत्यादिकं कर्म्म अत्र न भवति । अन्यदपि प्रयोजनमुत्तरत्र वक्ष्यामः ॥०॥ ॥१५॥०॥

वासस्तु निदध्यात् ॥ १६ ॥

ऋजुरक्षरार्थः । ननु, किमर्थमिदमुच्यते, वासः खल्वतिदेशादेव लभ्यते ? । वासोऽन्तरविधानार्थम्—इत्याह । तुशब्देन पूर्व्वोक्तं वासो व्यवच्छिद्यते । कथं ज्ञायते ? । पूर्व्वोक्तं खलु वासोऽतिदेशादेव प्राप्यते,—इति तदर्थं पुनः सूत्रणमनर्थकमेव स्यात् । तस्माद् वासो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तरमत्र विधीयते,—इत्यवगच्छामः। एककार्य्यार्थत्वात् पूर्व्वस्य वाससो निवृत्तिः स्यात्। (तन्निवृत्त्या च मन्त्रोऽपि तावन्मात्रः तदीयो निवर्त्तते। तेन, "एतद्वः पितरो वासः"—इति श्राद्धकल्पोक्तेनैव मन्त्रेण वाससो निधानं सिध्यति)। एकवचनसंयोगाच्चैकमेवात्र वासः स्यात्। अपूर्व्वं खल्वत्र वासो विधीयते। अतस्तदेकत्वमपि पश्वेकत्ववद्विवक्षितुमुचितमेव।

इदमिदानीं सन्दिह्यते। किं श्रौतस्य गृह्योक्तस्य च पिण्डपितृयज्ञस्य समुच्चयः, आहोस्वित् विकल्पः, अथवा स्मार्त्तस्य निवृत्तिः, उताहो श्रौतस्यैव?—इति। उच्यते। स्मार्त्तस्य निवृत्तिस्तावन्न भवति। कस्मात्?। उपदेशस्यानर्थकत्वापत्तेः। समुच्चयोऽपि न युज्यते; एकार्थत्वात्। विकल्पोऽप्यसङ्गतः; अतुल्यबलत्वात्। पक्षे स्वशाखाश्रयं खल्वेवं परित्यज्येत। तच्चानिष्टम्। तस्मात्, श्रौतस्यैव निवृत्तिरित्यवगच्छामः। पिण्डपितृयज्ञः खल्वस्मच्छाखायां नास्ति। न खलु स्वशास्त्रोक्तमुपेक्ष्य पारशाखिकं श्रौतमुपादातुमुचितम्। तथाच कर्म्मप्रदीपः।

"अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्म्मकारिणाम्।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया।
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः।
कर्त्तुमिच्छति दुर्म्मेधा मोघं तत्तस्य चेष्टितम्"।

इति। अपिच। पूर्व्वत्र उदपात्रान्तत्वं पिण्डपितृयज्ञस्य सूत्रयन्नाचार्य्यः पारशाखिकं श्रौतं नानुमन्यते। श्रौते पिण्डपितृयज्ञे खल्ववधाना जिघ्रणादिकमपि उदकनिषेकात् परतः श्रूयते। अपर आह। गृह्याग्निमतः स्मार्त्त एवाचार्य्यसम्मतः पिण्डपितृयज्ञः, श्रौताग्निमतस्तु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पारशाखिकोपि श्रौत एव, अग्निहोत्रादिवत्,—इति ॥०॥१६॥०॥ अवसिता प्रासङ्गिकी कथा। अथेदानीमष्टकाकर्म्मशेषमेवानुवर्त्तामहे,—

माघ्या ऊर्द्ध्वमष्टम्याꣳ स्थालीपाकः ॥ १७ ॥

कर्त्तव्यः,—इति सूत्रशेषः। अष्टकायै त्वा,—इति निर्व्वापः ॥०॥ १७॥०॥

तस्य जुहुयात् ॥ १८ ॥

तस्य स्थालीपाकस्यैकदेशं जुहुयात् ॥०॥१८॥०॥

अष्टकायै स्वाहेति जुहोति ॥ १९ ॥

स्पष्टोऽर्थः। पूर्व्वेणैव जुहोतिना सिद्धे पुनर्जुहोतिग्रहणं शाकचरोरपि होमप्रज्ञापनार्थम् ॥०॥१९॥०॥

स्थालीपाकावृताऽन्यत् ॥ २० ॥

कृतभाष्यमेतत् ॥०॥२०॥०॥

शाकं व्यञ्जनमन्वाहार्य्यम् ॥ २१ ॥

अनु पश्चादोदनचरोराह्रियते,—इत्यन्वाहार्य्यं शाकं व्यञ्जनं कुर्य्यात्,—इति सूत्रशेषः। एतदुक्तं भवति। अस्यामष्टकायामोदनचरोः पश्चात् शाकचरुः कर्त्तव्यः। स च शाकचरुरोदनचरोर्व्यञ्जनार्थः मांसादिचरुवत्। तथाच पूर्व्वाष्टकायामुक्तम्।

"ओदनव्यञ्जनार्थन्तु पश्वभावेऽपि पायसम्"।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

होमोऽपि पूर्व्ववत्तन्त्रेणैव स्यात्। कुतः?। शाकस्य व्यञ्जनतयोपन्यासेन स्वातन्त्र्यनिराकरणात्। तथा चोक्तम्।

"शाकञ्च फाल्गुनाष्टम्यां स्वयं पत्न्यपि वा पचेत्।
वास्तुशाकादिहोमस्य कार्य्यः पूणाष्टकाऽऽवृता"।

इति। अन्वाहार्य्यः,—इति केचित् पठन्ति। तत्र च, छान्दसत्वमाश्रयणीयम्। अन्वाहार्य्यश्चरुरिति चरुसम्बन्धविवक्षया वा कथञ्चित् समाधेयम्। अन्वाहार्य्ये,—इति पाठे, अन्वाहार्य्ये; पूर्व्वाष्टकायाः प्रकृतत्वादोदनचरोः पश्चादाह्रियमाणे मांसचरौ—तत्स्थाने,—इत्येतत्। तथाच, तदीयमांसचरुस्थाने अत्र शाकं व्यञ्जनं कुर्य्यात्,—इत्यर्थः। अन्वाहार्य्यश्राद्धे,—इति कथं न वर्ण्यते?। 'नाष्टकासु भवेत् श्राद्धम्'—इत्यष्टकाकर्म्मण्यन्वाहार्य्यश्राद्धनिषेधात्—इत्याह। तस्माद् यथोक्त एवार्थः॥०॥२१॥०॥

अथ पितृदैवत्येषु पशुषु—वह वपां जातवेदः पितृभ्य इति वपां जुहुयात्॥ २२॥

अथशब्दः पूर्व्वोक्तायाः पश्वितिकर्त्तव्यताया अनुवृत्त्यर्थः। पित्रर्थं ये पशव आलभ्यन्ते त इमे पितृदैवत्याः पशवः। तेषु पितृदैवत्येषु पशुषु,—वहवपामिति मन्त्रेण वपां जुहुयात्। पितृदैवत्याश्च पशवः,—"श्रोत्रियेऽभ्यागते श्राद्धं महोक्षेण महाऽजेन वा दद्यात्"—इत्येवमादयस्तन्त्रान्तरोक्ता आदरणीयाः। कुतः?। स्वशास्त्रे विधानाभावात्। ओदनचरोश्चात्र, पितृभ्यस्त्वा,—इति निर्व्वापः स्यात्। कस्मात्?। पित्रर्थत्वात्। एवं, सव्योत्तराभ्यां पाणिभ्यां सकृदवहन्यात्। सकृत्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फलीकुर्य्यात्। सकृत् प्रक्षालयेत्। प्रसव्यमवघट्टयेत्। दक्षिणत उद्वासयेत्। न च प्रत्यभिघारयेत्। अष्टर्चस्य चात्र निवृत्तिः स्यात्। कुतः?। मन्त्रलिङ्गविरोधात्। एवञ्च, अवदानानि सन्नीय त्रिधाविभागमकृत्वैव स्थालीपाकावृता सौविष्टकृदावृता वा अवदाय, पितृभ्यः स्वाहा,—इति सकृदेव जुहुयात्। प्रोक्षणनिर्व्वापप्रधानहोमास्तु प्राचीनावीतिनैव कर्त्तव्याः। कुतः?। पित्रर्थत्वात्। तथा चोक्तम्।

"प्राचीनावीतिना कार्य्यं पित्र्येषु प्रोक्षणं पशोः।
दक्षिणोद्वासनान्तञ्च चरोर्निर्वपणादिकम्।
सन्नयश्चावदानानां प्रधानार्थो न हीतरः।
प्रधानहवनञ्चैव शेषं प्रकृतिवद्भवेत्"।

इति ॥०॥२२॥०॥

देवदैवत्येषु—जातवेदो वपया गच्छ देवानिति ॥२३॥

देवार्थं ये पशव आलभ्यन्ते त इमे देवदैवत्याः पशवः। तेषु जातवेद इति मन्त्रेण, वपां जुहुयात्,—इत्यनुवर्त्तते। आह। के पुनर्देवदैवत्याः पशवः?। उच्यते। योऽयं वास्तुकर्म्मणि 'कृष्णया गवा यजेत'—इत्येवमादिना सूत्रयिष्यते; ये च तन्त्रान्तरे,—'हिरण्यकामो वा याम्यायां मणिभद्रं रोहितेन यजेत, गोऽश्वकामः पौर्णमास्यां श्वेतेन',—इत्येवमादयः, त इमे देवदैवत्याः पशवः। तत्र, वास्तुकर्म्मणि वास्तोष्पतये त्वा,—इति निर्व्वापः। होमे तु विशेषं वक्ष्यति। मणिभद्रयागादिषु मणिभद्राय त्वा,—इत्यादिर्निर्वापः। मणिभद्राय स्वाहा,—इत्यादिको होमः ॥०॥२३॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथं पुनर्ज्ञायते; यन्मणिभद्रयागादिषु मणिभद्राय,—इत्यादिना निर्व्वापहोमौ भवतः,—इति ? । उच्यते ।

अनाम्नातेषु तथाऽऽदेशं यथाऽष्टकायै स्वाहेति जुहोति ॥ २४ ॥

आ-सम्यक् ज्ञातं आज्ञातं तन्न भवतीत्यनाज्ञातम्। तेषु यथैव श्रूयते, तथैवादेशो यथा भवति तथा कर्त्तव्यम्। एतदुक्तं भवति। येषु समश्नीयचरुहोमोपनयनव्रतान्तसावित्रचरुहोमादिषु देवता निर्दिश्यन्ते न मन्त्राः; तेषु यदेव श्रूयते तदेवादिश्य निर्व्वपेत् जुहुयाच्च । एवञ्च, समश्नीयचरौ अग्नये त्वा,—इत्यादिर्निर्वापः, अग्नये स्वाहा,—इत्यादिकश्च होमः । एवं सावित्रचरुहोमादिषु यथायथमूहनीयम् । येषु पुनराग्रहायणादिषु देवता नोपदिश्यते होममन्त्रश्चाव्यक्तलिङ्गः; तेषु यावन्मात्रं वाक्यादवगम्यते, तावत एवादेशः निर्व्वापे। आदिष्टमन्त्रेण तु होमः। येषु पुनश्चैत्यादिषु मन्त्रो नोपदिश्यते नापि देवता; तेषु चैत्यै त्वा,—इत्यादिना निर्व्वापः, चैत्यै स्वाहा,—इत्यादिना च होमः स्यात्। अत्र दृष्टान्तः। 'यथाऽष्टकायै स्वाहेति जुहोति',—इति। यथा खल्वष्टकायै स्वाहेति यदेव कर्म्मणो नामधेयं तेनैव जुहोति, एवं चैत्यादिष्वपि,—इति बोद्धव्यम् । आह । ननु, विषम उपन्यासः,—चैत्यादिषु देवता मन्त्रस्य नोपदिश्यते, न चैवमष्टका । तत्र हि देवता उपदिष्टा । उच्यते। सत्यमुपदिष्टा तत्र देवता, तथापि तु अन्तिमाष्टकायां 'अष्टकायै स्वाहा',—इति कर्म्मनामधेयेनैव होमः क्रियते, सूत्रप्रामाण्यात् । स खल्वयं कर्म्मनामधेयेन होमोऽत्र दृष्टान्तीकृतः । तस्माददोषः ॥०॥२४॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थालीपाकावृताऽन्यत् ॥ २५ ॥

व्याख्यातार्थं सूत्रम् ॥०॥२५॥०

ऋणे प्रज्ञायमाने गोलकानां मध्यमपर्णेन जुहुयात्—यत् कुसीदमिति ॥ २६ ॥

ऋणं प्रसिद्धम्। तस्मिन् प्रज्ञायमाने प्रकर्षेण ज्ञायमाने गोलकानां पलाशानां मध्यमपर्णेन मध्यमच्छदेन जुहुयात् यत् कुसीदमितिमन्त्रेण। अथ, प्रज्ञायमाने,—इत्येतदवाच्यम्? —इति चेत्। न। यत् खलु ऋणं प्रकर्षेण ज्ञायत एव केवलं, न पुनरपाकर्त्तुं शक्यते, तत्रैव होमोऽयं यथा स्यादित्येवमर्थत्वात्। एतदुक्तं भवति। ऋणमवश्यमपाकरणीयम्। अन्यथा दोषश्रवणात्। तथाच स्मर्य्यते।

"तपस्वी चाग्निहोत्री च ऋणवान् म्रियते यदि।
अग्निहोत्रं तपस्चैव तत्सर्व्वं धनिनो भवेत्"।

इति। "ऋणानाञ्चानपक्रिया"—इति चोपपातकगणनायां मनुनोक्तम्। यदि पुनरत्यन्तमेवाधनो न शक्नोति तदपाकर्त्तुम्, तदैवं जुहुयात्,—इति। अन्ये तु वर्णयन्ति,—नष्टे धनिके तद्दृक्थभागिनि च, ऋणापाकरणासम्भवे जुहुयात्,—इति। तदसङ्गतम्। कस्मात्?। राज्ञोऽप्यन्ततस्तद्दृक्थभाक्त्वात्। नहि कदाचिदपि राज्ञोऽभावोऽस्ति। तमिमं होमं यावत्सङ्ख्यमृणं तावत्सङ्ख्यमिच्छन्ति। त्रिप्रहोमञ्च मन्यन्ते ॥०॥२७॥०॥

अथातो हलाभियोगः ॥ २७ ॥

वक्ष्यते,—इति सूत्रशेषः। अथशब्दः पूर्व्वप्रकृतापेक्षः। कथं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम ?। यथा पूर्व्वोक्तान्यष्टकादीनि अवश्यकर्त्तव्यानि, एवमिदमप्येतस्मिन् निमित्ते सत्यवश्यमेव कर्त्तव्यम्,—इति। अतःशब्दो हेत्वर्थः। यस्मात्;—

"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा"।

इति कृष्यापि जीवनं मन्वादीनामनुमतम्। अतः एतस्मात् कारणात्। हलं लाङ्गलं तस्य आभिमुख्येन योगो हलाभियोगः,—कृषिप्रारम्भः,—इत्येतत् ॥०॥२७॥०॥

पुण्ये नक्षत्रे स्थालीपाकं श्रपयित्वैताभ्यो देवताभ्यो जुहुयात्,—इन्द्राय मरुद्भ्यः पर्ज्जन्यायाशन्यै भगाय ॥ ॥ २८ ॥

ऋजुरक्षरार्थः। देवतानां विसमासकरणं निर्वापहोमयोः पृथक्कल्पप्रज्ञापनार्थम् ॥०॥२८॥०॥

सीतामाशामरडामनघाञ्च यजेत ॥ २९ ॥

ऋजुरक्षरार्थः। विसमासकरणं पूर्व्ववत्। अथ, पूर्व्ववत् चतुर्थ्यन्तनिर्द्देशेनैव सिद्धे किमर्थं विभक्तिमतिक्रम्य यजेत,—इति पुनः क्रियते ?। आज्येनामूषां देवतानां होमप्रज्ञापनार्थमित्याह। कथं नाम ?। पूर्व्वविभक्तिमतिक्रामन् यजेत,—इति च पुनः कुर्व्वन्, पूर्व्वासामेव देवतानां चरुभागाभिसम्बन्धः नामूषाम्,—इति दर्शयति। आसां पुनर्द्देवतानामाज्येनैव होमः स्यात्। तथा चोक्तम्।

"आश्वयुज्यां तथा कृष्यां वास्तुकर्म्मणि याज्ञिकाः।
यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वे पञ्च द्वे क्रमेणैता हविराहुतयः स्मृताः ।
शेषा आज्येन होतव्या इति कात्यायनोऽब्रवीत्" ।

इति ॥०॥२९॥०॥

एता एव देवताः सीतायज्ञ खलयज्ञ प्रवपणप्रलवन-पर्य्ययणेषु ॥ ३० ॥

यजेत,—इत्यनुवर्त्तते । सीता लाङ्गलपद्धतिः, तत्र यो यज्ञः स सीतायज्ञः । स चायं कृष्टस्य क्षेत्रस्य पूर्व्वोत्तरार्द्धे स्यात् । पक्वव्रीहि-यवमध्ये क्षेत्रस्य पूर्व्वार्द्धोत्तरार्द्धे,—इति केचित् । स खल्वयं सीतायज्ञः शरदि वसन्ते च स्यात् । कस्मात् ? । विशेषाभावात् । पक्वं शस्यं छेदनात् परतः क्षेत्रादाकृष्य यत्र परिष्कृते देशविशेषे स्थाप्यते, सोऽयं खलः । तत्र खलयज्ञः कर्त्तव्यः । स खल्वयं खलयज्ञोऽप्युभय-त्रैव करणीयो भवति;—यवानां खले, व्रीहीणां खले च । प्रवपणं वीजवपनम् । प्रशब्दात् समस्तेषु वीजेषु उप्तेष्वयं यज्ञः स्यात् । प्रल-वनं धान्यानां छेदनम् । प्रशब्दः पूर्व्ववत् । पर्य्ययणं—परि सर्व्वतो-भावेन धान्यानां खलाद्गृहनयनम् । एतेषु सीतायज्ञादिषु एता एव देवताः यजेत ।

ननु, प्रवपणक्रमस्य युक्तत्वात् कस्मात् क्रमभेदः क्रियते ? । उच्यते । सीतायज्ञखलयज्ञयोस्तावदादितो निर्देशः व्रीहियवयो-र्द्वयोरेव धान्ययोस्तयोः करणप्रज्ञापनार्थः । प्रवपणादीनां क्रम-मतिक्रम्याभिधानं शारदधान्यमतिक्रम्य तेषां करणप्रज्ञापनार्थम् । तेन, सीतायज्ञखलयज्ञयोरुभयत्र करणात् चत्वारो यज्ञा भवन्ति, प्रवप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णादीनां सकृत्करणाच्च चयः, मिलित्वा संवत्सरे सीतायज्ञादयः सप्त सम्पद्यन्ते। अष्टमश्च हलाभियोगः,—इति। अत एवोक्तम्। "सप्त सीतामखादयः"—इति।

इदमिदानीं सन्दिह्यते। एता एव,—इति किमनन्तरोक्ताः सीतादयो देवताः परामृश्यन्ते? आहोस्वित् पूर्व्वा इन्द्रादयः? उताहो सर्व्वा एव?—इति। तत्र, पूर्व्वाः पञ्च,—इति केचित् वर्णयन्ति। कुतः?। देवताशब्दसामान्यात्। पूर्व्वत्र तावत् एताभ्यो देवताभ्यः,—इति देवताशब्दः श्रूयते, अत्रापि, एता देवताः,—इति देवताशब्दः कृतः। तस्मात्, पूर्व्वास्वेव देवताशब्दप्रयोगात् पूर्व्वा एव गृह्यन्ते नोत्तराः। तदसङ्गतम्। कस्मात्?। यस्मादुत्तरासामग्रहणे सीतायाः ग्रहणं न स्यात्। न च सीतायज्ञे सीतायाः परित्यागः कर्त्तुमुचितः। अन्ये तु, सर्व्वासामेव ग्रहणमिच्छन्तः, पूर्व्ववत् पूर्व्वाः पञ्च चर्व्वाकृतयः उत्तरास्त्वाज्याकृतयः,—इति मन्यन्ते। तदप्यसङ्गतम्। कस्मात्?। एवम्—इत्यकरणात्। एवं खल्वेवमिति कुर्य्यात्। न खलु देवतायाः परामर्शे द्रव्यमपि परामृष्टव्यम्,—इति किञ्चिन्नियामकमस्ति। तस्मात्, एताः,—इति सर्व्वनाम्नः प्रकृतपरामर्शकत्वात् एवकारकरणाच्चाविशेषेण सर्व्वासामेव देवतानां परामर्शः,—इत्येतद्गृह्णीमः। पूर्व्वासां चरुणा उत्तरासामाज्येन होमः,—इति तु नानुमन्यामहे। प्रमाणाभावात्। तस्मात् सर्व्वासामाज्येनैवात्र होमः स्यात्। तथा चोक्तम्।

"केवलाज्यहविष्काः स्युः सप्त सीतामखादयः"।

इति। अतिक्रान्तपरामर्शश्च नाचार्य्यस्यानुमतः,—इत्यसकृदावेदितम् ॥०॥२०॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आखुराजश्चोत्करेषु यजेत ॥ ३१ ॥

आखुराजो मुषिकानां राजा। तञ्च उत्करेषु यजेत। उत्कीर्य्यन्ते,—इत्युत्कराः पांशवो भण्यन्ते। चशब्दात् सर्व्वेषामेव सीतायज्ञादीनामन्ते आज्येनायमाखुराजस्य होमः स्यात्। तथा चोक्तम्।

"केवलाज्यहविष्काः स्युः सप्त सीतामखादयः।
आज्येनाखुं यजेदग्नौ तदन्ते, नित्यमेव तत्"।

इति। आखुराजाय स्वाहा,—इति होमः। सीतायज्ञादिषु आखुराजहोमे च चिप्रहोमन्यायमिच्छन्ति। यजेत,—इति पुनः करणं पूर्व्वेणैककर्म्याशङ्कानिरासार्थम् ॥०॥३१॥०॥

इन्द्राण्याः स्थालीपाकः ॥ ३२ ॥

कर्त्तव्यः,—इति सूत्रशेषः ॥०॥३२॥०॥

तस्य जुहुयादेकाष्टका तपसा तप्यमानेति ॥ ३३ ॥

ऋज्वर्थमेतत् ॥०॥३३॥०॥

स्थालीपाकावृताऽन्यत् स्थालीपाकावृताऽन्यत् ॥३४॥

कृतभाष्यं सूत्रम्। द्विर्व्वचनं प्रकरणसमाप्त्यर्थम्। अत्र किञ्चिद्वक्तव्यमस्ति। तत्र तावत् पृच्छामः। कः पुनरिन्द्राण्याः स्थालीपाकस्य कालः?। तत्र केचिदाहुः। चतुरष्टको हेमन्तः,—इति अष्टकाचतुष्ट्वावगमात् तिसृष्वेव च कर्म्मोपदेशात् चतुर्थ्यष्टकायामेतत् कर्त्तव्यम्,—इति। तदसङ्गतम्। कस्मात्?। चतुरष्टकपचस्याचार्य्याननुमतत्वात्। तदिदमभिहितमस्माभिः,—"तथा गौतमवार्कखण्डी"—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यत्र। अपरे तु,—चैत्र्याः पाकयज्ञपक्षे कर्म्मणि सूत्रानुपदेशात् तद्विषयताम् एतस्य मन्यन्ते। तदप्यसमीचीनम्। कुतः?। अनाम्नातेषु तथाऽऽदेशम्—इत्यनेनैव तत्र कर्म्मणः सिद्धत्वात्। अन्ये तु, पारिभाषिकमेव अस्य कालम्—इच्छन्ति।

तत्र वदामः। एकाष्टका,—इति मन्त्रलिङ्गादेकाष्टकायामेतत् कर्त्तव्यम्। तदिदं सामर्थ्यम् नाम प्रमाणं वाक्यस्य बाधकम्। आह। का पुनरियमेकाष्टका नाम?। तत्र व्याख्यातारो विवदन्ते। माघ्यनन्तराऽष्टका एकाष्टका,—इति पूर्व्वमीमांसाभाष्ये आचार्य्येण शवरस्वामिना निर्णीतम्। "माघी वैकाष्टका श्रुतेः"—इति सूत्रयतो भगवतो जैमिनेरप्येष एवाशयोऽवधार्य्यते। तथा आपस्तम्बोऽपि। "माघ्याः पौर्णमास्या उपरि षड्ष्टका, तस्यामष्टमी ज्येष्ठा या सम्पद्यते तामेकाष्टकेत्याचक्षते"—इति सूत्रयन्नेतदेवाह। महाब्राह्मणभाष्ये तु चैत्र्यनन्तरायामप्यष्टम्यामेकाष्टकाशब्दप्रयोगः समर्थितः। केचित्तु, प्रौष्ठपद्या ऊर्द्धकालभाविन्यामष्टकायामेतेन भाव्यम्,—इति वदन्ति। तदत्र भवन्तो भूमिदेवाः प्रमाणम् ॥०॥३४॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य चतुर्थी काण्डिका ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके पञ्चमी काण्डिका ।

उक्तो नित्यनैमित्तिकविधिः, अथेदानीं काम्यविधयो वक्तव्याः । तेषु तावत्,—

काम्येषत ऊर्द्धम् ॥ १ ॥

वक्ष्यमाणा विधयो वेदितव्याः ॥०॥ १ ॥०॥

पूर्व्वेषु चैके ॥ २ ॥

पूर्व्वेषु नित्यनैमित्तिकेष्वपि वक्ष्यमाणा विधयो भवन्ति,—इति एके आचार्य्या मन्यन्ते ॥०॥ २ ॥०॥

के पुनस्ते विधयः? । उच्यते,—

पश्चादग्ने भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदं भूमे भंजामह इति ॥ ३ ॥

जपेत्,—इति सूत्रशेषः । पश्चादग्नेरित्याद्युक्तार्थम् । न्यञ्चपाणि प्रतिष्ठापनञ्च,—

"दक्षिणं वामतो वाह्यमात्माभिमुखमेव च ।
करं करस्य कुर्व्वीत करणे न्यञ्चकर्म्मणः" ।

इति कर्म्मप्रदीपोक्तप्रकारेण कर्त्तव्यम् । स खल्वयं—"भूमिजपः"—इत्याख्यायते ॥०॥ ३ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वस्वन्तꣳरात्रौ धनमितिदिवा ॥ ४ ॥

रात्रौ क्रियमाणे कर्म्मणि 'वसु' शब्दान्तं,—दिवाक्रियमाणे कर्म्मणि 'धनम्'—इत्यन्तं कृत्वा, इदं भूमेरिति मन्त्रं जपेत् ॥०॥ ४ ॥०॥

इमꣳस्तोममिति तृचेन परिसमूहेत् ॥ ५ ॥

इमं स्तोमम्,—इत्यादिना ऋक्त्रयेण परिसमूहेत्—विचिप्तानग्न्यवयवानेकीकुर्य्यात्। अन्यत्र चिप्रहोमेभ्यः। तथा चोक्तम्।

"न कुर्य्यात् चिप्रहोमेषु दिजः परिसमूहनम्"।

इति। तिसृणामृचां समाहारः तृचः। "ऋचि त्रे रुत्तरपदादिलोपश्च च्छन्दसि"—इति तत्पदं सिद्धम्। "छन्दोवत् सूत्राणि कवयः कुर्व्वन्ति"—इत्यभ्युपगमात्। तदिदं परिसमूहनं यथाकरणीयं तदाह कर्म्मप्रदीपः।

"कृत्वाऽग्न्यभिमुखौ हस्तौ स्वस्थानस्थौ सुसंहितौ।
प्रदचिणं तथाऽऽसीनः कुर्य्यात् परिसमूहनम्"॥

इति। तस्मात्,—दचिणहस्तेन कुशान् गृहीत्वा,—इत्यसङ्गतैषा कल्पना भवदेवस्य ॥०॥ ५ ॥०॥

वैरूपाक्षः पुरस्ताद्धोमानाम् ॥ ६ ॥

वैरूपाचः,—उपश्च तेजश्च,—इत्यादि जपः,—इति केचित्। विरूपाचशब्दो यस्मिन् विद्यते, सोऽयं वैरूपाचः—भूर्भुवः स्वरोम्—इत्यादिकोमन्त्रः,—इति तत्त्वकारः। पद्यमान मन्त्रकाण्डे तु "भूर्भुवःस्वर् ॐ महान्तमात्मानं प्रपद्ये"—इति प्रतीकं प्रपदशेषतयैव पद्यते। "विरूपाचोऽसि दन्ताञ्जिः"—इत्येतदारभ्य वैरूपाचः पद्यते। स

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खल्वयं वैरूपाक्षः होमानां पुरस्तादग्रतो जप्तव्यः। होमानामिति कुर्व्वन् सहोमकेष्वेव काम्येष्वेतस्य कर्त्तव्यतां दर्शयति। पूर्व्वाणि तर्ह्यहोमकेष्वपि कर्त्तव्यानि?। न,—इत्युच्यते। कस्मात्?। अग्नि-सम्बन्धेन विधानात्। न्यञ्चकरणं परिसमूहनञ्च खल्वग्निसंबन्धेन वि-धीयते। न खल्वहोमकेऽग्निरस्ति। अथापि स्यात्,—एतस्मादेव कारणात्तत्राप्यग्निमुत्पादयिष्यामहे,—इति। अत्रोच्यते। नाप्रयोज-कत्वात्। नैषा साध्वी कल्पना। कस्मात्?। अप्रयोजकत्वात्। सिद्धं खल्वग्निमनूद्य तत्संबन्धेन जपादिकमेव वाक्यानि विदधति, न पुन-रग्निमुत्पादयितुमपि प्रयोजयन्ति। कथं ज्ञायते?। वाक्यस्य तत्रा-सामर्थ्यात्। उभयपरत्वे वाक्यभेदापत्तेश्च। कथम्। अग्निसंबन्धेनै-तानि कर्त्तव्यानि, अग्निश्चोत्पादनीयः,—इति यदि द्वावप्यर्थौ विधित्सितौ, भिद्येत तर्हि वाक्यम्। अन्यदस्य रूपं विधीयमानस्य अन्य-च्चानूद्यमानस्य भवति। तस्मात्,—सहोमकेष्वेव एवमन्तानां करणम्, —इति सिद्धम्। तत्वकारस्तु,—होमानां वच्यमाणप्रागुक्तनित्यनैमि-त्तिकानाम्,—इति वर्णयाञ्चकार ॥०॥ ६ ॥०॥

काम्येषु च प्रपदः ॥ ७ ॥

प्रपदः,—तपश्च तेजश्च,—इत्यादिकोमन्त्रः, काम्येषु पुरस्तात् जप्तव्यः। चशब्दात् होमेष्वपि। एतदुक्तं भवति। द्विविधानि तावत् काम्यानि भवन्ति—होमसंयुक्तान्यहोमकानि च। तत्र, वैरूपाक्षोहोमसंयुक्तेष्वेव, प्रपदस्तु सर्व्वत्रैव स्यात्,—इति। तदिदं काम्यपदं होमादन्येषामपि काम्यानां ग्रहणार्थम्। काम्येष्वत ऊर्द्धम्—इति खल्वाचार्य्यः स

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

होमकान्येव काम्यान्यभिप्रेत्य सूचयाञ्चकार,—इति लिख्यते। अतएव चशब्दः सहोमकानां समुच्चयार्थः। अथवा। पूर्व्वेषु चैके,—इत्युभयेषामधिकारात् पूर्व्वेष्वप्ययं विधिः स्यात्। अतस्तन्निरासार्थं काम्यग्रहणम्। चशब्दमेवकारार्थं वर्णयतस्त्वकारस्याप्येषैव वर्णना अनुमतेति गम्यते। एवञ्च, पूर्व्वाणि पूर्व्वेष्वपि पक्षतः प्राप्तानि,—इति बोद्धव्यम् ॥०॥ ७ ॥०॥

अथेदानीं प्रपदवैरूपाक्षयोर्जपप्रकारोऽभिधीयते,—

तपश्च तेजश्चेति जपित्वा प्राणायाममायम्यार्थमना वैरूपाक्षमारभ्योच्छ्वसेत् ॥ ८ ॥

तपश्च तेजश्च,—इत्यादिमन्त्रं (प्रपदरूपं) जपित्वा, तत्परिसमाप्तौ, प्राणानामायमनं प्राणायामः,—"त्रिरभ्यस्तः पूरककुम्भकरेचकाख्यः प्राणायामः,"—इति सन्ध्यासूत्रोक्तलक्षणः, तमायम्य कृत्वा,—इत्यर्थः। प्रथमं प्राणानायम्य पश्चात्तपश्च तेजश्च,—इत्यादिमन्त्रजपः,—ईत्यसङ्गतैषाकल्पना। 'अर्थमनाः' अर्थः प्रयोजनम्, तस्मिन् मनो यस्य, सोऽयमर्थमनाः,—यः कश्चिदर्थः साधयितुमभिप्रेतः, तं ध्यायन्,—इत्येतत्। 'वैरूपाक्षमारभ्य' 'उच्छ्वसेत्' प्राणान् विमुञ्चेत्,—इत्यर्थः। आवृत्य,—इति कश्चित् पठति, वैरूपाक्षं जप्त्वा वायुं रेचयेत्,—इति व्याचष्टे च। प्राणायामोऽप्यत्र काम्येष्वेव स्यात् न पूर्व्वेषु। कथं ज्ञायते?। अर्थमनाः,—इति करणात्। प्रपदजपानन्तरविधानाच्च। पूर्व्वेषु तु यथाम्नातमेव करणीयं न कश्चिद्विशेषः।

अत्र कश्चिदाह। प्राणानां संयमनमेवात्र कर्त्तव्यमुपदिश्यते, न तु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राणायामो यथोक्तलक्षणः,—इति। तदसङ्गतम्। कस्मात्?। प्राणायाममायम्य,—इति सूत्रणात्। अन्यथा, प्राणानायम्य,—इति कुर्य्यात्। एतेन,—प्राणधारणमात्रं वदता रघुनन्दनेनैतदनुपपत्तिभिया, प्राणानायम्य,—इति यत् परिकल्प्य लिखितं, तदप्यनादरणीयम्। प्राणायाममायम्य,—इत्येतस्यैव पाठस्य सर्व्वत्रोपलम्भात्। पूर्व्वैर्व्याख्यातृभिस्तथैव वर्णणाच्च। शिष्टाश्च प्राणायाममेव यथोक्तलक्षणमाचरन्ति, न प्राणधारणमात्रम्। स खल्वयं प्रपदो वैरूपाक्षश्च चिप्रहोमेषु न भवति। कुतः?।

"न कुर्य्यात् चिप्रहोमेषु द्विजः परिसमूहनम्।
वैरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्ज्जयेत्"।

इति वचनात्॥०॥ ८॥०॥

काम्येषु त्रिरात्राभोजनम्॥ ९॥

काम्येषु कर्म्मसु कर्त्तव्येषु त्रिरात्रमभोजनं प्रथमतः करणीयम्। आह। काम्येषु,—इति किमर्थं क्रियते? ननु काम्येष्वत ऊर्द्धम्,—इत्यधिकृतान्येव काम्यानि। नैष दोषः। पूर्व्वेषु चैके,—इत्युभयेषामधिकारात् पूर्व्वेष्वेतत् कदाचिदपि माभुदित्येवमर्थत्वात् काम्यग्रहणस्य॥०॥ ९॥०॥

त्रीणि वा भक्तानि॥ १०॥

त्रिरात्रमत्रापि सम्बध्यते। त्रीणि वा भक्तानि भोजनानि कर्त्तव्यानि। त्रीण्येवेति नियमार्थतया पर्य्यवसानात् भक्तान्तराणां निवृत्तिरवगम्यते। एतदुक्तं भवति। त्रिरात्रमेकभक्तं नक्तं वा कुर्य्यात्,—इति। अभक्तानि,—इति पाठेपि त्रीण्येव अभक्तानि,—इति भक्तत्रयमात्रमेव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लभ्यते,—इति समान एवार्थः। वाशब्दात् जघन्योऽयं पक्षः, तेनाशक्तस्यैव स्यात्, न तु शक्तस्यापि ॥०॥ १० ॥०॥

नित्यप्रयुक्तानान्तु प्रथमप्रयोगेषु ॥ ११ ॥

नित्यमहरहर्यानि कर्म्माणि प्रयुज्यन्ते, तानि नित्यप्रयुक्तानि,—"भूमित्यनकाममारं नित्यं प्रयुञ्जीत"—इत्येवमादीनि। तेषां प्रथमप्रयोगेषु प्रथमारम्भेषु त्रिरात्राभोजनादिकं न तु प्रतिप्रयोगमित्यर्थः। अशक्यत्वादित्यभिप्रायः। तदनेन, अनित्यप्रयुक्तानां प्रतिप्रयोगं करणं दर्शयति। तुशब्दोऽनर्थकोनिपातो मुखसुखार्थो वा ॥०॥ ११ ॥०॥

उपोष्य तु यजनीयप्रयोगेषु ॥ १२ ॥

यजनीयेति पक्षादियज्ञमाह:। तेषां यजनीयानां यः प्रयोगोऽनुष्ठानं, तेषु उपोष्य प्रयोगः कर्त्तव्यः, न तत्र त्रिरात्रभोजनादिकमित्यर्थः। तुशब्दः पूर्व्ववत् बोद्धव्यः।

आह। अथ, इदमवाच्यं ननु तत्रोपवासविधानादेव स प्राप्यते, अथोच्यते,—कारणं वक्तव्यम्। उच्यते। नित्ये तावत् पक्षादिचरौ उपवासः सूचितः, न स काम्येषु प्राप्नोति, अतः काम्येऽपि तस्य प्राप्त्यर्थमेतत् सूचितम्। अथवा। उपवासवत् त्रिरात्राभोजनादिकमपि स्यात्, अतस्तन्निवृत्त्यर्थमेतदुच्यते। कथं नाम?। उपोष्यैव न पुनस्त्रिरात्राभोजनादिकमपि कृत्वा,—इति। एवञ्च, तुशब्दः त्रिरात्राभोजनादिव्यवच्छेदकोऽपि भवति ॥०॥ १२ ॥०॥

उपरिष्टाद्वैक्ष्ंसान्निपातिकम् ॥ १३ ॥

यत् किल सन्निपतितमेव ज्ञायते, तत् सान्निपातिकमनियतनिमित्तं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परिवेषादिकमाचक्ष्महे। तदिदं सान्निपातिकमुपरिष्टाद्दैक्षं भवति। दीक्षा पुरश्चरणं त्रिरात्राभोजनादिकमित्येतत्। उपरिष्टात् कर्म्मणः पश्चात् दीक्षा यस्य, तदिदमुपरिष्टाद्दैक्षम् ॥०॥ १३ ॥०॥

काम्यपरिभाषामभिधाय, अथेदानीं काम्यानि कर्म्माण्यभिधीयन्ते,—

अरण्ये प्रपदं प्रयुञ्जीत दर्भेष्वासीनः ॥ १४ ॥

अरण्ये प्रपदं यथोक्तलक्षणं प्रयुञ्जीत। कथम्?। आसीनः उपविष्टः। क?। दर्भेषु कुशेषु ॥०॥ १४ ॥०॥

दर्भेषु,—इत्येतदिदानीं विशिनष्टि,—

प्राक्कूलेषु ब्रह्मवर्चसकामः ॥ १५ ॥

ब्रह्मवर्चसमध्ययनाश्रयं तेजः। तत् कामयते,—इति ब्रह्मववर्चसकामः। स खल्वयं ब्रह्मवर्चसकामः, प्राक्कूलेषु प्रागग्रेषु, दर्भेष्वासीनः अरण्ये प्रपदं प्रयुञ्जीत,—इति सम्बध्यते। केचित् पूर्व्वेण सूत्रेण सहास्यैक सूत्रतामिच्छन्ति ॥०॥ १५ ॥०॥

उदक्कूलेषु पुत्रपशुकामः ॥ १६ ॥

पुत्रान् पशूंश्च यः कामयते,—सोऽयं पुत्रपशुकामः, उदक्कूलेषु उदगग्रेषु दर्भेष्वासीनः अरण्ये प्रपदं प्रयुञ्जीत,—इत्यनुवर्त्तते ॥०॥ १६ ॥०॥

उभयेषभयकामः ॥ १७ ॥

उभयं कामयते,—इत्युभयकामः; ब्रह्मवर्चसकामः पुत्र पशुकामश्च मिलितोभयकामः—इत्येतत्। अपर आह। "उभयकामः"—ब्रह्म-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्चसकामः पुत्रकामश्च। अथवा। ब्रह्मवर्चसकामः पशुकामश्च”—इति। स खल्वयमुभयकामः, उभयेषु प्रागग्रेषु उदगग्रेषु च मिलितेष्वित्यर्थः। दर्भेष्वासीनः,—अरण्ये प्रपदं प्रयुञ्जीत,—इत्यनुवर्त्तत एव। सेयं त्रिसूत्री काम्यकर्मविधानार्था। काम्येषु च प्रपदः,—इत्यस्य विशेषार्था,—इति केचित् ॥०॥ १७ ॥०॥

पशुस्वस्त्ययनकामो व्रीहियवहोमं प्रयुञ्जीत सहस्रबाहुर्गौपत्य इति ॥ १८ ॥

पशूनां स्वस्त्ययनं मङ्गलमारोग्यमित्येतत्। तत् कामयते,—इति पशुस्वस्त्ययनकामः। व्रीहियवौ प्रसिद्धौ। ताभ्यां होमो व्रीहियवहोमः। तं प्रयुञ्जीत कुर्य्यात्, सहस्रबाहुरिति मन्त्रेण। त्रिप्रहोममन्त्रेच्छन्ति। पशुशब्देनात्र गावोऽभिप्रेयन्ते,—इत्यवगच्छामः। कस्मात्?। गौपत्य इति मन्त्रलिङ्गानुग्रहात्। वृहत् क्षुद्रपशूनामुपरिष्टाद्विशेषोपदेशाच्च ॥०॥ १८ ॥०॥

कौतोमतेन महावृक्षफलानि परिजप्य प्रयच्छेत् ॥ ॥ १९ ॥

महागुणयोगात् महावृक्षोऽभिप्रेतः, न परिमाणमहत्त्वात्। एवमेके। महागुणयोगात् परिमाणमहत्त्वाच्च महावृक्षः। एवमपरे। कः पुनरसौ?। यः कश्चिद्भोज्यफलः चूतनारिकेलादिः,—इत्याह। महावृक्षस्य फलानि महावृक्षफलानि। कौतोमतेन कौतोमतशब्दवता मन्त्रेण;—“कौतोमतं संवननं”—इत्यादिना मन्त्रेणेत्येतत्। परिजप्य प्रयच्छेत् दद्यात् ॥०॥ १९ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कस्मै प्रयच्छेत्?—

यस्यात्मनि प्रसादमिच्छेत्तस्मै ॥ २० ॥

आत्मनि स्वस्मिन् विषये यस्य प्रसन्नतामिच्छेत्, तस्मै प्रयच्छेत् ॥०॥ ॥०॥२०॥०॥

किं परिजपितानि सर्व्वाण्येव फलानि तस्मै प्रयच्छेत्? । न । किन्तर्हि?—

एकभूयांस्यात्मनो युग्मानि कुर्य्यात् ॥ २१ ॥

तेषां फलानां मध्यात् एकभूयांसि—युग्मानि समानि, फलानि आत्मनः आत्मार्थं कुर्य्यात् कल्पयेत् । एकेन भूयांसि एकभूयांसि—एकाधिकानीत्यर्थः । एतदुक्तं भवति । कानिचित् फलानि परिजप्य तेषां मध्यात् कियन्ति अयुग्मानि फलानि तस्मै प्रयच्छेत्, तेभ्यश्च एकेन फलेनाधिकानि अतएव युग्मानि फलानि आत्मनोऽर्थे कुर्य्यात्,—इति । आह । ननु, सन्धिसाम्यात् अयुग्मानि,—इत्यपि शक्यते वर्णयितुम्? । उच्यते । सत्यं शक्यते वर्णयितुं, कल्पनागौरवापत्तेस्तु न तथा वर्ण्यते । माङ्गलिकत्वाच्चात्मनो युग्मानामेव वर्णयितुमुचितत्वात् । युग्मानि किल माङ्गलिकानि भवन्ति । "वृद्धि-पूर्त्तेषु युग्मानाशयेत्"—इत्यादिदर्शनात् ॥०॥ २१ ॥०॥

वृक्षइवेति पञ्चर्चः ॥ २२ ॥

पञ्चानामृचां समाहारः पञ्चर्चः । वृत्त इव,—इत्येवमादिकः पञ्चर्चो-ऽधिकृतो वेदितव्यः ॥०॥ २२ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मिन् प्रथमं पार्थिवं कर्म्म ॥ २३ ॥

तस्मिन् अधिकृते पञ्चर्च्चे, तद्विषये,—इत्यर्थः। प्रथममाद्यं कर्म्म पार्थिवम्। पृथिव्यर्थं क्रियते,—इति पार्थिवम्—ग्रामक्षेत्राद्यर्थम्—इत्यर्थः। वर्त्तिष्यते,—इति सूत्रशेषः ॥०॥ २३ ॥०॥

अर्द्धमासमभुक्त्वा ॥ २४ ॥

कुर्य्यात्,—इति सूत्रशेषः। अस्मात् विशेषोपदेशात् अत्र सामान्यस्य पुरश्चरणस्य त्रिरात्राभोजनादेर्निवृत्तिरिति बोद्धव्यम् ॥०॥ २४ ॥०॥

अशक्तौ वा पेयामन्यतरं कालम् ॥ २५ ॥

अर्द्धमासाभोजनस्य खल्वशक्तौ प्रकृतमर्द्धमासं व्याप्य पेयां वा पीत्वा पार्थिवं कर्म्म कुर्य्यात्। "पेया आणाऽच्छमण्डयोः"—इत्याभिधानिकाः। किं सायम्? । न। 'अन्यतरं कालम्'। प्रातर्व्वा सायं वा,—इत्यनियमः ॥०॥ २५ ॥०॥

यत्रात्मानं परिपश्येत् ॥ २६ ॥

यत्र यस्मिन् काले पेयां पिवेत्,—तस्मिन् काले आत्मानमात्मच्छायां परिपश्येत्—दर्पणादाविति वाक्यशेषः।

एवं वा,—

यत्र यस्यां पेयायामात्मानं परिपश्येत्, तां पेयां पीत्वा,—इति पूर्व्वोक्तां पेयामनेन विशिनष्टि ॥०॥ २६ ॥०॥

एतद्व्रतमर्द्धमासव्रतेषु ॥ २७ ॥

यत्र यत्रार्द्धमासव्रतमुपदेक्ष्यते, तत्र तत्र,—"आचितशतकामोऽर्द्ध-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मासव्रतः"—इत्येवमादौ, एतत् अनन्तरोक्तं व्रतं बोद्धव्यम् ॥ ॥०॥ २७ ॥०॥

प्रासङ्गिकमभिधाय अथेदानीं प्रकृतं पार्थिवं कर्म्माह,—

पौर्णमास्यांरात्रावविदासिनि ह्रदे नाभिमात्रमवगाह्याक्षततण्डुलानृगन्तेष्वास्येन जुहुयात्-स्वाहेत्युदके ॥ २८ ॥

पौर्णमास्यां रात्रौ,—इत्यतिरोहितार्थम्। "विदासः शोषः, स यस्य ह्रदस्यास्ति स विदासी। अविदासी ग्रीष्मेऽप्यक्षीणजलः,—इत्यर्थः। तस्मिन् अविदासिनि ह्रदे"—इति केचित्। आचार्य्यपुत्रस्तु आह गृह्यासंग्रहे।

"मध्ये स्थण्डिलमन्ते च वारिणा परिसंवृतम्।
अविदासिनं ह्रदं विद्यात्तादृशं कर्म्मणो विदुः"।

इति। तदेतस्मिन् अविदासिनि ह्रदे, नाभिमात्रं नाभिपरिमितम् उदकम् अवगाह्य अवतीर्य्य, अक्षततण्डुलान्—अक्षता यवाश्च तण्डुलाश्च तान्—यवमिश्रान् व्रीहितण्डुलान्,—इति केचित्। अक्षतानां यवानां तण्डुलान्,—इत्यन्ये। अपरे पुनर् अक्षतशब्देन तण्डुलानेव विशेषयन्ति;—अक्षतानखण्डितान् तण्डुलान्,—इति। तदत्र भवन्तो भूमिदेवाः प्रमाणम्। तानिमानक्षततण्डुलान् ऋगन्तेषु प्रकृतानां पञ्चानामृचामवसानेषु आस्येन मुखेन जुहुयात् स्वाहेत्युच्चार्य्य। कुत्र जुहुयात्?। उदके जले। अनग्निकत्वादस्मिन् होमे स्वाहाकारविलोपं कश्चिदाशङ्कीत मन्दमतिरिति खल्वाचार्य्यः स्वाहेति सूत्रयाञ्चकार।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मात्, स्वाहाकारावसान एव होमोऽयं स्यात्। ऋगन्तेषु,—इति तर्हि किमर्थम्?। प्रत्येकं ऋगवसानेषु होमप्रज्ञापनार्थमित्याह। अन्यथा खल्वेकैवाऽऽहुतिः पञ्चर्च्चेन स्यादित्यपि कश्चिदाशङ्कीत। अत्र च, अनग्निकत्वात् यावदुक्तमेव कर्त्तव्यमिति द्रष्टव्यम्॥०॥ २८ ॥०॥

अथापरम् ॥ २९ ॥

अथशब्दः पूर्व्वोक्तत्रिरात्राभोजनाद्यानन्तर्य्यार्थः। पूर्व्वप्रकृतपञ्चर्च्चानुसन्धानार्थः वा। अथ एतस्मिन्नेव पञ्चर्च्चे अपरं अन्यत् कर्म्म, वर्त्तिष्यते,—इति सूत्रशेषः ॥०॥ २९ ॥०॥

तदपरं कर्म्म अभिधीयते, आ काण्डिकापरिसमाप्तेः,—

प्रथमयाऽऽदित्यमुपतिष्ठेत भोगकामोऽर्थपतिचक्षुर्व्विषये सिद्ध्यत्यर्थः ॥ ३० ॥

प्रकृतस्य पञ्चर्चस्य प्रथमया ऋचा,—वृक्ष इव पक्वस्तिष्ठति,—इत्यादिकयेत्येतत्। आदित्यमुपतिष्ठेत आराधयेत्। उपस्थानञ्चेदम्,—

"तदसंसक्तपार्ष्णिर्व्वा एकपादर्द्धपादपि।
कुर्य्यात् कृताञ्जलिर्व्वापि ऊर्द्ध्वबाहुरथापि वा"।

इति कर्म्मप्रदीपोक्तप्रकारेण करणीयम्। कः उपतिष्ठेत?। 'भोगकामः'। भोगं कामयते,—इति भोगकामः। कस्मिन् प्रदेशे उपतिष्ठेत?। अर्थपतिचक्षुर्व्विषये। यस्मादर्थपतेः सकाशात् भोगं कामयते, तस्यार्थपतेः चक्षुर्व्विषये चक्षुर्गोचरे प्रदेशे। एवं कृते खल्वस्य, 'सिद्ध्यति' 'अर्थः' प्रयोजनम्॥०॥ ३० ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वितीययाऽऽदित्ये परिविष्यमाणेऽक्षततण्डुलान् जुहुयात् वृहत्पत्रस्वस्त्ययनकामः ॥ ३१ ॥

पद्दं त्रायते,—इति पत्रं वाहनमाचक्ष्महे । वृहत्शब्दो महद्वचनः । वृहत् च तत् पत्रञ्चेति वृहत्पत्रं हस्त्यश्वादिकमुच्यते । तेषां स्वस्त्ययनमारोग्यं कामयते,—इति वृहत्पत्रस्वस्त्ययनकामः;—प्रकृतस्य पञ्चर्चस्य द्वितीयया ऋचा,—ऋतं सत्ये प्रतिष्ठितम्,—इत्येवमादिकयेत्येतत् । आदित्ये सवितरि परिविष्यमाणे, अक्षततण्डुलान् जुहुयात्, —इत्युक्तार्थम् । परिवेषः परिधिरित्यनर्थान्तरम् । यत्र खल्वादित्यस्य किरणाः वातेन मण्डलीभूताः तस्य परितो नानाभाः लक्ष्यन्ते, सोऽयमादित्यस्य परिवेषः,—इत्याचक्षते । तथा चोक्तम् ।

"वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः ।
नानाभा व्याहितन्वन्तः परिवेषाः प्रकीर्त्तिताः" ।

इति । तदिदमुपरिष्टाद्दैवम् । चिप्रहोममन्वेच्छन्ति ॥०॥ ३१ ॥०॥

तृतीयया चन्द्रमसि तिलतण्डुलान् क्षुद्रपशुस्वस्त्ययनकामः ॥ ३२ ॥

प्रकृतस्य पञ्चर्चस्य तृतीयया ऋचा,—अभिभागोऽसि,—इत्यादिकयेत्येतत् । चन्द्रमसि परिविष्यमाणे तिलतण्डुलान् जुहुयादित्यनुवर्त्तते । तिलतण्डुलान्,—इति, अक्षततण्डुलान्,—इतिवद्व्याख्येयम् । को जुहुयात् ? । क्षुद्रपशुस्वस्त्ययनकामः । क्षुद्रपशुशब्देनाजाविकाद्युच्यते । सर्व्वमन्यत् पूर्व्ववत् ॥०॥ ३२ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुर्थ्याऽऽदित्यमुपस्थायार्थान् प्रतिपद्येत स्वस्त्यर्थवा-नागच्छति ॥ ३३ ॥

प्रकृतस्य पञ्चर्चस्य चतुर्थ्या ऋचा,—कोश इव पूर्णो वसुना,—इत्यादिकयेत्येतत्। पूर्व्ववत् आदित्यमुपस्थाय, अर्थान् प्रति लक्षीकृत्य, तान् साधयितुमिति यावत्। पद्येत गच्छेत्। अर्थान् प्रपद्येत,—इति पाठेऽपि, अर्थान् साधयितुमिति पूर्व्वोक्त एवार्थः।

एवं गच्छन् खल्वयं गन्ता, स्वस्त्यर्थवानागच्छति। यमर्थमभिसन्धाय गच्छति, तद्वान् स्वस्तिमांश्चागच्छति गृहम् ॥०॥ ३३ ॥०॥

पञ्चम्याऽऽदित्यमुपस्थाय गृहान् प्रपद्येत, स्वस्ति गृहानागच्छति स्वस्ति गृहानागच्छति ॥ ३४ ॥

प्रकृतस्य पञ्चर्चस्य पञ्चम्या ऋचा,—आकाशस्यैष आकाशः,—इत्यादिकयेत्येतत्। तदनया ऋचा पूर्व्ववदादित्यमुपस्थाय गृहान् प्रति लक्षीकृत्य प्रपद्येत गच्छेत्,—प्रवासस्थः,—इति वाक्यशेषः। अथवा। गृहान् परित्यज्य प्रपद्येत गच्छेत् प्रवसेदित्यर्थः। गृहात् प्रपद्येत,—इति पाठे, गृहात् सकाशात् प्रपद्येत,—इति स एवार्थः। एवं प्रपद्यमानः खल्वयं स्वस्ति मङ्गलं यथा भवति तथा गृहानागच्छति। द्विर्व्वचनं पञ्चर्चाधिकारसमाप्तिप्रज्ञापनार्थम् ॥०॥ ४४ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य पञ्चमी काण्डिका ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठकस्य षष्ठी काण्डिका ।

भूरित्यनकाममारं नित्यं प्रयुञ्जीत ॥ १ ॥

भूरित्ययं मन्त्रप्रतीकः । भूरित्यादिकमनकाममारं मन्त्रं नित्यमहरहः प्रयुञ्जीत । अनकाममारशब्देन, "भूर्भुवः स्वरोऽ॒ सूर्य्य इव दृशे"—इत्यादिको मन्त्रो भण्यते । कुतः ? । योगात् प्रसिद्धेश्च । योगस्तावत् । मरणं मारः, काम इच्छा । कामेन मारो यस्मात् सोऽयं काममारः, स न भवतीत्यकाममारः । न अकाममारोऽनकाममारः । इच्छयैव मरणं यस्मादित्यर्थः । प्रसिद्धिश्चाध्येतृसम्प्रदायागता बोद्धव्या ॥०॥ १ ॥०॥

न केवलमिच्छयैव मरणमस्मान्मन्त्रात् सम्पद्यते, अपि तु यः खल्वेतं मन्त्रमहरहः प्रयुङ्क्ते, तस्य,—

न पापरोगान्नाभिचाराद्भयम् ॥ २ ॥

पापरोगः कुष्ठराजयक्ष्मादिः । अभिचारः श्येनसन्दंशादिः । तस्मात् भयं न भवति ॥०॥ २ ॥०॥

अलक्ष्मीनिर्णोदः ॥ ३ ॥

अलक्ष्मीः प्रसिद्धा । तस्या निर्णोदो निर्हारो नाशकः,—इत्येतत् । कः पुनरसौ ? । वक्ष्यमाणो होमः ॥०॥ ३ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स खल्वयमलक्ष्मीनिर्णोदो होमः,—

यजनीयप्रयोगः। ४॥

यजनीयेऽहनि प्रयोगोऽनुष्ठानं यस्य,—सोऽयं यजनीयप्रयोगः। पक्षादि-यज्ञदिने कर्त्तव्यः,—इत्यर्थः। यद्यपि, यजनीयप्रयोगोऽयं, तथापि तदीयचरुणा न करणीयः, किन्तु द्रव्यानादेशादाज्येनैव स्यात्।

एवं वा—

यजनीयस्य प्रयोगोऽनुष्ठानं यस्य सोऽयं यजनीयप्रयोगः। न खल्वस्य यजनीयप्रयोगत्वं विज्ञातं येनायमनुवादः स्यात्, किन्तु अविज्ञातं विधीयते। तेन, यजनीयवत् प्रयोगः,—इत्यर्थः, सिद्धो भवति। तस्मात् धर्म्मप्रदेशोऽयम्। "उपोष्य तु यजनीयप्रयोगेषु"—इति सूचित उपवासोऽत्र प्रदिश्यते। कथं पुनरसति वतिप्रत्यये वत्यर्थः शक्योऽवगन्तुम्?। शक्यः,—इत्याह। कथम्?। यजनीय-शब्दोऽयं कर्म्मणा सम्बन्धः तत् सहचरितं उपवासधर्म्मं शक्नोति लक्षणया गमयितुम्। शक्नोति चेद्गमयितुं, प्रदेष्टुमपि शक्नोति। एवं खल्वन्तरेणापि वतिप्रत्ययं वत्यर्थः शक्योऽवगन्तुम्। स खल्वय मर्थः सप्तमाध्याये प्रपञ्चितः, तत्रैवानुसन्धेयः॥०॥४॥०॥

अथेदानीमलक्ष्मीनिर्णोदो होमोऽभिधीयते,—

मूर्द्धाधिम इत्येकैकया॥ ५॥

मूर्द्धोधिमे,—इत्यादिकोऽष्टर्चोऽत्राभिप्रेतो बोद्धव्यः। तासां खल्व-ष्टानामृचामेकैकया ऋचा एकैका आहुति र्होतव्या। अलक्ष्मी-

i I

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्णादः,—इत्येकवचनात् सर्व्वाभिरेकैवाहुतिः स्यादित्यपि कदाचिदाशङ्का स्यात् कस्यचिन्मन्दमतेः, अतस्तन्निरासार्थमाचार्य्य एकैकयेत्याह ॥०॥ ५॥०॥

किं मन्त्राणां पाठक्रमेणैव अष्टावाहुतयो होतव्याः ? । न । कथन्तर्हि ? ।

या तिरश्चीति सप्तमी ॥ ६ ॥

या तिरश्चीत्यनया ऋचा सप्तमी आहुतिर्होतव्या । सेयमृक् प्रदेशान्तरपठितेति द्रष्टव्यम् । तदेवमष्टर्चस्य षड्भिर्ऋग्भिः पाठक्रमात् षड़ाहुतीर्हुत्वा, या तिरश्चीत्यनया ऋचा प्रदेशान्तरपरिपठितया सप्तम्याहुतिर्होतव्या । स्थिता तावदविनियुक्तैवाष्टर्चस्य सप्तमी ऋगष्टमी च ॥०॥६॥०॥

तदनन्तरम्,—

वामदेव्यर्च्चः ॥ ७ ॥

वामदेवो नाम ऋषिः, तदीया ऋचः वामदेव्यर्च्चः । अथ वा । वामदेव्यं नाम साम, तत् यासु ऋक्षु गीयते ता वामदेव्यर्च्चः । 'कयानश्चित्र आभुवत्'—इति त्र्यृचो भण्यते । तासामप्येककयैव ऋचा होमः स्यात्, न तु त्र्यृचेनैव । कुतः ? । एकैकया,—इत्यनुवर्त्तनात् । तदिदमुपरिष्टात् स्पष्टीकरिष्यामः ॥०॥७॥०॥

एतदनन्तरञ्च,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महाव्याहृतयश्च ॥ ८ ॥

महाव्याहृतयो भूराद्यास्तिस्रः। तासामप्येकैकया एकैका आहुति-र्होतव्या ॥०॥८॥०॥

प्रजापत इत्युत्तमा ॥ ९ ॥

प्रजापते न त्वदित्यष्टर्चस्याष्टम्या ऋचा उत्तमा अन्त्या आहुतिर्होतव्या। तदेवमष्टर्चस्याष्टम्या ऋचो विनियोगः सूचितः। आह। अथ, उत्तमा,—इत्येतदवाच्यं पाठक्रमादेवैतस्या उत्तमत्वसिद्धेः, अथोच्यते,—कारणं वक्तव्यम्?। उच्यते। अस्या उत्तमत्ववचनादुपोत्तमापि काचिदाहुति-र्विज्ञायते। का पुनरुपोत्तमा नामाहुतिरभिप्रेता?। शृणु। येयमष्ट-र्चस्य सप्तमी ऋक्—अपेहि त्वम्,—इत्यादिका साम्प्रतमप्यविनियुक्तैव स्थिता, सेयमुपोत्तमा इत्यवगच्छामः। कस्मात् कारणात्?। तस्या विनियोगान्तरानवगतेः, उपस्थितत्वाच्च। तदेवमष्टर्चस्य क्रमपरिपठिताः 'परिबाधं यजामहे'—इत्येवमन्ताः षट् ऋचः, प्रदेशान्तरपठिता या तिरश्चीत्येका, वामदेव्यर्चस्तिस्रः, महाव्याहृतयस्तिस्रः। एव-न्तावत् त्रयोदशाहुतयो भवन्ति। अपेहि त्वमिति चतुर्दशी। प्रजापते न त्वदिति पञ्चदशी बोद्धव्या। तथा चोक्तम्।

"विहारो वामदेव्यर्चां व्याहृतीनां तथैव च।
अलक्ष्मीनाशके होमे स्यादपेहि चतुर्दशी" ॥

इति ॥०॥९॥०॥

पर्य्यवसितोऽलक्ष्मीनिर्णोदः। अथेदानीं कर्म्मान्तरं वक्तुमारभते,—

4 T 2

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यशोऽहं भवामीति यशस्काम आदित्यमुपतिष्ठेत पूर्व्वाह्णमध्यन्दिनापराह्णेषु ॥ १० ॥

यशोऽहं भवामीति पञ्चर्चोऽत्राभिप्रेतः। तेनादित्यमुपतिष्ठेत। कः?। यशस्कामः। यशः कामयते यः, सोऽयं यशस्कामः। कस्मिन् काले?। पूर्व्वाह्णमध्यन्दिनापराह्णेषु। तिसृष्वपि सन्ध्यासु,—इत्यर्थः। कुतः?। परतः सन्धिवेलयोः पूर्व्वाह्णापराह्णपदप्रयोगदर्शनात्। एवञ्च, नित्योपस्थानादनन्तरमेतदुपस्थानं स्यात्। यथाश्रुतार्थ एव सम्यक् इति केचित् ॥०॥१०॥०॥

किं यथापठितेनैव पञ्चर्चेन?। न। कथन्तर्हि?

प्रातरह्णस्येति सन्नामयन् ॥ ११ ॥

प्रातरह्णस्य,—इति मन्त्रभागं संनामयन्, सम्यक्—यथालिङ्गं, नामयन् परिणमयन्—ऊहं कुर्व्वन्नित्यर्थः। एतदुक्तं भवति। प्रातरह्णस्य तेजसः,—इत्येतस्मिन् मन्त्रस्थाने,—मध्यन्दिनस्य तेजसः,—इति मध्यन्दिने, अपराह्णस्य तेजसः,—इत्यपराह्णे, ऊहं कुर्य्यादिति ॥ ॥०॥११॥०॥

कर्म्मान्तरमाह,—

सन्धिवेलयोरुपस्थानं स्वस्त्ययनमादित्यनावमित्युद्यन्तं त्वाऽऽदित्यानूद्यासमिति पूर्व्वाह्णे, प्रतितिष्ठन्तं त्वाऽऽदित्यानुप्रतिष्ठासमित्यपराह्णे ॥ १२ ॥

सन्धिवेलयोः प्रातः सायमित्येतत्। उपस्थानं कर्त्तव्यमिति सूत्रशेषः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केन ?। आदित्यनावमित्यनया अनुष्टुभा यजुर्द्वयसहितया। कस्य उपस्थानम् ?। आदित्यस्य। कथं ज्ञायते ?। अधिकारात्। मन्त्रलिङ्गाच्च। किमर्थं पुनरिदमुपस्थानम् ?। स्वस्त्ययनम्। स्वस्ति मङ्गलं अयति गच्छति प्राप्नोत्यनेनेति स्वस्त्ययनम्—मङ्गलफलक-मित्यर्थः। किं द्वयोरपि सन्ध्ययोरविशेषेण यजुर्द्वयस्याभिनिवेशः ?। न। किन्तर्हि ?। उद्यन्तं त्वा,—इत्येतद्यजुः पूर्वाह्णे विनियोक्त-व्यम्। प्रतितिष्ठन्तं त्वा,—इत्येतद्यजुरपराह्णे प्रयोक्तव्यम्। तथा च, लिङ्गवशादनयोर्विनियोगः,—इत्यभिप्रायः ॥०॥१२॥०॥

कर्म्मान्तरमाह,—

आचितशतकामोऽर्द्धमासव्रतस्तामिश्रादौ व्रीहि-कांस्यौदनं ब्राह्मणान् भोजयित्वा ॥ १३ ॥

आचितशब्देन शकटो भण्यते। कुतः ?। "आचितं शकटं प्राहुः"—इति वचनात्। शतशब्दो बहुत्ववचनः, शतवचनो वा। आचितानां शतं कामयते,—इत्याचितशतकामः। यद्यप्याचितशब्देन शकटो भण्यते, तथाप्यत्र शाकटो भारः ;—तावत् परिमितं सुवर्णमिहाभि-प्रेतमित्यवगच्छामः। कस्मात् ?। शकटमात्रस्यानतिप्रयोजनत्वात्। तावति सुवर्णेऽप्याचितशब्दस्य सङ्केतितत्वाच्च। तथा चोक्तम्।

"सुवर्णविस्तो हेम्नोऽक्षे कुरुविस्तस्तु तत्पले।
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला।
आचितो दश भाराः स्युः शाकटो भार आचितः"।

इति। अपर आह। "आचितशब्देनात्र बहुपशुधनधान्यमात्मनः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रार्थ्यते । तथा हि चरितार्थत्वादाचितानाम्”—इति । स खल्वय-माचितशतकामोऽर्द्धमासव्रतः सन्,—पूर्व्वोक्तेन विधिना अर्द्धमासं व्रतं कृत्वा,—इत्येतत् । तमिस्र एव तामिस्रः । तामिस्रस्य कृष्ण-पक्षस्य, आदौ प्रतिपदीत्यर्थः । 'व्रीहिकांसौदनं ब्राह्मणान् भोज-यित्वा' । व्रीहयः प्रसिद्धाः । कांसशब्देन द्रोणपरिमाणं भण्यते । कस्मात् ? । "द्रोणः स्यात् कांसमानकः"—इति वचनात् । व्रीहीणां कांसं व्रीहिकांसं, व्रीहिकांसस्य ओदनो भक्तः व्रीहिकांसौदनः, तं व्रीहिकांसौदनं ब्राह्मणान् भोजयित्वा । आह । व्रीहिकांसस्य, व्रीहिकांसयोः, व्रीहिकांसानाम्,—इति त्रेधैव विग्रहस्य सम्भवा-देकत्वेन विग्रहे कारणं वक्तव्यम् ? । उच्यते । प्रथमोपस्थित-त्वादेकवचनसंयोगाच्च एकत्वेनैव विग्रहमाचक्ष्महे । व्रीहिकांसौदन-मित्येकवचने श्रूयमाणे खल्वेकत्वमागच्छति हृदयम्, आगच्छति चेत्, —न युज्यते विनाकारणमुत्स्रष्टुम् । उत्तरत्रापि, 'तस्य',—इत्येक-वचनसंयोगेन व्रीहिकांसस्य परामर्शाच्चैवमवगच्छामः । अपि च । द्वित्वबहुत्वाभ्यां विग्रहे ब्राह्मणबहुत्वं स्यात् । तच्चानिष्टम् । कस्मात् कारणात् ? । श्राद्धे तस्य दोषदर्शनात् । कारणस्य चाविशेषात् । तथा च मनुः ।

"सत्क्रियां देशकालौ च द्रव्यं ब्राह्मणसम्पदः ।
पञ्चैतान् विस्तरो हन्ति तस्मान्नेहेत विस्तरम्" ॥

इति । तस्मात्, सत्क्रियाद्यनुरोधादत्राप्येकत्वेनैव विग्रहः,—इत्या-दरणीयम् ॥०॥१३॥०॥

तदेवं ब्राह्मणान् भोजयित्वा,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य कणानपरासु सन्धिवेलासु प्रत्यग् ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधायादित्यमभिमुखो जुहुयाद्—भलाय स्वाहा भल्लाय स्वाहेति ॥ १४ ॥

तस्य प्रकृतस्य व्रीहिकांसस्य, कणान्,—

"कुक्कुकाश्च कणास्तेत्र फलीकरणककुशाः" ।

इत्युक्तलक्षणान्। जुहुयात्,—इति सम्बन्धः। ते खल्विमे कणाः तुषाः,—इत्याचक्षते। अपरासु सन्धिवेलासु अस्तमयसन्ध्यासु,—इत्यर्थः। बहुवचनात् तामिस्रपक्षमभिव्याप्य सर्व्वास्वेवास्तमयसन्ध्यासु अयं होमः स्यात्, न पुनः प्रतिपद्येव,—इति द्रष्टव्यम्। प्रत्यक् पश्चिमायां दिशि, चतुष्पथे,—इति सम्बन्धः। ग्रामात् निवासभूतात् निष्क्रम्य निर्गत्य गत्वा वा। चतुष्पथः प्रसिद्धः। तस्मिन् अग्निं उपसमाधाय यथोक्तेन विधिना, आदित्यमभिमुखः,—आभिमुख्येनादित्यमुखः, प्रत्यङ्मुखः,—इत्येतत्। "भलाय स्वाहा" "भल्लाय स्वाहा"—इत्येताभ्यां यजुर्भ्यां पृथक् जुहुयात्। 'अग्निमुपसमाधाय,—इति वचनात् क्षिप्रहोमोऽयम्। कथं नाम?। अग्निमुपसमाधायैव जुहुयात्, न सर्व्वामप्यावृतं कृत्वा,—इति ॥०॥१४॥०॥

एतयैवावृताऽपरौ तामिस्रौ ॥ १५ ॥

एतयैवानन्तरयैवावृता रीत्या अपरावपि तामिस्रौ कृष्णपक्षावभिव्याप्य अपरासु सन्धिवेलासु जुहुयात्। इदमिदानीं सन्दिह्यते। एतया,—इति किं ब्राह्मणभोजनादेः परामर्शः, आहोस्विदर्द्धमासव्रतादेः?,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

—इति । ब्राह्मणभोजनादेः,—इत्याह । कस्मात् ? । आवृता,—इति करणात् । न खल्वर्द्धमासव्रतमावृत् । कर्तृधर्मः खल्वेतत् । कथं ज्ञायते ? । "आचितशतकामोऽर्द्धमासव्रतः"—इति कर्तृविशेषणतयोपन्यासात् । तस्मादर्द्धमासव्रतस्य न परामर्शः । अपि च । तस्यैव कर्म्मण आवृत्तिरिहोपदिश्यते । अभ्यस्ते च कर्म्मणि सकृदेव व्रतमन्यत्रोपदिष्टम्,—"नित्यप्रयुक्तानान्तु प्रथमप्रयोगेषु"—इत्यत्र । तद्वदिहापि वर्णयितुमुचितम् । अपर आह । तामिस्रान्तरेषु ब्रह्मचारी स्यात्,—इति व्रतान्तरोपदेशान्नार्द्धमासव्रतस्य परामर्शः । इतरथा अर्द्धमासव्रतादेव ब्रह्मचर्य्यस्य प्राप्तत्वात् तद्वाच्यं स्यात्,—इति । तदपि न समीचीनम् । कुतः ? । अर्द्धमासव्रते ब्रह्मचर्य्यस्य पूर्व्वमाचार्य्येणानुपदेशात् । प्रथमतामिस्रे तर्हि न प्राप्नोति ब्रह्मचर्य्यम् ? । मा प्रापत्, का नो हानिः । अर्द्धमासव्रतस्य पुरश्चरणरूपतया तत्रापि न तावतैव प्रथमतामिस्रे ब्रह्मचर्य्यस्य प्राप्तिः । यथा तु प्रथमेऽपि तामिस्रे प्राप्नोति ब्रह्मचर्य्यं, तथा परतो वर्णयिष्यामः ॥०॥१५॥०॥

तामिस्रान्तरेषु ब्रह्मचारी स्यादासमापनादासमापनात् ॥ १६ ॥

अन्तरशब्दो मध्यवचनः । तामिस्रपक्षयोरन्तरे मध्ये यान्यहानि, तानि तामिस्रान्तराणि । पूर्व्वापरयोस्तामिस्रयोर्निर्देशात् तन्मध्यपतितानि शुक्लपक्षदिनान्यपि सन्दंशपतितन्यायेन गृह्यन्ते । तेषु अहःसु ब्रह्मचारी मैथुनवर्ज्जी, स्यात् भवेत् । आसमापनात् कर्म्मसमापनपर्य्यन्तम् । कर्म्मसमापनदिनस्य तामिस्रान्तरत्वेऽपि कर्म्मसमापनात् परतो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न तत्र ब्रह्मचर्य्यनियमः,—इत्येतदर्थम्;—'आसमापनात्'—इत्याह। यद्यपि, पर्व्वत्वेन तत्रापि मैथुननिषेधोऽस्त्येव, तथापि निमित्तान्तर-प्रयुक्तस्य तस्य कर्म्माङ्गत्वं नास्ति,—इत्यभिप्रायः।

एवं वा,—

तामिस्राणामन्तरे मध्ये यान्यहानि, तानि तामिस्रान्तराणि, तेषु तामिस्रान्तरेषु अहःसु ब्रह्मचारी स्यात्। बहुवचनात् प्रथमेऽपि तामिस्रे ब्रह्मचर्य्यं प्राप्नोति। तामिस्रान्तरेषु कर्म्मोपदेशादवान्तरेष्वहःसु ब्रह्मचर्य्यं न स्यात्,—इत्याशङ्कायामाह;—आसमापनात्,—इति। कर्म्मसमापनपर्य्यन्तमित्यर्थः। द्विर्व्वचनं प्रकरणकाण्डिकयोः समाप्त्यर्थमादरार्थञ्च॥०॥१६॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य षष्ठी काण्डिका॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठकस्य सप्तमी काण्डिका ।

अथेदानीं प्रकरणान्तरमारभते,—

अवसानं जोषयेत* ॥ १ ॥

अवस्यन्ति निवसन्त्यस्मिन्,—इत्यवसानं गृहार्थं भूस्थानमिहाभिप्रेतम्, न गृहमेव । कथं ज्ञायते ? । 'समं लोमशम्'—इत्यादि विशेषणानां सामर्थ्यात् । 'तत्रावसानं प्राग्द्वारम्'—इत्यादिसूत्रेणोपपत्तेश्च । तदिदमवसानं जोषयेत,—'जुषी प्रीतिसेवनयोः'—इति स्मरणात् सेवेत, परिगृह्णीयादित्येतत् ॥०॥ १ ॥०॥

अवसानमिदानीं विशिनष्टि,—त्रयोदशभिः सूत्रैः,—

समं लोमशमविभ्रंशि ॥ २ ॥

समं समानम्,—अनिम्नोच्चमित्यर्थः । लोमशम् । लोमानीव कोमलानि तृणानि यत्र विद्यन्ते, तदिदं लोमशमित्युच्यते । अथ वा । 'तृणानि भूमेर्लोमानि'—इति वचनात् यथाश्रुत एवार्थः । अविभ्रंशि । यत्र कृतस्य वेश्मनो नदीतीरभेदवृक्षपातमतङ्गजादिभिर्विभ्रंशो विनाशो न सम्भाव्यते, तदिदमविभ्रंशि । 'अवसानं जोषयेत',—इति सर्व्वत्र सम्बध्यते ॥०॥ २ ॥०॥

---

*जोषयेत्,—इति पाठान्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राच्य उदीच्यो वा यत्रापः प्रवर्त्तेरन् ॥ ३ ॥

प्राच्यः प्राङ्मुख्यः। उदीच्यः उदङ्मुख्यः। वाशब्दो विकल्पार्थः। यत्र यस्मिन् स्थाने, आपः प्रवर्त्तेरन्,—प्रकर्षेण स्वभावतो वर्त्तेरन् न तु क्रियेरन्। प्रवर्त्तेरन् स्वभावतो गच्छेयुः, न तु प्रयत्नान्तरेण,—इति वा वर्णनीयम्। 'अवसानं जोषयेत'—इत्यनेन सम्बध्यते। यच्छब्दो-ऽयमुत्तरवाक्यगतः सामर्थ्यात् पूर्व्ववाक्यगतं तच्छब्दं नापेक्षते। एव-मुत्तरत्रापि द्रष्टव्यम् ॥०॥ ३ ॥०॥

अक्षीरिण्योऽकण्टका अकटुका यत्रौषधयः स्युः ॥ ॥ ४ ॥

क्षीरमिव क्षीरं शुभ्रो निर्यासो भण्यते। क्षीरं विद्यते यासां ताः क्षीरिण्यः, ता न भवन्तीत्यक्षीरिण्यः,—अर्कादिभ्यो भिन्नाः,—इत्येतत्। अकण्टकाः, कण्टकरहिताः,—मदनादिभ्योऽन्याः। अकटुकाः। कटुकाः कटुगुणयुक्ताः, ता न भवन्तीत्यकटुकाः निम्बादिभ्यो भिन्नाः। कटुस्तिक्तम्। तदेवम्भूता ओषधयो यत्र यस्मिन् स्थाने, स्युः स्वभा-वतो भवेयुः ॥०॥ ४ ॥०॥

गौरपांशु ब्राह्मणस्य ॥ ५ ॥

गौराः शुक्लवर्णाः पांशवो रेणवो यस्मिन्, तत् गौरपांशु ब्राह्मणस्य, अवसानम्,—इति सम्बध्यते ॥०॥ ५ ॥०॥

लोहितपांशु क्षत्रियस्य ॥ ६ ॥

अवसानम् ॥०॥ ६ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृष्णपांशु वैश्यस्य ॥ ७ ॥

अवसानम्,—इत्येव ॥०॥ ७ ॥०॥

त्रैवर्णिकानां विशेषमभिधाय, अथेदानीं सामान्येनावसानं विशिनष्टि,—

स्थिराघातमेकवर्णमशुष्कमनुषरममरुपरिहितमक्लिनम् ॥ ८ ॥

योद्धृभिरभिहन्यमानं यन्न विदीर्य्यते, तत् स्थिराघातम्। एकवर्णमभिन्नवर्णम्। यत्रोत्पद्यमाना ओषधयो न शुष्यन्ति, तदशुष्कम्। यत्रोप्तं वीजं न प्ररोहति, तदुषरमिरिणमित्यनर्थान्तरम्। तन्न भवतीत्यनुषरम्। यत्र दूरं खनद्भिरल्पमेवोदकमुपलभ्यते, तन्मरुरित्युच्यते। तथा चोक्तम्।

"द्वीपमुन्नतमाख्यातं शादा चैवेष्टका स्मृता।
क्लिनं सजलं प्रोक्तं दूरखातोदको मरुः"।

इति। मरुभूम्या सर्व्वतो वेष्टितं यत् स्थानं तन्मरुपरिहितम्। तत् न भवतीत्यमरुपरिहितम्। क्लिनं, सजलं स्थानम्। तत् न भवतीत्यक्लिनम् ॥०॥ ८ ॥०॥

पुनरपि विशेषेणावसानं विशिनष्टि,—त्रिभिः सूत्रैः,—

दर्भसम्मितं ब्रह्मवर्च्चसकामस्य ॥ ९ ॥

ब्रह्मवर्च्चसं व्याख्यातम्। तत्कामस्य, दर्भसम्मितम्—दर्भैः कुशैः सम्यक् मीयते ज्ञायते परिच्छिद्यते वा यत्, तथाविधं,—दर्भयुक्त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मित्येतत्। तथा च गृह्यान्तरम्। "यस्मिन् कुशवीरणप्रभूतम्"—इति। वास्तुविद्याविद्भिरप्यभिहितम्।

"कुशयुक्ता शरवकुला
दूर्व्वाकाशावृता क्रमेण मही"।

इति। केचित् पुनरेतदविद्वांसो भाषन्ते,—'दर्भसम्मितं कुशनिर्म्मितम्'—इति ॥०॥ ९ ॥०॥

वृहत्तृणैर्बलकामस्य ॥ १० ॥

वृहत्तृणैर्वीरणशरादिभिः सम्मितं युक्तम् ॥०॥ १० ॥०॥

मृदुतृणैः पशुकामस्य ॥ ११ ॥

मृदुतृणैर्दूर्व्वादिभिः। सम्मितमिति वर्त्तते। सेयं त्रिसूत्री, यथाक्रमं ब्राह्मणक्षत्रियवैश्यानामवसानस्य विशेषणार्था। कथं ज्ञायते?। तथैव ब्रह्मवर्च्चस-बल-पशुकामनानामाञ्जस्येनोपपत्तेः। तथा चोक्तम्।

"कुशयुक्ता शरवकुला
दूर्व्वाकाशावृता क्रमेण मही।
अनुवर्णं वृद्धिकरी
मधुरकषायाम्लकटुका च"।

इति ॥०॥ ११ ॥०॥

शादा सम्मितम् ॥ १२ ॥

शादा,—इति, इष्टकामाहुः। कस्मात्?। "शादा दैवेष्टका स्मृता"—इति वचनात्। तथा सम्मितं तुल्यं—चतुरस्रमित्यर्थः। अत्र, सम्मि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तम्,—इति क्रियते, पूर्व्वस्मात् सम्मितशब्दादेतस्य सम्मितशब्दस्यार्थभेदप्रज्ञापनार्थम् ॥०॥ १२ ॥०॥

मण्डलद्वीपसम्मितं वा ॥ १३ ॥

मण्डलं वर्त्तुलम्। द्वीपशब्देनोन्नतमुच्यते। कुतः?। "द्वीपमुन्नतमाख्यातम्"—इति वचनात्। मण्डलञ्च तत् द्वीपञ्चेति मण्डलद्वीपं तत्सम्मितं तदाकारम्। वाशब्दो विकल्पार्थः। सम्मितशब्दः पूर्व्ववत्॥ ॥०॥ १३ ॥०॥

यत्र वा श्वभ्राः स्वयं खाताः सर्व्वतोऽभिमुखाः स्युः ॥ १४ ॥

यत्र यस्मिन् स्थाने वा, श्वभ्रा अवटाः, स्वयं खाताः—न तु कृत्रिमाः, सर्व्वतः सर्व्वासु दिक्षु विदिक्षु च, अभिमुखा इतरेतराभिमुखाः, स्युः स्वभावतो भवेयुः। एतदनेनोक्तं भवति। सर्व्वत उच्छ्रितं मध्यतश्च किञ्चिन्निम्नम्,—इति। यत्र किल दिशां विदिशाञ्च विचारणा नाभिप्रेयते, तत्र 'सर्व्वतः'—इति करोत्याचार्य्यः। तथाच गृह्यासंग्रहः।

"दिशाञ्च विदिशाञ्चैव यत्र नोक्ता विचारणा।
सर्व्वतस्तत्र शब्दोऽयं विधियोगे निपात्यते"।

इति।

एवं वा,—

सर्व्वतोऽभिमुखाः,—आभिमुख्येन सर्व्वदिग्विदिङ्मुखाः। एतदनेनोक्तं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवति। मध्यतः किञ्चिदुच्चम्, अभितश्च सखातम्। तथैवावटानां सर्व्वतोऽभिमुखत्वसम्भवात्। इयमपि त्रिसूत्री यथाक्रमं ब्राह्मणक्षत्रिय-वैश्यानामवसानस्य विशेषणार्था,—इति केचित्। सामान्येनावसानस्य विशेषणार्था,—इत्यपरे ॥०॥ १४ ॥०॥

तत्रावसानं प्राग्द्वारं यशस्कामो बलकामः कुर्व्वीत॥ ॥ १५ ॥

तत्र तस्मिन् स्थाने। अवस्यन्त्यस्मिन्,—इत्यवसानं गृहं प्राग्द्वारं कुर्व्वीत। कः?। यशस्कामो बलकामः। यशस्कामो वा, बलकामो वा,—इत्यर्थः। तदत्र, "खादिरे बध्नाति, पालाशे बध्नाति, रौहितके बध्नाति",—इतिवद्विकल्पो बोद्धव्यः। कस्मात्?। कामशब्दाभ्यासात्। यदि पुनरुभयकामोऽभिप्रेतः स्यात्, तर्हि यशोबलकामः,—इति कुर्य्यात्, अलं कामशब्दाभ्यासेन। तस्मात्, कामशब्दाभ्यासादव-गच्छामः,—विकल्पोऽयम्,—इति ॥०॥ १५ ॥०॥

उदग्द्वारं पुत्रपशुकामः ॥ १६ ॥

तत्रावसानं कुर्व्वीत,—इत्यनुवर्त्तते ॥०॥१६॥०॥

दक्षिणाद्वारꣳ सर्व्वकामः ॥ १७ ॥

दक्षिणाद्वारं दक्षिणा नाम दिक्, तत् द्वारम्,—अवसानं कुर्व्वीत,—इत्यनुवर्त्तत एव। सर्व्वकामः,—इति, यत् किञ्चित् यशोबलादिकं कामयते, तत् सर्व्वमेतस्माद्भवतीत्यर्थः ॥०॥ १७ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न प्रत्यग्द्वारं कुर्व्वीत ॥ १८ ॥

पश्चिमद्वारमवसानं न कुर्व्वीत ॥०॥ १८ ॥०॥

अनुद्वारञ्च ॥ १९ ॥

अनुपश्चात् द्वारं यस्य, तदनुद्वारमवसानं न कुर्व्वीत। चकारो न कुर्व्वीतेत्यनुषङ्गार्थः। किमनेनोक्तं भवति?। एतदनेनोक्तं भवति। गृहाङ्गनाभिमुखमेव गृहद्वारं करणीयं न तु तद्वैपरीत्येन,—इति। अथ वा। अनुद्वारमित्यनेन द्विद्वारं गृहं निषिध्यते। कथं नाम?। संमुखद्वारं पश्चात्द्वारञ्च गृहं न करणीयम्,—इति॥ ॥०॥ १९ ॥०॥

गृहद्वारम् ॥ २० ॥

अनुद्वारमवसानं न कुर्व्वीत,—इत्यनुवर्त्तते। गृहद्वारमनुलक्षीकृत्य द्वारं यस्य, तथाविधमवसानं न कुर्व्वीत। अन्यगृहद्वाराभिमुखं गृहद्वारं न कुर्व्वीत,—इत्येतत्। तथा च वास्तुविद्याविद्भिरुक्तम्।

"द्वारगवाक्षस्तम्भैः कर्दमभित्त्यन्तकोणवेधैश्च।
नेष्टं वास्तुद्वारं विद्धमनाक्रान्तमन्यैश्च"।

इति ॥०॥ २० ॥०॥

तथा च गृहद्वारं कुर्य्यात्;—

यथा न संलोकी स्यात् ॥ २१ ॥

यथा येन प्रकारेण गृहाभ्यन्तरे सन्ध्योपासन-होम-भोजनादिक्रियां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुर्व्वाणो गृहपतिर्न पतित-श्व-चाण्डालादीनां संलोकी—आलोकी—आलोकनीयः,—इत्येतत् । स्यात् भवेत् । 'संलोकि'—इति पाठे, गृहमध्यगतं धनादिकं यथा न वहिःस्थितस्य जनस्य, संलोकि, आलोकनगम्यं स्यात्,—इति वर्णनीयम् ॥०॥ २१ ॥०॥

वर्ज्जयेत् पूर्व्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा ।
न्यग्रोधमपराद्देशादुत्तराच्चाप्युदुम्बरम् ॥ २२ ॥

प्लक्षो जटीपर्कटीत्यनर्थान्तरम् । न्यग्रोधो वटः । अपरः पश्चिमः । स्पष्टमन्यत् ॥०॥ २२ ॥०॥

किं पुनरेतैरेतासु दिक्षुवस्थितैर्भवति ? । उच्यते,—

अश्वत्थादग्निभयं विद्यात् प्लक्षाद्ब्रूयात् प्रमायुकान् ।
न्यग्रोधाच्छस्त्रसंपीड़ामक्ष्यामयमुदुम्बरात् ॥ २३ ॥

अश्वत्थात्—पूर्व्वतः स्थितात् । प्लक्षात्—दक्षिणतः स्थितात् । प्रमायुकान्,—प्रकर्षेण ह्रस्वान्, नष्टायुषः,—इत्येतत् । मायुकः,—इति निघण्टौ ह्रस्वनामसु चतुर्थं पदम् । प्रमायुकान् प्रकृष्टपित्तान्,—इति केचित् । न्यग्रोधात्—पश्चिमतःस्थितात् । अक्ष्यामयमक्षिरोगम् । उदुम्बरादुत्तरतः स्थितात् ॥०॥ २३ ॥०॥

आदित्यदेवतोऽश्वत्थः प्लक्षो यमदेवतः ।
न्यग्रोधो वारुणो वृक्षः प्राजापत्य उदुम्बरः ॥ २४ ॥

ऋजुरक्षरार्थः । प्लक्षो यमदेवतः,—इत्यत्रैकाक्षरन्यूनतायामपि न छन्दोभङ्गदोषश्चोदयितव्यो भवति । भवति चात्र ब्राह्मणम् । "न ह्येकस्मा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षरादिराधयन्ति"—इति । देवताकीर्त्तनमुत्तरार्थम् ॥०॥२४॥०॥ यदि पुनः पूर्व्वादिष्वश्वत्यादयः स्युः, तदा किं कुर्य्यात्?,—इत्यपेक्षायामाह,—

तानस्वस्थानस्थान् कुर्व्वीत ॥ २५ ॥

तानश्वत्थादीन् पूर्व्वादिष्ववस्थितान् अस्वस्थानस्थान् कुर्व्वीत। स्वेषु पूर्व्वोक्तेषु स्थानेषु तिष्ठन्ति,—इति स्वस्थानस्थाः, न स्वस्थानस्थाः अस्वस्थानस्थाः, तथाविधान् कुर्व्वीत। यथा ते स्वस्थानेषु पूर्व्वादिषु न तिष्ठन्ति, तथा कुर्य्यादिति यावत्। तथाकरणञ्च च्छेदनादुद्धरणाद्वा बोद्धव्यम्। तत्र चोत्तरसूत्रोक्तो विशेषो द्रष्टव्यः।

"तान् स्वस्थानस्थान् कुर्व्वीत"—इति पाठे, तानश्वत्थादीन् स्वस्थानस्थान् स्वेषु स्थानेषु स्थितान् कुर्य्यादिति व्याख्येयम्। यस्मात् पूर्व्वादिष्ववस्थितेष्वश्वत्थादिषु अग्निभयादिकं, स्वस्थानस्थितेष्वभ्युदयः, तस्मात्तान् स्वस्थानस्थितान् कुर्व्वीत,—स्वेषु स्थानेषु रोपयेदित्यर्थः। आह। कानि पुनरमीषां स्वस्थानानि?। पूर्व्वविपरीतानि,—इति ब्रूमः। कस्मात्?। वास्तुविद्याविदां वचनात्। तथा चोक्तम्।

"याम्यादिष्वशुभफला-
जातास्तरवः प्रदक्षिणेनैते।
उदगादिषु प्रशस्ताः
प्लक्षवटोदुम्बराश्वत्थाः"।

इति।

For Private and Personal Use Only

"भवनस्य वटः पूर्व्वे जातः स्यात् सार्व्वकामिकः।
उदुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः।
प्लक्षश्चोत्तरतो धन्यो विपरीतो विपर्य्यये"।

इति चैत्रमादि ॥०॥ २५ ॥०॥

यदा खल्वेतानश्वत्थादीनुद्धरेत् च्छेदयेद्वा, तदा तद्दोषशान्त्यर्थम्,—

एतास्त्वेव देवता अभियजेत ॥ २६ ॥

एता अनन्तरोक्ता देवता अभियजेत। एवशब्दात् यं वृक्षमुद्धरेत् च्छेदयेद्वा तस्यैव देवतामभियजेत, न पुनः सर्व्वाः। चशब्दः पूर्व्वोक्तकल्पेन सम्बन्धकरणार्थः। सम्बन्धकरणस्य प्रयोजनम्,—यदा खल्विमे अस्वस्थानस्थाः क्रियन्ते, तदैवायं कल्पो यथा स्यात्,—इति। वृक्षे चैवं सम्बन्धकरणे, एवशब्दः पूर्व्वोक्तप्रकारेण विशेषबोधको द्रष्टव्यः। अथवा। चशब्दः च्छेदनपक्षे मनूक्तप्रायश्चित्तान्तरानुसन्धानार्थः। कथं नाम?। एता देवताश्च अभियजेत, ऋचश्च जपेत्,—इति। तथा च मनुः।

"फलदानाञ्च वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम्"।

इति। कल्पान्तरसमुच्चयार्थमपि चशब्दं वर्णयन्ति। कथं नाम?। यदि तानस्वस्थानस्थान् न कुर्य्यात्, तदा,—

"छिन्द्याद् यदि न तरूं स्तान्
तदन्तरे पूजितान् वपेदन्यान्।
पुन्नागाशोकारिष्ट-
वकुलपनसान् शमीशालौ"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति वास्तुविद्याविदुक्तं कुर्य्यात्,—इति । तदिदं कल्पान्तरं चशब्देन समुच्चीयते,—इति मन्यन्ते ॥०॥ २६ ॥०॥

मध्येऽग्निमुपसमाधाय कृष्णया गवा यजेत ॥ २७ ॥

मध्ये प्रकृतस्य गृहस्याभ्यन्तरे, न तदर्थपरिगृहीताया भूमेः । कथं ज्ञायते ? । सन्निहितपरित्यागे व्यवहितपरिग्रहे च कारणविशेषस्याभावात् । "पूर्व्वैः प्रोष्ठपदैर्गृहेऽग्निं प्रतिष्ठाप्य"—इति च साम-विधाने ब्राह्मणे दर्शनात् । अग्निम् उपसमाधाय,—इत्युक्तार्थम् । कृष्णया कृष्णवर्णया गवा यजेत । सेयं स्त्रीगवी अभिप्रेता,—इत्यव-गच्छामः । कस्मात् कारणात् ? । कृष्णया,—इति स्त्रीलिङ्गनिर्देशात् ॥०॥ २७ ॥०॥

अजेन वा श्वेतेन ॥ २८ ॥

यजेत,—इत्यनुवर्त्तते । ऋजुरक्षरार्थः । वाशब्दाद् गोरभावे सत्ययं कल्पो बोद्धव्यः ॥०॥ २८ ॥०॥

किं केवलया गवा ? केवलेन वा अजेन ? । न । कथन्तर्हि ?,—

सपायसाभ्याम् ॥ २९ ॥

पयसि भवश्चरुः पायसः । तत्सहिताभ्यां गोऽजाभ्यां यथालाभ-मन्यतरेण यजेत । लाघवं चिकीर्षुः खल्वयमाचार्य्यः, सपायसाभ्याम्, —इति सूत्रयाञ्चकार, न पुनर्गोऽजयोः साहित्यं प्रतिपिपादयि-षया । कथं ज्ञायते ? । अजेन वा,—इति वाशब्देन तयोर्विकल्प-प्रतिपादनात् ॥०॥ २९ ॥०॥

गोरजस्य चालाभे,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पायसेन वा ॥ ३० ॥

केवलेन यजेत । तदत्र, पशुप्रोक्षणे निर्वापे च, वास्तोष्पतये त्वा,—इति देवतानिर्देशः स्यात् ॥०॥ ३० ॥०॥

ततश्च प्रकृतिवत् पायसमांसचरू श्रपयित्वा,—

वसामाज्यं मांसं पायसमिति संयूय ॥ ३१ ॥

वसाम्,—इति शृतावदानमांसयूषमाह । तद्धि वसा सम्पृक्तं भवति । शृते खलु मांसे निर्गच्छन्ती वसा यूषेणैव मिश्रीभवति न पृथगुपलभ्यते । आह । एतस्मात् लिङ्गात् पूर्व्वमेव वसां पृथगुद्धरिष्यामः ? । न,—इत्युच्यते । कुतः ? । कल्पनागौरवापत्तेः । प्रमाणविशेषस्य चाभावात् । तस्मात्, चरुद्वयस्यैव श्रवणमात्रादवगतेरन्यथोपपन्नं लिङ्गं न चर्व्वन्तरमनुमापयति,—इत्यास्थेयम् । दृश्यते खल्वन्यत्रापि तत्सम्बन्धात्ताच्छब्द्यम्;—दण्डयोगाद्दण्डः पुरुषः,—इत्येवमादौ बहुलम् ।

सूत्रशेषमिदानीं वर्ण्यते । आज्यं व्याख्यातम् । मांसं पश्ववदानमांसम् । पायसं पूर्व्वोक्तम् । 'इति' एतानि चत्वारि, संयूय,—"यु मिश्रणे,"—इति स्मरणात् सम्यक् मिश्रयित्वा ।

कर्म्मक्रमस्तु,—अवदानानि पायसञ्च श्रपयित्वा, कंसेऽवदानरसमवासिच्य, स्वस्तरेऽवदानानि कृत्वा, न वार्यां सूनायामणुशश्छेदयित्वा, कंसपात्रे चासज्य, वसादिभिः सह संमिश्रयेत्,—इति ॥ ॥०॥ ३१ ॥०॥

ततश्च,—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अष्टगृहीतं गृहीत्वा जुहुयात् ॥ ३२ ॥

अष्टगृहीतं गृहीत्वा अष्टकृत्वो गृहीतं कृत्वा,—इत्येतत्। कस्मात् अष्टगृहीतं गृहीत्वा ?। संमिश्रितात्,—इत्याह। कुतः ?। मिश्रणस्य तदर्थत्वात्। पूर्वं च तथैव दृष्टत्वात्। अत्र च, मध्यात् पूर्वार्द्धादिति प्राकृतो धर्म्मा निवर्त्तते। कस्मात् ?। वैकृतस्य विशेषोपदेशस्यार्थवत्त्वात्। भृगूणामपि नात्र कश्चिद्विशेषः। अन्ये त्वाहुः,—"मन्नीतस्य मध्यपूर्व्वार्द्धाभ्यां त्रिः ग्रहणात् षड़वदानानि भवन्ति, भृगूणान्तु मध्यपूर्व्वार्द्धपश्चादर्द्धेभ्यो द्विः ग्रहणम्—तेन षड़ेव भवन्ति, पुरस्ताच्चोपरिष्टाच्चाज्यस्य, एवमष्टगृहीतं भवति"—इति। अवदानस्थानमत्रापि प्रत्यञ्जयेत्। कुतः ?। "प्रत्यनक्त्यवदानस्थानानि"—इत्यविशेषेणोपदेशात्। तद्बाधे च कारणविशेषस्याभावात् ॥०॥ ॥ ३२ ॥०॥

जुहुयात्,—इति सामान्यत उक्तम्, अथेदानीं तत्रैव विशेषोऽभिधीयते,—

वास्तोष्पत इति प्रथमा ॥ ३३ ॥

वास्तोष्पते,—इति मन्त्रेण प्रथमा आहुतिर्होतव्या। अत्र किञ्चिद्वक्तव्यमस्ति। परस्तात् तद्वक्ष्यामः ॥०॥ ३३ ॥०॥

वामदेव्यर्चः ॥ ३४ ॥

तिस्रः। ताभिः तिस्र आहुतयो होतव्याः ॥०॥ ३४ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महाव्याहृतयः ॥ ३५ ॥

तिस्र एव। ताभिरपि तिस्र एवाहुतयो होतव्याः ॥०॥ ३५ ॥०॥

प्रजापतय इत्युत्तमा ॥ ३६ ॥

प्रजापतये स्वाहा,—इत्यनेन मन्त्रेण उत्तमा अन्त्या आहुतिर्होतव्या। आह। निर्देशबलादेव प्रथमोत्तमत्वे सिद्धे, प्रथमा,—इति उत्तमा,—इति चावाच्यमिति चेत्। न। अर्थवत्त्वात्। कः पुनरर्थः?। उच्यते। अनयोः प्रथमोत्तमत्वमभिदधानः खल्वनयोरेवाहुत्योश्चरु-भागाभिसम्बन्धं ज्ञापयत्याचार्य्यः, न सर्व्वासामाहुतीनाम्। तस्मात्, 'वामदेव्यर्च्चः' 'महाव्याहृतयः'—इत्यन्तरालसूचिताः षड़ाहुतय आ-ज्येनैव स्युः, न चरुणा। तथा चोक्तम्।

"आश्वयुज्यां तथा कुर्य्यां यज्ञकर्म्मणि याज्ञिकाः।
यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते।
द्वे पञ्च द्वे क्रमेणैता हविराहुतयः स्मृताः।
शेषा आज्येन होतव्या इति कात्यायनोऽब्रवीत्"।

इति। सोऽयमर्थः। रघुनन्दनादयस्त्वेतदजानन्तः सर्व्वा एव चर्व्वा-हुतीरिच्छन्ति। तदशास्त्रम् ॥०॥ ३६ ॥०॥

हुत्वा दश बलीन् हरेत् ॥ ३७ ॥

स्फुटरक्षरार्थः। अभिधानादेव प्राप्तत्वात् हुत्वा,—इत्येतदवाच्यमिति चेत्। न। सम्बन्धकरणार्थत्वात्। हुत्वा,—इति पुनर्व्वचनं खलु होमबलिहरणयोः सम्बन्धकरणार्थम्। सम्बन्धकरणस्य च प्रयोजनम्,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

—होमशेषेणैव वलिहरणं यथास्यात्,—इति । अथ वा । हुत्वा,—इत्येतदवचने, 'प्राक् स्विष्टकृत आवापः'—इति सूत्रणात् उपन्यासक्रमाच्च स्विष्टकृद्धोमादर्व्वागेव वलिहरणम्,—इत्यपि कदाचिदाशङ्का स्यात् कस्यचिदिति, हुत्वा,—इत्याह । कथं नाम ? । स्विष्टकृदादिकमपि हुत्वा वलीन् हरेत्,—इति । अन्ये त्वाहुः । "कर्म्मापवर्गविहितं वामदेव्यगानमिदानीं माभूदित्यतः, हुत्वा,—इति वचनम् । कथं नाम ? । हुत्वा वलीन् हरेत् ततो वामदेव्यं गायेत्"—इति ।

ननु, दश,—इत्यपि अनर्थकम्, दशानामेवोपरिष्टादुपदेशात् अन्तरेणाप्येतद्वचनं, वलीनां दशत्वं लभ्यत एव । उच्यते । "प्राच्यूर्द्ध्वावाचीभ्योऽहरहर्नित्यप्रयोगः"—इति सूत्रयिष्यमाणत्वादस्मिन् कर्म्मणि अनित्यत्वमपि कश्चिदाशङ्कीत । अतस्तन्निरासार्थं दश,—इति सूत्रञ्चकार । अथ वा । "प्रजापतये स्वाहेति मध्य उपहरेत्"—इति सामविधानब्राह्मणे एकादशानां वलीनां हरणदर्शनात् अत्रापि मध्यतोऽप्यधिकं वलिहरणं स्यादितीमामधिकाशङ्कामपनेतुं दश,—इत्याह । दशैवात्र वलयो भवन्ति न पुनः सामविधानवदेकादश । प्रजापतये स्वाहा,—इति होम एवात्र स्यात् न वलिः,—इत्यभिप्रायः । न चैवं ब्राह्मणविरोधः,—इति शङ्कनीयम् । तस्मात् कल्पात् कल्पान्तरत्वादेतस्य । अत एव होमेऽपि तत्र विशेषः श्रूयते । स च तत्रैवानुसन्धेयः । तस्मात्, ब्राह्मणं कौथुमादिव्यतिरिक्तविषयं श्रौताग्निविषयं वा,—इत्यामेयम् ॥०॥ २७ ॥०॥

अथेदानीं क्व वलयो हर्त्तव्याः ? कथञ्च ?—इत्येतदवक्तव्यम् । तदुच्यते,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रदक्षिणं प्रतिदिशम् ॥ ३८ ॥

बलीन् हरेत्,—इत्यनुवर्त्तते । ऋजुरक्षरार्थः । अथ, प्रदक्षिणम्,—इत्येतदवाच्यम्?; ननु प्रकृतावेव प्रादक्षिण्यस्य सिद्धेः । नैष दोषः । कस्मात्? । यस्मात् प्रकृतस्याग्नेः प्रादक्षिण्येनात्र बलिहरणमित्येतत् प्रतिपिपादयिषया प्रदक्षिणमित्याह । अन्यथा विशेषाभावात् कर्त्तुरपि प्रादक्षिण्यं स्यात् ॥०॥ ३८ ॥०॥

किं केवलासु दिक्षु? । न । क्व तर्हि?—

अवान्तरदेशेषु ॥ ३९ ॥

बलीन् हरेत्,—इत्यनुवर्त्तत एव । चशब्दोऽत्र लुप्तवत् द्रष्टव्यः । अवान्तरदेशेषु च बलीन् हरेदित्यर्थः । दिशोर्दिशोरन्तरालमवान्तरदेशः,—इत्याख्यायते ॥०॥ ३९ ॥०॥

अथेदानीं, कथं बलीन् हरेत्?,—इत्येतत् प्रति वक्तुमारभते,—

आनुपूर्व्येणाव्यतिहरन् ॥ ४० ॥

पूर्वं पूर्वमनु,—इत्यनुपूर्वम्, तस्य भाव आनुपूर्व्यम्, तेन आनुपूर्व्येण, बलीन् हरेत्,—इत्यनुवर्त्तत एव । किं कुर्व्वन्? । अव्यतिहरन् । व्यतिहारमकुर्व्वन् । व्यतिहारो व्यत्यासः पौर्व्वापर्य्यविपर्य्ययः,—इत्यनर्थान्तरम् ।

कस्य पुन र्व्यतिहारो निषिध्यते? । आनुपूर्व्यस्येत्याह । कुतः? । सन्निधानात् । मन्त्राणाम्,—इति च प्रतिपद्यामहे । कस्मात्? । तेषामपि बौद्धसन्निधानस्य सम्भवात् । न वक्तव्यं तर्हि? ननु विधानसामर्थ्यादेव व्यतिहारो न भविष्यति, अथोच्यते;—कारणं वक्तव्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदरार्थम्,—इति ब्रूमः। आह। ननु, सूत्रमेवैतदवाच्यं, पूर्व्वसूत्राभ्यामुत्तरसूत्रेण चैतस्य गतार्थत्वात्। उच्यते। नैष दोषः। कस्मात्?। सामान्यप्राप्तविशेषकथनस्यापुनरुक्तत्वात्। लेखशैली खल्वियमाचार्य्याणाम्। ते खल्वादितः सामान्येनाभिधाय पुनस्तदेव विशेषेणाभिदधते। सोऽयमलङ्कारो न दोषः। एतस्मिन् खल्वनुक्ते पूर्व्वसूत्रद्वयक्रमानुरोधान्मन्त्रान् विहृत्य किमादितः सर्व्वासु दिक्षु बलिहरणं ततोऽवान्तरदेशेषु? उत उत्तरसूत्रानुसारात्तदुक्तेनैव क्रमेण? उताहो उभयत्रापि पाठक्रमस्याविशेषात् विकल्पः?,—इति कदाचित् शिष्या मुह्येयुः, अतः परमकारुणिक आचार्य्यः सूत्रमिदं रचयाञ्चकार। ननु तथापि न ज्ञायते;—प्राचीनस्य पराचीनस्य वा क्रमस्यानुपूर्व्यमभिप्रेतम्,—इति। पराचीनस्य,—इत्याह। कुतः?। यतः प्राचीनस्य क्रमस्यानुपूर्व्यें खल्वभिप्रेयमाणे मन्त्राणां व्यतिहारः स्यात्। तच्चानिष्टम्। उत्तरसूत्रतात्पर्य्यपर्य्यालोचनाच्चैवमवगच्छामः। यदि तावत् प्राचीनस्य क्रमस्यानुपूर्व्यमिहाभिप्रेतमभविष्यत्, नूनमुत्तरत्र पुरस्तात्,—इति, अवान्तरदेशे,—इति चैवमादिदेशकीर्त्तनं नाकरिष्यत्। अकार्षीच्चाचार्य्यः। तस्मादवगच्छामः.—न प्राचीनस्य क्रमस्यानुपूर्व्यमिह प्रतिपिपादयिषितम्,—इति। अथ, तथाप्युत्तरसूत्रे देशकीर्त्तनमनर्थकम्;—ननु मन्त्राणां व्यतिहारनिषेधादेव प्राचीनस्य क्रमस्यानुपूर्व्यमत्र न भविष्यति,—इत्युक्तम्। सत्यमुक्तम्। तत् खल्वेतदुत्तरत्र देशकीर्त्तने सति शक्यते वक्तुम्। न पुनरन्यथा। कथम्?। देशकीर्त्तनबलात्तत्तद्देशानामेव बलीनां ते ते मन्त्राः भवन्ति। तत्रादितो दिक्षु, ततो विदिक्षु च बलिहरणे मन्त्राणां व्यतिहारोऽवर्ज्जनीयः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यात्। देशकीर्त्तनस्य खल्वभावे, तत्तद्देशानामेव वलीनां ते ते मन्त्राः,—इत्यत्र कारणविशेषाभावात् यथापठितैरेव मन्त्रैरादितो दिन्तु ततो विदिन्तु बलिहरणोपपत्तेर्व्यतिहारस्य वक्तुमशक्यत्वात्,—इत्यस्तु किं विस्तरेण ॥०॥ ४० ॥०॥

यस्यानुपूर्व्यस्य येषाञ्च मन्त्राणां व्यतिहारो निषिद्धः, त इदानीमभिधीयन्ते; देवताश्च बलीनाम्,—

इन्द्रायेति पुरस्ता द्वायव इत्यवान्तरदेशे यमायेति दक्षिणतः पितृभ्य इत्यवान्तरदेशे वरुणायेति पश्चान्महाराजायेत्यवान्तरदेशे सोमायेत्युत्तरतो महेन्द्रायेत्यवान्तरदेशे वासुकय इत्यधस्तादूर्द्ध्वं नमो ब्रह्मण इति दिवि ॥ ४१ ॥

ऋजुरत्तरार्थः। अधस्तादिति नीचैर्दानमुपदिशति। ऊर्द्ध्वमिति ब्रह्मबलावन्वेति। ऊर्द्ध्वम्,—इति ऊर्द्ध्वमुत्क्षिप्य दानार्थम्। दिवि,—इति दिवं मनसि निधाय निक्षेपार्थम्। बलिहरणमन्त्राणाञ्चामीषामन्ते नमस्कारः स्यात्। कुतः?।

"अमुष्मै नम इत्येवं बलिदानं विधीयते।
बलिदानप्रदानार्थं नमस्कारः कृतो यतः"।

इति प्रकृतौ तथादर्शनात्। पितृभ्यः,—इत्यत्र चान्ते स्वधाकारः स्यात्। कस्मात्?।

"स्वधाकारेण निनयेत् पित्र्यं बलिमतः सदा"।

इति वचनात्। ब्रह्मबलौ तु यावदुक्तत्वादादित एव नमस्कारः स्यात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषवचनस्य खल्वर्थवत्त्वार्थं सामान्यवचनस्योपरोध इष्यत एव। न च विकल्पः, अतुल्यबलत्वात्। सामान्यविशेषयोर्विकल्पस्य क्वचिदप्यदर्शनात्। उपजीव्यश्च खल्वाचार्य्यः कात्यायनस्य,—इति नैतदन्यथयितुं शक्यम्। सामविधानब्राह्मणेऽप्येवमेवैतत् समाम्नायते,—इति नात्र विकल्पो युक्तः कल्पयितुम्। अपरे पुनरेतदविद्वांसो भाषन्ते,—"ब्रह्मणे,—इत्यत्रान्ते नमस्कारः स्यात्। कुतः?। प्रकृतौ तथा दृष्टत्वात्। यथोपदेशं वा स्यात्। उपदेशसामर्थ्यात्। एवञ्चेत्, विकल्पः, तुल्यबलत्वात्"—इति।

सुभूमिकरणमुभयतस्त्राद्भिः परिषेकश्च प्रकृतिवदत्रापिकर्त्तव्यः॥ ॥०॥ ४१ ॥०॥

प्राच्यूर्द्ध्वावाचीभ्योऽहरहर्नित्यप्रयोगः॥ ४२॥

प्राच्यूर्द्ध्वावाचीभ्यः,—तत्तद्देवताभ्यः,—इत्येतत्। अवाची खल्विहाधोदिगभिप्रेयते। कथं ज्ञायते?। तद्बलेरवाचीनं दीयमानत्वात्। सन्निहित पठितस्योर्द्ध्वस्य वैपरीत्याच्च। तथाच नित्यबलौ कर्म्मप्रदीपः। "इन्द्राय वासुकये ब्रह्मणे"—इति। एताभ्यः खलु देवताभ्योऽहरहः प्रत्यहं, नित्यप्रयोगः,—नित्यमवश्यं प्रयोगोऽनुष्ठानं कर्त्तव्यः बलीनाम्। एताभ्यो देवताभ्यः प्रत्यहं बलिहरणमवश्यं कर्त्तव्यमित्यर्थः। तदिदं प्रसङ्गादत्र सूचितम्। अहरहरिति प्रत्यहकरणार्थम्। नित्यपदमावश्यकत्वार्थम्। क्रमश्च पूर्व्वसूत्रोक्त एव स्यात्। वैपरीत्ये कारणाभावात्। क्रमभेदः खल्विहोर्द्ध्ववैपरीत्येनावाचीग्रहणार्थः,—इत्यवोचाम। स्वहस्तितः खल्वयमेवक्रमः कर्म्मप्रदीपकृता।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिहितञ्चैतत् सर्व्वमास्माभिरधस्तात्,—"अथ संस्तूपं स रक्षोजनेभ्यः"—इत्यत्र ॥०॥ ४२ ॥०॥

प्रासङ्गिकमभिधाय प्रकृतमेव पुनरनुवर्त्तामहे,—

संवत्सरे संवत्सरे नवयज्ञयोर्वा ॥ ४३ ॥

वाशब्दस्योभयत्रान्वयः कर्त्तव्यः। नवयज्ञयोः,—इत्येतदपि वीप्सितं द्रष्टव्यम्। तेनायमर्थः। संवत्सरे संवत्सरे वा नवयज्ञयोर्नवयज्ञयो र्वा नित्यप्रयोगः,—इत्यनुवर्त्तते। नवयज्ञयोरिति द्विवचनकरणात् व्रीहियवयज्ञयोरिति बोद्धव्यम्। श्यामाकयज्ञस्य तु वनस्थविषयत्वादिह नोल्लेखः।

आह। कस्य नित्यप्रयोगः?। यथोक्तस्य कर्म्मणः,—इत्याचक्ष्महे। कस्मात्?। "अव्यक्तं प्रधानगामि"—इति वचनात्। तथाच सामविधाने ब्राह्मणे। "अथातो वास्तुशमनम्"—इत्येतस्मिन् प्रकरणे, "बहुपशुधनधान्यहिरण्यमायुष्मत्पुरुषं वीरस्थः सुभगा अविधवस्त्रीकं शिवं पुण्यं वास्तु भवति, चतुर्षु मासेषु प्रयोगः संवत्सरे वा पुनः प्रयोगः"—इत्याम्नातम्। तस्मात्,—प्रकृतस्य बलित्रयस्य प्रयोगः,—इत्यसङ्गतैषा वर्णना। सामविधाने खल्वहरहर्बलित्रयस्योपदेशविरहात् प्रकृतस्यैव कर्म्मणः पुनः प्रयोगोऽवगम्यते। तस्मादिहापि तथैव वर्णयितुमुचितम् ॥०॥ ४३ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य सप्तमी काण्डिका ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके अष्टमी काण्डिका ।

श्रवणाऽऽग्रहायणीकर्म्मणोरक्षताञ्छिष्ट्वा ॥ १ ॥

व्याख्याते श्रवणाग्रहायणी कर्म्मणी । तयोः कर्म्मणोः, अक्षतान् यवान् शिष्ट्वा,—अवशिष्टान् कृत्वा उर्व्वरितान् कृत्वा,—इत्येतत् । अक्षतान्, —इति वचनादामादितानां यवानां मध्यात् पूर्व्वमेव भर्ज्जनादवशेषः कर्त्तव्यः, न भर्ज्जनात् परतः । कुतः ? । अनक्षतत्वात्तेषाम् । तथा चोक्तम् ।

"अक्षतास्तु यवाः प्रोक्ता भृष्टा धाना भवन्ति ते" ।

इति । शिष्ट्वा,—इति करणाच्च, एतत् कर्म्मकरणार्थमक्षतानामवशेषः करणीयः, न तु यदि दैवादक्षताः शिष्यन्ते, तदैवैतस्य कर्म्मणः करणम्,—इत्युपदिशति ॥०॥ १ ॥०॥

प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधाय हयेराक इत्येकैकयाऽञ्जलिना जुहुयात् ॥ २ ॥

प्राङ्मुखो वा उदङ्मुखो वा ग्रामान्निर्गत्य । चतुष्पाथः प्रसिद्धः । तस्मिन् 'अग्निमुपसमाधाय'—इत्युक्तार्थम् । हयेराके,—इति चतस्र ऋचः । तासामेकैकया ऋचा, अञ्जलिना—व्याकोषीकृतेन पाणिद्वयेन जुहुयात् ;—प्रकृतानक्षतान् । अथ, अग्निमुपसमाधाय,—इत्ये-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्वाच्यम्; ननु जुहोतिचोदनया खल्वेतत् प्राप्नोति। न,—इत्याह। कस्मात्?। यस्मादग्निमुपसमाधाय,—इत्येतदवचने चतुष्पथे खल्वसौ होमः स्यात् उदकद्रवाक्षततण्डुलानाम्। तस्मादेतदुच्यते ॥०॥ २ ॥०॥

प्राङुत्क्रम्य वसुवन एधीत्यूर्द्धमुदीक्षमाणो देवजनेभ्यः ॥ ३ ॥

प्राङ् प्राङ्मुखः, उत्क्रम्य अग्नेः सकाशात् कतिचित् पदानि गत्वा। वसुवन एधि,—इति यजुषा त्रिरभ्यस्तेन,—इत्यर्थः। कुतः?। पठ्यमानमन्त्रकाण्डे तथैवैतस्य यजुषः पाठात्। ऊर्द्धम् उपरिष्टात्। उदीक्षमाणः ऊर्द्धमवलोकयन्, देवजनेभ्यः देवजनानुद्दिश्य। प्रकृतानामक्षतानामञ्जलिमुत्सृजेत्,—इति सूत्रशेषः। "ऊर्द्धम्"—इति पदस्योत्सर्गेण संबन्धो न तु ईक्षणेन। कथं ज्ञायते?। उदीक्षमाणः,—इति उदुपसर्गेणैव तदवगतेरनर्थकत्वापत्तेः।

इदमिदानीं सन्दिह्यते। वसुवन एधि,—इत्येतद्यजुः किमुत्क्रमणेन संबध्यते, आहोस्विदुदीक्षणेन, उताहो उत्सर्गेण?—इति। उत्क्रमणेन,—इति केचित्। तदसङ्गतम्। कस्मात्?। यस्मादेवं सति अक्षतबलिरमन्त्रकः स्यात्। तच्चानिष्टम्। अव्यक्तस्य प्रधानसंबन्धसिद्धान्तोऽप्येवमुपरुध्येत। अतएव, उदीक्षणेन संबन्धः,—इत्यपि नाद्रियामहे। अपरेतु,—देवजनेभ्यः,—इति चतुर्थीनिर्देशादयमेव नमस्कारान्तो बलिमन्त्रः,—इति मन्यमानाः,—वसुवनेति मन्त्रस्योत्क्रमणेन संबन्धम् इच्छन्ति। तदप्यसुन्दरम्। कस्मात् कारणात्?। इति करणाभावात्। एवं खल्वभिप्रेयमाणे, "इन्द्रायेति पुरस्तात्"—इत्ये-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वमादिवत्, देवजनेभ्यः,—इत्यत्रापि इतिः क्रियेत। तदकरणादवगच्छामः,—नायं बलिमन्त्रः,—इति। तस्मादुत्सर्गेणैव यजुषः संबन्धः। तथा चोक्तम्।

"ऊर्द्धं वस्विति मन्त्रेण देवेभ्योत्सृज्य वा बलिम्।
तथेतरजनेभ्यश्च प्राञ्चमन्यद् यथाविधि"।

इति। उत्क्रमणमुदीक्षणञ्च द्वयमपि मन्त्रानुपदेशाद् व्याहृतियोगेन स्यात्। तूष्णीमिति केचित्॥०॥ ३॥०॥

तिर्य्यङ्ङितरजनेभ्योऽर्व्वाङवेक्षमाणः॥ ४॥

तिर्य्यङ् तिरश्चीनं यथा भवति, तथा,—इति क्रियाविशेषणमेतत्। अथवा। "प्राञ्चमन्यद् यथाविधि"—इति वचनात् प्राञ्चमेतं बलिं हरेत्। ततश्च एवं व्याख्यायते। तिर्य्यङ् तिरश्चीनः सन्, इतरजनेभ्यः देवजनेतरजनेभ्यः, अक्षताञ्जलिमुत्सृजेत्। प्रकृतेन वसुवन एधीत्यनेन मन्त्रेण। किमविशेषेण?। न। कथन्तर्हि?। अर्व्वाङवेक्षमाणः। अधोऽवलोकयन्। अवाङवेक्षमाणः,—इति पाठेऽपि स एवार्थः। अर्व्वाङ् अधोमुखः, अवेक्षमाणो बलिदेशम्,—इति वा वर्णनीयम्॥०॥ ४॥०॥

अनवेक्षमाणः प्रत्येत्याक्षतान् प्राश्नीयादुपेतैरमात्यैः सह॥ ५॥

अनवेक्षमाणोऽनवलोकयन्। अनपेक्षमाणः,—इति पाठेऽपि, अपेत्ययमुपसर्गः,—इति स एवार्थः। किमनवेक्षमाणः?। प्रहृतान् बलि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिग्देशान्। प्रत्येत्य पुनरागत्य। किम्?। अग्निसमीपदेशम्। कुतः?। प्रकृतत्वात्। प्रतिशब्दस्वरसाच्च। अक्षतान्,—प्रकृतान् होमबल्योरवशिष्टान् इत्यर्थः। प्राश्नीयात् भुञ्जीत। किमेक एव प्राश्नीयात्?। न। उपेतैरमात्यैः सह। उपेतैः समीपमागतैरमात्यैः सह मिलित्वा। अमात्यशब्देन पुत्रभ्रातृप्रभृतयो गृह्या उच्यन्ते। एतदुक्तं भवति। यावदयं गृहान्निष्क्रान्तो जुहोति बलिञ्चोत्सृज्य प्रत्येति, तावदमात्या अप्यस्य समीपमागच्छेयुः;—येन तैः सार्द्धमक्षतप्राशनमस्योपपद्यते,—इति। स खल्वयमर्थः उपेतपदस्वरसादवगम्यते ॥०॥ ५ ॥०॥

काम्येन खल्वेतेन कर्मणा भवितव्यम्। किं पुनरस्मिन् कर्मणि कृते फलं स्यात्?। तदुच्यते,—

स्वस्त्ययनम् ॥ ६ ॥

व्याख्यातोऽक्षरार्थः। तदिदं कर्मणः फलवचनपरं सूत्रं न वामदेव्यगानविधानार्थम्। अनर्थकत्वापत्तेः। परिभाषाप्राप्तं वामदेव्यगानं खल्वन्तरेणाप्येतद्वचनमिदानीं कर्त्तव्यं भवति। उत्तरतः कर्मान्तरसूत्रणादिदानीमेतस्य कर्मणोऽपवर्गावगमात्। अपर आह। कर्मापवर्गविहितं वामदेव्यगानमिह स्वस्त्ययनम्—इति ॥०॥ ६ ॥०॥

वशङ्गमौ शङ्कश्चेति पृथगाहुती व्रीहियवहोमौ प्रयुञ्जीत ॥ ७ ॥

वशङ्गमौ,—इति मन्त्रेण, शङ्कश्च,—इति मन्त्रेण च, पृथक् नाना

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आहुती ययोः तौ पृथगाहुती व्रीहियवहोमौ प्रयुञ्जीत कुर्य्यात्। ननु, पृथगाहुती,—इत्येतदवाच्यं ; व्रीहियवहोमौ,—इति द्विवचनबलात् होमयोर्द्वित्वावगतेः। न,—इत्याह। कस्मात्?। यस्मात् व्रीहियवयोर्द्वन्द्वबलादितरेतरयोगावगतेर्मिलितयोर्व्रीहियवयोर्होमः स्यात्। तस्मादेकैकमन्त्रेणैकैकस्य होमार्थं पृथगाहुती,—इति वचनम्। एवञ्च, वशङ्गमाविति मन्त्रेण व्रीहिहोमः, शङ्कुश्चेत्यनेन च यवहोमः स्यात्। तथा चोक्तम्।

"वशङ्गमाविति व्रीहीन् शङ्कुश्चेति यवांस्तथा।
असावित्यत्र नामोक्त्वा जुहुयात् क्षिप्रहोमवत्"॥

इति। अस्माद्वचनात् क्षिप्रहोमोऽयम्। आह। असौ,—इत्येतस्मिन् सर्व्वनाम्नि नाम ऊहित्वा जुहुयात्,—इत्युक्तम्। न ज्ञायते; कस्य नाम्न ऊहः?—इति। तद्वक्तव्यम्। यस्यात्मनि प्रसादमिच्छति, तस्य,—इति ब्रूमः। कस्मात्?। औचित्यात्। उत्तरसूत्रपर्य्यालोचनाच्च॥०॥ ७॥०॥

यस्यात्मनि प्रसादमिच्छेत्तस्मै॥ ८॥

यस्य,—अविशेषात् स्त्रियाः पुरुषस्य वा, आत्मनि स्वस्मिन् विषये, प्रसादं प्रसन्नतामिच्छेत् अभिलषति, तस्मै,—इति व्यत्ययाच्चतुर्थी। तस्य, नाम ऊहित्वा,—इति सूत्रशेषः। अथवा। तस्मै,—इति तादर्थ्ये चतुर्थी बोद्धव्या। यस्यात्मनि प्रसादमिच्छेत्तदर्थं तमुद्दिश्य व्रीहियवहोमौ प्रयुञ्जीत,—इति गतेन संबन्धः। अनयाऽपि वचनव्यक्त्या तस्यैव नाम्न ऊहः,—इत्यवगच्छामः। तं प्रसादयितुम्—इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा वर्णनीयम्। अस्यामपि वर्णनायां गतेनैवास्य संबन्धो द्रष्टव्यः ॥ ॥०॥ ८ ॥०॥

किमस्य व्रीहियवहोमस्य सकृत् प्रयोगः? । न,—

नित्यप्रयोगः ॥ ९ ॥

नित्यमहरहः प्रयोगः—अर्थादप्रमादात् प्रत्यहमनुष्ठानम् ॥०॥ ९ ॥०॥

एकाष्टर्यायामर्द्धमासव्रते द्वे कर्म्मणी ॥ १० ॥

"आकूतीं देवीं मनसा प्रपद्ये"—इत्यादिकामृचमेकाचर्य्यामाचक्ष्महे। कस्मात्? । तस्या इदानीं क्रमप्राप्तत्वात्। प्रसिद्धेश्च। प्रसिद्धि वीजञ्च,—"यस्यास्त एकमचरम्"—इति मन्त्रवर्णः। तदस्यामेकाचर्य्यायामृचि चत्वारि कर्म्माणि सूचयिष्यति। तेषां मध्यात् द्वे कर्म्मणी अर्द्धमासव्रते स्याताम्। के पुन र्द्वे कर्म्मणी अर्द्धमासव्रते स्याताम्?। आयुष्काम ग्रामकामकर्म्मणी,—इति ब्रूमः। कथं ज्ञायते?। अनयो र्विशिष्टफलकत्वात्। साध्यानुगुणत्वाच्च साधनस्य। तथा चोक्तम्।

"चत्वारि चैकाचर्य्यायां कर्म्माणि फलभेदतः।
तत्रार्द्धमासव्रतता न द्वितीयचतुर्थयोः"।

इति। द्वितीय चतुर्थयोस्तु परिभाषिकव्रततैव स्यात्,—विशेषस्यानुपदेशात्,—इति द्रष्टव्यम् ॥०॥ १० ॥०॥

तानि चत्वारि कर्म्माणि सपरिकरमिदानीमभिधीयन्ते,—अष्टभिः सूत्रैः,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पौर्णमास्याᳩ रात्रौ खदिरशङ्कुशतं जुहुयादायुः-कामः ॥ ११ ॥

पौर्णमास्यां रात्रौ,—इत्युक्तार्थम्। खदिरः प्रसिद्धः। तन्मयाः शङ्कवः कीलकाः—खदिरशङ्कवः। तेषां खदिरशङ्कूनां शतम्,—(शतशब्दः संख्यावचनः)—जुहुयात्, प्रकृतया एकाचर्य्यया ऋचा, क्षिप्रहोमन्यायेन,—इत्यर्थः। शङ्कवश्च प्रकृतिधर्म्मानुरोधात् समित्प्रमाणाः समिल्लक्षणयुक्ताश्च कर्त्तव्याः। तथा चोक्तम्।

"सत्वचः शङ्कवः कार्य्या स्तीक्ष्णाग्रा वीतकण्टकाः।
समिल्लक्षणसंयुक्ताः सूचीतुल्यास्तथाऽऽयताः"।

इति। को जुहुयात्?। आयुःकामः। आयुर्जीवितं कामयते यः, सोऽयमायुःकामः। कस्य आयुःकामः?। अविशेषादात्मनः पुत्रादीनां वा। कथं पुनः "शास्त्रदेशितं फलमनुष्ठातरि"—इति स्थिते सिद्धान्ते पुत्रादीनामप्यायुःकामयमानोऽधिकरोति,—इति वर्ण्यते?। गृह्याकर्म्मत्वादित्याह। गृह्याकर्म्म खल्विदं गृह्यानामपि फलजनकं भवितुमर्हति, न केवलं यजमानस्यैव। गृह्याश्च पुत्रादयः। न खल्वसौ यजमानोऽन्तरेणैतान् स्वमेवाभ्युदयं कामयमानो भवति, निर्वृतः। तत् सारत्वात्तस्य। तथाच गृह्यासंग्रहः।

"पत्न्यः पुत्राश्च कन्याश्च जनिष्याश्चापरे सुताः।
गृह्या इति समाख्याताः यजमानस्य दायकाः।
तेषां संस्कारयोगेन शान्तिकर्म्मक्रियासु च।
आचार्य्यविहितः कल्पस्तस्माद् गृह्या इति स्थितिः" ॥

इति ॥०॥ ११ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आयसान् बधकामः ॥ १२ ॥

अयो लौहम्। तद्विकारान् आयसान् शङ्कून्,—प्रकृतत्वाच्छतसंख्याकान्, प्रकृतेनैव विधिना जुहुयात्। कः? । बधकामः। हननं बधः,—इत्यनर्थान्तरम्। तं कामयते यः, सोऽयं बधकामः। कस्य बधकामः? । शत्रूणामर्थात् ॥०॥ १२ ॥०॥

अथापरम् ॥ १३ ॥

अथशब्दः,—बधकामकर्म्मणा व्यवहितस्यापि पूर्व्वप्रकृतस्यार्द्धमासव्रतस्यानुसन्धानार्थः। अर्द्धमासव्रते द्वे कर्म्मणी,—इत्युक्तम्। तत्रैकमायुःकामस्योक्तम्। अथापरमपि अर्द्धमासव्रतं कर्म्म ग्रामकामस्य वर्त्तिष्यते,—इत्यर्थः ॥०॥ १३ ॥०॥

प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य चतुष्पथे पर्व्वते वाऽऽरण्यैर्गोमयैः स्थण्डिलं प्रताप्यापोह्याङ्गारान् मन्त्रं मनसाऽनुद्रुत्य सर्पिरास्येन जुहुयात् ॥ १४ ॥

'प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य',—इत्युक्तार्थम्। 'चतुष्पथे पर्व्वते वा'। चतुष्पथपर्व्वतौ प्रसिद्धौ। तयोरन्यतरस्मिन्। 'अरण्ये भवैर्न ग्राम्यैः, 'गोमयैः',—न दारुभिः, 'स्थण्डिलं' लोहपात्रं, 'प्रताप्य' प्रकर्षेणातिशयं तापयित्वा, तस्मात् स्थण्डिलात् 'अङ्गारान्' अग्निमयान्, 'अपोह्य' अपाकृत्य, 'मन्त्रं' प्रकृतमेकाक्षर्य्यामन्त्रं, 'मनसा' हृदयेन, 'अनुद्रुत्य' अनुस्मृत्य, 'सर्पिः' घृतं, 'आस्येन' मुखेन,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'जुहुयात्'। कुत्र जुहुयात्?। प्रतप्ते स्थण्डिले,—इत्याह। कुतः?। प्रकृतत्वात्। अथापि स्यात्,—जुहोति चोदनाबलादपोढेष्वेवाङ्गारेषु होमः?,—इति चेत्। नैतदेवम्। कस्मात्?। यस्मादेवंसति स्थण्डिलप्रतापनोपदेशोऽनर्थकः स्यात्। अपोहनोपदेशेन चाङ्गाराणां स्थण्डिल-प्रतापनमात्रार्थतया कर्म्मानङ्गत्वावगतेः। एवञ्च, अनग्निकत्वादत्र चिप्रहोमधर्म्मो न स्यात्, किन्तु उदकहोमवत् यावदुक्तमेव स्यात्,—इति द्रष्टव्यम्। अत्र च, स्थण्डिल प्रतापनादौ यद्यपि मन्त्रो नोपदिश्यते, तथापि न व्याहृतिप्रयोगः, किन्तु तूष्णीमेव करणीयम्। तथा च गृह्यासंग्रहः।

"वपाहोम मुखेनैव होमे स्विष्टकृते तथा।
व्याहृतीर्न प्रयोक्तव्या मुखे नाप्सु च लक्षणम्"।

इति ॥०॥ १४ ॥०॥

तस्याञ्च सर्पिराहुत्याम्—

ज्वलन्त्यां द्वादशग्रामाः ॥ १५ ॥

अस्य भवन्ति। फलविधिरयं न फलार्थवादः। कथं ज्ञायते?। काम्यानां श्रूयमाणफलत्वस्य रात्रिसत्रन्यायेन वर्णयितुमुचितत्वात्। तस्मात् ग्रामकामस्यात्राधिकारः ॥०॥ १५ ॥०॥

धूमे त्र्यवरार्द्धाः ॥ १६ ॥

आहुत्यामज्वलन्त्यां केवले धूमे जायमाने त्र्यवरार्द्धाः ग्रामाः अस्य भवन्ति। अवरार्द्धशब्दो हीनवचनः। त्रयोऽवरार्द्धाः हीना येषां ते

For Private and Personal Use Only

तथोक्ताः। अत्रार्द्धशब्देनैतत् दर्शयति,—धूमप्रमाणाल्पत्वबहुत्वाभ्यां फलाल्पत्वबहुत्वं भवति, परन्तु न्यूनकल्पेऽपि त्रयो ग्रामाः सम्पद्यन्ते,—इति। अपरे तु मन्यन्ते,—ज्वालादीप्तितारतम्येनापि फलतारतम्यं भवति,—इति ॥०॥ १६ ॥०॥

अमोघं कर्म्मेत्याचक्षते ॥ १७ ॥

इदं ग्रामकामकर्म्म अमोघं अव्यर्थमिति आचक्षते कथयन्ति आचार्य्याः। अमोघवचनेनैतद्दर्शयति,—यदि ज्वाला न भवति, धूमोऽपि न जायते, तथापि नैवेदं कर्म्म मोघं भवति, अपितु कियदपि गृहक्षेत्रादिकं फलमस्य स्यादेव,—इति। कुतः?। अमोघवचनस्यैवमर्थत्वात् ॥ ॥०॥ १७ ॥०॥

वृत्त्यविच्छित्तिकामो हरितगोमयान् सायं प्रातर्जुहुयात् ॥ १८ ॥

वृत्तिर्वर्त्तनमुपजीवनमित्यनर्थान्तरम्। अविच्छित्तिरविच्छेदः—अविच्युतिरित्येतत्। वृत्तेरविच्छित्तिः वृत्त्यविच्छित्तिः। तां कामयते,—इति वृत्त्यविच्छित्तिकामः। आह। कतमा पुनरिह वृत्ति रभिप्रेता?। शिलोञ्छादिरूपा,—इति ब्रूमः। कुतः?। तस्या एव ब्राह्मणादि वृत्तितया प्रशंसनात्। तथाच वृत्तिमुपक्रम्य स्मरति भगवानत्रिः।

"मयैष धर्म्मोऽभिहितः संस्थिता यत्र वर्णिताः।
बहुमानमिह प्राप्य प्रयान्ति परमां गतिम्"।

इति। मनुरपि।

"अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ।
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम् ।
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन" ।

इति ।

"न लोकवृत्तं वर्त्तेत वृत्तिहेतोः कथञ्चन ।
अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम्" ।

इति च। तस्मात्,—युक्ता अभ्युदयहेतोः शुद्धाया वृत्तेरविच्छित्ति-कामना । अपर आह । वृत्तिशब्देन श्रुतिस्मृतिविहितकर्मानुष्ठान-मुच्यते । कुतः? ।

"यावज्जीवमविच्छिन्नां वृत्तिं यस्त्वनुतिष्ठति ।
यथाऽऽम्नातेन विधिना स परं ब्रह्म विन्दते" ।

इति स्मरणात् । मनुवचनाच्च ।

"एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ।
स्नातकव्रतकल्पस्तु सत्त्वशुद्धिकरः शुभः" ।

इति । तदसङ्गतम् । कुतः? । वृत्तिशब्दस्येदमर्थाप्रसिद्धेः । स हि जीवनोपायमाह,—इति स्मृतिषु प्रसिद्धम् । यदपि स्मरणम्—"याव-ज्जीवमविच्छिन्नाम्"—इत्यादि,तदपि अस्मदुक्तामेव वृत्तिं स्तौति ।तस्या अपि प्रसंशार्हत्वात् । न भवदुक्ताम् । अप्रसिद्धेरेव । मनुरपि चतुर्थे-ऽध्याये प्रथममस्मदुपवर्णितां वृत्तिं, परतस्तु स्नातकव्रतमभिधाय,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकरणशेषे "एषोदिता गृहस्थस्य"—इत्यादिना यथाक्रमं तदुभयमेवोपसंहरति,—इत्यवगच्छामः । कथम्? । उपक्रमोपसंहारयोरेकार्थत्वोपपत्तेः । अन्यथा खल्वसावन्यदुपक्रम्यान्यदुपसंहरन्ननवधेयवचनः स्यात् । भवत्परिकल्पितायाश्च वृत्तेराश्रमान्तरसाधारण्यात् गृहस्थमात्रपरं मनुवचनं पीड्येत । न खल्वेकैव वृत्तिरनेकसाधारणी एकस्य प्रशस्यते नापरस्येति किञ्चित् कारणमत्र शक्यमुत्प्रेक्षितुम् । तस्मादस्मदुक्त एवार्थो विद्वद्भिरादरणीयः ।

स खल्वयंवृत्त्यविच्छित्तिकामः,—हरितगोमयान् सायं प्रात जुहुयात् । प्रकृतेनैकाक्षर्य्यामन्त्रेण । होमश्चायं क्षिप्रहोमन्यायेन स्यात् । हरिताश्च ते गोमयाश्च,—इति हरितगोमयाः, तान्—हरित गोमयान् । यैः खलु गोमयैः सङ्कुले प्रदेशे हरितानि तृणानि प्रशस्तान्युत्पद्यन्ते, तान् किल गोमयान् हरितगोमयान् आचक्षते । ते खल्वार्द्रा इहाभिप्रेयन्ते । कथं ज्ञायते? । तेष्वेव तत्प्रसिद्धेः । हरितगोमयान्,—इति बहुवचनं सायंप्रातरावृत्त्यपेक्षम् । आहुतेरावृत्त्यपेक्षमेव कुतो न स्यात्?—इति चेत् । न । एकमन्त्राधिकारात् । अभ्यासानुपदेशाच्च । तस्मात्,—एकैवेयमाहुतिः सायंप्रातःकालयोर्होतव्या । सा खल्वियमाहुतिः, सायं—सायमाहुतेः पुरस्तात् स्यात्। प्रातश्चः प्रातराहुतेः,—परस्तात्। कस्मात्? । सायंप्रातर्होमयोरव्यवायोपपत्तेः । एवं खल्वव्यवायः सायंप्रातर्होमयोरुपपद्यते । इतरथा व्यवायः स्यात् । स चानिष्टः । कुतः? ।

"नैकस्मिन् कर्म्मणि तते कर्म्मान्यत् तायते यतः" ।

इति वचनात्। अथ, एवमपि प्रादुष्करणहोमयोर्व्यवायः स्यादेव?।

5 A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यादेव। अनन्यगतिकत्वात्। किं पुनरत्र कारणम्?;—प्रादुष्करण होमयोर्व्यवाय आश्रयितव्यो न सायं प्रातर्होमयोः,—इति। उच्यते। आश्रयिष्यामः प्रादुष्करणहोमयोर्व्यवायम्, अनाश्रयन्तः सायं प्रातर्होमयोर्व्यवायं करिष्यामः। न च गुणस्य अव्यवायं उपपादयितुं प्रधानयोर्व्यवायः युक्त आश्रयितुम्। तस्मात्,—यथोक्तमेवास्तु। स खल्वयं होमो वर्षासु प्रत्यहं करणीयः। कुतः?। तत्रैव हरित गोमयोपपत्तेः। तथा चोक्तम्।

"सायं होमस्य पुरतः परस्तात् प्रातराहुतेः।
आर्द्रं वर्षासु जुहुयात् प्रत्यहं गोमयाहुतिम्"।

इति। एवन्तावदेकाचर्य्यायां चत्वारि कर्म्माण्यभिहितानि॥०॥१८॥०॥

मन्त्रान्तरविनियोगं विवक्षुः कर्म्मान्तरमिदानीं वक्तुमारभते,—

त्रिरात्रोपोषितः पण्यहोमं जुहुयादिदमहमिमं विश्वकर्म्माणमिति॥ १९॥

त्रिरात्रोपोषितः,—इत्युक्तार्थम्। 'काम्येषु त्रिरात्राभोजनम्'—इति सिद्धत्वादेतदवाच्यम्,—इति चेत्। न। सिद्धमेव पुनरुच्यते। किमर्थम्?। आदरार्थम्। अथवा। नियमार्थमेतद्भविष्यति,—त्रिरात्रोपोषित एव पण्यहोमं जुहुयात्,—इति। किमतः?। एतदतो भवति,—'त्रीणि वा भक्तानि'—इत्येतत् पक्षान्तरमिह न भवति,—इति।

पण्यं विक्रेयद्रव्यं भण्यते। पण्याय होमः पण्यहोमः। तम्—पण्यहोमम्, 'इदमहम्,'—इति मन्त्रेण क्षिप्रहोमन्यायेन जुहुयात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आह। केन द्रव्येण जुहुयात्?। द्रव्यानादेशादाज्येन। एवमेके। उत्तरसूत्रदर्शनात् पश्ववयवेन। एवमपरे। येषां पशूनामवयव होमाद् विनाशः,—यथा मणिरत्नादीनाम्, तेषामाज्येन, येषां पुनरवयवहोमादपि न विनाशः,—यथा धान्यादीनाम्, तेषामवयवेनैव होमः। एवमन्ये। किं पुनरत्र युक्तम्?। पश्ववयवेन,—इत्याह। कुतः?। उत्तरसूत्रादेव। पशुशब्दो वृद्धावपि प्रयुज्यते,—इति तस्याप्यत्र ग्रहणमिच्छन्ति। एका चेयमाहुतिः। सकृच्च प्रयोगः॥

॥०॥ १९ ॥०॥

वाससस्तन्तून्॥ २०॥

वाससः पशस्य तन्तून् दशासूत्राणि जुहुयात्, पूर्व्वोक्तेन विधिना॥

॥०॥ २० ॥०॥

गोर्बालान्॥ २१॥

गोः पशस्य बालान् लाङ्गूललोमानि, जुहुयादित्यनुवर्त्तते॥०॥२१॥०॥

एवमितरेभ्यः पशुभ्यः॥ २२॥

इतरेभ्यः पशुभ्यः सकाशात्, एवमवयवमुद्धृत्य जुहुयात्। अत्र पशुहोमकर्म्मणः परिसमाप्तिः। फलमप्यस्य कर्म्मणः पशुमेव कल्पयितव्यं भवति। कुतः?। उपस्थितत्वात्। पशुहोममिति वचनाच्च॥०॥

॥ २२ ॥ ॥०॥

पूर्णहोमो यजनीयप्रयोगः॥ २३॥

'पूर्णहोमं यशसे जुहोमि'—इति पूर्णशब्दोपलक्षितेन मन्त्रेण होमः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्णहोमः । कर्त्तव्यः,—इति सूत्रशेषः । स खल्वयं पूर्णहोमो यजनीयप्रयोगो भवति । व्याख्यातमेतत् । होमश्चायमाज्येन करणीयः । द्रव्यानुपदेशात् । एका चेयमाहुतिः चिप्रहोमन्यायेन स्यात् । एवमुत्तरत्रापि ॥०॥ २३ ॥०॥

इन्द्रामवदादिति च ॥ २४ ॥

'इन्द्रामवदात्तमोवः'—इति मन्त्रेण च होमो यजनीयप्रयोगः ॥०॥ ॥ २४ ॥ ॥०॥

अनयोः खलु यजनीयप्रयोगाहुत्योर्मध्यात्,—

यशस्कामः पूर्व्वाᳬ सहायकाम उत्तराम् ॥ २५ ॥

यशस्कामः पूर्व्वामाहुतिं जुहुयात् । सहायकाम उत्तरामाहुतिं जुहुयात् ॥०॥ २५ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य अष्टमी काण्डिका ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोभिलीय-गृह्यसूत्रे

चतुर्थप्रपाठके नवमी काण्डिका।

पुरुषाधिपत्यकामोऽष्टरात्रमभुक्त्वा ॥ १ ॥

पुरुषाणामाधिपत्यं सेनापत्यादिकं कामयते,—इति पुरुषाधिपत्य कामः। अष्टरात्रम्,—अष्टौ अहोरात्राणि, अभुक्त्वा उपोष्य ॥०॥ ॥ १ ॥०॥

औदुम्बरान् सुवचमसेध्मानुपकल्पयित्वा ॥ २ ॥

उदुम्बरस्यैतान् औदुम्बरान्। तान् खल्विमान् वार्त्तानेव न तैजसान्,—इत्यवगच्छामः। कथम्?। इध्मेन सहैकयोगनिर्देशात्। सुवचमसेध्माः व्याख्याताः। तान् उपकल्पयित्वा,—उपकल्प्य सम्पाद्य,—इत्येतत्। चमसस्योपकल्पनं प्रणीतार्थम्। इध्मानामुपकल्पनम्—आज्यतन्त्रेणहोमप्रज्ञापनार्थम्। कथं ज्ञायते?। एवं खल्वमीषामुपकल्पनं दृष्टार्थं भवति। अन्यथा अदृष्टार्थत्वमेषां कल्पनीयं स्यात्। नचैतदुचितम्,—सम्भवति दृष्टे अर्थे ॥०॥ २ ॥०॥

प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधाय ॥ ३ ॥

कृतभाष्यं सूत्रम् ॥०॥ ३ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आज्यमादित्यमभिमुखो जुहुयात्;—अन्नं वा एकच्छन्दस्यꣳश्रोर्व्वा एषेति च ॥ ४ ॥

आदित्यमभिमुखः,—आभिमुख्येनादित्यमुखः, अन्नं वा,—इति मन्त्रेण, श्रोर्व्वा,—इति मन्त्रेण च, आज्यं जुहुयात्। पृथङ्मन्त्रद्वयनिर्देशः,—आहुतिद्वयार्थः। आदित्यमभिमुखः,—इति वचनात् प्रातराहुत्यनन्तरमेव होमोऽयं करणीयः,—इत्यवगच्छामः। कथं कृत्वा?। एवं खल्वादित्याभिमुखता प्राङ्मुखता च होतुः सम्पत्स्यते। तथाच सति, न कस्यापि शास्त्रस्य उपरोधो भविष्यति। इतरथा प्राङ्मुखशास्त्रं वा उपरोत्स्यते, आदित्याभिमुखशास्त्रं वा। तच्चानिष्टम्। ननु, आज्यम् —इति किमर्थम्?। आज्येन होमार्थम्। ननु, अवचनेऽपि तदेव प्राप्नोति?। प्राप्नोति। अनर्थकं तर्हि?। न,—इत्युच्यते। कस्मात्?। यस्मात् आज्यमित्यवचने अनादेशबलात् तत् प्राप्नोति, वचनेऽपि आदेशबलात् तदेव प्राप्नोति। तत् किमत्र चोद्यम्?—इति न खल्वधिगच्छामि। आदेशे खल्वेतत् वचनमाज्यस्य प्रापकं भवति, अनादेशे चान्यद्वचनम्। अनादेशे प्रापकं तु वचनमवष्टभ्य, आदेशवचनमाचिक्षिपति भवान्। नचैतदुचितम्। आचार्य्येच्छाधीनत्वादादेशानादेशयोः।

अथ, प्रयोजनान्तरमन्तरेण न ते परितोषः;—शृणु, तदपि। आज्यमित्यवचने मन्त्रलिङ्गादन्नेन होममपि कश्चिदाशङ्कीत कदाचित्,—इति इमामधिकामाशङ्कां निरसितुम्,—आज्यम्,—इत्याचार्य्यः सूत्रयाञ्चकार,—इति क्लिश्यते। अपर आह। “ ‘सर्पिस्तैलं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दधि पयो यवागूं वा',—इत्येतस्य व्यावृत्त्यर्थं पुनराज्यग्रहणम्। एवञ्च, अत्र आज्यमेव नियम्यते"—इति ॥०॥ ४ ॥०॥

अन्नस्य घृतमेवेति ग्रामे तृतीयाम् ॥ ५ ॥

अन्नस्य घृतम्,—इत्यनेन मन्त्रेण तृतीयामाहुतिं ग्रामे जुहुयात्। इयमप्याहुतिराज्येनैव स्यात्। कुतः?। द्रव्यान्तरानुपदेशात्। आज्यस्य च प्रकृतत्वात्। ग्रामेऽप्यग्नावेव होमो न ग्राम एव। 'ग्रामान्निष्क्रम्य,'—इत्येतद्वैपरीत्यमभिप्रयन् खल्वाचार्य्यः,—'ग्रामे,'—इत्याह,—इति श्लिष्यते। 'अग्निमुपसमाधाय'—इति खल्वनुवर्त्तत एव।

इदमिदानीं सन्दिह्यते। किमियमप्याहुतिरौदुम्बरस्रुवचमसादिना आज्यतन्त्रेण स्यात्, उत चिप्रहोमन्यायेन,?—इति। आज्यतन्त्रेण,—इति ब्रूमः। कस्मात्?। अधिकारात्। फलान्तरानुपदेशात्; तृतीयत्ववचनाच्च; ऐककर्म्यावगतेश्च। अन्यथा खल्वभिधानादेव तृतीयत्वप्राप्तेस्तृतीयामिति वचनमनर्थकं स्यात्। तस्मात्,—संख्यावचनादैककर्म्यं प्रतिपादयन् पूर्व्वोक्तधर्म्मसंबन्धमत्रापि दर्शयति,—इत्याश्रेयम् ॥०॥ ५ ॥०॥

गोष्ठे पशुकामः ॥ ६ ॥

गोष्ठे गवामावासे, अग्निमुपसमाधाय प्रकृतामाहुतिं जुहुयात्। कः?। पशुकामः। पशुशब्देन गौरेवाभिप्रेयते। कथं ज्ञायते?। गोष्ठे,—इति तस्यैव हृदयागतत्वात्, तत् परित्यागे च कारणविशेषाभावात्। पशुशब्देनाविशेषात् गोमेषमहिषादय उच्यन्ते,—इति केचित्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदमिदानीं सन्दिह्यते। किं कृत्स्नमेवाहुतित्रयं पशुकामस्य गोष्ठे उपदिश्यते, उताहो अनन्तरा तृतीयैवाहुतिः?,—इति। अनन्तरा तृतीयैव,—इति ब्रूमः। कस्मात्?। आनन्तर्य्यातिरेकात्। अभ्यासानुपदेशाच्च। तस्मात्,—तृतीयाम्,—इत्यनुवर्त्तते,—इति बोद्धव्यम्। अपर आह। अविशेषात् उत्तरत्रापि मन्त्रत्रयस्यानुवृत्तिदर्शनाच्च कृत्स्नमेवाहुतित्रयमिहोपदिश्यते,—इति।

स खल्वयं होमः पुरुषाधिपत्यकामस्यैव सतः पशुकामस्य गोष्ठे उपदिश्यते। दर्शपौर्णमासयाजिन एव सतः पशुकामस्य गोदोहेन प्रणयनोपदेशः,—इति यथा। कथं ज्ञायते?। तस्यैवाधिकारात्। तृतीयाम्,—इत्यनुवर्त्तनेनैककर्म्मप्रतिपत्तेश्च। 'गोष्ठे पशुकामः'—इत्येतावन्मात्रं खल्विहोच्यते, न तु किञ्चिदपि कर्त्तव्यमुपदिश्यते। भवितव्यन्तु तेन। तस्मात्,—आनन्तर्य्यातिरेकात् तृतीयामाहुतिं जुहुयात्,—इत्यनुषञ्जनीयम्। तस्मात्,—येयं तृतीया आहुतिः केवलं पुरुषाधिपत्यकामस्य ग्रामे उपदिष्टा, सैव तस्यैव पशुकामस्य सतः गोष्ठे उपदिश्यते,—इति श्लिष्यते। तस्मादधिकृताधिकारोऽयमुपदेशः ॥०॥ ६ ॥०॥

विदूयमाने चीवरम् ॥ ७ ॥

विदूयमाने,—"टु दु उपतापे"—इति स्मरणात् विशेषेण उपतप्यमाने। कस्मिन्?। गोष्ठे। कथं ज्ञायते?। अधिकारात्। सप्तमीनिर्देशाच्च। एतदनेनोक्तं भवति। गोष्ठे अग्निमुपसमाधायैव होमो न कर्त्तव्यः, किन्तु अग्निमुपसमाधायापि तावत् प्रतीक्षणीयं;—यावद्गोष्ठ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुपतप्यमानं भवति। तत उपतप्यमाने सति गोष्ठे होमः करणीयः, —इति। अपरे पुनरेतदविद्वांसो भाषन्ते—"गोष्ठस्योपतापासम्भवात् गोष्ठसंबन्धाङ्गेषु उपतप्यमानासु—इति द्रष्टव्यम्"—इति। तदेवं विदूयमाने गोष्ठे चीवरं जुहुयात्। चीवरशब्देन लोहचूर्णमुच्यते। कुतः?। "लोहचूर्णञ्च चीवरः"—इति वचनात्। तदत्र चीवरविधानादाज्यस्य निवृत्तिः स्यात्। पूर्व्वोक्तधर्म्मसंबन्धस्तु अत्रापि स्यादेव। तत्सम्बन्धेनैवोपदेशात्। या खल्वियं तृतीयाऽऽहुतिराज्येन ग्रामे स्यात्, सैव पशुकामस्य सतः चीवरेण गोष्ठे भवति,—इति खल्वेवोचाम। अत्र पुरुषाधिपत्यकामकर्म्मणोऽपवर्गः।

अन्यः पुनरन्यथेमं ग्रन्थं वर्णयाञ्चकार,—'गोष्ठेपशुकामः'—इत्यादिम्,—"पशुकामो गोष्ठे तृतीयामाज्याहुतिं जुहुयात्। पशुकामः,—इति निरपेक्षश्रवणात् अधिकृताधिकारे च प्रमाणाभावात् सर्व्वस्यैव पशुकामस्य होमोऽयं, न पुरुषाधिपत्यकामस्यैव सतः पशुकामस्य,—इति। तस्मात्, पुरुषाधिपत्यकामकर्म्मणः कर्म्मान्तरमिदम्। एवञ्च, अत्र अष्टरात्रोपोषणं न स्यात्, न वा उदुम्बरस्रुवादि,—इति। कर्म्मान्तरमाह। 'विदूयमाने चीवरम्'। गोष्ठस्योपतापासम्भवात् गोष्ठसंबन्धाङ्गेषु उपतप्यमानासु चीवरं लोहचूर्णं जुहुयात्। इदमपिकर्म्मान्तरम्। क्षिप्रहोमश्चायम्। एतेषां त्रयाणामपि कर्म्मणां सकृत् प्रयोगादेव फलं स्यात्। कुतः?। "अभ्यासानुपदेशात्"—इति ॥०॥ ७ ॥०॥

अथेदानीं कर्म्मान्तरमाह,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिभयेऽध्वनि वस्त्रदशानां ग्रन्थीन् बध्नीत ॥ ८ ॥

भयमेव प्रतिभयम्। प्रतिरुपसर्गः। प्रकर्षवाची वा। तेन, प्रकर्षेण भयं प्रतिभयम्,—इत्यर्थः। अथवा। प्रत्यासन्नं भयं प्रतिभयम्। अध्वनि पथि, प्रतिभये,—प्रत्यासन्ने भयहेतौ सति,—इत्येतत्। वस्त्रदशानाम्,—वस्त्रं वासः, अविशेषादधरीयमुत्तरीयञ्च स्वकीयमेव भण्यते। तस्य दशानां ग्रन्थीन्,—बहुवचनात् त्रीनेव, बध्नीत। अन्नं वा एकच्छन्दस्यम्,—इत्येतत्प्रभृतिभिस्तिसृभिर्ऋग्भिः। कुतः?। एतासामेव प्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च। आह। आनन्तर्यातिरेकात् तृतीययैव स्यात्?। उच्यते। "स्वाहाकारान्ताभिः"—इति वक्ष्यमाणसूत्रात् तिसृभिरेव स्यात्, न पुनरानन्तर्यातिरेकात् तृतीययैव। अतिक्रान्तसंबन्धस्याप्याचार्यानुमतत्वात् ॥०॥ ८ ॥०॥

स्ववाससोदशाऽभावे कथम्?। उच्यते,—

उपेत्य वसनवतः ॥ ६ ॥

वसनवतः,-दशायुक्त वसनवतः, 'वस्त्रदशानां ग्रन्थीन् बध्नीत,'—इत्यनुवर्त्तते। किं कृत्वा?। उपेत्य। उप,-समीपम्, इत्वा—गत्वा।

इयमपरा सूत्रद्वययोजना,—

अध्वनि पथि, प्रतिभये सति, वस्त्रदशानां त्रीन् ग्रन्थीन् बध्नीत, प्रकृताभिर्ऋग्भिः। किमात्मनो वस्त्रदशानाम्?। न। कस्य तर्हि?। 'उपेत्य वसनवतः'। वसनवतः सहगन्तुः कस्यचित्, वस्त्रदशानां ग्रन्थीन् बध्नीत। किं कृत्वा?। उपेत्य। एवं वा,—

'प्रतिभयेऽध्वनि वस्त्रदशानां ग्रन्थीन् बध्नीत'। अर्थादात्मनः। न

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केवलमात्मन एव। किं तर्हि?। 'उपेत्य वसनवतः'। चशब्दोऽत्र लुप्तवत् द्रष्टव्यः। वसनवतः,—इति च द्वितीयाबहुवचनान्तं पदम्। तदयमर्थः। वसनवतश्चैकसार्थगन्तॄन् सहायानुपेत्य तेषामपि वस्त्रदशानां ग्रन्थीन् बध्नीत ॥०॥ ६ ॥०॥

अहोमकत्वात् कर्म्मणः स्वाहाकारविलोपं मा प्रशाङ्क्षीत्,—इत्यत आह,—

स्वाहाकारान्ताभिः ॥ १० ॥

प्रकृताभि र्ऋग्भिः ॥०॥ १० ॥०॥

किं पुनरस्मिन् कर्म्मणि कृते फलं भवति?। उच्यते,—

सहायानाञ्च स्वस्त्ययनम् ॥ ११ ॥

सहायानां आत्मनः सह गन्तॄणां, चशब्दादात्मनश्च, स्वस्ति मङ्गलं तस्यायनं प्राप्तिः,—भयनिवृत्तिरित्येतत्। तस्या एवाभिप्रेतत्वेन मङ्गलरूपत्वात्। भवति,—इति सूत्रशेषः। अभिप्रेतार्थसिद्धिर्वा स्वस्ति शब्देनोच्यते। तस्यायनं प्रापकमेतत् कर्म्म,—इत्ययमर्थस्तदानीं वर्णनीयः। तदिदमुपरिष्टाद्दैवं वेदितव्यम्। भयस्यानियतकालत्वात् ॥ ॥०॥ ११ ॥०॥

आचितसहस्रकामोऽक्षतसक्ताहुतिसहस्रं जुहुयात् ॥ १२ ॥

आचितशतकामः,—इत्येतद्व्याख्यानेनैव, आचितसहस्रकामः,—इत्येतदपि व्याख्यातम्। अक्षतैर्यवैर्निष्पन्नाः सक्तवोऽक्षतसक्तवः, तेषामा-

5 B 2

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हुतिसहस्रं (चिप्रहोमन्यायेन) जुहुयात्,—अन्नं वा एकच्छन्दस्यम्—इत्येताभिर्ऋग्भिः। कुतः?। एतासामेवप्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च।

अत्र किञ्चिद्वक्तव्यमस्ति। आहुतिसहस्रं होतव्यमुपदिश्यते, ऋचश्च तत्र तिस्रः करणतयोच्यन्ते, तत् कथमयं होमः स्यादिति तावत् सन्दिह्यते। किं तिसृणामृचामनुरोधात् आहुतिसहस्रस्य त्रिरभ्यासः कर्त्तव्यः, आहोस्वित् तिसृभिरेव ऋग्भिरेकैका आहुतिर्होतव्या, उताहो आहुतिसहस्रं त्रिधा विभज्य ऋक्त्रयेण होतव्यम्?—इति। तत्र न तावदाद्यः पक्षः। कुतः?। गुणानुरोधेन प्रधानाभ्यासस्यायुक्तत्वात्। आहुतिसहस्रमिति संख्यावचनाच्च। नापि द्वितीयः। कस्मात्?। एकैकस्या एवर्चो होमनिर्व्वाहसामर्थ्यात्। तथात्वे खल्वन्त्याया एव ऋचः व्यवायाभावेन करणत्वापत्त्या आद्ययोः ऋचोः करणत्वाभावप्रसङ्गाच्च। तस्मात्, पारिशेष्यात् तृतीयः पक्षो ज्यायान्। तस्मात्, आहुतिसहस्रं त्रिधा विभज्य प्रथमया ऋचा तस्य प्रथमं भागम्, द्वितीयया ऋचा द्वितीयं भागम्, तृतीयया च ऋचा तृतीयं भागं जुहुयात्,—इति। अथ, एवमपि अन्त्या एका आहुतिः शिष्यते, कतमया पुनः ऋचा असौ होतव्या?। आद्यया,—इति ब्रूमः। कस्मात्?। मालान्यायेन पुनरपि तस्या एव उपस्थितत्वात्। तथा चोक्तम्।

"सहस्राहुतिसहस्रस्य पुरीषाणाञ्च कीर्त्तितम्।
त्रिधाऽभ्यासेन तत् कुर्य्यादाद्यमन्त्राऽऽहुतिर्भवेत्"।

इति ॥०॥ १२ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पशुकामो वत्समिथुनयोः पुरीषाहुतिसहस्रं जुहुयात् ॥ १३ ॥

पशून् कामयते,—इति पशुकामः। वत्सश्च वत्सा च वत्समिथुनम्। कथं ज्ञायते?। मिथुनशब्दस्य द्वन्द्ववाचित्वात्। तयोः वत्समिथुनयोः, पुरीषाणां शकृताम् आहुतयः—पुरीषाहुतयः, तेषां सहस्रं जुहुयात्। अन्नं वा एकच्छन्दस्यम्—इत्येवमादिभिर्ऋग्भिः। कुतः?। एतासामेव प्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च।

इदमिदानीं सन्दिह्यते। किं यदैव यदैव पुरीषं सम्पद्यते, तदैव जुहुयात्। उत पूर्व्वमेव सर्व्वं पुरीषं संगृह्य एकस्मिन्नेव पूर्व्वाह्णे आहुतिसहस्रं जुहुयात्?,—इति। एकस्मिन्नेव पूर्व्वाह्णे,—इति ब्रूमः। कस्मात्?। प्रधानस्य होमकर्म्मणो नानादिनकल्पनायां पारिभाषिककालबाधे च कारणविशेषाभावात्। पुनरपि सन्देहः। किं प्रकृतयोरेव वत्समिथुनयोः पुरीषसंग्रहः कार्य्यः, उत प्रकृतयोरन्ययोश्च कयोश्चिदनियमेन?-इति। प्रकृतयोरेव,—इति ब्रूमः। कुतः?। प्रकृतपरित्यागे हेत्वभावात्। तथा चोक्तम्।

"चतुर्णां वत्सवत्सानां प्रकृतानाञ्च गोमयम्।
एकस्मिन्नेव पूर्व्वाह्णे जुहुयात् सकृद्धोमवत्"।

इति। 'सकृद्धोमवत्'—इति वचनादत्रापि आहुतिसहस्रं त्रिधा विभज्य पूर्व्ववत् जुहुयात्,—इति द्रष्टव्यम् ॥०॥ १३ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अविमिथुनयोः क्षुद्रपशुकामः ॥ १४ ॥

क्षुद्रपशुकामः, अविमिथुनयोः—मेषमिथुनयोः, पुरीषाहुतिसहस्रं प्रकृताभिर्ऋग्भिः पूर्ववदेव जुहुयात् ॥०॥ १४ ॥०॥

वृत्त्यविच्छित्तिकामः कम्बूकान् सायं प्रातर्जुहुयात् क्षुधे स्वाहा क्षुत्पिपासाभ्याᳬं स्वाहेति ॥ १५ ॥

वृत्त्यविच्छित्तिकामः,—वृत्त्यर्थम्। कम्बूकान् फलीकरणकणान्। सायं प्रातर्जुहुयात्,—क्षुधे स्वाहा क्षुत्पिपासाभ्यां स्वाहेत्याभ्यां यजुर्भ्याम्। अत्रापि सायमाहुतेः पुरस्तात् प्रातराहुतेश्च परस्तात् होमः स्यात्। त्रिप्रहोमश्चायम् ॥०॥ १५ ॥०॥

माभैषीर्न मरिष्यसीति विषवता दष्टमद्भिरभ्युक्षन् जपेत् ॥ १६ ॥

विषमस्यास्तीति विषवान् सर्पादिः। तेन दष्टम्,—अविशेषात् पुरुषं स्त्रियं वा। अद्भिरुदकेन अभ्युक्षन् आभिमुख्येन सिञ्चन्, माभैषीरिति मन्त्रं जपेत्,—आ विषप्रक्षयात्। कथं ज्ञायते?। प्राणिपीडाऽपनयार्थत्वात् कर्मणः। अभ्युक्षन् जपेत्,—इति कुर्व्वन् अभ्युक्षणजपयोर्यौगपद्यं दर्शयति ॥०॥ १६ ॥०॥

तुरगोपायेति स्नातकः सम्बेशनवेलायां वैणवं दण्डमुपनिदधीत ॥ १७ ॥

स्नातको गृहमेधी। सम्बेशनं शयनं स्वापो निद्रा,—इत्यनर्थान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य वेलायां रात्रावित्यर्थः। कुतः?। दिवास्वापस्य निषेधात्। वैणवम्—वेणुर्वंशः तज्जं, दण्डं यष्टिम्, तुरगोपाय,—इति मन्त्रेण उप समीपे—शयनसन्निधौ,—इत्येतत्। निदधीत धारयेत्। दध धारणे। निशब्दप्रयोगात्तत्रैव निश्चलं धारयेत्, न तु मन्त्रप्रयोगं कृत्वा अन्यत्रापनयेत् ॥०॥ १७ ॥०॥

किमर्थं धारयेत्?—

स्वस्त्ययनार्थम् ॥ १८ ॥

मङ्गलप्राप्त्यर्थम्—चौराद्युपद्रववारणार्थमित्येतत् ॥०॥ १८ ॥०॥

हतस्ते अत्रिणा कृमिरिति कृमिमन्तं देशमद्भिरभ्युक्षन् जपेत् ॥ १९ ॥

कृमयः प्रसिद्धाः व्रणेषु जायन्ते। कृमयो विद्यन्ते यस्मिन्, तं कृमिमन्तम्, देशम्—प्राणिव्रणप्रदेशम्, न तु गोमयादि। कथं ज्ञायते?। प्राणिपीडापनयनकर्म्माधिकारात्। तत्राप्युत्तरसूत्रस्य पशुविषयत्वादेतस्य नरविषयतामवगच्छामः। तमिमं कृमिमन्तं देशं अद्भिरभ्युक्षन्, हतस्ते,—इत्यादि कृमिमन्त्रान् सर्व्वानेव जपेत्। कथं पुनर्ज्ञायते सर्व्वेषां कृमिमन्त्राणामत्र विनियोगः?—इति। उच्यते। कृमिमतो देशस्याभ्युक्षणे विनियोगविधानात् सर्व्वेषां कृमिमन्त्राणामत्रैव विनियोगमवगच्छामः। अन्येषां कृमिमन्त्राणां विनियोगान्तरादर्शनात्। न खल्वविनियुक्ता एवान्ये कृमिमन्त्राः पठ्यन्ते,—इति युक्तम्। तस्मादुत्तरत्राहणमन्त्राणां विनियोगोपदेशादिह सर्व्वेषामेव कृमि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्त्राणां विनियोगः,—इत्यादरणीयम्। अत्राप्यभ्युक्षणसमकालमेव मन्त्रजपः। एवं कृते किल कृमिपीड़ोपशान्तिर्भवति ॥०॥ १९ ॥०॥

पशूनाञ्चेच्चिकीर्षेदपराह्णे सीतालोष्टमाहृत्य वैहायसं निदध्यात् ॥ २० ॥

पशूनां गवाश्वादीनां, चेत् यदि, चिकीर्षेत् कर्त्तुमिच्छेत्। किम्?। कृमिपीड़ोपशान्तिम्। कथं ज्ञायते?। अधिकारात्। तदा, अपराह्णे—न पूर्व्वाह्णे। सीता लाङ्गलपद्धतिः। तस्या लोष्टम्, लोष्टः प्रसिद्धः, तमाहृत्य आनीय, वैहायसं आकाशस्थं, निदध्यात् धारयेत्,—गृहपटलादिस्थं धारयेदित्येतत्। निशब्दः पूर्व्ववत् ॥०॥ २० ॥०॥

तस्य पूर्व्वाह्णे पांशुभिः परिकिरन् जपेत् ॥ २१ ॥

तस्य लोष्टस्य। पूर्व्वाह्णे—न अपराह्णे। अथ, सिद्धत्वादेतदवाच्यम्? अथोच्यते,—कारणं वक्तव्यम्। उच्यते। एतदवचने खल्वपराह्णे,—इत्यनुवर्त्तेत, अतस्तन्निवृत्त्यर्थम्,—पूर्व्वाह्णे,—इत्युच्यते। पांशुभिः रेणुभिः, परिकिरन्,—प्रकृतस्य पशोः कृमिमन्तं देशम्। प्रकृतमेव मन्त्रं जपेत्। कुतः?। तस्यैव प्रकृतत्वात्। मन्त्रान्तरानुपदेशाच्च। परिकिरणसमकालं मन्त्रजपो व्याख्यातः ॥०॥ २१ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य नवमी काण्डिका ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुर्थप्रपाठके दशमी काण्डिका ।

क्रमप्राप्तानां मन्त्राणां विनियोगमिदानीं वक्तुमारभते,—

उत्तरतो गां बद्धोपतिष्ठेरन्नर्हणा पुत्रवाससेति॥ १॥

उत्तरतः उत्तरस्यां दिशि । कस्य? । अर्हणप्रदेशस्य । कथं ज्ञायते? । 'यत्रैनमर्हयिष्यन्तः स्युः'—इति सूचयिष्यमाणत्वात् । गां स्त्रीगवीं बद्धा । स्त्रीगवीमिति कुतो वर्ण्यते? । लिङ्गादित्याह । धेनुः,—इति पयस्वती—इति चैवमादिमन्त्रलिङ्गं खल्वेवमनुगृह्यते । न च पुंगव परिग्रहे कारणं पश्यामः । तस्माद् यथोक्त एवार्थः । तदेवं गां बध्वा-तामेवाभिमुखाः सन्तः, अर्हणा पुत्रवाससा,—इति मन्त्रेणोपतिष्ठेरन्—आराधयेयुः । उपस्थितत्वान्मन्त्रलिङ्गाच्च तामेवोपतिष्ठेरन् न पुनरर्हणीयमिति बोद्धव्यम् । के उपतिष्ठेरन्? । ये अर्हयिष्यन्तः स्युः । कथं ज्ञायते? । उपस्थितत्वात् । बहुवचननिर्देशाच्च । यदि पुनरर्हणीय एवोपतिष्ठेत,—तर्ह्येकवचनं कुर्य्यात् । 'यत्रैनम्'—इत्यर्हणीयस्यैकवचनेन निर्देशात् । आह । अर्हयितुरेकत्वात् अस्यामपि वर्णनायां नैव बहुवचनस्यार्थवत्तां पश्यामः । एवन्तर्हि बहुवचनं कर्त्तुरनियमार्थं भविष्यति । कथं नाम? । ये केचिद्गृह्या उपतिष्ठेरन्, न पुनरर्हयितैवेत्यस्ति नियमः,—इत्यभिप्रायः । अथवा । बहुवचनं कुर्व्वन्नाचार्य्यः सर्व्वैरेव गृह्यैरर्हणीयार्हणार्थमप्रमत्तैर्भवितव्यमित्युपदिशति ।

5 c

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथाच वाजसनेयके प्रवचने। "यत्रचार्हा आगच्छति, सर्व्वे गृह्या इतरे तत्र वेष्टयन्ति, अथेह परित्राता भवति"—इति ॥०॥ १ ॥०॥

एवमर्हयितृषूपतिष्ठमानेषु खल्वयमर्हणीयः,—

इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामीति प्रतितिष्ठमानो जपेत् ॥ २ ॥

प्रतितिष्ठमानः ऊर्द्धस्तिष्ठन्, इदमहमिति मन्त्रं जपेत्। अर्थात् जपानन्तरमासने उपविशेत्। कथं ज्ञायते?। 'इदम्' आसनम्, अधितिष्ठामि,—इति मन्त्रलिङ्गात्। समस्तमन्त्राम्नानं किमर्थम्?। निराकाङ्क्षार्थमहममुक इति नामादेशो नास्तीति प्रज्ञापनार्थम्। समाम्नायप्रज्ञापनार्थञ्च ॥०॥ २ ॥०॥

कुत्र प्रतितिष्ठमानो जपेत्?

यत्रैनमर्हयिष्यन्तः स्युः ॥ ३ ॥

यत्र यस्मिन् प्रदेशे, एनमर्हणीयमर्हयिष्यन्तः—अर्हणं करिष्यन्तः अर्हयितुमिच्छन्तः इत्येतत्। स्युः भवेयुः गृह्याः। बहुवचनं व्याख्यातम्। तत्र प्रदेशे प्रतितिष्ठमानो जपेत् ॥०॥ ३ ॥०॥

यदा वाऽर्हयेयुः ॥ ४ ॥

यदा यस्मिन् काले, अर्हयेयुरर्हणं कर्त्तुमारभेयुः। बहुवचनं पूर्व्ववत्। तदा वा प्रतितिष्ठमानो जपेत्,—इति गतेन संबन्धः।

एवं वा—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाशब्दः तुशब्दार्थः। यदा पुनरेनमर्हयेयुस्तदा विष्टरादीनि वेदयेरन्,—इत्यनागतेनाभिसंबन्धो वर्णनीयः ॥०॥ ४ ॥०॥

अथेदानीमर्हणविधिविवक्षयेदमाह,—

विष्टरपाद्यार्घ्याचमनीयमधुपर्कानेकैकशस्त्रिस्त्रिर्वेदयेरन् ॥ ५ ॥

विष्टरः,—

"ब्रह्मविष्टरयोश्चापि सन्देहे समुपस्थिते।
ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः।
कतिभिस्तु भवेद्ब्रह्मा? कतिभिर्विष्टरः स्मृतः?।
पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन तु विष्टरः"।

इति आचार्य्यपुत्रेण गृह्यासंग्रहे व्याख्यातः। कात्यायनेन तु कर्म्मप्रदीपे,—

"यज्ञवास्तुनि मुष्ट्याञ्च स्तम्बे दर्भवटौ तथा।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि"।

इति विष्टरे दर्भसंख्या निषिद्धा। तदनयोर्विकल्पः,—पञ्चाशदर्द्धैर्वा कुशैर्विष्टरः स्यात्, असंख्यातैर्वा,—इति। कथं ज्ञायते?। द्वयोरेवास्मदाचार्य्याभ्यामनुशिष्टत्वात् अनन्यगतेर्वचनात्। सम्भवे पञ्चाशदर्द्धैरसम्भवे पुनरपरिमितैरपि कुशैर्विष्टरो भवति,—इति नारायणोपाध्यायाः। रघुनन्दनस्तु दर्भसंख्यावचनमाचार्य्यपुत्रस्येत्येतदजानानः कात्यायनवचनविरोधात् तद्वचनं शाखान्तरीयमितिवर्णयन् कल्पनारसिकत्वमात्मनः ख्यापयाञ्चकार। अन्यदपि दर्भवटुप्रसङ्गात् पूर्व्वमेव व्याख्यातम्।

5 c 2

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स खल्वयं विष्टरः एको वा स्यात् द्वौ वा,—इत्यनियमः। कथं ज्ञायते?। 'द्वौ चेत्'—इति वक्ष्यमाणसूत्रपर्य्यालोचनात्।

पाद्यम्-पादप्रक्षालनार्थमुदकम्। तथाच लाट्यायनसूत्रम्। "तत्रै-तदाहरन्ति,—विष्टरं पादप्रक्षालनम् अर्घ्यम् आचमनीयं मधुपर्क-मिति"—इति। द्राह्यायणसूत्रम्। "अर्हयिष्यन्त आहरन्ति,—विष्टरौ पाद्यमर्घ्यम्"—इत्यादि। "विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्कौ गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्ते"—इति च गृह्यान्तरम्।

"पादार्थमुदकं पाद्यं केवलं जलमेव तत्।
तत्तैजसेन पात्रेण शङ्खेनापि निवेदयेत्"।

इति च स्मर्य्यते पुराणेषु। तस्मात्,—'पाद्यम्'—इत्येवमेव प्रयोगो भट्टनारायणाद्यनुमत आदरणीयः। यच्च भवदेवभट्टेन 'पाद्याः',—इति लिखितम्, यदपि सरलायाम्—'पाद्याः',—इति प्रयोगमभि-धाय, पाद्याः—इति अप्संबन्धात् स्त्रीबहुवचनम्,—इति वर्णितम्। तदसङ्गतम्। कुतः?। अस्मच्छास्त्रे पाद्यमिति निर्देशात्। न खलु वीक्षणविधौ मन्त्रे च 'अपः'—इति दर्शनादत्रापि तथा कल्पनायां किञ्चित् प्रमाणमस्ति। तस्मादस्मदुक्त एव प्रयोगः।

अर्घ्यम्—

"दध्यक्षतसुमनस आपश्चेति चतुष्टयम्।
अर्घ्य एष प्रदातव्यो गृह्ये ये अर्घ्यार्हाः स्मृताः।
दध्यक्षतसुमनसो घृतं सिद्धार्थका यवाः।
पानीयञ्चैव दर्भाश्च अष्टाङ्गो ह्यर्घ्य उच्यते"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति गृह्यासंग्रहोक्तलक्षणम्। 'स खल्वयमर्घ्यः कांस्यपात्रेणार्हणीयस्याञ्जलौ निनेतव्यः। कस्मात्?।

"कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ"।

इति वचनात्—इति वर्णयन्ति। आचमनीयम्—आचमनार्थमुदकम्।

मधुपर्कः,—

"सर्पिषा मधुना दध्ना अर्च्चयेदर्हयन् सदा।
ऋषिप्रोक्तेन विधिना मधुपर्केण याज्ञिकः।
कंसे त्रितयमासिच्य कंसेन परिसंवृतम्।
परिश्रितेषु देयः स्यान्मधुपर्क इति श्रुवम्"।

इति।

"दधनि पयसि वाऽथवा कृतान्ने
मधु दद्यान्मधुपर्कमेतदाहुः।
दधि मधु सलिलेषु सक्तवः
पृथगेते विहिता स्त्रयस्तु मन्थाः"।

इति च गृह्यासंग्रहोक्तलक्षणः। तदेवं छन्दोगानां स्वशाखापरिभाषितश्चतुर्विधो मधुपर्को भवति;—सर्पिर्मधुदधि, दधनिमधु, पयसि मधु, कृतान्ने मधु च,—इति। तत्र प्रथमो मधुपर्कः कंसस्थः कंस परिवृतश्च भवति। इतरेषु पुनर्नैषनियमः। कस्मात्?। "कंसे त्रितयमासिच्य"—इत्यादिना तत्रैव तदभिधानात्। यथा खल्वभिक्रमणं प्रयाजमात्रस्यैवाङ्गं नानुयाजादीनाम्, तद्वदत्रापि स्यात्। रघुनन्दनस्तु छन्दोगोऽप्येतदजानानः,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"साक्षतं सुमनोयुक्तं उदकं दधिमिश्रितम् ।
अर्घ्यं, दधि मधुभ्याञ्च मधुपर्को विधीयते" ।

इति वचनं लिखित्वा, 'दधिमधुमात्रेण मधुपर्काभिधानं घृतासम्भव-परम्'—इति स्वच्छन्दादेव परिकल्प्य, 'तत् सम्भवे गोभिलः'—इत्यभिधाय, "मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन"—इति पारस्करगृह्यसूत्रम्,—"पिहितं कांस्यस्थम्"—इत्याकुलीकृत्य लिखित्वा, 'पूर्व्ववचने पात्रानुपदेशात् कांस्यपात्रं विनापि मधुपर्को दीयते'—इति ब्रुवन्नात्मनः कल्पनानैपुण्यं ख्यापयाञ्चकार । पृथगमीषां मधुपर्काणामेकविशेषस्यान्यत्राप्रसक्तेः किमर्थमेतावान् प्रयासः,—इति न विद्मः । परमार्थतः पुनर्मधुपर्काणां पृथक्त्वमविदुषा वृथैव प्रलपितमिति प्रेक्षावतामनपेक्षणीयं भवति। अपि च। मध्वसम्भवे घृतेन मधुपर्कं गृह्यान्तरकाराः स्मरन्ति, स तु स्वातन्त्र्यातिशयान्मन्यते,—घृतासम्भवे दधिमधुमात्रेण मधुपर्कः,—इत्यहोप्रमादः । तथाच गृह्यान्तरम् । "दधनि मध्वानीय सर्पिर्वा मध्वलाभे"—इति । अपि च । अहोवतायं साहसिको,—यः पारस्करीयं सूत्रमाचार्य्यीयं ब्रुवन् पारमर्षञ्च सूत्रमाकुलयन्नापत्रपते । तत् किमत्र ब्रूमः । विस्तरतस्त्वेतत् गृह्यासंग्रहभाष्ये वक्ष्यामः। अग्निस्वामिनोपि प्रथमं मधुपर्कमविद्वांस इव कल्पसूत्रवृत्तौ भाषन्ते,—मधुना पृक्तं दधिपयः कृतान्नं वा मधुपर्कः—इति । 'मधुपर्को दधि मधुयुक्तम्'—इति ब्रुवाणो भट्टनारायणोप्यसम्यग्दर्शित्वमात्मनो नातिशेते । तदस्तु किं विस्तरेण?।

सूत्रशेषमिदानीं वर्णयामहे । तानेतान् विष्टरादीन् मधुपर्कान्तान् द्रव्यविशेषान् एकैकशः प्रत्येकं त्रिस्त्रिरुच्चार्य्य, वेदयेरन्—निवेदयेरन्,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यल्पत्वादर्हयितुः कर्म्म प्रथमं सूचितम्। वेदयेरन्—ज्ञापयेयुः—इति केचित्। निवेदनञ्च दत्तहस्तेनादाय कर्त्तव्यम्। कर्त्तुरङ्गस्योपदेशाभावे तस्यैव करस्य कर्म्मपारगत्वात्। तथा चोक्तम्।

"कर्म्मोपदिश्यते यत्र कर्त्तुरङ्गं न चोच्यते।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः"।

इति। तस्मात्,—विष्टरनिवेदने उत्तानहस्ताभ्याम्—इत्यसङ्गता कल्पना भवदेवभट्टस्य। सुखावबोधार्थं प्रयोगः प्रदर्श्यते। विष्टरो विष्टरो विष्टरः, पाद्यं पाद्यं पाद्यम्, अर्घ्यमर्घ्यमर्घ्यम्, आचमनीयमाचमनीयमाचमनीयम्, मधुपर्को मधुपर्को मधुपर्कः,—प्रतिगृह्यताम्—इति सर्व्वत्र वाक्यशेषं समापयेत्। कुतः?। तथा प्रसिद्धेः। योग्यत्वाच्च। विष्टरद्वयपक्षे द्विवचनान्तेन प्रयोगः,—इति भट्टनारायणोपाध्यायाः। पृथङ् निवेदनम्,—इति भवदेवभट्टः ॥०॥ ५ ॥०॥

अथेदानीमर्हणीयकर्म्मविधिर्वक्तव्यः। स खल्वर्हयित्रा दत्तं विष्टरादिकं—विष्टरं प्रतिगृह्णामि,—इत्यादिना गृह्णीयात्। कथं ज्ञायते?। योग्यत्वात्। प्रसिद्धेश्च। अर्घ्यमधुपर्कयोस्तु विशेषं वक्ष्यामः। स खल्वयमर्हणीयः विष्टरं गृहीत्वा,—

या ओषधीरित्युदञ्चं विष्टरमास्तीर्य्याध्युपविशेत् ॥ ॥ ६ ॥

या ओषधीः,—इत्यनया ऋचा उदञ्चमुत्तराग्रं विष्टरमास्तीर्य्य, विष्टरम् अधिलक्षीकृत्य आसनस्योपरि उपविशेत्। क्व आस्तीर्य्य? आसने। कथं ज्ञायते?। "तामद्यमस्मिन्नासने"—इति मन्त्रलि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञात्। स खल्वयं मन्त्रः विष्टरस्यासनास्तरणे विनियुक्तः। कुतः?। उपवेशनस्य पूर्व्वमेव सिद्धत्वात्, इति व्याख्यातारः ॥०॥ ६ ॥०॥

द्वौ चेत् पृथगृग्भ्याम् ॥ ७ ॥

चेत् यदि, द्वौ विष्टरौ अर्हयित्रा दत्तौ स्याताम्, तदा पृथक्— नाना, ऋग्भ्याम्—या ओषधीरित्येताभ्यामित्यर्थः। आस्तीर्य्याध्युपविशेत्,—इत्यनुवर्त्तते। ऋग् इयं मन्त्रब्राह्मणादवगन्तव्यम्। अत्र, पृथक्—इति करणात् निवेदनं युगपदवगम्यते। चेत्,—इति करणाच्च नातीव द्वयोरावश्यकत्वम्,—इति ॥०॥ ७ ॥०॥

किं द्वितीयमपि विष्टरमविशेषेणासन एवास्तीर्य्य उपर्य्युपविशेत्?। न। किन्तर्हि?—

पादयोरन्यम् ॥ ८ ॥

अन्यमपरम्—द्वितीयं विष्टरम्, या ओषधीरितिमन्त्रेण पादयोरधस्तादास्तीर्य्याध्युपविशेदित्यर्थः। पादयोरध आस्तीर्य्य उपरि पादौ तूष्णीं कुर्य्यात्,—इति भट्टभाष्यसरले ॥०॥ ८ ॥०॥

यतो देवीरित्यपः प्रेक्षेत ॥ ९ ॥

यतो देवीः,—इत्यनेन मन्त्रेण, अपः,—पादप्रक्षालनार्थमुदकम्–पाद्यमित्येतत्। प्रेक्षेत अर्हणीयः ॥०॥ ९ ॥०॥

तेनोदकेन खल्वयमर्हणीयः,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सव्यं पादमवनेनिज इति सव्यं पादं प्रक्षालयेत्, दक्षिणं पादमवनेनिज इति दक्षिणं पादं प्रक्षालयेत् ॥ १० ॥

सव्यं पादम्,—इति मन्त्रेण, सव्यं वामं, पादं प्रक्षालयेत्। अनेनैव सूत्रशेषो व्याख्यातः। प्रक्षालयेत्,—इति क्रियाभ्यासः; निर्द्देशक्रमेण पादयोः प्रक्षालनार्थः। अन्यथा उदकसंस्थतानुरोधात् दक्षिणं प्रक्षाल्य ततः सव्यस्य प्रक्षालनं स्यात्। तच्चानिष्टम्। तथा च स्मरणम्।

"पादं प्रक्षालयेद्विप्रो दक्षिणं प्रथमं सदा।
शूद्रस्तु वामं प्रथमं सामवेदी तथा बधूः"।

इति।

"सामगः क्षालयेत् सव्यमादावन्यस्तु दक्षिणम्"।

इति चैवमादि ॥०॥ १० ॥०॥

पूर्व्वमन्यमपरमन्यमित्युभौ शेषेण ॥ ११ ॥

पूर्व्वमन्यमिति मन्त्रेण उभौ पादौ शेषेणावशिष्टेनोदकेन प्रक्षालयेत्—अर्हणीयः। सन्निकर्षातिशयाद्दक्षिणस्यैव पादस्य प्रक्षालनं स्यात्,—इति तन्निरासार्थम्—उभौ,—इत्याह। आह। पूर्व्वमन्यमित्युभौ शेषेण,—इति वक्तव्ये, पूर्व्वमन्यमपरमन्यमित्युभौ शेषेण,—इति गुरुकरणं किमर्थम्?। क्रमविशेषार्थम्,—इति ब्रूमः। कथं नाम?। एकैकपादप्रक्षालने यस्य पूर्व्वं प्रक्षालनं यस्य च पश्चात्, उभयपादप्रक्षालनपक्षेऽपि तस्यैव पूर्व्वं तस्यैव च पश्चात् प्रक्षालनम्—इति।

5 D

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेतत् क्रमविशेषसूचनार्थं पूर्व्वापरत्वानुकीर्त्तनमिति बोद्धव्यम् ॥ ॥०॥ ११ ॥०॥

अन्नस्य राष्ट्रिरसीत्यर्घ्यं प्रतिगृह्णीयात् ॥ १२ ॥

अन्नस्य राष्ट्रिरसि,—इत्यनेन मन्त्रेण अर्घ्यं यथोक्तलक्षणं प्रतिगृह्णीयात्—अर्हणीयः। अर्घ्यं प्रतिगृह्णामि,—इत्यर्घ्यं प्रतिगृह्णीयादित्यसङ्गतैषा कल्पना भवदेवभट्टस्य। 'प्रतिगृह्णीयात्',—इत्यस्य अञ्जलौ गृहीत्वा शिरसि दद्यात्,—इति रघुनन्दनव्याख्यानेऽपि प्रमाणं न पश्यामः। मन्त्रानुपदेशात् तूष्णीमेव शिरस्यर्घ्यं दद्यात्,—इति तु स्यात् ॥०॥ १२ ॥०॥

यशोऽसीत्याचमनीयमाचामेत् ॥ १३ ॥

यशोसि,—इति मन्त्रेणाचमनीयमाचमनार्थमुदकम्, आचामेत् सम्यक् भक्षयेत्,—अर्हणीयः। आचामेत्,—इति करणात्,—वारत्रयमुदकं भक्षयेत्, अथ यथोक्तेन विधिना इन्द्रियाण्युपस्पृशेत्,—इत्यवगच्छामः। 'तच्च सकृन्मन्त्रेण भक्षयित्वा द्विस्तूष्णीं भक्षयेत्'—इति भट्टभाष्यम् ॥ ॥०॥ १३ ॥०॥

यशसो यशोसीति मधुपर्कं प्रतिगृह्णीयात् ॥ १४ ॥

यशसो यशोसि,—इत्यनेन मन्त्रेण मधुपर्कमर्हणीयः प्रतिगृह्णीयात्। अपरे पुनरेतदविद्वांसो भाषन्ते,—मधुपर्कं प्रतिगृह्णामीति मधुपर्कं प्रतिगृह्णीयात्,—इति ॥०॥ १४ ॥०॥

तस्य खल्वस्य मधुपर्कस्य,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यशसो भक्षोसि महसो भक्षोसि श्रीर्भक्षोसि श्रियं मयि धेहीति त्रिः पिबेत् ॥ १५ ॥

यशसो भक्षोसि,—इत्येवमादिना मन्त्रेण, त्रिः—वारत्रयं पिबेदर्हणीयः। आह। समस्तमन्त्राम्नानं किमर्थम्?। उच्यते। मन्त्रे भक्षशब्दस्य त्रिः पाठात् त्रिः पानविधानाच्च भक्षशब्दान्तैरेव मन्त्रावयवैः पानं स्यात्,—इत्यपि कदाचिदाशङ्का स्यात् कस्यचिन्मन्दमतेः। अतस्तन्निरासार्थं मन्त्रान्तेन पानप्रतिपादनार्थम्, समाम्नायप्रज्ञापनार्थञ्च समस्तमन्त्राम्नानम्,—इति भट्टनारायणप्रभृतयः। तस्मात्, कौथुमादीनां मन्त्रान्तेनैव पानम्। येषान्तु 'श्रियो भक्षोसि'—इति मन्त्रपाठः, तेषां मन्त्रावयवैरेव पानं स्यात्। तथा च छन्दोगगृह्यान्तरम्। "मधुपर्कं त्रिः पिबेद् यशसो महसः श्रिय इति, तूष्णीं चतुर्थम्" इति। तद्त्र, मन्त्रप्रतीकोपादानात् प्रतीकैरेव पानमवगम्यते। 'श्रीर्भक्षोसि'—इति खल्वस्मच्छाखायां मन्त्रपाठः।

इदमिदानीमत्र सन्दिह्यते। किं प्रतिपानं मन्त्रावृत्तिः, उत सकृन्मन्त्रेण पानत्रयम्?—इति। सकृन्मन्त्रप्रयोगः,—इति केचित्। कुतः?। "एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवाचनं कृत्वा,"—इति वचनात्। तदसङ्गतम्। कस्मात्?। द्रव्यभेदात्। द्रव्यभेदः खल्वत्र भवति। न हि यदेवादितः पिबति, परस्तादपि तदेव पिबति,—इत्यप्रमत्तः शक्नोति वदितुम्। तस्मादस्त्यत्र द्रव्यभेदः। उत्तरत्र तूष्णीमिति करणाच्चात्र प्रतिपानं मन्त्रावृत्तिमवगच्छामः। आह। मध्ये तर्हि आचमनं प्राप्नोति? अन्यथोच्छिष्टः कथं द्वितीयं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृतीयञ्च पानं करिष्यति, मन्त्रं वा पठिष्यति। उच्यते। उत्तरञ्च आचान्तोदकाय,—इति करणादिहोच्छिष्टतैव न भवतीत्यवगच्छामः। तस्मात्, प्राणाग्निहोत्रवत् सोमभक्षणवच्च अकृताचमनस्यैव मन्त्रपाठः स्यात्। तथाच गृह्यासंग्रहः।

"मधुपर्के तथा सोमे अप्सु प्राणाहुतीषु च।
अनुच्छिष्टो भवेद्विप्रो यथा वेदविदो विदुः।
प्राणाहुतिषु सोमेषु मधुपर्के तथैव च।
आस्यहोमेषु सर्व्वेषु नोच्छिष्टो भवति द्विजः"।

इति। इदमपरं चिन्त्यते। मधुपर्कस्य पिवति—चोदना तावदुपलभ्यते, मन्त्रे च भक्षशब्दश्रुतिः। तत्र, किं पात्रेण पातव्यम्? आहोस्वित् हस्तेन भक्षयितव्यम्?—इति। तत्र केचिदाहुः। मन्त्रलिङ्गात् प्रसिद्धेश्च हस्तेन भक्षयितव्यम्। पिवति चोदना तु भोजनधर्म्मस्य पूर्व्वापरद्विराचमनादेर्निवृत्त्यर्थतयाप्युपपद्यते,—इति। अपरे ब्रुवन्ति। मन्त्राणामविधायकत्वात् प्रसिद्धेश्चानैकान्तिकत्वात् विधिवलीयस्त्वाच्च पात्रेण पातव्यम्,—इति। अन्ये तु मन्यन्ते। मधुसंयोगात् द्रवश्चेन्मधुपर्कः स्यात्, तदा पात्रेण पातव्यम्। अथ दध्नः काठिन्यात् पानानुपपत्तिः, प्रागेव तु कृतान्नस्य, तदा हस्तेन भक्षयितव्यम्—इति। तदत्र भवन्तो भूमिदेवाः प्रमाणम्॥०॥ १५ ॥०॥

तूष्णीं चतुर्थम्॥ १६ ॥

मधुपर्कस्य पिवेत्॥०॥ १६ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूय एवाभिपाय शेषं ब्राह्मणाय दद्यात् ॥ १७ ॥

भूयः—पुनरपि, एवकारकरणात,—तूष्णीमेव, अभिपाय आभिमुख्येन पीत्वा, शेषमवशिष्टं ब्राह्मणाय दद्यात्। न च पुत्राय शिष्याय वा, न पुनरविशेषेण यस्मै कस्मैचित्। कथं ज्ञायते?। "उच्छिष्टं कस्यचि न्न पातव्यं नापि दातव्यम्"—इति शास्त्रान्तरे अन्यस्मै उच्छिष्टदानस्य अन्योच्छिष्टभक्षणस्य च निषेधनात्। गुर्वाद्युच्छिष्टभोजनन्तु प्रसिद्धमेवेति न तदुपपादनार्थमुपक्रमः। तदभावे पुनरब्राह्मणायापि दद्यात्, तच्च अद्भिरभ्युक्ष्य,—इति विशेषः। तथा च द्राह्यायणसूत्रम्। "तदभावेऽद्भिः सम्प्रोक्ष्याब्राह्मणाय"—इति। लाट्यायनोऽप्येवमेव सूत्रयाञ्चकार ॥०॥ १७ ॥०॥

आचान्तोदकाय गौरिति नापितस्त्रिर्ब्रूयात् ॥ १८ ॥

आचान्तोदकाय अर्हणीयाय। तादर्थ्ये चतुर्थी। आचान्तोदकमर्हणीयमुद्दिश्य,—इति वा वर्णनीयम्। नापितो गौरिति त्रिरुच्चैर्ब्रूयात्। आचान्तोदकाय,—इति कुर्व्वन् उच्चैस्त्वं द्योतयति। कथं नाम?। यथा स वर्हणीयः शृणोति, तथोच्चैर्ब्रूयात्,—इति। एवं खल्वाचान्तोदकार्थता कथनस्य सम्पत्स्यते। अन्ये तु वर्णयन्ति। 'आचान्तोदकाय,—इति सप्तम्यर्थे चतुर्थी। तेन, अर्हणीये आचान्तोदके सतीत्यर्थः,'—इति। मधुपर्कभक्षणे उच्छिष्टता न प्राप्नोति,—इति खल्वाचार्य्य आचान्तोदकाय,—इत्याह। तेन, इतः पूर्व्वं नास्त्येवाचमनम् ॥०॥ १८ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नापितेन त्रिर्गोरित्युक्ते खल्वयमर्हणीयः, तमेव नापितम्,—

मुञ्च गां वरुणपाशाद् द्विषन्तं मेऽभिधेहीति तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिवतूदकमिति ब्रूयात् ॥ १९ ॥

मुञ्च गामिति मन्त्रं ब्रूयात्। आह। समस्तमन्त्राम्नान किमर्थम्?। समाम्नाय प्रज्ञापनार्थम्। एवमेव मन्त्रस्य पाठार्थञ्च। तेन, मे,—इत्यादौ निराकाङ्क्षत्वार्थं न नामप्रयोगः। तेन, अमुष्य,—इत्यप्यनूह एव स्यात्,—इति केचित्। ते खलु, 'मेऽभिधेहीति'—इत्यत्र, इतिकारं किमिति न लिखितवन्तः,—इति प्रष्टव्याः। तस्मात्, 'अमुष्य'-पदस्थाने तावदर्हयितुर्नामादेशः कर्त्तव्यः। कुतः?। अदः पदस्थाने नामादेशस्यास्माभिः पूर्व्वमुपपादितत्वात्। "समस्तमन्त्राम्नानं 'जहि' 'अमुष्य'—इति पदयोरन्तरा शब्दान्तराध्याहारशङ्कानिवृत्त्यर्थम्। अन्यथा, मम विष्णुदत्तस्य च,—इत्येवं प्रयोगः स्यात्। तच्चायुक्तम्। मेऽभिधेहीति मे—शब्देन तदर्थसिद्धेः"—इति केचित्। तेषामपि तदुक्तयैव युक्त्या अध्याहारशङ्काया अप्रसक्तेः समस्तमन्त्राम्नानं किमर्थमिति न विद्मः। मेऽभिधेहीति,—इत्यत्र इतिकरणं किमर्थम्?। परस्तान्मन्त्रपदस्य रूपान्तरत्वप्रज्ञापनार्थम्। प्रागिति शब्दप्रक्षेपात् यथाऽवस्थितानामेव मन्त्रपदानां प्रयोगार्थञ्च। तेन, 'अमुष्य'-पदस्थाने नामादेशः स्यात्। तर्हि 'तम्'—इत्यात्रापि स्यात्?। नैष दोषः। इति करणात् प्राक्तनेन 'द्विषन्तम्'—इति पदेन तस्य सम्बन्धात्।

तस्मादियमेवावधारणा;—'समस्तमन्त्राम्नानं समाम्नाय प्रज्ञापना-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्थम्। मध्ये इतिकारकरणं ततः प्राक्तनस्य मन्त्रभागस्य यथाश्रुत-पाठार्थम्, पराचीनस्य 'अमुष्य'पदस्य स्थाने नामादेशसूचनार्थञ्च। अन्यस्य पराचीनत्वेऽपि न नामादेशः, प्रमाणाभावात्। नाप्यध्याहारः, समस्तमन्त्राम्नानात्'—इति। तथा च छन्दोगगृह्यान्तरम्। "स-ञ्चोदितामनुमन्त्रयेत मुञ्च गामित्यमुष्य चेत्यर्हयितुर्नाम ब्रूयात्"—इति। भट्टभाष्येप्युक्तम्,—"मेऽभिधेहीत्यत्रेति शब्दप्रक्षेपात् 'मेऽभिधेहि'—इत्येव प्रयोगः। न तु निराकाङ्क्षीकरणाय मे वक्तुरिति। अमुष्यपदस्थाने अर्हयितुर्नामादेशः"—इति। अत्र च, पठ्यमानमन्त्रकाण्डे 'इति'पदं न पठ्यते, केवलमाचार्य्येणैव उक्तमर्थं प्रतिपिपादयिषुणा प्रक्षिप्तं तदिति बोद्धव्यम्। भट्टनारायणोऽपि प्रक्षिप्तत्वमितिकारस्य स्पष्टमाचष्टे। व्याख्यातारोऽपि पूर्व्वाचार्य्या एवमेव प्रतिपन्नाः। भवदेवभट्टोऽपि मन्त्रे इतिकारं न लिलेख। यच्च,—उक्तभट्टभाष्यप्रतीकं लिखित्वा, रघुनन्दनेनोक्तम्,—"मेऽभिधेहीत्यत्र भवदेवभट्टेन यत् इतिपदं न लिखितम्, तद् हेयम्, भट्टभाष्यविरोधात्, प्रमाणाभावाच्च,"—इति। तदेव हेयम्। कस्मात्?। भट्टभाष्यविरोधाभावात्। तत्र खल्वितिशब्दस्य प्रक्षेपत्वकथनाद्युक्तमितिशब्दस्य मन्त्रानङ्गत्वमुक्तम्। प्रमाणञ्चात्र मन्त्रसमाम्नायोऽध्येतृसम्प्रदायश्च। तस्मात्,—भट्टभाष्य-पङ्क्तेस्तात्पर्य्यापर्य्यालोचनात् समाम्नायाद्यनवलोकनप्रमादाच्च अप्रमाणं प्रमाणविरुद्धञ्च यदृच्छयैव प्रलपितमित्यनादरणीयम् ॥०॥१९॥०॥

ततो नापितेन मुक्तां तामेव गामवलोकयन्नर्हणीयः,—

माता रुद्राणामित्यनुमन्त्रयेत ॥ २० ॥

स्पष्टार्थं सूत्रम् ॥०॥ २० ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किं सर्व्वत्रैवार्हणकर्म्मणि नापितेन गौरित्युक्ते मुञ्च गामित्युक्ता माता रुद्राणामित्यनेन तामनुमन्त्रयेदर्हणीयः ?। एवं खलु प्राप्तम्। एवं प्राप्ते इदमारभ्यते,—

अन्यत्र यज्ञात्॥ २१ ॥

यज्ञोऽग्निष्टोमादिः। तस्मादन्यत्रैवं कुर्य्यात्॥०॥ २१ ॥०॥

यज्ञे तर्हि किं कुर्य्यात् ?। उच्यते,—

कुरुतेत्यधियज्ञम्॥ २२ ॥

यज्ञमधिकृत्य,—इत्यधियज्ञम्। यज्ञमधिकृत्य यदर्हणं क्रियते, तत्र नापितेन गौरित्युक्ते खल्वयमर्हणीयः 'कुरुत'—इति ब्रूयात्। कुरुत आलभध्वमित्यग्निस्वामिप्रभृतयः। "कुरुतेति गवि प्रोक्तायां ब्रूयात्" —इति च लाट्यायनसूत्रम्॥०॥ २२ ॥०॥

कति पुनरर्हणीया भवन्ति ?। उच्यते,—

षड़र्घ्यार्हा भवन्ति॥ २३ ॥

अर्घ्यमर्हणम्। तदर्हन्तीत्यर्घ्यार्हाः। ते खल्विमे षट्सङ्ख्यका भवन्ति ॥०॥ २३ ॥०॥

त इमे षड़र्हणीया नामतो निर्दिश्यन्ते,—

आचार्य्य ऋत्विक् स्नातको राजा विवाह्यः प्रियोऽतिथिरिति॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आचार्य्यः,—

"उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते"।

इत्युक्तलक्षणः। ऋत्विक्,—

"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते"।

इत्युक्तलक्षणः। स्नातकास्त्रयो व्याख्याताः। राजा अभिषेकादिगुणयुक्तो नरेश्वरः। विवाह्यो विवाहयितव्यो जामाता,—इत्येतत्। प्रियः,—विद्यातपःप्रभृतिगुणैः प्रीतिविषयोऽतिथिर्यथोक्तलक्षणः। इत्येते षड़र्घ्यार्हा नामतो निर्दिष्टाः। प्रियः,—इति विशेषणात् विद्यादिगुणवानेवातिथिरर्घ्यार्हो भवति, न यः कश्चित्,—इति दर्शयति ॥०॥ २४ ॥०॥

किमेतानाचार्य्यादीन् सकृदेवार्हयेत्?। न। किन्तर्हि?,—

परिसंवत्सरानर्हयेयुः ॥ २५ ॥

परिगतः संवत्सरो येषां, तान् परिसंवत्सरान् आचार्य्यादीन् अर्हयेयुः। 'पुनर्,'—इति पराचीनमिहाप्यन्वीयते। मध्यमणिन्यायात्। तेन, एकस्मादर्हणकालादारभ्य संवत्सरादूर्द्धमागतानेतानाचार्य्यादीन् पुनरर्हयेयुरित्यर्थः ॥०॥ २५ ॥०॥

पुनर्यज्ञविवाहयोश्च पुनर्यज्ञविवाहयोश्च ॥ २६ ॥

यज्ञविवाहौ व्याख्यातौ। तयोर्निमित्तभूतयोः संवत्सरमध्येऽप्यागतानाचार्य्यादीन् पुनरर्हयेयुः। अपर आह। 'यज्ञविवाहयोर्निमित्तयो रर्घ्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गपि संवत्सरादृत्विगाचार्य्यौ प्राप्तौ पुनरर्हयेयुः,'—इति। चः समुच्चये परिसंवत्सरकालमेव समुच्चिनोति। पुनर्यज्ञविवाहयोश्च पुनर्यज्ञविवाहयोश्च,—इति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति॥०॥ २६॥०॥

अत्रैव शिवम्।

शाण्डिल्यस्य महामुनेरकलुषे वंशे प्रशंसोत्तरे
चीराब्धावकलङ्कमञ्जुलवपुः कान्तः कलानां निधिः।
वाक्पीयूषकरैर्हरन्नतितरां चेतांस्यरीणामपि
चान्तोऽभूत् परिपूर्णसुन्दरकलोऽप्युल्लासनावासभूः॥

राधाकान्तः स खलु विदितो मौलिरुच्चैर्गुणानां
मेधोत्कर्षप्रथितमहिमा धीमतामग्रगण्यः।
शास्त्रालापव्यसनरसिकः सन्निवृत्तोऽन्यदोषात्
साक्षात् दोषाकर इव सतामाकरः सद्गुणानाम्॥

सिद्धान्तवागीश इति प्रसिद्धो
यः सर्व्वसिद्धान्तगणेष्वभिज्ञः।
काले मितं वाक्यमुदर्कपथ्यं
यस्योपदेष्टाऽऽगमवज्जनानाम्॥

कृपापारावारः स खलु शरणं रूढ़विपदां
परानिष्टद्वेष्टा परमभिनिविष्टः श्रुतिविधौ।
स्फुरद्भक्तिश्रद्धाविमलमतिरुच्चैर्गिरिसुता-
पदाम्भोजद्वन्द्वप्रचुरमकरन्दे मधुकरः॥

योऽध्यापयामास परःसहस्रा-
ननन्यकाम्यानपि शिष्यसङ्घान्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यस्यान्तकाले विससर्ज देहं
सुरापगातीररसान्तरस्थः ॥
अद्वैतवादनिरतो नवावतार इव भक्तियोगस्य ।
अपरिमितो यत्प्रेमा रोमाञ्चमिषादलच्चि वाह्येऽपि ॥
श्रीचन्द्रकान्तनामा ब्रह्मविदः कौथुमो धरादेवः ।
तस्मान्महानुभावात्तर्कालङ्कारलाञ्छनो जातः ॥
सोऽयं ब्रह्ममयीसुतो मतिमतामाराधनेषूत्सुकः
पित्रैवामरगुर्व्वनूनमतिना भूयो विनीतोऽस्पृशत् ।
तस्योच्चैश्चरणारविन्दकृपयाऽन्येषां गुरूणान्तथा
किञ्चिद्बोधलवोदयातिचपलः शार्दूलविक्रीडितम् ॥
कामरूपब्रह्मपुत्रावन्तरा कैकयेषु यः ।
पुण्ये सेरपुरे रम्ये करोति वसतिं द्विजः ॥
श्रीमद्विजयिनी देवी साम्प्रतं भारतेश्वरी ।
यदङ्गसाम्राज्यगतं तद्रचाधिकृताज्ञया ॥
मन्वादीनां सम्यक् तथा वचांसि च निबन्धकर्तॄणाम् ।
बुद्धा विचार्य्य भूयो मीमांसाद्वितयमप्ययथालोच्य ॥
गौतमकणादतन्त्रमवलोक्य कपिलमुनिरचिततन्त्रमपि ।
अपि च पतञ्जलितन्त्रं सामानि विशेषतः समालोच्य ॥
लाट्यायनीयकल्पं द्राह्यायणरचितमाश्वलायनकृतम् ।
गृह्यान्तरकर्तॄणां परिशिष्टकृताञ्च विचार्य्य वचः ॥
रचयाञ्चकार भाष्यं कठिनच्छन्दोगगृह्यसूत्रेषु ।
श्रीचन्द्रकान्त एतत्तरलाल्पमतिर्यथाबुद्धि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदाङ्कशैलचन्द्रे शकनरपतिहायने समाप्तैषा ।
आश्विनमङ्गलवारे रसेन्दुदिवसे कृतिस्तस्य ॥
स्खलितं यदत्र दैवात्तदखिलमखिलेश्वरः शमं नयतु ।
प्रीणातु परपिताऽसौ बालकपरिचापलादस्मात् ॥
मन्दोत्तममध्यानामुपासकानामनुग्रहार्थं यः ।
धत्ते विविधशरीरं स हरतु दुरितं ममेशानः ॥
यस्याज्ञाविवशाऽचलापि चलति भ्राम्यन्ति शून्ये ग्रहा-
वातो वाति तपत्यथापि तपनो मृत्युस्तथा धावति ।
व्यत्यासो विपुलस्य यस्य नियमस्याल्पोऽपि नो लक्ष्यते
सोऽयं श्रीपरमेश्वरः प्रकुरुतादन्तेऽपि मे मङ्गलम् ॥
पित्रोश्चरणसरोजं विकसतु हृदये ममानिशं वल्गु ।
तमसां विघटनदक्षाः स्फुरन्ति नखरेन्दवो यत्र ॥
सन्तः सन्ति जगत्सु ये परगुणं दोषोत्करैरावृतं
सश्लाघं परिशोध्य साधु बहुलीकुर्व्वन्ति निर्व्वासनाः ।
तेषां तद्व्रतमेव, तेषु विफला सत्यं कृपाप्रार्थना
तद्भक्तिप्लुतमानसास्तु शिरसा तेभ्यो नमस्कुर्म्महे ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये चतुर्थप्रपाठकस्य दशमी काण्डिका समाप्ता ॥०॥

समाप्तश्चायं चतुर्थः प्रपाठकः ॥०॥

समाप्तञ्चेदं गोभिलगृह्यसूत्रभाष्यम् ॥०॥

शुभमस्तु ॥ श्रीरस्तु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृह्यासङ्ग्रहः ।

(गोभिलगृह्यपरिशिष्टरूपः)

गोभिलपुत्रकृतः ।

प्रथमप्रपाठकः ।

ॐ नमः सामवेदाय ।

श्रीगणेशायनमः ।

नत्वा गुर्व्वाचार्य्यान् विचार्य्य बुद्ध्या वचांसि पूर्व्वेषाम् ।
गृह्यासंग्रहभाष्यं स्वल्पग्रन्थं करिष्यामः ॥

इह खलु तत्रभवान् गोभिलपुत्रः गोभिलगृह्यसूत्राण्यव्यक्तानि व्यक्तं व्याचिख्यासुर्गोभिलानुपदिष्टमपि किञ्चिदुपदिदिक्षुर्गोभिलगृह्यपरिशिष्टरूपं गृह्यासंग्रहाख्यमिमं ग्रन्थं रचयाञ्चकार । यस्यायमादिमः श्लोकः,—

**अथातः संप्रवक्ष्यामि यदुक्तं पद्मयोनिना ।
ब्राह्मणानाꣳ हितार्थाय सꣳस्कारार्थं तु भाषितम् ॥१॥**

तत्रायमथशब्द आनन्तर्य्यार्थः संबन्धकरणार्थश्च । उच्चार्य्यमाणश्च मङ्गलप्रयोजनो भवति । आनन्तर्य्यार्थस्तावत् । गोभिलगृह्यसूत्राध्ययनानन्तरम् अनुद्भिन्नपदार्थगृह्यसूत्रार्थावधारणार्थं तदनुक्तविशेषप्रतिपत्त्यर्थञ्चैतत् शास्त्रमध्येतव्यमित्येतदर्थः । संबन्धकरणार्थः खल्वपि । गोभि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लगृह्यसूत्रशास्त्रेणास्य शास्त्रस्य संबन्धं करोति। प्रयोजनञ्चास्य,—गोभिलगृह्यसूत्रवदेतदपि शास्त्रं गोभिलीयधर्म्मोपदेशपरमेव,—इति प्रतिपत्तिः।

अतः शब्दो हेत्वर्थः। यस्मात् अग्निनामादीनि गोभिलेन नोक्तानि, यस्माच्च अनुक्तिनार्थं गोभिलगृह्यसूत्रम्, अतः—एतस्मात् कारणात्,—

गोभिलपुत्रोऽहं ब्राह्मणानां हितार्थाय सम्यक् प्रकर्षेण वक्ष्यामि। किम्?। पद्मयोनिना ब्रह्मणा यदुक्तमग्निनामादिकम्। इच्छब्दस्योत्तरवाक्यगतत्वेनोपादानादिह तच्छब्दापेक्षा नास्ति। तु पुनः। संस्कारार्थे संस्काररूपप्रयोजने,—तत् सिद्ध्यर्थमित्येतत्। ब्रह्मणा भाषितमिति प्राधान्यात् पुनरुपादानम्। किमतः?। गर्भाधानादिषु केषुचित् संस्कारेषु गोभिलेनाग्निर्नोपदिष्टः, तेष्वपि संस्कारप्रयोजनसिद्ध्यर्थमस्मदुक्तनामाऽग्निर्भवति। एतदतः।

अपर आह। "यस्मिन् कर्म्मणि गोभिलेनाग्निरुक्तस्तत्रैवाग्निनाम ज्ञातव्यं नान्यत्र। ब्रह्मणा साधारण्येन सर्व्वकर्म्मसु अग्निनाम उक्तम्, तेन हेतुना गोभिलपुत्रेणापि सर्व्वकर्म्मसु अग्निनाम उक्तम्। ततश्च, गोभिलोक्ते गर्भाधानादौ अग्निनाम न भवति"—इति। तदसङ्गतम्। गोभिलपरिशिष्टरूपत्वादेतस्य। न खलु गोभिलेन नोक्तमिति गोभिलपुत्रेणोक्तमपि नोपादेयमिति किञ्चिदत्र कारणमुपलभामहे। तथात्वे वा गोभिलानुक्तानां बहूनामपि विशेषाणामत्रोक्तानामनुपादेयतापत्तेः। उपादीयन्ते च। तस्मादसङ्गतैषा कल्पना,—गोभिलोक्ते गर्भाधानादौ अग्निनाम न भवति,—इति। गोभिलोऽप्यस्माकमुपदेष्टा, तत् पुत्रोऽपि। यत् खलु पित्रा नोपदिष्टं तदेव पुत्रेणो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदेष्टव्यम् । सन्दिग्धस्त्वार्थो निर्णेतव्यः । न हि गोभिलेनापि तत्र तत्राग्निर्निषिद्धः । न खल्वेतत् परशाखिकं शास्त्रम् । न च गोभिलेन नोक्तमिति स्वशाखायामेव ग्रन्थान्तरोक्तमपि परित्यक्तव्यम् । परिशिष्टानामानर्थक्यप्रसङ्गात् । अनुक्तानां खल्वर्थानामुपदेशस्तेषु भूयसोपलभ्यते । अलमसदावेशेन ॥

एवं शास्त्रारम्भं प्रतिज्ञाय प्रथमन्तावदग्निनामान्यभिधीयन्ते नवभिः श्लोकैः,—

लौकिकः पावको ह्यग्निः प्रथमः परिकीर्त्तितः ।
अग्निस्तु* मारुतो नाम गर्भाधाने विधीयते ॥ २ ॥

हिशब्दो निश्चयार्थः । लौकिकोऽग्निः पावकः कथितः । रघुनन्दनस्तु,—"लौकिके"—इति पठित्वा, लौकिके—गृहप्रवेशे,—इति वर्णयाञ्चकार । गर्भाधाने पुनर्मारुतो नामाग्निर्विधीयते । यद्यपि, गोभिलेन तत्राग्निर्नोपदिष्टः, तथाप्यस्माभिस्तत्पुत्रैस्तदुपदिष्टार्थवेदिभिर्मारुतो नामाग्निस्तत्र विधीयते । तस्मादस्ति गोभिलोक्तेऽपि गर्भाधानेऽग्निरिति बोद्धव्यम् । विधीयते,—इति करणाच्चैवमवगच्छामः । यदि नाम केवलं ब्रह्मणा उक्त इति गर्भाधाने, अग्निरुच्यते,—इत्यभिप्रायः, तदा परिकीर्त्तितः,—इत्येव कुर्य्यात्, न—विधीयते,—इति ॥

पुंसवने चान्द्रमसः शुङ्गाकर्म्मणि शोभनः ।
सीमन्ते मङ्गलो नाम प्रागल्भो जातकर्म्मणि ॥ ३ ॥

पुंसवने चान्द्रमसो नामाग्निः । 'चन्द्रनामा'—इति रघुनन्दनः पठति ।

* अग्रेस्तु,—इति पाठान्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"प्रागुदीच्यां दिशि न्यग्रोधशुङ्गामुभयतःफलामस्रामामक्रिमिपरिसृप्तां त्रिः सप्तैर्यवैर्माषैर्वा परिक्रीयोत्थापयेत्"—इत्यादि गृह्यसूत्रोक्ते शुङ्गाकर्म्मणि शोभनो नामाग्निः। सीमन्ते सीमन्तकरणे। स्पष्टमन्यत्॥

नाम्नि च* पार्थिवो ह्यग्निः प्राशने च शुचिस्तथा।
सभ्यनामाऽथ चूड़े तु व्रतादेशे समुद्भवः॥ ४॥

नामकरणे पार्थिवो नामाग्निः। अन्नप्राशने शुचिर्नामाग्निः। चूड़ाकरणे सभ्यो नामाग्निः। 'सत्यनामा'—इति रघुनन्दनः पठति। व्रतानाम्—गोदाने विशेषस्य वक्ष्यमाणत्वात् व्रातिकादित्यव्रतमहानाम्निकौपनिषदज्यैष्ठसाम्नाम्, आदेशे उपदेशे, समुद्भवो नामाग्निः कथितः॥

गोदाने सूर्य्यनामा तु केशान्ते ह्यग्निरुच्यते।
वैश्वानरो विसर्गे तु विवाहे योजकः स्मृतः॥ ५॥

गोदाने गोदानिकव्रते सूर्य्यनामा अग्निः। गोदानाङ्गे गृह्योक्ते केशान्ते कर्म्मणि अग्निर्नामाग्निः। विसर्गे,—व्रतप्रस्तावात् व्रतानन्तरं करणीये मौञ्जीत्यागे समावर्त्तनापरनामधेये गृह्योक्ते आप्लावनाख्ये कर्म्मणि,—इत्येतत्। "मौञ्जीविसर्गे त्यागे वैश्वानरो नामाग्निः"—इति दीक्षितभाष्यम्। विसर्गे दाने,—इति केचित्। विवाहे योजको नामाग्निः॥

चतुर्थ्यान्तु शिखीनाम धृतिरग्निस्तथाऽपरे।
आवसथ्ये भवो ज्ञेयो वैश्वदेवे तु पावकः॥ ६॥

---

* नाम्नि स्यात्,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुर्थ्याम्—गृह्योक्ते चतुर्थीकर्म्मणि शिखी नामाग्निः। 'अपरे आचार्या-स्तथा चतुर्थीकर्म्मणि धृतिनामानमग्निमाहुः'—इति दीक्षितराम-कृष्णः। अपरे धृतिहोमादौ धृतिर्नामाग्निः,—इति रघुनन्दनः। तत्र ब्रूमः। धृतिहोमे धृतिर्नामाग्निर्युक्तः। कुतः?। शब्दसाम्यात्। धृतिनामा खल्वग्निर्धृतिहोमे आगच्छति हृदयम्। आगच्छति चेत्, न युज्यते विनाकारणमुत्स्रष्टुम्। एवञ्च, अग्निनाम्नां सप्तत्रिंशत्सङ्ख्याप्याञ्जस्येनोपपत्स्यते। मतान्तरत्वे खल्वेतस्य सा नातीव समञ्जसा स्यात्।

आवसथ्ये गृह्येऽग्नौ भवो नामाग्निर्ज्ञातव्यः। गृह्यः, औपासनः, आवसथ्यः,—इति ह्यनर्थान्तरम्। वैश्वदेवे कर्म्मणि पुनः पावको नामाग्निः॥

ब्रह्मा वै गार्हपत्ये स्यादीश्वरो दक्षिणे तथा।
विष्णुराहवनीये तु अग्निहोत्रे त्रयोऽग्नयः॥ ७॥

गार्हपत्येऽग्नौ ब्रह्मा नामाग्निः स्यात्। एवमुत्तरत्रापि। दक्षिणे दक्षिणाग्नौ। श्रौते खल्वग्निहोत्रे एते त्रयोऽग्नयो भवन्ति॥

लक्षहोमे वह्निर्नाम* कोटिहोमे हुताशनः।
प्रायश्चित्ते विधिश्चैव पाकयज्ञे तु साहसः॥ ८॥

प्रायश्चित्ते प्रायश्चित्तहोमे विधिर्नामाग्निः। 'विधुः',—इति रघुनन्दनः पठति। पाकयज्ञे साहसो नामाग्निः। स्पष्टमन्यत्। आह। कः पुनः

---

* लक्षहोमे तु वह्निः स्यात्,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाकयज्ञो नाम?। उच्यते। यः खल्वेकाग्निसाध्यः यज्ञः, तं पाकयज्ञमाचक्षते। किं कारणम्?। "पाकयज्ञा इत्याचक्षते एकाग्नौ यज्ञान्"—इति लाट्यायनसूत्रात्। द्राह्यायणोऽप्येतत् सूत्रयाञ्चकार। "पाकयज्ञा इत्याख्या यः कश्चैकाग्नौ"—इति च छन्दोगगृह्यान्तरम्। "श्रावण्याश्वयुज्याग्रहायण्यष्टकान्वष्टक्यैकाष्टकाः पाकयज्ञाः",—इति दीक्षितरामकृष्णः। "पाकयज्ञे,—पाकाङ्गकयज्ञे वृषोत्सर्गदेवप्रतिष्ठाहोमादौ"—इति रघुनन्दनः। पाकयज्ञः प्रशस्तयज्ञः,—इति शाखान्तरीयगृह्यवृत्तिकृतः॥

देवानां हव्यवाहस्तु पितॄणां कव्यवाहनः।
पूर्णाहुत्यां मृडो नाम शान्तिके वरदस्तथा॥ ९॥

निगदव्याख्यातोऽयं श्लोकः॥

पौष्टिके बलदश्चैव क्रोधाग्निश्चाभिचारके।*
वश्यार्थे कामदो नाम वनदाहे तु दूतकः॥ १०॥

पौष्टिके,—शरीरस्य धनस्य वा पुष्टिजनके कर्म्मणि, बलदो नामाग्निः। पुष्टिरुपचयः। अभिचार एवाभिचारकः। तस्मिन्नभिचारके कर्म्मणि क्रोधाग्निः। अभिचरणमभिचारो मारणमित्येतत्। वश्यं वशीकरणम्। तदर्थे कर्म्मणि कामदो नामाग्निः। वनदाहे दूतको नामाग्निः।

कोष्ठे तु जठराग्निश्च† क्रव्यादो मृतभक्षणे।
समुद्रे वाड़वो ज्ञेयः क्षये संवर्त्तको भवेत्॥ ११॥

* क्रोधोऽग्निः,—इति पाठान्तरम्।
† जठरो नाम,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोष्ठे उदरे। सूनभक्षणे ग्रन्दाहे। क्षये,—सर्व्वेषां नाशे प्रलये,—इति यावत्। शिष्टमन्यत्॥

एवमग्निनामान्यभिधाय तेषां श्रावणं ज्ञानञ्चेदानीं विधत्ते,—

एतेऽग्नयः समाख्याताः श्रावयेद् ब्राह्मणः सदा।
सप्तत्रिंशतिविख्याता ज्ञातव्याश्च द्विजेन तु॥१२॥

एते पूर्व्वोक्ता अग्नयः सम्यक् कथिताः। तानेतान् ब्राह्मणः सदा द्विजं श्रावयेत्। द्विजेन तु, सप्तत्रिंशतिविख्याताः (आर्षोयं प्रयोगः) सप्तत्रिंशत्सङ्ख्यया विशेषेण कथिताः,—प्रसिद्धा वा, अग्नयो ज्ञातव्याः। तदिदमर्थं कर्म्मस्वविनियुक्तानामप्यग्निनाम्नां पूर्व्वं परिकीर्त्तनमिति द्रष्टव्यम्॥

सप्त जिह्वाः स्फुरन्त्येता हुताशनमुखे स्थिताः।
याभिर्हव्यं समश्नन्ति हुतं सम्यक् द्विजोत्तमैः॥१३॥

अग्निमुखे स्थिता एता वक्ष्यमाणाः सप्तजिह्वाः स्फुरन्ति। द्विजोत्तमैः,—निषादस्थपतिवत् कर्म्मधारयसमासस्यैव युक्तत्वादविशेषाच्च उत्तमद्विजैः, सम्यक् हुतं हव्यं याभिर्जिह्वाभिः समश्नन्ति,—दिवौकसः,—इति वाक्यशेषः॥

काली कराली च मनोजवा च
सुलोहिता चैव सुधूम्रवर्णा।
स्फुलिङ्गिनी चैव शुचिस्मिता च
लेलायमाना इति सप्त जिह्वाः॥१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्येताः सप्त जिह्वाः नामतो निर्दिष्टाः । लेलायमानाः,—एवं भवि-तुमिच्छन्त्यः । लल ईप्सायाम् ॥

तासां खल्वासां जिह्वानां मध्यात्,—

द्वे शान्तिके पौष्टिके द्वे च तिस्रोऽभिचारिण्यः ।
एतास्त्वोक्ता विशेषेण ज्ञातव्याश्च द्विजेन तु ॥ १५ ॥

शान्तिके कर्म्मणि द्वे जिह्वे । पौष्टिके च कर्म्मणि द्वे जिह्वे । तिस्र-स्त्वाभिचारकर्म्मण्युपयुक्ताः । एतास्त्वोक्ता जिह्वा द्विजेन विशेषतो ज्ञातव्याः ॥

आहूयैव तु* होतव्यं यो यत्र विहितो विधिः ।

यत्र कर्म्मणि यो विधिरुक्तः, तत्र तेन विधिना होतव्यम् । किं कृत्वा ? । विहितमग्निमाहूय । "यत्र यो विहितोऽनलः"—इति तत्त्वकारः पठति । तत्र च, यत्र योऽनलो विहितस्तत्र तमनलमाहूय होतव्यमिति व्यक्त एवार्थः ॥

अविदित्वा तु यो ह्यग्निं होमयेदविचक्षणः ॥ १६ ॥
न हुतं न च संस्कारो न च कर्म्मफलं लभेत् ।

यः खल्वविचक्षणोऽग्निमज्ञात्वा होमयेत्, तेन हुतं न भवति,—(हुतं होमः । भावे निष्ठा) कृतोऽपि होमो न सिध्यतीत्यर्थः । न च तेन होमेन तस्य शरीरस्य संस्कारो भवति । न चासौ कर्म्मफलं लभते ॥

---

* आहूय चैव,—इति पाठान्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञात्वा स्वरूपमाग्नेयं योऽग्नेराराधनं चरेत् ॥ १७॥
ऐहिकामुष्मिकैः काम्यैः सारथिस्तस्य पावकः।
निःसंशयकरैरर्थैः पुत्रशिष्यहितैषिणः ॥ १८ ॥

यः पुनरग्नेरिदमाग्नेयं स्वरूपं वक्ष्यमाणलक्षणं ज्ञात्वा अग्नेराराधनमाचरति, तस्य पुत्रशिष्यहितैषिणः,—इत्याग्नेयं स्वरूपं विदुषः पुत्रशिष्यहितैषित्वं वदन्—तदविदुषः पुत्रशिष्यानिष्टमपि द्योतयति। 'निःसंशयकरैः'—निःसंशयं यथा भवति तथा क्रियमाणैः, 'काम्यैः'—कमनीयैः अभिलसनीयैः, 'ऐहिकामुष्मिकैः'—इहलोके परलोके च भवैः सौभाग्यस्वर्गादिभिः, 'अर्थैः'—प्रयोजनैः फलैः,—इत्येतत्। 'पावकः' 'सारथिः'—सारथिवदनुकूलः तत्तत्फलनिर्व्वाहक इत्यर्थः। तथाविधैरर्थैः पुत्रशिष्यहितैषिणस्तस्य पावकः सारथिः—फलदाता, इति वा वर्णनीयम्। तदनेन तस्य पुत्रशिष्याणामपि तत्तदर्थाः सम्पद्यन्ते,—इत्युक्तं भवति ॥

न चात्र संशयः कर्त्तव्यः इत्याह,—

गोभिलाचार्य्यपुत्रेण कृतं शास्त्रं सुनिश्चितम्।
पावकस्य मुखं वक्ष्ये यदुक्तं पद्मयोनिना ॥ १९ ॥

शास्त्रं पूर्व्वोक्तमग्निनामादिप्रतिपादकं गोभिलाचार्य्यपुत्रेण मया सुनिश्चितं कृतमिति गोभिलानुक्तोऽपि मदुक्तोऽग्निर्गर्भाधानादिष्वस्तीत्यभिप्रायः। उक्तस्यापि पुनरुक्तिः शिष्याणां दृढ़प्रत्ययार्था। अपर आह। शास्त्रं गृह्यासंग्रहाख्यम्,—इति। अथेदानीमहमग्नेर्मुखं वक्ष्ये व्याख्यातमन्यत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्तजिह्वा-प्रमाणन्तु प्रादेशं परिकीर्त्तितम्।
प्रमाणं चतुरस्रञ्च वर्त्तुलं मुखमण्डलम् ॥ २० ॥

पूर्व्वोक्तानां वक्ष्यमाणानाञ्च सप्तजिह्वानां प्रमाणं प्रादेशं विस्तृत-तर्ज्जन्यङ्गुष्ठरूपम्। अपर आह। बद्धमुष्टिः करो रत्निः, रत्न्यर्द्धं प्रादेशम्,—इति। प्रमाणं पूर्व्वोक्तप्रादेशप्रमाणं, चतुरस्रं चतुष्कोण-ञ्चाग्निमुखं कथितम्। मुखमण्डलन्तु वर्त्तुलम् ॥

यदर्थं हूयते वह्नौ तां जिह्वां परिकल्पयेत्।

यत्कर्म्मार्थं हूयते, तां तद्विहितां जिह्वामग्नौ परिकल्पयेत् चिन्त-येदावाहयेद्वा ॥

पूर्व्वोक्ताभ्यः सप्तभ्यो जिह्वाभ्योऽन्याः सप्त जिह्वा आह,—

कराली धूमिनी श्वेता लोहिता महालोहिता ॥ २१ ॥
सुपर्णी पद्मरागी च सप्तैताः परिकीर्त्तिताः।

सप्तैता जिह्वाः कथिताः। स्पष्टमन्यत् ॥

करालीं राक्षसाश्नन्ति धूमिनीमसुरास्तथा ॥ २२ ॥
श्वेतां नागाः समश्नन्ति पिशाचा लोहितां तथा।
महालोहितां गन्धर्व्वाः सुपर्णीञ्च यमस्तथा ॥ २३॥

करालीं—कराल्या जिह्वया, करालीं जिह्वां प्राप्येति वा वर्णनीयम्। एवमुत्तरत्रापि व्याख्येयम्। राक्षसाः अश्नन्ति। अत्र विसर्गलोपे सन्धिरार्षः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पद्मरागी च विख्याता दिव्या जिह्वा हुताशने।
तस्यान्तु होमयेन्नित्यꣳ सुसमिद्धे हुताशने ॥ २४ ॥

यया देवाः समश्नन्ति, सा दिव्येत्युच्यते। हुताशने हुताशनस्य। पद्मरागी हुताशनस्य जिह्वा दिव्या विख्यातेत्यर्थः। तस्यां दिव्यायां जिह्वायां पद्मराग्यामित्येतत्। सुसमिद्धे प्रज्वलिते। स्पष्टमन्यत् ॥

विधूमे लेलिहाने च होतव्यं तन्त्रसिद्धये।
न धूमो न तथा ज्वाला विशुद्धो भुवि चक्षुषः ॥ २५ ॥

विधूमे धूमरहिते, लेलिहाने दीप्यमाने चाग्नौ, तन्त्रस्य कर्म्मविस्तारस्य सिद्धये होतव्यम्। तत्र हेतुरुत्तरार्द्धेनोक्तः। न धूमः चक्षुषो विशुद्धः विशुद्धिहेतुः, अपि तु धूमश्चक्षुषोऽविशुद्धिहेतुरित्यर्थः। तथेति धूमयुक्तेत्यर्थः। धूमयुक्ता ज्वालापि न चक्षुषो विशुद्धिहेतुः, अपि तु सापि चक्षुषोऽविशुद्धिहेतुरेव। तदत्र धूमशब्देन केवलधूमस्य, ज्वालाशब्देन तु धूमयुक्तज्वालाया अपि दोष उक्तः। 'भुवि'—इत्यत्रापि ज्वालेत्यन्वीयते। भुवि ज्वाला न चक्षुषो विशुद्धिहेतुः,—इति भुवं लिहत्यग्नौ होमो निन्द्यते। तथा च स्मर्य्यते।

"क्षुत् तृट् क्रोध त्वरा युक्तो हीनमन्त्रं जुहोति यः।
अप्रवृद्धे सधूमे वा सोऽन्धः स्यादन्यजन्मनि।
अल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके।
आर्द्रकाष्ठैः सुसम्पन्ने फुत्कारवति पावके।
कृष्णार्च्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्।
आहुतिं जुहुयाद् यस्तु तस्य नाशो भवेद् ध्रुवम्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। 'तथाज्वालः'—इति पाठे, अज्वाल इति च्छेदः। अज्वालो ज्वालारहितोऽग्निर्न विशुद्ध इत्यर्थः। तथा च कर्म्मप्रदीपः।

"योऽनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्च स जायते"।

इति। 'विशुद्धोष्णविचक्षुषा'—इति पाठे, "विशुद्धेन विगतोष्णेन चक्षुषा यत्राग्नौ धूमो न दृष्टस्तत्र होतव्यम्"—इति दीक्षितभाष्योक्तैव वर्णना॥

प्रभया भाति यत्रैव भगवांस्तत्र तिष्ठति।
तत्र पूर्णाहुतिं दद्यात् सर्व्वकामप्रसिद्धये॥ २६॥

यत्रैवाग्नौ प्रभया भाति ज्वालेत्यर्थः। तत्रैव भगवान् विष्णुस्तिष्ठति। 'तत्र पूर्णाहुतिं दद्यात्';—सर्व्वेषां कामानामभिलसितफलानां प्रकर्षेण सिद्ध्यर्थम्। पूर्णाहुतिदानोपदेशेन होमोऽपि तत्रैव कर्त्तव्यः,—इत्यपि भङ्ग्यन्तरेणोपदिशति। अत्र च, यस्मिन् कर्म्मणि यः कामः शास्त्रेणानुशिष्टः, स एव कामस्तत्र सिध्यति, न पुनरन्योऽपीति द्रष्टव्यम्। तत् कस्य हेतोः?। "सर्व्वत्वमाधिकारिकम्"—इति सिद्धान्तात्।

पूर्णाहुतिन्तु ऊर्द्धः सन् दद्यात्, नोपविष्टः। कुतः?।

"दद्यादुत्थाय पूर्णां वै नोपविश्य कदाचन"।

इति भविष्यपुराणात्। एवमेके। गोभिलीयकर्म्मण्युपविष्ट एव पूर्णाहुतिं दद्यात्, न पुनरूर्द्धः सन्। कस्मात्?।

"आसीन ऊर्द्धः प्रह्वो वा नियमो यत्र नेदृशः।
तदासीनेन कर्त्तव्यं न प्रह्वेन न तिष्ठता"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति कर्म्मप्रदीपवचनात्। एवमपरे। तदत्र भवन्तो भूमिदेवाः प्रमाणम्॥

अथेदानीं वर्ज्जनीयाः समिध आह,—

मारणी राक्षसी रौद्री क्रव्यादी ब्रह्मराक्षसी।
स्थूलजङ्घा कराली च वज्रहस्ता तथैव च॥२७॥
यमदूती च विज्ञेया इत्येताः समिधो नव।

इत्येता नव समिधो नामतो विज्ञेयाः॥

यथाक्रममासां लक्षणं ब्रुवन् वर्ज्जनीयत्वमाह,—

विशीर्णा विदला ह्रस्वा वक्रा स्थूला कृशा द्विधा॥२८॥
कृमिदष्टा च दीर्घा च वर्ज्जनीयाः प्रयत्नतः।

विशीर्णा त्रुटिता पाटितेत्येतत्। इयं मारणीत्युच्यते। विदला दलरहिता,—त्वचा वियुक्तेति यावत्। इयं राक्षसी। ह्रस्वा प्रादेशप्रमाणात् न्यूना। इयं रौद्री। वक्रा प्रसिद्धा। इयं क्रव्यादी। स्थूला अङ्गुष्ठात् स्थूला। इयं ब्रह्मराक्षसी। कृशा अङ्गुष्ठात् कृशा, अङ्गुष्ठस्थौल्यस्य विहितत्वात्। इयं स्थूलजङ्घा। द्विधा द्विशाखिका। इयं कराली। कृमिदष्टा कृमिभिर्दष्टा। इयं वज्रहस्ता। दीर्घा प्रादेशात् दीर्घा। इयं यमदूती। ता एताः समिधो यत्नतो वर्ज्जनीयाः। तथाच कर्म्मप्रदीपः।

"नाङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित्।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रादेशान्नाधिका नोना न तथा स्याद् द्विशाखिका।
न सपर्णा न निर्वीर्य्या होमेषु च विजानता" ॥

इति ॥

अथेदानीं विशीर्णादीनां वर्ज्जनीयत्वे हेतुमुक्त्वा वर्ज्जनममूषामुपसंहरति,—

विशीर्णाऽऽयुःक्षयं कुर्य्याद्विदला व्याधिसम्भवा ॥२९॥
ह्रस्वा मृत्युकरी रौद्री दुर्भगत्वन्तु वक्रया।
विघ्नानि कुरुते स्थूला कृशा च रिपुवर्द्धिनी ॥ ३० ॥
द्विधा नाशयते ह्यर्थं भार्य्याञ्च प्रियबान्धवान्।
कीटदष्टाऽतिभयदा दीर्घा चैव सुतान् हरेत् ॥ ३१॥
तस्मात् सर्व्वप्रयत्नेन वर्ज्जनीयाश्च वर्ज्जयेत्।

व्याधिसम्भवा,—व्याधेः सम्भवो यया, सा तथाविधा। ह्रस्वा रौद्रीति सामानाधिकरण्यम्। अस्मादप्यवगच्छामः,—विशीर्णत्वादीनि यथाक्रमं मारणादीनां लक्षणानि,—इति। वक्रया दुर्भगत्वं प्राप्नोति। विघ्नानि विघ्नान्। अतिभयदेभिच्छेदः। निगदव्याख्यातमन्यत्। यस्मादेवं, तस्माद्वर्ज्जनीया एताः समिधो यत्नेन वर्ज्जयेदिति विशीर्णादीनां वर्ज्जनस्योपसंहारः ॥

अथेदानीं सर्व्वकामदाः समिध आह,—

अकृशा चैव न स्थूला अशाखा चापलाशिनी ॥३२॥
सक्षीरा नाधिकाऽन्यूनाः समिधः सर्व्वकामदाः।

कृशाद्यो व्याख्याताः। तद्वैपरीत्येनाकृशादयो व्याख्यातव्याः। अशाखा,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

—न द्विशाखिका। अपलाशिनी, न सपत्रा। सक्षीरा—न निर्वीर्य्या। क्षीरमत्र वृक्षदुग्धम्। न अधिकाः नाधिकाः—अनधिका इत्यर्थः। निपातसमानार्थेन नञ्शब्देन समासः। न न्यूनाः अन्यूनाः। निपातेन समासः। नाधिकाश्च अन्यूनाश्च,—इति पश्चात् द्वन्द्वः। न,—इति भिन्नं वा पदम्। न अधिकाः, न च न्यूनाः,—इत्यनुषङ्गेन व्याख्येयम्। एवंविधाः समिधः,—सर्व्वान् कामान् ददति इति सर्व्वकामदा उच्यन्ते॥

गोभिलानुक्तं विशेषमभिधाय, अथेदानीं गोभिलोक्तेष्वपि केषुचित् विशेषं विवित्सुः प्रतिजानीते,—

गृह्याकर्म्मसु सर्व्वेषु होत्रे प्रतिविधिं ध्रुवम्॥ ३३॥
क्रमशः संप्रवक्ष्यामि यो यत्र विहितो विधिः।

गृह्या गोभिलोक्तगृह्यशास्त्रम्। तदुक्तेषु सर्व्वेषु कर्म्मसु, होत्रे, होतुः सुखार्थम्,—यस्मिन् कर्म्मणि यो विधिर्विहितः, तत्र प्रतिविधिं प्रतिकर्म्मविधानं, क्रमशः सम्यक् प्रकर्षेणाहं वक्ष्यामि॥

ननु स विधिराचार्य्येणैवोक्तः, किमपरं वक्तव्यमवशिष्यते, यदर्थोऽयमुपक्रमोऽर्थवान् भवति,—इत्याशङ्कायामाह,—

अनुद्भिन्नपदार्थानि गृह्यावाक्यानि यानि तु॥ ३४॥
तेषां वक्ष्यामि सिद्ध्यर्थं श्लोकसंग्रहसंज्ञकैः।

अनुद्भिन्नपदार्थानि यानि गृह्यावाक्यान्याचार्य्येण पठितानि, तेषामर्थोद्भेदसिद्ध्यर्थम्,—श्लोकसंग्रहसंज्ञकैरिति व्यत्यासेन प्रयुङ्क्ते। संग्रह-

5 G 2

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संज्ञकैः श्लोकैरित्यर्थः। गृह्यासंग्रहः—इति खल्वयं ग्रन्थोऽभिधीयते। अहं वक्ष्यामि। तथा च, आचार्य्योक्तो विधिरनुद्भिन्नार्थ इति तदर्थोद्भेदार्थमयमुपक्रमोऽर्थवानेवेति भावः। उद्भिन्नः व्यक्तः। न उद्भिन्नः अनुद्भिन्नः। पदानामर्थाः पदार्थाः। अनुद्भिन्नाः पदार्थाः येषु वाक्येषु, तानि अनुद्भिन्नपदार्थानि॥

तत्र प्रथमन्तावत्,—"अथातो गृह्याकर्म्माण्युपदेक्ष्यामः"—इति गोभिलसूत्रस्थं गृह्यापदमनुद्भिन्नार्थं व्याकरोति द्वाभ्याम्,—

पत्न्यः पुत्राश्च कन्याश्च जनिष्याश्चापरे सुताः॥३५॥
गृह्या इति समाख्याता यजमानस्य दायकाः।

जनिष्या जनिष्यमाणाः। दायकाः दायहराः॥

तेषाꣳ सꣳस्कारयोगेन शान्तिकर्म्मक्रियासु च॥३६॥
आचार्य्यविहितः कल्पस्तस्माद् गृह्या इति स्थितिः।

तेषां पत्न्यादीनां संस्कारयोगेन,—संस्कारलाभार्थमित्यर्थः। तदिदमर्थं या विवाहादिक्रियाः क्रियन्ते, तासु;—शान्तिकर्म्मणां शान्त्यर्थकर्म्मणामलक्ष्मीनिर्णोदादीनां क्रियासु करणेषु च, यः कल्पः शास्त्रविधिरपेक्षितः, स खल्वाचार्य्यविहितः—आचार्य्येण गोभिलेन विहितः। तदर्थं गृह्यसूत्रं कृतमित्यर्थः। यस्माद्गृह्यानधिकृत्य आचार्य्येण सूत्राणि रचितानि, तस्मात् कारणादाचार्य्यगृह्यसूत्राणां गृह्या इति स्थितिः। गृह्यसम्बन्धात् स्मृतिरपि गृह्या,—इत्युच्यते। दण्डयोगाद्दण्डः पुरुष इति यथा॥

"अनुगुप्ता अप आहृत्य प्रागुदक्प्रवणं देशं समं वा परिसमूह्योपलिप्य"—इत्यादि गोभिलोक्तं क्रमं स्पष्टयति,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूमेः समूहनं कृत्वा गोमयेनोपलिप्य च ॥ ३७ ॥
द्रव्याण्युत्तरतः स्थाप्य वृषीं कुर्य्यादुदङ्मुखीम्।

यागार्थं भूमेः समूहनं कुशैर्मार्ज्जनं कृत्वा, गोमयोदकेनोपलिप्य द्रव्याण्युदकादीनि प्रयोजनोपयोगीनि उपलिप्तभूमावुत्तरतः स्थापयित्वा, वृषीम्—ऋषीणामासनम्—विहितमासनमित्येतत्। उदङ्मुखीमुदगग्रां कुर्य्यात्। मुखमग्रम्। तदिदानीं प्रयोजनोपयोगिद्रव्यासादनमस्माकं न ब्रह्मस्थापनाद्यनन्तरमिति द्रष्टव्यम्। आह। कस्य उत्तरतः?। अग्नेरिति ब्रूमः। तथाच कर्म्मप्रदीपः।

"प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः।
तत्तथाऽऽसादयेद् द्रव्यं यद् यथा विनियुज्यते"।

इति। यद्यप्यग्निरिदानीं न स्थापितः, तथापि भविष्यतैवाग्निना 'उत्तरतः'—इत्यस्य संबन्धो बोद्धव्यः। "पुरोडाशकपालेन तुषानुपवपति"—इति भविष्यता पुरोडाशेन कपालस्य संबन्धो यथा॥
यज्ञादौ स्थानपरिमाणमाह,—

गोचर्म्ममात्रं कुर्व्वीत चतुरस्रमनूषरे ॥ ३८ ॥
सर्व्वतोऽरत्निमात्रं स्यात् सायं प्रातस्तु होमयोः।

ऊषरमिति बालुकामयं स्थानमुच्यते। तत् न भवतीत्यनूषरम्। तस्मिन् प्रदेशे, चतुरस्रं चतुष्कोणं गोचर्म्ममात्रं गोचर्म्मपरिमाणं स्थानं कुर्व्वीत। सायंप्रातर्होमयोः पुनः सर्व्वतो दिक्षु रत्निमात्रं अरत्निमात्रं वा स्थानं स्यात्। उभयत्र परिमाणे मात्रच्। बद्धमुष्टिः करो रत्निः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निष्कनिष्ठः करोऽरत्निः। सार्द्धद्वाविंशत्यङ्गुलोऽरत्निः,—इति केचित्॥ अप्रसिद्धत्वात् स्वयमेव गोचर्म्मपरिमाणं व्याकरोति,—

ऋषभैकशतं यत्र गवां तिष्ठति संवृतम्॥ ३९॥
बालवत्सप्रसूतानां गोचर्म्म इति तं विदुः।

ऋषभो वृषभः। तेन सममेकशतं बालवत्सप्रसूतानाम्—बालाः वत्साः प्रसूताः यासां सद्यःप्रसूतवत्सानामित्यर्थः। विशेषणसामर्थ्यात् बालवत्स-सहितानां गवामेकशतमेकेन वृषभेन सह यत्र प्रदेशे संवृतम्—सम्यग-सङ्कोचेन वर्त्तमानं, तिष्ठति, तं प्रदेशं गोचर्म्म इति विदुर्जानन्त्याचार्य्याः। अपर आह। यस्मिन् स्थाने ऋषभानां शतं बालवत्सप्रसूतानां गवाञ्च शतं संवृतमेकीभूतं तिष्ठति, तत् स्थानं गोचर्म्म,—इति। तदसङ्गतम्। कुतः?। शतशब्दस्यानुषङ्गकल्पनायां मानाभावात्।

"गवां शतं वृषश्चैको यत्र तिष्ठेदयन्त्रितः।
एतद्गोचर्म्ममात्रन्तु प्राहुर्वेदविदो जनाः"।

इति स्मृत्यन्तरदर्शनाच्च॥

षट् पञ्च चतुरो वाऽपि त्रयो द्वौ वा शफौ स्मृतौ॥ ४०॥
गोचर्म्म इति शब्दोऽयं विधियोगे निपात्यते।

चतुरः,—इति व्यत्यासेन प्रयुक्तं। चत्वारः,—इत्यर्थः। वाऽपि,—इत्यपि व्यत्यासेन प्रयुक्तं। अपि वा,—इत्यर्थः। तदयमर्थः। षट् शफाः, पञ्च वा चत्वारो वा त्रयो वा शफाः गोचर्म्म इति स्मृताः, द्वौ वा शफौ गोचर्म्म इति स्मृतौ। योग्यत्वादुपस्थितत्वाच्च शफवतीनां गवामेव ग्रहणं वाच्यम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेवं गोचर्म्मस्थानानामनियतपरिमाणत्वादाह,—विधियोगे,—इति। पूर्व्वोक्तेषु परिमाणेषु विधियोगे विधानयोगे सति, गोचर्म्म इत्ययं शब्दो निपात्यते। यत्र विहिते कर्म्मणि यावत् स्थानमपेक्षितं, तत्र तावत् परिमितमेव स्थानं ग्राह्यमित्यभिप्रायः॥

प्राङ्नीचं ब्रह्मवर्चस्यमुदङ्नीचं यशोत्तमम् ॥ ४१ ॥
पित्र्यं दक्षिणतोनीचं प्रतिष्ठालम्भकंसमम् ।

पूर्व्वतो निम्नं स्थानं ब्रह्मवर्चस्यं ब्रह्मवर्चसविषये साधु भवति। ब्रह्मवर्चसमध्ययनप्रकर्षजं तेजः। उत्तरतोनीचं यशोत्तमम्। उत्तमं यशो यस्मात् इति तथाविधम्। राजदन्तादिवत् परनिपातः। 'सान्ता अप्यदन्ताः'—इत्युक्ते यशोत्तममिति निर्देशः साधुः। 'पिण्डं दद्याद् गयाशिरे'—इतिवत्। आर्षो वा विसर्गलोपे सन्धिः। पित्र्यं स्थानं दक्षिणतो नीचं भवति। समं पुनः प्रतिष्ठाया लम्भकं प्रापकम्। तदनेन, "प्रागुदक्प्रवणं देशं समं वा"—इति गोभिलसूत्रं व्याख्यातम्। तत्कारोऽप्येवमेव श्लोकमिमं पपाठ। प्रागुदक्प्रवणं देशम्—इत्येतत् विवरणपरतयैव चेमं वर्णयाञ्चकार। एवमेव पित्र्ये कर्म्मणि दक्षिणाप्लवनदेशत्वं कर्म्मप्रदीपाद्यनुशिष्टमनु गृह्यते। केचित्तु,—

प्राग्ग्रीवं ब्रह्मवर्चस्यमुदग्ग्रीवं यशोत्तमम्।
पित्र्यं दक्षिणतो नीचं प्रतिष्ठालम्भुकं समम्।

इत्यन्यथा श्लोकमिमं पठन्तः,—'ब्रह्मवर्चसकामस्य प्राक् ग्रीवं प्राङ्मस्तकमासनं कर्त्तव्यम्, यशस्कामस्य उदक्मस्तकम्, पित्र्यमासनं दक्षिणतो नीचं कर्त्तव्यम्, प्रतिष्ठाकामस्य लम्भुकं सुन्दरं समम्,'—इत्यास-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नपरतया वर्णयन्ति। तदप्यसमीचीनमिति लच्यते। कुतः?। अनुक्लि-न्नार्थगृह्यसूत्रार्थपरत्वाद्ग्रन्थस्य। स्थानप्रस्तावाचानुपस्थितासनपरताया अन्याय्यत्वात्। अन्यथा वृषीं कुर्य्यादुदङ्मुखीम्—इत्यस्मिन्नेव प्रक्रमे इदमपि कुर्य्यात्। वर्णनापि तेषां न ग्रन्थमनुसरतीत्यलमसदावेशेन॥

वरं गान्तु विजानीयाच्चतुर्वर्षामिति स्थितिः॥ ४२॥
दक्षिणानां विशिष्टं वै वरं तमपरं विदुः।

चतुर्वर्षां गां वरं जानीयादिति शास्त्रमर्य्यादा। दक्षिणानां मध्ये विशिष्टं श्रेष्ठं, तं गाम्, अपरं पूर्व्वोक्तादन्यं वरं जानन्त्याचार्य्याः। तम्,—इति विधेयप्राधान्यविवक्षया पुंसा निर्देशः, लिङ्गव्यत्ययाद्वा। नात्र कल्पे वर्षनियम इत्यभिप्रायः। तथा चोक्तम्।

"गौर्विशिष्टतमा लोके शास्त्रेऽपि च निगद्यते।
न ततोऽन्यद्वरं किञ्चित् तस्माद्गौर्वरमुच्यते"॥

इति। तदनेन,—"अनड्वान् कंसो वासो वर इति दक्षिणाः"—इति सूत्रस्थोऽनुक्लिन्नार्थो वरशब्दो व्याख्यातः॥

"पूर्णपात्रो दक्षिणा"—इति सूत्रस्थं पूर्णपात्रपदं व्याकरोति,—

चतुर्मुष्टिर्भवेत् किञ्चित् पुष्कलं तच्चतुर्गुणम्॥ ४३॥
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते।

चतुर्मुष्टिः 'किञ्चित्' भवेत्। किञ्चिच्चतुर्गुणं—षोड़शमुष्टिः पुष्कलं भवेत्। चत्वारि पुष्कलानि—चतुःषष्टिमुष्टिः पूर्णपात्रमिति दीक्षित भाष्यम्। 'अष्टमुष्टि भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलं'—इति नारायणोपाध्यायादयः पठन्ति। अत्र च, "कंसं चमसं वाऽन्नस्य पूरयित्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृतस्य वाऽकृतस्य वाऽपि वा कलानामेवैतं पूर्णपात्रमित्याचक्षते"—इत्याचार्य्यसूत्रोक्तस्य एतस्य च पूर्णपात्रस्य सम्भवासम्भवाभ्यां व्यवस्था बोद्धव्या। अत्यन्तासम्भवे तु,—

"यावता बहुभोक्तुश्च तृप्तिः पूर्णेन जायते।
नावरार्द्धं ततः कुर्य्यात् पूर्णपात्रमिति स्थितिः"।

इति कर्म्मप्रदीपोक्तं द्रष्टव्यम्॥

यज्ञद्रव्यसमाहारे भोजनाचमने तथा॥ ४४॥
जपे वा होमकाले वा दक्षिणं बाहुमुद्धरेत्।

यज्ञद्रव्याणां स्रुवादीनां समाहरणे ग्रहणे इत्यर्थः। जपे जपकाले। एषु दक्षिणं बाहुं यथासम्भवमूर्द्धं कुर्य्यात्। वाशब्दौ समुच्चयार्थौ॥

होमः प्रतिग्रहो दानं भोजनाचमनानि च॥ ४५॥
अवहिर्जानु कर्म्माणि साङ्गुष्ठान्येवमाचरेत्।
आरम्भः सर्व्वहोमानामाहुर्यज्ञविदो जनाः॥ ४६॥

अवहिर्जानु यथा भवति, तथैतान्याचरेदिति क्रियाविशेषणमेतत्। 'कर्म्माणि' सन्ध्यावन्दनादीनि। होमादेर्विशेषतः कथनमादरार्थम्। अवहिर्जानु,—इति अन्तर्जानु इत्यर्थः। जानुनोर्मध्ये हस्तौ कृत्वेत्येतत्।

"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः"।

इति। "अन्तरूर्व्वोरत्नी कृत्वा"—इति चैवमादिस्मृत्यन्तरदर्शनात्। जानुमध्ये दक्षिणं बाहुं कृत्वा,—इति केचित्। 'साङ्गुष्ठानि' अङ्गुष्ठाङ्गुलिसहितानि चैतानि कर्म्माण्याचरेत्। सर्व्वहोमानामारम्भोऽप्येव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेव करणीय इति यज्ञविदो जनाः कथयन्ति। होम इति वचना-दारम्भे नियमो न स्यादिति वा; आदरातिशयार्थं वा; 'आरम्भः सर्व्व-होमानाम्'—इति पुनराह ॥

"मध्यतः प्राचीं रेखामुल्लिख्योदीचीञ्च संहतां पश्चात्"—इत्यादि सूत्रेण स्थण्डिले रेखादिकरणमभिधाय, "लक्षणावृदेषा सर्व्वत्र"—इति सूत्रेण तेषां लक्षणत्वमुक्तं गोभिलेन। तदिदं विशेषतो विवक्षुः प्रतिजानीते,—

लक्षणं तत् प्रवक्ष्यामि प्रमाणं दैवतञ्च यत्।

गोभिलेन रेखाकरणादिरूपं लक्षणमुक्तं, तदहं प्रकर्षेण वक्ष्यामि। रेखाणां यत् प्रमाणं, यच्च दैवतं देवता, तत् सर्व्वं प्रवक्ष्यामि ॥

न नखेन न काष्ठेन नाश्मना मृण्मयेन वा ॥ ४७ ॥
प्रोल्लिखेल्लक्षणं विप्रः सिद्धिकामस्तु यो भवेत्।

अश्मना पाषाणेन। लक्षणं रेखाम् ॥

नखादिना रेखाकरणे दोषमाह,—

नखेन कुनखी चैव काष्ठेन व्याधिमृच्छति ॥ ४८ ॥
अश्मना धननाशः स्यात् मृण्मयेन कलिर्ध्रुवम्।

ऋच्छति गच्छति प्राप्नोति,—इत्येतत्। कलिः कलहः ॥

नखादीनां दोषमभिधाय, अथेदानीं फलादीनां गुणमाह,—

फलेन फलनी चैव पुष्पेण श्रियमृच्छति ॥ ४९ ॥
पर्णेन धनलाभः स्यात् दीर्घमायुः कुशेन तु।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फलेन लक्षणं लिखन् फलनी स्यात्। फलनं फलम्। तदिद्यतेऽस्येति फलनी फलवान् इत्यर्थः। फलिनी,—इति पाठे, फलेन लिखिता रेखा फलिनी फलप्रदा स्यादिति व्याख्येयम्। पर्णेन पत्रेण ॥

यस्मादेवम्,—

तस्मात् फलेन पुष्पेण पर्णेनाथ कुशेन वा ॥ ५० ॥
प्रोल्लिखेल्लक्षणं विप्रः सिद्धिकामस्तु कर्म्मसु ।

ऋज्वर्थः श्लोकः ॥

सव्यं भूमौ प्रतिष्ठाप्य प्रोल्लिखेद्दक्षिणेन तु ॥ ५१ ॥
तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत् ।

सव्यं वामं पाणिं भूमौ प्रतिष्ठाप्य दक्षिणेन पाणिना लक्षणं प्रोल्लिखेत्। यावदग्निं स्थण्डिले स्थापयेत्, तावद् वामं पाणिं नोत्थापयेत्—भूमावेव स्थापयेदित्यर्थः ॥

अथेदानीं रेखाणां देवतामाह,—

प्राक्कृता* पार्थिवी रेखा† आग्नेयी चाप्युदक् स्मृता‡ ॥ ५२ ॥
प्राजापत्या च ऐन्द्री च§ सौमी च प्राक्कृता स्मृता ।

पार्थिवी पृथिवीदेवताका रेखा प्राक्संस्था आचार्य्येण कृता। आचार्य्येण प्राक् संस्था या रेखा प्रथममभिहिता सेयं पार्थिवी,—इति

* प्राग्गता,—इति पाठान्तरम्। † ज्ञेया,—इति पाठान्तरम्।
‡ गता,—इति पाठान्तरम्। § प्राजापत्या तथा चैन्द्री,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वक्ष्ये,—प्राक् कृता पार्थिवीरेखा,—इति भङ्ग्यन्तरेणाह। अनेनैव श्लोकशेषो व्याख्यातः। आसाञ्च रेखाणां पाठक्रमेणैव करणं बोद्धव्यम्। तदनेन, "मध्यतः प्राचीं लेखामुल्लिख्योदीचीञ्च संहतां पश्चान्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युचेत्"—इति सूत्रोक्तानां रेखाणां दैवतमुक्तम्॥

उत्करं गृह्य रेखाभ्योऽरत्निमात्रे निधापयेत्॥ ५३॥
द्वारमेवन्तु द्रव्याणां प्रागुदीच्यां दिशि स्मृतम्।

रेखाभ्यः पूर्व्वोक्ताभ्यः, उत्करं गृह्य गृहीत्वा, अरत्निमात्रे देशे निधापयेत् स्थापयेत्। उद्धृत्य कीर्य्यते विक्षिप्यते इत्युत्करो रेखोत्कीर्णमृत्तिका भण्यते। कस्यां दिशि निधापयेत्?। उच्यते। प्रागुदीच्यामैशान्यां दिशि पुनर्द्रव्याणामुत्कराणामेवं द्वारं निधापनद्वारं मुनिभिः स्मृतम्। द्वारमेतत् पदार्थानाम्,—इति तत्त्वकारपाठेऽपि तथैवार्थः। 'एवमैशान्यां दिशि होमद्रव्याणामानयनार्थं द्वारं स्मृतम्'—इति दीक्षितरामकृष्णः॥

रेखाणां मानमाह,—

पार्थिवी चैव सौमी च लेखे द्वे द्वादशाङ्गुले॥ ५४॥
एकविंशतिराग्नेयी प्रादेशिन्ये उभे स्मृते।

पृथिवीदेवताका सोमदेवताका च द्वे रेखे द्वादशाङ्गुलपरिमिते। अग्निदेवताका रेखा एकविंशत्यङ्गुलपरिमिता। उभे अवशिष्टे प्राजापत्यैन्द्रीरेखे प्रादेशिन्ये प्रादेशपरिमिते स्मृते। एतदुक्तं भवति। प्रथमं प्राक्संस्थां द्वादशाङ्गुलपरिमितां पार्थिवीं रेखामुल्लिखेत्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत उदक्संस्थामेकविंशत्यङ्गुलामाग्नेयीं रेखामुल्लिखेत्। ततः प्राक्संस्थां प्रादेशपरिमितां प्राजापत्यामैन्द्रीञ्च रेखामुल्लिखेत्। ततः पुनरपि प्राक्संस्थां द्वादशाङ्गुलपरिमितां सौमीं रेखामुल्लिखेत्,—इति। कात्यायनस्तु कर्म्मप्रदीपे,—

"लक्षणे प्रागगतायास्तु प्रमाणं द्वादशाङ्गुलम्।
तन्मूललग्ना योदीची तस्या एवं नवोत्तरम्।
उदग्गतायाः संलग्नास्तिस्रः प्रादेशमात्रिकाः।
सप्तसप्ताङ्गुलांस्त्यक्त्वा कुशेनैव समुल्लिखेत्"।

इति प्रकारान्तरं स्मरति। तदनयोः प्रकारयोर्विकल्पो बोद्धव्यः। कुतः?। द्वयोरेव स्वशास्त्रोक्तत्वात्॥

आग्नेयीलग्नानां रेखाणामन्तरालमुल्लेखनप्रकारञ्चाह,—

षडङ्गुलान्तराः कार्य्या आग्नेयी संहितास्तु ताः॥५५॥
पार्थिवायास्तु रेखायास्तिस्रस्ता उत्तरोत्तराः।

आग्नेय्यामुदक्संस्थाया मेकविंशत्यङ्गुलमितरेखायां संहिताः संलग्नाः, ता अतस्रो रेखाः प्रत्येकं षडङ्गुलव्यवहिताः कर्त्तव्याः।

"सप्त सप्ताङ्गुलांस्त्यक्त्वा कुशेनैव समुल्लिखेत्"।

इति कर्म्मप्रदीपोक्तमन्तरं तदुक्तकल्पे बोद्धव्यम्। पार्थिवायाः पार्थिव्या रेखाया अन्या यास्तिस्रो रेखाः, ता उत्तरोत्तराः कार्य्याः। सा खल्वियं पार्थिवी रेखा स्थण्डिलस्य दक्षिणतः स्यात्। कथं ज्ञायते?। अन्यासां तिसृणां रेखानामुत्तरोत्तरत्वषड़ङ्गुलान्तरत्वयोरनुरोधात्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रेखाणां वर्णमाह,—

शुक्लवर्णा पार्थिवी स्यादाग्नेयी लोहिता भवेत् ॥५६॥
प्राजापत्या भवेत् कृष्णा नीलामैन्द्रीं विनिर्दिशेत् ।
पीतवर्णेन सौमी स्याद्रेखाणां वर्णलक्षणम् ॥ ५७ ॥

पीतवर्णेन,—इति इत्थम्भावे तृतीया । पीतवर्णेन विशिष्टा स्यादित्यर्थः । श्लिष्टमन्यत् । तदित्थमेनं सार्द्धश्लोकं दीक्षितरामकृष्णः पपाठ व्याचष्टे च । रघुनन्दनस्त्वन्यथेमं ग्रन्थं पठति । तद्यथा,—

पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत् ।
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता ।
श्वेतवर्णा च सौमी स्याद्रेखाणां वर्णलक्षणम् ॥

इति । भवदेवभट्टोऽप्येवमेव पद्धतौ लिलेख । पीतं रूपं पृथिव्याः, श्वेतं सोमस्य,—इति तन्त्रान्तरेऽपि दृश्यते । तदत्र भवन्तो भूमिदेवाः प्रमाणम् ॥

एष लेखविधिः प्रोक्तो प्रतिष्ठाकर्म्मसु सर्व्वसु ।
सूक्ष्मास्ता ऋजवः कार्य्या लेखास्ताः सुसमाहिताः
॥ ५८ ॥

लेखविधिः,—रेखाणामुल्लेखनविधिः । अथवा । लिख्यते,—इति लेखो रेखा भण्यते । तासां विधिरित्यर्थः । सर्व्वसु,—इति एत्वाभावश्छान्दसः । ताः पूर्व्वोक्ता रेखाः, सूक्ष्मा न स्थूलाः, ऋजवो न वक्राः, कर्त्तव्याः । ताः खल्विमा रेखाः सुसमाहिताः,—शोभनं सम्यक्—यथोक्तप्रकारेणाहिताः करणीयाः,—इत्यादरार्थमुक्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतानि तत्त्वतो ज्ञात्वा गृह्याकर्म्मणि कारयेत्।

एतानि परिसमूहनादीनि तत्त्वतो ज्ञात्वा गृह्याकर्म्मणि कर्त्तव्ये कारयेत्। एतानि,—इत्येव। गृह्याकर्म्माणि,—इति पाठे, एतानि ज्ञात्वा गृह्याकर्म्माणि कारयेदिति व्यक्त एवार्थः॥

"प्रागुदक् प्रवणं देशं समं वा परिसमूह्योपलिप्य"—इति सूत्रेण भूमेरुपलेपनं गोभिलेनोक्तम्। 'गोमयेनोपलिप्य च'—इत्यनेन स्वयमप्येतदनुशिष्टम्। तत्र पृच्छति,—

विष्णुपादपरिक्रान्ता वाराहेणोद्धृता च या॥ ५९॥
शुचिर्मेध्या च पूता च किमर्थमुपलिप्यते?।

येयं भूमिर्विष्णुपादेन परिक्रान्ता कृतपरिक्रमणा, वाराहेण वराहरूपिणा भगवता प्रलयार्णवादुद्धृता च, सेयं शुचिरनुपहता, मेध्या यज्ञार्हा च, (मेधो यज्ञ इत्यनर्थान्तरम्) पूता पवित्रा च। अथ वा। शुचिर्मेध्या पवित्रेति पर्य्यायशब्दानां कथनभङ्ग्या पवित्रत्वातिशयो भूमेरभिप्रेयते। सा खल्वियं किमर्थं पुनरुपलिप्यते गोमयेन?॥

अत्रोत्तरमाह,—

इन्द्रेण वज्राभिहतः पुरा वृत्रो महासुरः॥ ६०॥
मेदसा तस्य संक्लिन्ना तदर्थमुपलिप्यते।

पुरा पूर्व्वस्मिन् काले वृत्रो नाम कश्चिन्महासुरः इन्द्रेण कर्त्रा वज्रेण करणेनाभिहतः, तस्य वृत्रस्य मेदसा धातुविशेषेण संक्लिन्ना

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आर्द्रा (क्लिदू आर्द्रभावे) इयं पृथिवी एतस्मात् कारणादुपलिप्यते गोमयेन ॥

ननु कस्मिंश्चिदतीते काले वृत्रस्य मेदसा संक्लिन्ना भूमिरासीत्, तदपि मेदः पूर्व्वमेवोद्धृतं, तत् किमिदानीमुपलेपनेन ?—इत्याशङ्कायामाह,—

मेदमुद्ध्रियमाणस्य शेषं यत् किञ्च तिष्ठति ॥ ६१ ॥
अन्तर्धानं मृदा चैव दीयते वेदनिश्चयः।

'उद्ध्रियमाणस्य' उद्धृतस्य मेदसः, 'शेषम्' अवशिष्टम्, 'यत्' 'किञ्च' किमपि, 'मेदम्' मेदः, 'तिष्ठति' अस्थात्, 'मृदा' 'एव' 'तस्य' 'अन्तर्धानम्' 'दीयते' दत्तम्। उभयत्र कालसामान्ये लट्। अथ वा। उद्धृतस्य मेदसोऽवशिष्टं किञ्चिन्मेदोऽद्यापि तिष्ठत्येव। तिष्ठति चेत्, कथं न दृश्यते ?। तत्राह। मृदैव तस्यान्तर्धानमद्यापि दीयते। अतो न दृश्यते,—इति भावः। इत्ययं 'वेदस्य' 'निश्चयः'। एतस्मात् कारणादिदानीमप्युपलिप्यते,—इत्यभिप्रायः।

दीक्षितस्त्वन्यथेमं ग्रन्थं वर्णयाञ्चकार,—मेदमुद्ध्रियमाणस्य,—इत्यादिम्। "वृत्रस्य मेदं रुधिरमुद्ध्रियमाणस्योद्धृतस्य यत् शेषं किञ्च तिष्ठति, तन्मृदैव मृत्तिकया अन्तर्धानं दीयते—स्थण्डिलं क्रियते इत्यर्थः"—इति ॥

द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि ॥ ६२ ॥
यानि पश्यत्युदासीनः* कर्त्ता तानि न पश्यति।

---

* पश्यन्त्युदासीनाः,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्यूते,—

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते"।

इत्युक्तलक्षणे। व्यवहारे,—

"वि नानार्थे, ऽव सन्देहे, हरणं हार उच्यते।

नानासन्देह-हरणाद्व्यवहार इति स्मृतः"।

इत्याद्युक्तलक्षणे विवादनिर्णये, यज्ञकर्म्मणि च प्रवृत्ते, यान्युदासीनः पश्यति, द्यूतादिकर्त्ता तानि न पश्यति। 'प्रवृत्ते'—इत्यत्र 'प्रव्रते' —इति रघुनन्दनः पठति। 'प्रव्रते प्रकृष्टव्रते'—इति व्याकरोति च। यस्मादेवं, तस्मात्,—

एकः कर्म्मणि युक्तः स्यात् द्वितीयस्तन्त्रधारकः॥६३॥
तृतीयः प्रश्नं प्रब्रूयात्* ततः कर्म्म समाचरेत्†।

एकः पुरुषः कर्म्मणि युक्तः स्यात्। द्वितीयः पुरुषः, तन्त्रस्य कर्म्म-विस्तारस्य शुद्धाशुद्धकर्म्मणो धारको धर्त्ता स्यात्,—इति दीक्षित भाष्यम्। स खल्वयं पुरुषः सब्रह्मके कर्म्मणि ब्रह्मैव स्यात्। कथं ज्ञायते?। "भाषेत यज्ञसंसिद्धिम्"—इति गोभिलसूत्रस्वरसात्। अब्रह्मके पुनरन्योपि। तन्त्रधारकः पुस्तकवाचकः,—इति रघुनन्दनः। तृतीयः पुरुषः कर्म्मणः शुद्ध्यशुद्धिविषयकं प्रश्नं प्रब्रूयात् प्रकर्षेण शास्त्रादिना ब्रूयात् कथयेत्—निर्णयेदित्यर्थः। स खल्वयं सदस्योभण्यते॥

---

* प्रश्नकं ब्रूयात्,—इति पाठान्तरम्।

† समारभेत्—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथेदानीं "भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयन्ति"—इति सूत्रोक्त-मग्निप्रणयनं व्याकुरुते सार्द्धैश्चतुर्भिः,—

कपालैर्भिन्नपात्रैर्वा नत्वामैर्गोमयेन वा ॥ ६४ ॥
अग्निप्रणयनं कार्य्यं यजमान-भयावहम् ।

कपालैर्घटखण्डैः,—

"कपालं मृण्मयं पात्रं चक्राघटितमुच्यते" ।

इत्युक्तलक्षणैर्वा । भिन्नपात्रैः—भग्नपात्रैर्वा । आमैरपक्कपात्रैर्वा । (तुशब्दो वाशब्दार्थः) । गोमयेन वा, अग्निप्रणयनं न कर्त्तव्यम् । कपालादिपात्रैः कृतं खल्वग्निप्रणयनं यजमानस्य भयमावहति ॥

अल्पः प्रणीतो विच्छिन्नोऽसमिद्धश्चापरिश्रुतः ॥ ६५ ॥
त्वरया पुनरानीतो यजमान-भयावहः ।

अल्पः । विच्छिन्नोऽन्तराच्छेदसहितः—विक्षिप्त इति यावत् । असमिद्धोऽप्रदीप्तः । अपरिश्रुतः शास्त्रोक्तेतिकर्त्तव्यतारहितः । श्रुतं शास्त्रमिति ह्यनर्थान्तरम् । त्वरया चानीतः प्रणीतोऽग्निर्यजमानस्य भयमावहति । पुनः शब्दश्चशब्दार्थः ॥

यस्मादेवम्,—

तस्माच्छुभेन पात्रेण अविच्छिन्नाकृशं बहु ॥ ६६ ॥
अग्निप्रणयनं कुर्य्याद् यजमान-सुखावहम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अविच्छिन्नम्, अक्रुशं—समिद्धम्, बक्र—नाल्पं यथा भवति, तथा अग्निप्रणयनं कुर्य्यात् ॥

शुभं पात्रन्तु कर्त्तव्यं यजमान-सुखावहम् ॥ ६७ ॥

शुभं पात्रमित्यादरार्थं पुनरुपादानम् ॥

शुभं पात्रमाह,—

शुभं पात्रन्तु कांऽस्यंऽ स्यात्तेनाग्निं प्रणयेद्बुधः।
तस्याभावे शरावेण नवेनाभिमुखञ्च तम् ॥ ६८ ॥

तस्य कांस्यस्याभावे नवेन शरावेणाग्निं प्रणयेदिति गतेन संबन्धः। अभिमुखं यथा भवति, तथा 'तम्' अग्निं प्रणयेदिति कल्पद्वयेऽपि संबध्यते। यस्तु,—

"शरावे भिन्नपात्रे वा कपाले वोल्मुकेऽपि वा।
नाग्निप्रणयनं कुर्य्याद् व्याधिहानिभयावहम्"।

इति शरावनिषेधः। स पुरातनशरावविषयः, कांस्यपात्रसद्भावविषयः, गोभिलीयव्यतिरिक्तविषयो वा ॥

अग्नेः स्वरूपमाह,—

सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः।
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु ॥ ६९ ॥

अन्तशब्दः स्वरूपार्थः। सर्व्वतः पाणिपादस्वरूपं यस्य, स तथा। सर्व्वतोऽक्षीणि—चक्षूंषि, शिरांसि, मुखानि च, यस्य, स तथोक्तः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स खल्वयं विश्वरूपो महानग्निः सर्व्वकर्म्मसु प्रणीतो भवति। "ज्ञात्वा स्वरूपमाग्नेयम्"—इत्यग्नेः स्वरूपं विदुषः फलवादः पुरस्तादभिहितः। तदेव खल्वग्नेः स्वरूपमनेन श्लोकेनोक्तमिति बोद्धव्यम्। रघुनन्दनस्तु,—विशेषतोनामाज्ञाने सर्व्वत्र विश्वरूपोनामाग्निर्भवति,—इति कल्पयाञ्चकार। अग्निप्रणयनानन्तरं पठनीयोमन्त्रोऽयम्,—इति चाचचते॥

न वस्त्रेण धमेदग्निं न शूर्पेण न पाणिना।
मुखेनोपधमेदग्निं मुखाद्ध्येषोऽध्यजायत॥ ७०॥

वस्त्रेण शूर्पेण पाणिना वा, अग्निं न धमेत् नोद्दीपयेत्। किन्तु मुखेनाग्निमुपधमेत्। तत्र हेतुः। हि यस्मादेषोऽग्निः प्रजापतेर्मुखादध्यजायत उत्पन्नः। मुखादुपजातस्य मुखेनोपधमनं युक्तमिति भावः। मुखादुत्पत्तिश्चाग्नेस्ताण्ड्ये ब्राह्मणे समाम्नायते। "सोऽकामयतः—यज्ञं सृजेयेति, स मुखत एव त्रिवृतमसृजत, तं गायत्रीच्छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणो मनुष्यो वसन्त ऋतुस्तस्मात् त्रिवृत् स्तोमानां मुखं, गायत्री छन्दसा, मग्निर्देवतानां, ब्राह्मणो मनुष्याणां, वसन्त ऋतूनां, तस्माद् ब्राह्मणो मुखेन वीर्य्यं करोति, मुखतो हि सृष्टः"—इति। "मुखादग्निश्च वायुश्च"—इति च पुरुषसूक्ते। रघुनन्दनस्त्वेतदजानानः—'मुखात् मुखपात्रमन्त्रात्,—इति यदृच्छयैव कल्पयाञ्चकार। तदनादरणीयम्।

तदिदं मुखेनाग्नेरुपधमनं लौकिकाग्निव्यतिरिक्तविषयम्। तथाच, कर्म्मप्रदीपः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"जुह्वंश्च हुते चैव पाणि-सूर्प-स्फ्य-दारुभिः ।
न कुर्य्यादग्निधमनं कुर्य्याद् वा व्यजनादिना ।
मुखेनैके धमन्त्यग्निं मुखाद्ध्येषोऽध्यजायत ।
नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत्" ।

इति ॥

वस्त्रादिना अग्निधमने दोषम्, मुखेन धमने फलञ्चाह,—

वस्त्रेण तु भवेद् व्याधिः सूर्पेण धननाशनम् ।
पाणिना मृत्युमादत्ते मुखेन सिद्धिभाग्भवेत् ॥ ७१ ॥

मृत्युमादत्ते गृह्णाति,—अचिरान् म्रियते, इत्यर्थः ॥

अथेदानीं त्रिधा प्रातर्होमकालमाह,—

उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ ७२ ॥

ऋज्वर्थः श्लोकः ॥

वस्तुक्रमानुरोधादुद्देशक्रममुल्लङ्घ्य प्रथममनुदितं कालं लक्षयति,—

रात्रेः षोड़शमे भागे ग्रहनक्षत्रभूषिते ।
अनुदयं विजानीयाद्धोमन्तत्र प्रकल्पयेत् ॥ ७३ ॥

रात्रेः—षोड़शधा विभक्तायाः, षोड़शमे भागे । स खल्वयं कालोऽन्तिममुहूर्त्तादपि किञ्चिन्न्यूनो भवति । तमिमं कालं विशिनष्टि । ग्रहनक्षत्रैर्भूषिते अलङ्कृते । यावद्ग्रहनक्षत्राणि दीप्यन्ते, तावदित्यर्थः । तमिमं कालमनुदयं जानीयात् । तत्रानुदयकाले होमं कुर्य्यात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समयाध्युषितं कालमाह,—

ततः प्रभातसमये नष्टे नक्षत्रमण्डले।
रविबिम्बं न दृश्येत समयाध्युषितं स्मृतम्॥ ७४॥

ततः—तदनन्तरं, प्रभातसमये,—भातं दीप्तिः; "भा दीप्तौ"—इति स्मरणात्, रविकिरणानां प्रदीप्तिसमये इत्यर्थः। अतएव नक्षत्र-मण्डले नष्टे विलीने विरले इत्येतत्। पुनर्विशिनष्टि। रविबिम्बं सूर्य्य-मण्डलं यावन्नदृश्यते, तावदित्यर्थः। स खल्वयं कालः समयाध्युषितं स्मृतमाचार्य्यैः। विधेयप्राधान्यविवक्षया नपुंसकनिर्देशः।

उदयकालमाह,—

रेखामात्रन्तु दृश्येत रश्मिभिश्च समन्वितम्।
उदयं तं विजानीयाद्धोमं कुर्य्याद्विचक्षणः॥ ७५॥

रश्मिभिः किरणैर्युक्तं सूर्य्यमण्डलस्य रेखामात्रं यदा दृश्यते, तं का-लमुदयं जानीयात्। पुरस्तात्तावत् 'रविबिम्बं न दृश्येत'—इत्युक्तम्। तदत्र, रविबिम्बस्यैव रेखामात्रं दृश्यते,—इत्यर्थमवगच्छामः। स खल्व-यमुदयकालस्यारम्भः। उत्तरावधिस्तस्य,—

"हस्तादूर्द्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति।
तावद्धोमविधिः पुण्यो नान्योऽभ्युदितहोमिनाम्"।

इति कर्म्मप्रदीपे कात्यायनेनोक्तः। तस्मात्,—'स्थण्डिलवद्रेखाया एकविंशत्यङ्गुलपरिमाणदर्शनात् रेखामात्रमेकविंशत्यङ्गुलमात्रं रवेरुदयं दृश्येत'—इत्यसङ्गतैषा कल्पना दीक्षितस्य।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु "पुरोदयात् प्रातः प्रादुष्कृत्योदितेऽनुदिते वा प्रातराहुतिं जुहुयात्"—इति सूत्रयता गोभिलेन प्रातर्होमस्य कालद्वयमुक्तम्, अनेन तु कालत्रयमुच्यते। तदनयोः पितापुत्रवचसोर्विरोधः। नैषदोषः। अभिप्रायभेदात्। गोभिलः खल्वाचार्य्यः उदयात् पूर्व्वमेवानुदयकालमभिप्रयन् समयाध्युषितस्यापि कालस्य तत्रैवान्तर्भावं मन्यमानः 'उदितेऽनुदिते वा'—इति कालद्वयं सूत्रयाञ्चकार। अनेन तु "उदिते जुहोति, अनुदिते जुहोति, समयाध्युषिते जुहोति"—इति श्रुतिमनुसरता एकस्यैवोदयपूर्व्वकालस्यानुदयसमयाध्युषितत्वेन द्वैविध्यमभिप्रेत्य कालत्रयमुपदिष्टम्। तस्मादभिप्रायभेदात् द्वयोरविरोधः।

अथेदानीमग्न्याधानस्य कालानाह,—

आधानस्य तु चत्वार उक्ताः कालाः पृथक् पृथक्।
अन्त्या समिद्विवाहश्च विभागः परमेष्ठिनः॥ ७६॥

अग्न्याधानस्य पुनः पृथक् पृथक् चत्वारः काला आचार्य्यैरुक्ताः। तान् कालान् गणयति,—अन्त्या समिदित्यादिना। विभागो अंशविभागः।

अत्र किञ्चिद्वक्तव्यमस्ति। तत्र तावत्,—"ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन्"—इति सूत्रेण यः आधानकाल उक्तः, स इहान्त्यसमिद्योगादन्त्या समिदिति निर्दिश्यते। "जायाया वा पाणिं जिघृक्षन्"—इति सूत्रेण य आधानकाल उक्तः, स इह विवाह इत्युच्यते। यः पुनः परमेष्ठिनोऽग्नेराधानकालः—"प्रेते वा गृहपतौ परमेष्ठिकरणम्",—इत्यनेन सूत्रेणोपदिष्टः; स इह परमेष्ठिन इत्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिधीयते। विभागकालः पुनर्गोभिलेन नोपदिष्टः, तत् कथमाधानस्य चत्वारः काला उक्ता इत्युच्यते?। उच्यते। एते चत्वारः कालाः गोभिलेनोक्ताः,—इत्येतदिह नोच्यते। किन्तर्हि?। आचार्य्यैरुक्ताः,—इति। गौतमः खल्वाचार्य्यः,—"भार्य्यादिरग्निर्दायादिर्वा"—इति सूत्रयाञ्चकार। सोऽपि किल च्छन्दोग एव। तत्र तावत्, एक एव भार्य्यादिरग्निः,—'अन्त्यां समिधमभ्याधास्यन्'—इति, 'पाणिं जिघृक्षन्'—इति च कालद्वयाहितो भवतीत्याचार्य्येण दर्शितः। एकः खल्वपि दायादिरग्निः,—गृहपतेर्मरणं, दायविभागश्चेति कालद्वयाहितो भवति,—इत्याचार्य्यसूत्रादाचार्य्यपुत्रवाक्याच्चावगच्छामः। तस्मात्,—चत्वारः कालाः,—इति उपपन्नतरम्।

"प्रेते वा गृहपतौ"—इति सूत्रयता गोभिलेन गृहपतौ प्रेते यदाधानमुक्तं, तत् ज्येष्ठस्यैव भ्रातुर्न कनिष्ठस्य। कथं ज्ञायते?।

"ज्येष्ठः कुर्य्यात्तथाऽऽधानं कणीयांश्च विवर्जयेत्"।

इति कर्म्मप्रदीपवचनात्। कनिष्ठस्य तु विभागकाल एव दायादिरग्निर्भवति। तस्मात्,—आचार्य्यो ज्येष्ठं प्रधानमभिप्रेत्य 'प्रेते वा गृहपतौ'—इति सूत्रयाञ्चकार, आचार्य्यपुत्रस्तु कनिष्ठाभिप्रायेण 'विभागः'—इत्याह,—इति श्लिष्यते। तदिदं गोभिलानुक्तविशेषाभिधानपरं वचनम्।

ननु, "तथा तिथिनक्षत्रपर्व्वसमवाये" "दर्शे वा पौर्णमासे वाऽग्निसमाधानं कुर्व्वीत"—इति सूत्राभ्यामन्येऽप्याधानकाला गोभिलेनोक्ताः, तत् कथमाधानस्य 'चत्वारः कालाः'—इत्युच्यते। उच्यते। सत्यमुक्ता अन्येऽप्याधानकालाः, परन्तु गृह्यकर्म्मणां योऽग्निः, स्तत्रैते चत्वार एव कालाः सन्निकृष्यन्ते नेतरे। कुतः?। इतरेषां कालानामाश्रमा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तरसाधारणात्। श्रौताग्निसाधारणाच्च। चत्वारः खल्वमी कालाः गृह्यकर्म्मणामग्नेरसाधारणा भवन्ति। कस्मात्?। यस्मादन्यसमिदाधानात् विवाहाच्चासौ गृहस्थो भवति। पूर्व्वं खल्वयं ब्रह्मचारी आसीत्। सत्यपि गार्हस्थ्ये पितरि जीवति न स्वातन्त्र्यं गृह्यकर्म्मादिषु पुत्राणामिष्यते। "पितरि जीवति पुत्राणामर्थादानविसर्गाक्षेपेषु न स्वातन्त्र्यम्"—इत्यादिस्मरणात्। तेषामपि गृह्यतया पितृकृतैरेव गृह्यकर्म्मभिः फलवत्ताया न्याय्यत्वाच्च। अतएव गृहपतौ प्रेते गृह्यकर्म्मणामग्नेराधानं ज्येष्ठस्य। जीवति ज्येष्ठे कनीयसामप्यविभक्तानामस्वातन्त्र्यं मुनयः स्मरन्ति। तथाच मनुः।

"पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः।
पुत्रवच्चापि वर्त्तेरन् ज्येष्ठे भ्रातरि धर्म्मतः"।

इति। अतएवांशविभागकालोऽमीषामाधानकालः। अतएव मनुः।

"एवं सहवसेयुर्वा पृथग्वाधर्म्मकाम्यया"।

इति विभागे धर्म्मकाम्यां हेतुतया निर्द्दिशति। गौतमोप्याह। "विभागे तु धर्म्मवृद्धिः"—इति। यस्मात्,—परेते गृहपतावग्नेराधानं ज्येष्ठस्यैव, कनीयसान्तु विभागकाल एव, तस्मादविभक्तानामेकमेव गृह्यकर्म्मादिकं विभक्तानान्तु पृथक् पृथक्,—इति स्मर्त्तारः स्मरन्ति। तथाच बृहस्पतिः।

"एकपाकेन वसतां पितृदेवद्विजार्च्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे"।

इति। नारदः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"भ्रातॄणामविभक्तानामेकोधर्म्मः प्रवर्त्तते ।
विभागे सति धर्म्मोऽपि भवेत् तेषां पृथक् पृथक्" ।

इति । तस्मात्,—गृह्यकर्म्मणामग्नेरसाधारणाश्चत्वारः कालाः,—इति तथोक्तम् । तथाच गौतमः । "भार्य्यादिरग्निर्दायादिर्वा, तस्मिन् गृह्याणि"—इति । एतत्सूत्रोक्तस्यैव खल्वग्नेश्चत्वार इमे आधान-कालाः भवन्ति,—इत्यवोचाम ॥

भार्य्यादेस्तावदग्नेः प्रथमप्रातराहुतिप्रकारः,—"तेन चैवास्य प्रातराहुति र्हुता भवति"—इति सूत्रेणोक्तः । दायादेरग्नेः प्रथमप्रातराहुति-प्रकारमाह,—

परमेष्ठी विभक्तश्च जुहुयादक्षतान् सकृत् ।
प्रातस्तूष्णीं घृतं वाऽपि प्रातराहुत्युपक्रमः ॥ ७७ ॥

येन परमेष्ठिनोऽग्नेराधानं कृतं, स इह परमेष्ठी भण्यते। येन च विभागकाले कृतमग्नेराधानं, स विभक्त इत्युच्यते। स खल्वयं परमेष्ठी विभक्तश्च, अक्षतान्—'अक्षतास्तु यवाः प्रोक्ताः'—इति वचनात् यवान्, घृतम् वा सकृदेकवारं तूष्णीममन्त्रकं प्रातर्जुहुयात्। सेयं दायादेरग्नेः प्रथमा प्रातराहुतिर्भवति। अपरस्तु सकृत् पदमनर्थकं कुर्व्वन्नाह,—'द्वितीयामपि तूष्णीं जुहुयात्,—इति ।

तदनयोः परमेष्ठिविभक्तयोरग्न्योः प्रातराहुतिभ्यामुपक्रमः प्रारम्भः। तदनेन, "सायमाहुत्युपक्रम एवात ऊर्द्धं गृह्योऽग्नौ होमोविधीयते"—इति गोभिलसूत्रं दायाद्यग्निव्यतिरिक्तविषयं व्याख्यातम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अपिवाऽन्यं मथिलाऽभ्यादध्यात्"—इति सूत्रेणारणेयोऽग्निरुपदिष्टः। तत्रारणिस्वरूपादिकमाह,—

आश्वत्थोन्तु शमीगर्भामरणिं कुर्व्वीत सोत्तराम्।
उरोर्द्दीर्घां रत्निदीर्घां चतुर्विंशाङ्गुलां तथा॥ ७८॥
चतुरङ्गुलोच्छ्रितां कुर्य्यात् पृथुत्वेन षड़ङ्गुलाम्।

आश्वत्थीमश्वत्थसंबन्धिनीम्। शमीगर्भां शमीगर्भसंबन्धिनीम्। तत्संरुन्धात्ताच्छब्दम्। शमीगर्भश्च,—

"संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते"।

इति कर्म्मप्रदीपोक्तलक्षणः। मुख्योऽयं पक्षः। असम्भवे आश्वत्थीमेव कुर्य्यात्।

"अलाभे त्वशमीगर्भादुद्धरेदविलम्बितः"।

इति कर्म्मप्रदीपवचनात्। सोत्तरामुत्तरारणिसहितामरणिं कुर्व्वीत। कीदृशीं कुर्व्वीत?। उच्यते। उरोः सक्थ्नोर्द्दीर्घाम्। रत्नि र्व्याख्याता। तत्परिमाणदीर्घाम्। चतुर्व्विंशाङ्गुलदीर्घाम्। तथेति दैर्घ्यपरामर्शः। "खादिरे बध्नाति, पालाशे बध्नाति, रौहितके बध्नाति"—इतिवदमीषां परिमाणानां विकल्पो बोद्धव्यः। चतुरङ्गुलोच्छ्रितां चतुरङ्गुलोच्चाम्, पृथुत्वेन विस्तारेण षड़ङ्गुलां कुर्य्यात्। अत्र, चतुर्विंशाङ्गुलादि परिमाणमङ्गुष्ठाङ्गुलाभिप्रायेण। अविशेषाच्च द्वयोरप्यरण्योरेतत् परिमाणं बोद्धव्यम्। तथाच कर्म्मप्रदीपः।

"चतुर्व्विंशतिरङ्गुष्ठा दैर्घ्यं षड़पि पार्थवम्।
चत्वार उच्छ्रये मानमरण्योः परिकीर्त्तितम्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। अन्योऽपि विशेषः,—"तस्य या प्राङ्मुखी शाखा"—इत्यादिकः कर्म्मप्रदीपादुपलब्धव्यः॥

प्रमन्थचात्रोविलीनां परिमाणमाह,—

अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्यात् द्वादशाङ्गुलम्॥७९॥
ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम्।

चात्रगर्भस्थो मन्थनार्थः काष्ठविशेषः प्रमन्थः। सोऽयं प्रमन्थोऽष्टाङ्गुलः स्यात्। स खल्वयं प्रमन्थः उत्तरारणेः काष्ठशकलमुद्धृत्य कर्त्तव्यः।

"उत्तरारणिनिष्पन्नः प्रमन्थः सर्व्वदा भवेत्"।

इति कर्म्मप्रदीपवचनात्। चात्रम्—मन्थनदण्डरूपं द्वादशाङ्गुलपरिमितं स्यात्। ओविली च—चात्रोर्द्धस्थलौहशङ्कुशिरसि निबद्धकाष्ठविशेषरूपा द्वादशाङ्गुलैव स्यात्। एतत् सर्व्वं यथाविधि विन्यस्तं मन्थनयन्त्रमित्युच्यते। चात्रमोविली च सारवद्दारुणा निर्मातव्यम्।

"सारवद्दारवं चात्रमोविली च प्रशस्यते"।

इति कर्म्मप्रदीपवचनात्। विन्यासप्रकारस्त्वमीषां कर्म्मप्रदीपादुपलब्धव्यः।

अथेदानीं देवयोनिसंज्ञकं मन्थनस्थानमाह,—

मूलादष्टाङ्गुलमुत्सृज्य त्रीणि त्रीणि च पार्श्वयोः॥८०॥
देवयोनिः स विज्ञेयस्तत्र मथ्यो हुताशनः।

अरण्या मूलदेशादष्टाङ्गुलं त्यक्त्वा, पार्श्वयोश्च त्रीणि त्रीण्यङ्गुलानि त्यक्त्वा यः सन्धिप्रदेशो लभ्यते, स खल्वयं देवयोनिर्विज्ञेयः। तत्राग्निर्मथ्यः।

प्रकारान्तरमाह,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलादष्टाङ्गुलं त्यक्त्वा अग्रात्तु द्वादशाङ्गुलम् ॥ ८१ ॥
देवयोनिः स विज्ञेयस्तत्र मथ्यो हुताशनः ।

स्पष्टार्थः श्लोकः। प्रकारान्तरं मन्थनप्रकारस्य कर्म्मप्रदीपादुपलब्धव्यम्॥

स्रुवस्वरूपमाह,—

खादिरोऽरत्निदीर्घः स्यात् स्रुवोऽङ्गुष्ठपर्व्ववृत्तः ॥८२॥

खदिरकाष्ठनिर्म्मितोऽरत्निदीर्घः स्रुवः स्यात्। अरत्निर्द्विवितस्तिरिति दीक्षितभाष्यम्। अङ्गुष्ठपर्व्वपरिमाणेन वृत्तोवर्त्तुलः। स्रुवस्य धारणदण्डः खल्वयमङ्गुष्ठपर्व्ववृत्तः स्यात्। अग्रे पुनरस्य नाशारन्ध्रवत् मध्यस्थितमर्य्यादमङ्गुष्ठद्वयपरिमाणं वर्त्तुलं विलं विज्ञेयम्। तदाह कर्म्मप्रदीपः।

"खादिरो वाऽथ पालाशो द्विवितस्तिः स्रुवः स्मृतः।
स्रुग्वाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः।
स्रुवाग्रे घ्राणवत् खातं द्व्यङ्गुष्ठपरिमण्डलम्।
जुह्वाः शराववत् खातं सनिर्वाहं षडङ्गुलम्"।

इति। अग्रभागे अङ्गुष्ठपर्व्वभ्यां वृत्तोवर्त्तुलः,—इति वा वर्णनीयम्॥

स्रुचः स्वरूपमाह,—

पार्णीं स्रुचं वाहुमात्रीं पाणितलाकारपुष्कलाम्।
त्वग्विलां त्वग्रे कुर्व्वीत मेक्षणं स्रुक्स्रुवादिवत् ॥८३॥

पर्णः पलाशः—इत्यनर्थान्तरम्। पार्णीं पलाशसंबन्धिनीम्, बाहुमात्रीं बाहुपरिमिताम्, अग्रे अग्रदेशावच्छेदेन,—पाणितलाकार

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुष्कलां—पाणितलस्याकारेण पुष्कलां विस्तीर्णाम्, लम्बिलां—त्वक्-पर्य्यन्तखातां त्वचि खातां वा। (एतेन त्वक्युक्तमेवास्या अग्रं स्यात्)। तदेवम्भूतां स्रुचं कुर्व्वीत। इयमेव जुहूरित्युच्यते। अत्रापि विशेषः कर्म्मप्रदीपे द्रष्टव्यः। मेक्षणमपि स्रुक्स्रुवादिवत् काष्ठनिर्म्मितम्। विशेषस्तु कर्म्मप्रदीपे।

"इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्।
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्।
एषैव दर्व्वी यस्तत्र विशेषस्तमहं ब्रुवे।
दर्व्वी द्व्यङ्गुलपृथ्वग्रा तुरीयोनन्तु मेक्षणम्"।

इति॥

शङ्कुश्चैवोपवेशश्च द्वादशाङ्गुल इष्यते।

अन्वष्टक्यादिकर्म्मणि कर्षूणां खननार्थः शङ्कुर्भवति, 'वृषीं चोपदध्यात्,—इति सूत्रोक्तो वृष्यपरपर्य्याय उपवेशः,'—इति नारायणोपध्यायाः। 'उपवेशो हस्तप्रतिरूपकः,'—इति दीक्षितभाष्यम्। स खल्वयं शङ्कुरुपवेशश्च द्वादशाङ्गुल इष्यते आचार्य्यैः। अत्रापि,—

"शङ्कुश्च खादिरः प्रोक्तोरजतेन विभूषितः"।

इति कर्म्मप्रदीपोक्तोविशेषो द्रष्टव्यः॥

नवैः शोभनैरगर्भं पवित्रन्तु कुशाग्रजम्॥ ८४॥
ललाटाच्चिबुकं प्राहुर्बाहुमात्राः परिधयः।

नवैर्न पुनरास्तृतैरित्यर्थः। शोभनैः कुशैः पवित्रं प्राहुराचार्य्याः। बहुवचनं व्यक्तिभेदाभिप्रायम्। कथं ज्ञायते?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" ।

इति कर्म्मप्रदीपे द्विदलस्योक्तत्वात् । पवित्रं विशिनष्टि, अगर्भं अन्तर्गर्भशून्यम् । कुशाग्रजं साग्रकुशेन जातम् । ललाटात् ललाटमारभ्य (ल्यबलोपे पञ्चमी), चिवुकं चिवुकपर्य्यन्तम्—ललाटावधि चिवुकपर्य्यन्तपरिमाणमित्यर्थः । तदनेन,—"तत एव वर्हिषः प्रादेशमात्रे पवित्रे कुरुते"—इत्यादिसूत्रोक्तं पवित्रं व्याख्यातम् । "ललाट प्रमाणेन चिवुकं सन्दंशं प्राङ्गराचार्य्याः"—इति दीक्षितभाष्यम् ।

"परिधीनप्येके कुर्व्वन्ति शामीलान् पार्णान् वा"—इतिसूत्रोक्तान् परिधीन् व्याचष्टे । परिधयो बाहुमात्रा भवन्ति । विशेषस्तु कर्म्मप्रदीपे ।

"बाहुमात्राः परिधयो ऋजवः सत्वचोऽव्रणाः ।
त्रयो भवन्त्यशीर्णाग्रा एकेषान्तु चतुर्दिशम्" ।

इति ॥

दीप्ताग्नौ विस्फुलिङ्गेऽच वने दग्धेषु दारुषु ॥ ८५ ॥
न च संस्कारदोषोऽस्ति तथा चरुकपालयोः ।

'विक्षिप्ते दीप्ताग्नौ'—इति दीक्षितभाष्यम् । विस्फुलिङ्गे अग्निकणे, वने दवाग्निना दग्धेषु काष्ठेषु, चरौ च मार्ज्जारादिदृष्ट्याद्यल्पोपघाते, कपाले च, संस्कारे प्रोक्षणादौ कृते सति दोषो नास्ति ॥

अथेदानीं कर्म्मक्रममाह,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लेखनाभ्युक्षणे कृत्वा निहितेऽग्नौ समिद्दत् ॥८६॥
ततो भूमिग्रहं कृत्वा कुर्य्यात् परिसमूहनम्।

समिदित्यार्षो विभक्तिलोपः। ददिति शत्रन्तम्। तदयमर्थः। रेखोल्लेखनमभ्युक्षणञ्च कृत्वा निहिते स्थापितेऽग्नौ समिधं दद्यात्। ततः,—"पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदं भूमेर्भजामह इति" —इतिसूत्रोक्तं भूमिग्रहं कृत्वा, "इमं स्तोममितितृचेन परिसमूहेत्" —इतिसूत्रोक्तं परिसमूहनं कुर्य्यात् ॥

ब्रह्माणमुपसंकल्प्य चरुश्रपणमारभेत्॥ ८७॥
ब्रह्माणं स्तरणं विद्याच्चरुर्यत्र न कल्पितः।

ततो ब्रह्माणमुपसंकल्प्य,—अग्निसमीपे सम्यक् गृह्योक्तप्रकारेण स्थापयित्वा, चरुश्रपणमारभेत। तस्मात्,—भूमिजपादेः पूर्व्वं ब्रह्मस्थापनमित्यसङ्गतं वचनम्। यत्र कर्म्मणि चरुर्न कल्पितस्तत्र ब्रह्माणमेव स्तरणं जानीयात्। न तत्र गृह्योक्तं स्तरणं कुर्य्यादित्यर्थः॥

ब्रह्मविष्टरयो*श्चापि सन्देहे समुपस्थिते॥ ८८॥
ऊर्द्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः।

ब्रह्मविष्टरयोः स्वरूपसन्देहे निर्णयमाह,—ऊर्द्ध्वकेशो ब्रह्मा भवेत्। अधोलम्बितकेशो विष्टरो भवेत्। केशोऽग्रम्॥

---

* ब्रह्माविष्टरयोः,—इत्यादर्शपुस्तके अशुद्धः पाठः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कतिभिस्तु भवेद्ब्रह्मा? कतिभिर्विष्टरः स्मृतः?॥८९॥
पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन तु विष्टरः।

स्पष्टार्थः। आभ्यां श्लोकाभ्यां गोभिलोक्तौ दर्भवटुविष्टरौ व्याख्यातौ। कर्म्मप्रदीपे तु,—

"यज्ञवास्तुनि मुष्ट्याञ्च स्तम्बे दर्भवटौ तथा।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि"।

इति दर्भवटौ विष्टरे च दर्भसंख्या निषिद्धा। तदनयोर्विकल्पः,—पञ्चाशद्भिर्वा कुशैर्भवति, अपरिमितैर्वा कुशैः,—इति। कुतः?। द्वयोरप्यस्मच्छाखेऽभिधानात्। 'सम्भवे पञ्चाशद्भिः कुशैरसम्भवे अपरिमितैरिति व्यवस्थितोऽयं विकल्पः'—इति नारायणोपाध्यायाः। रघुनन्दनस्तु च्छन्दोगोऽपि, आचार्य्यपुत्रस्यैतद्वचनमित्यजानानः,—शाखान्तरीयमेतत् संख्यावचनम्,—इति ब्रुवन् कल्पनानैपुण्यमात्मनः ख्यापयाञ्चकार॥

उदग्धारामविच्छिन्नामाग्नमारभ्य दक्षिणाम्॥९०॥
दद्याद्ब्रह्मासनस्थाने सर्व्वकर्म्मसु नित्यशः।

अग्नेरिदं आग्न्यं स्थण्डिलमारभ्य दक्षिणां दक्षिणाग्रामितिदीक्षितभाष्यम्। अग्निमारभ्य,—इति तत्त्वकारः पठति। तदेवं ब्रह्मासनस्य स्थाने अविच्छिन्नामुदकस्य धारां दद्यात्। तदनेन,—"दक्षिणतोऽग्ने र्ब्रह्मासनमास्तीर्य्य"—इति सूत्रोक्तं ब्रह्मासनास्तरणम्,—तत्स्थाने इत्यमुदकधारां दत्त्वा करणीयमिति व्याख्यातम्। प्रागग्रवारिधारादानम्—इति केचित्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकाग्नौ* पितृयज्ञे च ब्रह्माणं नोपकल्पयेत्॥ ९१॥
सायं प्रातश्च होमेषु तथैव बलिकर्मसु।

एकोऽग्निर्यस्मिन्, तस्मिन्नेकाग्नौ पितृयज्ञे,—इति सामानाधिकरण्येन संबन्धः, श्रौतस्य वह्निसाध्यस्य पिण्डपितृयज्ञस्य निरासार्थः। चकारः पुनरर्थः। एकाग्नौ पितृयज्ञे पुनर्ब्रह्माणं नोपकल्पयेत्। पितृयज्ञे अन्वष्टक्यकर्मणि पिण्डपितृयज्ञे च,—इति दीक्षितभाष्यम्। एकाग्नौ, पितृयज्ञे च,—इत्युभयत्र ब्रह्माणं नेच्छन्त्यन्ये। तदसङ्गतम्। एकाग्न्योरपि दर्शपौर्णमासयोर्ब्रह्मोपवेशनस्याचार्य्येण गृह्ये अभिधानात्। अपिच, एवं खल्वेकाग्निसाध्ये गृह्योक्तकर्ममात्र एव विवाहहोमादौ ब्रह्मा न स्यात्। दृश्यते च। लिङ्गञ्च विवाहहोमे ब्रह्मणः पश्यामः। तथाच वक्ष्यति।

प्राजग्राहमुदग्राहं ब्रह्माणमृत्विजं तथा॥ ९२॥
एतानि वाह्यतः कृत्वा शेषाणान्तु प्रदक्षिणम्।

तस्माद् यथोक्तमेवास्तु। 'राकाग्नौ'—इति पाठे, राकायां पौर्णमास्यां योऽग्निः, तत्र ब्रह्माणं न कल्पयेदित्यर्थः। तथाच गोभिलसूत्रम्। "पौर्णमास्यां रात्रौ खदिरशङ्कुशतं जुहुयादायुः कामः"—इति।

सायं प्रातर्होमेषु, चशब्दादन्येष्वपि क्षिप्रहोमेषु, बलिकर्मसु-चैत्यहोमकेष्वित्यर्थः। तदेतेषु ब्रह्माणं नोपकल्पयेत्। तथाच गृह्यान्तरम्।

---

* राकाग्नौ,—इति परिशिष्टप्रकाशधृतः पाठः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"एकसाध्येष्ववर्हिःषु न स्यात् परिसमूहनम्।
नोदगासादनञ्चैव चिप्रहोमा हि ते स्मृताः"।

इत्येकसाध्यत्वम्—होममात्रसाध्यत्वं चिप्रहोमानामाह॥

"अथ हविष्यस्यान्नस्याग्नौ जुहुयात् कृतस्य वाऽकृतस्य वा"—इत्यादि सूत्रोक्तं कृतादिपदं व्याचष्टे,—

यवव्रीह्यकृतं ज्ञेयं तण्डुलादि कृताकृतम्॥ ९३॥
ओदनन्तु कृतं विद्यात् न तस्य करणं पुनः।

ऋजुरक्षरार्थः। यवव्रीहि,—इति द्वन्द्वैकवद्भावः। तच्च गोधूमादीनामप्युपलक्षणम्। तण्डुलादि,—इत्यादिपदात् माषमुद्गादिविदलादीनां ग्रहणम्। ओदनपदम्—मोदकपिष्टकादीनामप्युपलक्षणम्। 'तण्डुलादि,—इत्यादिपदात् सक्तुग्रहणम्',—इत्यसङ्गतैषा कल्पना दीक्षितस्य। कुतः?। तस्य कृतत्वात्। कथं ज्ञायते?। यदयमोदनस्य कृतत्वे 'न तस्य करणं पुनर्'—इति हेतुतया निर्दिशति। अविशिष्टं खल्वेतत् सक्तौ। न हि तस्यापि पुनः करणमस्ति। तथाच कर्मप्रदीपः।

"कृतमोदनसक्वादि तण्डुलादि कृताकृतम्।
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा मतम्"।

इति॥

सीमन्ते दर्भपिञ्जूल्यस्तिस्रस्ताभिस्त्रिरुन्नयेत्॥ ९४॥
त्रिभिः श्वेतैश्च शलली, प्रोक्तोवीरतरः शरः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सीमन्तकरणे कर्म्मणि तिस्रोदर्भपिञ्जूल्यो भवन्ति। ताभिस्तिसृभिरेव-वारत्रयं सीमन्तमुन्नयेत्। तदनेन,—"अथ सीमन्तमूर्द्ध्वमुन्नयति भूरिति दर्भपिञ्जूलीभिरेव प्रथमं भुवरितिद्वितीयं स्वरितितृतीयम्"—इति सूत्रोक्ता दर्भपिञ्जूल्य उन्नयनञ्च व्याख्यातम्। भवदेवभट्टस्त्वेतदजानानः, नव दर्भपिञ्जूलीराह। दर्भपिञ्जूलीनां त्रित्वमभ्युपगच्छन्नपि भट्टनारायणः—एकैकया पिञ्जूल्या एकैकमुन्नयनं वदन्ननादेयवचन एव।

त्रिभिः स्थानत्रये स्थितैः श्वेतैः—अन्तरा वर्णान्तरसम्भिन्नैरित्यर्थः। इत्थम्भावे तृतीया। तदेवम्भूतैः श्वेतैः,—"त्रिश्वेतया च शलल्या"—इति सूत्रोक्ता शलली व्याख्याता। "अथ वीरतरेण"—इति सूत्रोक्तो वीरतरः शरः प्रोक्तः॥

दिशाञ्च विदिशाञ्चैव यत्र नोक्ता विचारणा॥ ९५॥
"सर्व्वतः" तत्र शब्दोऽयं विधियोगे निपात्यते।

यत्र विधियोगे—विधानयोगे, दिशां पूर्व्वादीनां विदिशामाग्नेय्यादीनाञ्च विचारणा, न प्रोक्ता नाभिप्रेता, तत्र 'सर्व्वतः,'—इत्ययं शब्दो-निपात्यते क्रियते। तथाच गोभिलसूत्रम्। "यत्र श्वभ्राः स्वयं खाताः सर्व्वतोऽभिमुखाः स्युस्तत्रावसानं प्राग्द्वारं यशस्कामोबलकामः कुर्व्वीत"—इति। दीक्षितः पुनः—"एवं दक्षिणैवं प्रतीच्येवमुदीची"—इति सूत्रमत्रोदाजहार॥

विहितप्रतिषिद्धाञ्च प्रणीतां नोपकल्पयेत्॥ ९६॥

पूर्व्वं विहिता पश्चात् प्रतिषिद्धा या प्रणीता,—सेयं विहितप्रतिषिद्धा। तामिमां प्रणीतां नोपकल्पयेत्,—'गृह्याकर्म्मसु'—इति पराचीन-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनुषज्य संबन्धनीयम्। आह। केयं विहितप्रतिषिद्धा नाम?। उच्यते। महतः पात्रान्तरस्य सद्भावे अपां पूर्णः स्रुवः। तथाच गोभिलसूत्रम्। "उत्तरतोऽपां पूर्णः स्रुवः प्रणीता, भावे न वा स्यादित्येके"—इति॥

वैरूपाक्षं जपेन्मन्त्रं प्रपदञ्चैव यज्ञवित्।
परिधींस्तु न कुर्व्वीत गृह्याकर्म्मसु याज्ञिकः॥९७॥
उदकाञ्जलयस्तिस्रस्ते वै परिधयः स्मृताः।

"वैरूपाक्षः पुरस्ताद्धोमानाम्"—इति सूत्रोक्तं वैरूपाक्षं मन्त्रम्, प्रपदञ्च,—"तपश्च तेजश्चेति जपित्वा"—इति सूत्रोक्तम्,—गृह्याकर्म्मसु जपेदन्यत्र क्षिप्रहोमेभ्यः। तथाच कर्म्मप्रदीपः।

"न कुर्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्।
वैरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्जयेत्"।

इति। "पूर्व्वेषु चैके"—इत्युपक्रम्य वैरूपाक्षादीनामुक्तत्वात् प्रणीतावद्विहितप्रतिषिद्धतया एतान्यपि गृह्याकर्म्मसु न कर्त्तव्यानीति मा प्रशाङ्क्षीदिति खल्वाचार्य्यपुत्रः,—वैरूपाक्षं जपेत्,—इत्याह। परिधींस्तु,—"परिधीनप्येके कुर्व्वन्ति"—इति सूत्रोक्तान्, गृह्याकर्म्मसु न कुर्व्वीत। तत्र हेतुः। अदितेऽनु,—इत्यादि मन्त्रैर्ये त्रयः—(तिस्रः—इति व्यत्ययेन स्त्रीत्वम्, त्रय इत्यर्थः) उदकाञ्जलयः, तएव परिधयोऽस्माकमाचार्य्यैः स्मृताः। तस्मात्, यत्रापि परिस्तरणं नास्ति, तत्रापि परिधीन् न कुर्व्वीत॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्व्वेषामेव होमानां समिदादौ विधीयते ॥ ९८॥
कर्म्मान्ते चैवमेव स्यात् स्वाहां तत्र न कारयेत्।

सर्व्वेषामेव होमानामाद्यन्तयोः समिदग्नौ दातव्या। तत्रच स्वाहां न कुर्य्यात्। स्वाहापदं मन्त्रोपलक्षणम्। दैवतमप्यस्या नास्ति। तथाच कर्म्मप्रदीपः।

"समिदादिषु होमेषु मन्त्रदैवतवर्ज्जिता।
पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवेत्"।

इति॥

"अथेध्मानुपकल्पयते खादिरान् पालाशान् वा"—इति सूत्रोक्ता-निध्मान् व्याकुरुते,—

इध्ममष्टादश दारु प्रवदन्ति विचक्षणाः॥ ९९॥
दर्शे च पौर्णमासे च, क्रियास्वन्यासु विंशतिः।

दर्शपौर्णमासयोरष्टादशसंख्यकं दारु इध्मं वदन्ति पण्डिताः। अपरासु क्रियासु विंशतिरिध्मा भवन्ति। अन्यत्राज्यहोमादिभ्यः। तथाच कर्म्मप्रदीपः।

"अङ्गहोमसमित्तन्त्रसोष्यन्त्याख्येषु कर्मसु।
येषाञ्चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च।
अक्षभङ्गादिविपदि जलहोमादिकर्म्मणि।
सोमाहुतिषु सर्व्वासु नैतेष्विध्मो विधीयते"।

इति॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रादेशमात्रं कुर्व्वीत मेक्षणं समिधस्तथा ॥ १०० ॥
इध्मः समानवृक्षाणां द्विप्रादेशप्रमाणतः।

मेक्षणं समिधश्च प्रादेशमात्रं कुर्य्यात्। इध्मस्तु द्विप्रादेशप्रमाणतः कर्त्तव्यः। स चायमिध्मः—समानजातीयानां वृक्षाणां (संबन्धलक्षणा षष्ठी) करणीयः। न पुनः कतिचिदिध्माः खादिराः, कतिचिच्च पालाशाः कर्त्तव्याः ॥

प्रागग्राः समिधो देयास्ताश्च काम्येष्वपाटिताः ॥ १०१ ॥
शान्त्यर्थेषु सशक्ताऽऽर्द्रा विपरीता जिघांसति।

समिधः प्रागग्राः कृत्वा अग्नौ देयाः। ताश्च समिधः काम्येषु कर्म्मस्व-पाटिताः कर्त्तव्याः। शान्त्यर्थेषु कर्म्मसु, सशक्ता,—शक्तं शक्तिः (भावे निष्ठा) तया सहवर्त्तमानाः—समर्थाः सवीर्य्या इति यावत्, आर्द्रा च समित् कर्त्तव्या। जिघांसति हन्तुमिच्छति कर्म्मणि—अभिचारकर्म्मणीत्येतत्। एतद्विपरीता समित् कर्त्तव्या निर्वीर्य्या शुष्का चेत्यर्थः। एतद्विपरीता समित् कर्त्री कर्म्मकर्त्तारं हन्तुमिच्छति,—इति वा वर्णनीयम् ॥

इध्मः सन्नहनादानं चरुश्रपणमेव च ॥ १०२ ॥
तूष्णीमेतानि कुर्व्वीत समस्तञ्चेध्ममादहेत्।

इध्मः पूर्व्वोक्तः। सन्नहनम्—"कंसमपां पूरयित्वा सर्व्वौषधीः कृत्वा हस्तावबधाय प्रदक्षिणमाचार्य्योऽहतेन वसनेन परिणह्येत्"—इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रोक्तं परिणहनमित्यर्थः। कुतः?। तत्रापि सन्नहनपदप्रयोगात्। तथाच, 'अविसन्नहनत्यागः'—इति तदेव परिणहनं निर्द्दिशति। सन्नहनं बन्धनरज्जुः—"तन्त्रीं प्रसार्य्यमाणाम्"—इत्यादि सूत्रोक्ता,—इति केचित्। आदानं हविषां ग्रहणम। चरुश्रपणञ्च। उपलक्षणञ्चैतत्। अन्यस्यापि हविषः श्रपणं बोद्धव्यम्। एतानि तूष्णीं कुर्य्यात्। समस्तञ्चेध्ममग्नौ दद्यात्॥

आचार्य्यानुमतं वाक्यमेकीयं गृह्यते क्वचित्॥१०३॥
शेषाणि चैव वाक्यानि आचार्य्यो न प्रसंशति।

यत्र क्वचिदुच्चावचानि वाक्यान्याचार्य्येण गोभिलेन पठितानि, तत्र यद्वाक्यमेकीयमेकीभूतम्—यन्मतं बहूनामभिन्नमित्येतत्। तदाचार्य्यानुमतं गृह्यते—तदेवाचार्य्यस्यानुमतमिति ज्ञायते इत्यर्थः। शेषाण्येकीयमतविरुद्धानि वाक्यानि क्वचिदप्याचार्य्यो न प्रसंशति। अत्रायमर्थः। "चतुरष्टकोहेमन्तः ताः सर्व्वाः समांसाश्चिकीर्षेदितिकौत्सः"—इत्याचार्य्येण चतुरष्टकपक्षः सूचितः। "त्र्यष्टक इत्यौद्गाहमाणिः" "तथा गौतमवार्कखण्डी"—इत्यनेन त्र्यष्टकपक्षोऽपि सूचितः। न च किमत्र स्वमतमित्येतत् कण्ठत उक्तम्। तत्र, त्र्यष्टकपक्षएवानुमत आचार्य्यस्य,—इति प्रतिपद्यामहे। कस्मात् कारणात्?। तत्रैव बहूनामैकमत्यात्। अतएव, परतः कर्त्तव्योपदेशादिभिस्त्र्यष्टकपक्षएवाचार्य्येणानुगृहीतः, न चतुरष्टकपक्षः। चतसृष्वष्टकास्वाचार्य्येण कर्म्मानुपदेशात्। मध्यमाष्टकायामेवान्वष्टक्यकर्म्मविधानाच्च। चतुरष्टकपक्षे हि सर्व्वत्रैव मांससद्भावात् सर्व्वत्रैवान्वष्टक्यं स्यात्। अष्टका

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संज्ञपितपशुसाध्यत्वात्तस्य। तदिदमुक्तम्—शेषाणि वाक्यानि कचिद्याचार्य्यो न प्रशंसति,—इति। तथाच कर्म्मप्रदीपः।

"अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ।
वार्कखण्डिश्च सर्व्वासु कौत्सोमेनेऽष्टकासु च"।

इति॥

द्रव्याणामुपक्लृप्तानां होमीयानां यथाविधि॥१०४॥
प्रसिञ्चन्* वीक्षणं कुर्य्यादद्भिरभ्युक्षणमेव च†।

यथाविधि,—

"प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः।
तत्तथाऽऽसादयेद्द्रव्यं यद्यथा विनियुज्यते"।

इति कर्म्मप्रदीपोक्तविध्यनुसारेण, उपक्लृप्तानाम्, समासादितानामित्यर्थः। होमीयानां होमसम्बन्धिनां द्रव्याणाम्। (षष्ठीचेयं वीक्षणाभ्युक्षणसंबन्धापेक्षया द्रष्टव्या। तथा चोक्तम्। "प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते"—इति।) अद्भिः प्रसिञ्चन् वीक्षणं दर्शनं, अभ्युक्षणञ्च,—

"उत्तानेनैव हस्तेन प्रोक्षणं समुदाहृतम्।
न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चाऽवोक्षणं मतम्"।

इत्युक्तलक्षणं कुर्य्यात्। एव च,—इति निपातसमुदायः समुच्चयवाची॥

गोभिलोक्तं सम्पूयनं व्याकुरुते,—

---

* सादयन्,—इति तत्त्वकारधृतपाठः। † तथा,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पवित्रमन्तरे* कृत्वा स्थाल्यामाज्यं समावपेत्॥ १०५॥
एतत् सम्पूयनं नाम पश्चादुत्पवनं स्मृतम्।

अन्तरे मध्ये पवित्रम्—

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेवच।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्।
एतदेव हि पिञ्जूल्या लक्षणं समुदाहृतम्।
आज्यस्योत्पवनार्थं यत् तदप्येतावदेव तु"।

इति कर्म्मप्रदीपोक्तलक्षणं, कृत्वा संस्थाप्य, आज्यस्थाल्यामाज्यं प्रक्षिपेत्। तदेतत् सम्पूयनं नाम स्मृतम्। एतदनन्तरमुत्पवनम्। तथाच गोभिलसूत्रम्। "सम्पूयोत्पुनात्युदगग्राभ्यां पवित्राभ्याम्"—इति॥
"आज्यं संस्कुरुते"—इति सूत्रोक्तमाज्यं व्याकुरुते,—

अग्निना चैव मन्त्रेण पवित्रेण च चक्षुषा॥ १०६॥
चतुर्भिरेव यत् पूतं तदाज्यमितरद्धृतम्।

अग्निना अधिश्रयणं, मन्त्रेण—देवस्त्वा,—इत्यादिना; पवित्रेण च यथोक्त लक्षणेनोत्पवनं, चक्षुषा वीक्षणम्। एभिश्चतुर्भिर्यत् पूतं तदाज्यमित्युच्यते। एतदन्यदसंस्कृतं यत् तद्धृतम्॥

घृतं वा यदि वा तैलं पयो वा दधि यावकम्॥१०७॥
आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते।

---

* अन्तरा,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पयोदुग्धम्। यावकं यवागूः। आज्यस्याभावे आज्यस्थाने निरुक्तानामेषामाज्यशब्दोविधीयते। तदनेन "आज्यं संस्कुरुते सर्पिस्तैलं दधि पयो यवागूं वा"—इति गोभिलसूत्रं व्याख्यातम्॥

आज्यानां सर्पिरादीनां संस्कारे विधिचोदिते॥१०८॥
अनधिश्रयणं दध्नः शेषाणां श्रयणं स्मृतम्।

विधिचोदिते संस्कारे,—तद्विषये इत्यर्थः। दध्नोऽधिश्रयणं नास्ति, शेषाणामधिश्रयणं स्मृतमाचार्य्यैः। स्पष्टमन्यत्।

एवं वा—

विधिचोदिते संस्कारे कृते सति आज्यशब्दोविधीयते,—इति गतेन संबन्धः। तत्र विशेषमाह अनधिश्रयणम्—इत्यादि। पूर्ववद्व्याख्यानम्॥

यथा सीमन्तिका* नारी पूर्व्वगर्भेण संस्कृता॥१०९॥
एवमाज्यस्य संस्कारः संस्कारे विधिनोदिते।

यथा सीमन्तिका नारी पूर्व्वगर्भेण—प्रथमगर्भेण संस्कृता भवति;—द्वितीयादिगर्भे न पुनः सीमन्तकरणसंस्कारो यथेत्यर्थः। तथाच गोभिलसूत्रम्। "अथ सीमन्तकरणं प्रथमगर्भे"—इति। विधिना उक्ते संस्कारे—तद्विषये इत्येतत्। आज्यस्य संस्कारोऽप्येवमेव भवति। संस्कारविधिचोदितः,—इति पाठे, संस्कारविध्युक्त आज्यस्य संस्कारोऽप्येवमिति व्याख्येयम्। एतदनेनोक्तं भवति। सीमन्तकरणसंस्कारो

* सीमन्तिनी,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गर्भस्य पात्रस्य च,—इति सकृत् संस्कृतपात्रजातानां सर्व्वेषां गर्भाणां संस्कृतत्ववत् आज्यसंस्कारोप्याज्यस्य तत्पात्रस्य च,—इति सकृत् संस्कृताज्यपात्रे यान्याज्यानि निःक्षिप्यन्ते तानि सर्व्वाणि संस्कृतानि भवन्ति, न पुनरमीषां पृथक् संस्कारः करणीयः,—इति। तथाच आश्वलायनगृह्यपरिशिष्टम्। "सीमन्तोन्नयनं प्रथमे गर्भे, सीमन्तोन्नयनसंस्कारो गार्भे पात्रसंस्कारः"—इति॥

एतदेवाह,—

आज्यस्य हविषां चैव आज्ये पूर्व्वक्रियाविधिः॥११०॥
तस्य संपवनं पूर्व्वं चरोः पर्य्युक्षणं परम्।

यस्मात् आज्ये आज्यविषये आज्य-संस्कारविषये इत्येतत्। आज्यस्य आज्यस्थाने गृहीतानां हविषाञ्च मध्ये, पूर्व्वं प्रथममेव क्रियायाः संस्कारस्य विधिर्विधानम्, तस्मात् तस्य पूर्व्वं प्रथममेव संपवनं पवित्रीकरणं संस्कारः,—इति यावत्; न पुनः पश्चाद्गृहीतस्यापीत्यर्थः। चरोस्तु परं केवलं परि सर्व्वतोभावेन उक्षणं प्रोक्षणमेव संस्कारः इत्यर्थः।

एवं वा—

पूर्व्वमेव तस्य संपवनं सम्पूयनादि विधिचोदितः संस्कारः। चरोः,—उपलक्षणत्वात् पश्चाद्गृहीतस्य हविषः, पर्य्युक्षणमेव परं संस्कारः। पश्चाद्ग्राह्यं हविः—संप्रोक्ष्य ग्रहीतव्यमित्यर्थः। दीक्षितस्त्वाह। चरोः देवसवितः—इति पर्य्युक्षणं परं पश्चात्,—इति॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथेदानीम्—"पर्य्युक्ष्य स्थालीपाक आज्यमानीय मेक्षणेनोपघातं होतुमेवोपक्रमते"—इति सूत्रोक्तमुपघातं व्याकुरुते,—

पाणिना मेक्षणेनाथ स्रुवेणैव तु यद्धविः ॥ १११ ॥
हूयते चानुपस्तीर्य्य उपघातः स उच्यते ।

पाणिना मेक्षणेन वा स्रुवेणैव वा यत् हविर्हूयते, स खल्वयं होम उपघात उच्यते। यत्,—इति होमक्रिया विशेषणम्। किं कृत्वा हूयते?। अनुपस्तीर्य्य। उपस्तरणमभिघारणञ्चाकृत्वा। स्रुवेण स्रुचि प्रथमं यदाज्यं दीयते तदुपस्तरणम्, यत् पुनराज्यं चरुमवदाय अनन्तरं दीयते तदभिघारितम्,—इत्याचक्षते याज्ञिकाः। आचार्य्यपुत्रस्तु पूर्व्वापरकालकृतमवान्तरभेदमनादृत्य उपस्तरणमभिघारणञ्चोभयमेवोपस्तरणं मन्यमानः—'अनुपस्तीर्य्य'—इत्याह ॥

यद्युपघातं जुहुयाच्चरावाज्यं समावपेत् ॥ ११२ ॥
मेक्षणेन तु होतव्यं नाज्यभागौ न स्विष्टकृत् ।

यदि उपघातं जुहुयात्, तदा स्थालीपाके चरौ आज्यं प्रक्षिपेत्। मेक्षणेन होतव्यम्। तुशब्दश्चशब्दार्थः समुच्चये, पूर्व्वोक्तपाण्यादिकमपि समुच्चिनोति। तत्र च आज्यभागौ न होतव्यौ, न च स्विष्टकृत् होतव्यः।

स खल्वयमुपघातहोमः समशनीयचरुपितृयज्ञचर्व्वोः, अन्यत्रापि बहुदैवत्ये चरौ, अन्वष्टक्यचरौ च भवति। तथाच कर्म्मप्रदीपः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"चरौ समश्ननीये तु पितृयज्ञचरौ तथा ।
होतव्यं मेक्षणेनान्यदुपस्तीर्य्याभिघारितम् ।

इति ।

"चरौ तु बहुदैवत्ये होमस्तस्योपघातवत्" ।

इति च परिशिष्टप्रकाशादौ स्मृत्यन्तरम् । तथा अन्वष्टक्यकर्म्मणि गोभिलसूत्रम् । "कंसे चरु समवदाय मेक्षणेनोपघातं जुहुयात्"—इति । वृषोत्सर्गहोमस्य तु बहुदैवतत्वेऽपि नोपघातत्वम् । तदाह कर्म्मप्रदीपः ।

"एतेभ्य एव जुहुयान्मेक्षणेनावदाय च ।
सुच्याहुतीश्चरोः पृथक् सिञ्चेदाज्याभिघारितम्" ।

इति । यत्रापि गोभिलेन "स्थालीपाकावृताऽन्यत्"—इति सूचितम्, तत्रापि होमस्य नोपघातत्वमिति वक्ष्यामः ॥

हुत्वाऽऽज्यं परिशेषेण यत् द्रव्यमुपकल्पितम् ॥११३॥
सुवेणैव तु तत् स्पृष्टं सम्पातं चैव तं विदुः ।

आज्यं हुत्वा होमावशिष्टं यदाज्यद्रव्यं उपसमीपे पात्रान्तरे कल्पितं स्थापितं, तत् सम्पातं विदुः । आज्यं हुत्वा होमावशिष्टं यदाज्यं सुवेण बद्धा मस्तके स्पृष्टं, तदपि सम्पातं विदुः । तथाच चतुर्थी-कर्म्मणि गोभिलसूत्रम् । "आहुतेराहुतेस्तु सम्पातमुदपात्रेऽवन-येत्"—इति । तथोत्तरविवाहे । "आहुतेराहुतेस्तु सम्पातं मूर्द्धनि बद्धा अवनयेत्"—इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थालीपाकावृताऽन्यत्तु यत्र संज्ञा निपात्यते ॥११४॥
तत्राज्यभागौ हुत्वैव स्रुचमास्तीर्य्यावद्यति ।॰

यत्र यत्र गोभिलेन, "स्थालीपाकावृतान्यत्"—इतीयं संज्ञा निपात्यते,—अयंशब्दः प्रयुज्यते इत्यर्थः। तत्राज्यभागौ हुत्वा स्रुचमास्तीर्य्य आज्येनोपस्तीर्य्य, अवद्यति अवदानं गृह्णाति। न पुनरुपघात होमः स्यात्। यथा, आवर्ण्यां प्रदोषे चरोर्बहुदैवतत्वेऽपि, 'स्थालीपाकावृताऽन्यत्'—इति सूत्रणात् तत्रोपघातहोमो न भवति। एव मन्यत्राप्यनुसन्धेयम् ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गृह्यासंग्रहभाष्ये प्रथमः प्रपाठकः ॥ ० ॥ ० ॥

श्लोकाः—११३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृह्यासंग्रहः ।

द्वितीयः प्रपाठकः ।

यज्ञवास्तुकर्म्मणि गोभिलेन "तत एव वर्हिषः कुशमुष्टिमादाय"—इति सूत्रितम्। तत्र, 'तत एव वर्हिषः'—इत्येतदनुङ्किन्नपदार्थं वाक्यं व्याकुरुते,—

स्तृतेभ्यो न प्रचिन्वीयात् यातयामं स्तृतं स्मृतम्।
स्तृतशेषात्ततो गृह्य यज्ञवास्तुक्रिया तथा ॥ १ ॥

यज्ञवास्त्वर्थं स्तृतेभ्यः कुशेभ्यः कुशं न चिनुयात्। कस्मात्?। यस्मात् स्तृतं वर्हिर्यातयामं निर्वीर्य्यं स्मृतमाचार्य्यैः। यस्मादेवं, तस्मात् स्तृत-शेषाद्वर्हिषः कुशमुष्टिं गृहीत्वा, तथा—गोभिलोक्तेन प्रकारेण, यज्ञ-वास्तुक्रिया कर्त्तव्या। स च प्रकारो गृह्यसूत्रादुपलब्धव्यः। अपरे पुनरेतदविद्वांसः स्तृतादेव वर्हिषः कुशमुष्टिमादाय यज्ञवास्तुकरणम्—इति प्रलपन्ति। तदशास्त्रम्॥

यज्ञवास्तुक्रियां कृत्वा विधिदृष्टेन कर्म्मणा।
आज्यधारामविच्छिन्नां जुहुयात् सार्व्वकामिकीम्॥ २॥

विधिदृष्टेन कर्म्मणा यज्ञवास्तुक्रियां कृत्वा, अविच्छिन्नां सन्ततां सार्व्व-कामिकीं सर्व्वकामप्रदामाज्यधारां जुहुयात्। विधिदृष्टेन कर्म्मणा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सार्व्वकामिकीमाज्यधारां जुहुयात्—इति वा वर्णनीयम्। तदनेन गोभिलानुक्ताऽपि पूर्णाहुतिर्विधीयते। कथं ज्ञायते?। सार्व्वकामिकीम्,—इतिवचनात्। "पूर्णाहुत्या सर्व्वान् कामानाप्नोति"—इति हि ब्राह्मणम्। सेयं पूर्णाहुतिः,—"वसुभ्यः स्वाहा,"—इति मन्त्रेण होतव्या,—इति दीक्षितभाष्यम्। "पूर्णहोमं यशसे जुहोमि"—इत्यादिमन्त्रेण,—इति भवदेवभट्टप्रभृतयः॥

सायंप्रातर्वैश्वदेवे पितृयज्ञे तथैव च।
कंवूके गोमये नित्यं व्रतानां समिधासु च॥ ३॥
चैत्ये यूपे व्रीहियवे भूमावप्सु च याज्ञिकैः।
व्याहृतीर्न प्रयोक्तव्या यज्ञवास्तुक्रिया तथा॥ ४॥

सायंप्रातर्होमे, वैश्वदेवहोमे, पितृयज्ञे—अन्वष्टक्यकर्म्मणि पिण्डपितृयज्ञे च, कंवूके—"वृत्त्यविच्छित्तिकामः कंवूकान् सायंप्रातर्जुहुयात्"—इति सूत्रोक्ते कंवूकहोमे। कंवूकाश्च,—

"कंवूकाश्च कणाश्चैव फलीकरणकक्कुशाः"।

इत्युक्तलक्षणाः। गोमये—"वृत्त्यविच्छित्तिकामो हरितगोमयान् सायंप्रातर्जुहुयात्"—इति सूत्रोक्ते गोमयहोमे, व्रतानां वेदव्रतानां समिधासु समिद्धोमेषु, (हलन्तलक्षणः टाप्प्रत्ययः) चैत्ये चिताकर्म्मणि, यूपे यूपकर्म्मणि, व्रीहियवे—नवयज्ञोक्ते, "वग्रहुर्मी ग्रहुश्चेति पृथगाहुती व्रीहियवहोमौ प्रयुञ्जीत"—इत्यादिसूत्रोक्ते वा व्रीहियवहोमे, भूमौ—"वृत्त इवेति पञ्चर्चः तस्मिन् प्रथमं पार्थिवं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्म्म"—इति सूत्रोक्ते पार्थिवकर्म्मणि, भूम्यां होमे वा, अप्सु च—"पौर्णमास्यां रात्रावविदासिनि ह्रदे नाभिमात्रमवगाह्याक्षततण्डुलानृगन्तेष्वास्येन जुहुयात् स्वाहेत्युदके"—इति सूत्रोक्ते जलहोमे च, याज्ञिकैर्व्याहृतयो न प्रयोक्तव्याः, यज्ञवास्तुक्रियाऽप्येषु न कर्त्तव्या। व्याहृतीः,—इति पूर्व्वसवर्णोद्रष्टव्यः॥

चरवे योविधिः प्रोक्तः स यज्ञइति निश्चयः।
बलिन्तेभ्यो न कुर्व्वीतोपसिद्धार्थबलीन् हरेत्॥५॥

चरवे,—इति तादर्थ्ये चतुर्थी। चर्व्वर्थं यो विधिरुक्तः स खलु यज्ञे ज्ञातव्यः,—इत्याचार्य्याणां निश्चयः। अतो बलिकर्म्मार्थं तान् विधीन् न कुर्व्वीत। बलये तान् न कुर्व्वीत,—इति वक्तव्ये, बलिन्तेभ्यो न कुर्व्वीत,—इति व्यत्यासेन प्रयुङ्क्ते। बलिकरणार्थं चरुर्न पक्तव्यः—इत्ययमत्र विवक्षितोऽर्थः। अतोयत्र कारणान्तरात् चरुः पच्यते, तत्र तस्मादपि बलिहरणमविरुद्धम्। तथा च गोभिलसूत्रम्। "सर्व्वस्य त्वेवान्नस्यैतान् बलीन् हरेत्—पित्र्यस्य वा स्वस्त्ययनस्य वा अर्थार्थस्य वा"—इति।

उप—समीपे महानसे सिद्धार्थैरन्नैर्बलीन् हरेत्। होमशेषेणैव बलिहरणस्य कर्त्तव्यत्वात् वैश्वदेवहोमोऽप्यनेन व्याख्यातः। मनुरप्याह।

"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्व्वकम्।
आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम्"।

इति। विश्वे देवाः सर्व्वे देवाः ते यस्य पाकस्य देवताः सोऽयं वैश्वदेवोऽहरहर्महानसे यत् पच्यते, तदुच्यते। "वैश्वदेवादन्नात् पर्य्युक्ष्य जुहोति"—इति च गृह्यान्तरम्। तथा कात्यायनः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"स्वशाखाविधिना कृत्वा तच्छेषेण बलिं हरेत्"।

इति॥

यत्र मन्त्रा न विद्यन्ते व्याहृतीस्तत्र योजयेत्।
मन्त्राणामेव चादेशे मन्त्रात् कर्म्म समाचरेत्॥६॥

यत्र मन्त्रा नोपदिश्यन्ते, तत्र व्याहृतीर्वक्ष्यमाणलक्षणाः योजयेत्—अन्यत्र सायंप्रातर्वैश्वदेवादिभ्यः इध्मादिभ्यश्च। मन्त्राणां पुनरुपदेशे मन्त्रात् कर्म्म कुर्य्यात्,—इत्यादरार्थमुक्तम्॥

भूराद्योव्याहृतयोवेदेभ्योनिःसृताः पुरा।
महत्त्वं व्याहृतित्वञ्च प्राप्ताः स्वेनैव कर्म्मणा॥७॥

भूर्भुवःस्वरिति तिस्रोव्याहृतयः, वेदेभ्यः—ऋग्यजुःसामलक्षणेभ्यः पूर्व्वं निर्गताः। ताः खल्वेताः स्वेनैव कर्म्मणा वक्ष्यमाणलक्षणेन महत्त्वं व्याहृतित्वञ्च प्राप्ताः। महतोभावोमहत्त्वम्। व्याहृतीनां भावो व्याहृतित्वम्॥

ॐकारजननात्तासां महत्त्वं परिभाष्यते।
व्याहृता व्याहृतित्वञ्च तेन त्रैविद्यतां ययुः॥८॥

ॐकारस्य जननात् तासां महत्त्वमाचार्य्यैरुच्यते। ताश्च वेदेभ्यो व्याहृताः सत्यः व्याहृतित्वं ययुः। तेनैव वेदत्रयेभ्योव्याहृतत्वेन हेतुना त्रैविद्यताञ्च ययुः। त्रिवेदेषु भवास्त्रैविद्याः। तद्भावस्त्रैविद्यता। अथ वा। विद्या,—इति वेदमाचक्ष्महे। तिसृणां विद्यानां भावः त्रैविद्यम्। यस्माद्वेदत्रयेभ्यो व्याहृताः, तस्माद्वेदत्रयभावं ययुरित्यर्थः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
अण्डं भित्त्वा विनिर्यातौ तेनैतौ मङ्गलावुभौ॥९॥

ॐकारस्य अथशब्दस्य द्वावेतौ ब्रह्मणोऽण्डं भित्त्वा पूर्व्वं निर्गतौ। 'कण्ठं भित्त्वा'—इति पाठे व्यक्त एवार्थः। तेनैतावुभौ मङ्गलजनकौ। 'तेन माङ्गलिकावुभौ'—इति पाठेऽपि स एवार्थः॥

अथैताः स्वव्याहृतयोऽयवीयस्यः पराः स्मृताः।
ऐरावतः प्रतिष्ठेचे वेदान्तेष्वाश्रिताश्च याः॥ १० ॥

अथ पूर्व्वोक्ता एताः स्वस्ववेदस्य व्याहृतयः अयवीयस्यः ज्येष्ठाः, पराः उत्कृष्टाः कथिताः। याश्च ऐरावतः प्रतिचेचे इरावतः स्थाने—(इराशब्दस्यादिवृद्धिः)—ऊहगाने,—इत्येतत्। वेदान्तेषु च आश्रिताः,—इति ता एव व्याहृतयः स्तूयन्ते। ऊहगाने उदाहरणम्। "भूः। भुवाः। सुवाः"। वेदान्तेषु खल्वपि। "भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये इत्यृग्वेदं प्रपद्ये यजुर्व्वेदं प्रपद्ये सामवेदं प्रपद्ये"—इति॥

मध्ये स्थण्डिलमन्ते च वारिणा परिसंवृतम्।
अविदासिनं ह्रदं विद्यात्तादृशं कर्म्मणो विदुः॥११॥

मध्ये स्थण्डिलं स्थलं, अन्ते च वारिणा परि सर्व्वतोभावेन संवृतं वेष्टितम्। एवम्भूतं ह्रदमविदासिनं जानीयात्। तादृशं ह्रदं कर्म्मणो विदुर्जानन्त्याचार्य्याः। कर्म्मणः,—इति सम्बन्धलक्षणा षष्ठी। तदनेन,—"पौर्णमास्यां रात्राववविदासिनि ह्रदे नाभिमात्रमवगाह्याक्षततण्डु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तानृगन्तेष्वारोन जुङयात् स्वाहेत्युदके"—इति सूत्रोक्तः अविदासी ह्रदो व्याख्यातः॥

"अपवर्गेऽभिरूपभोजनं यथाशक्ति"—इति सूत्रोक्तमभिरूपं व्याकुरुते,—

यत्र विद्या च वित्तञ्च सत्यं धर्म्मः शमोदमः।
अभिरूपः स विज्ञेयः स्वाश्रमे योऽव्यवस्थितः॥ १२॥

वित्तम्—इति भावप्रधानो निर्द्देशः। ख्यातिर्व्विचारो वा तदर्थः। अथ वा। वित्तं धनमिति यथाश्रुत एवार्थः। वृत्तञ्च,—इति पाठे, वृत्तम्—

"गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः।
प्रवर्त्तनं हितानाञ्च तत् सर्व्वं वृत्तमुच्यते"।

इत्युक्तलक्षणम्। तत्र सत्यादीनां पुनरुपादानमादरार्थम्। शमोवहिरिन्द्रियनिग्रहः। दमोऽन्तरिन्द्रियनिग्रहः। प्रसिद्धमन्यत्। यत्रैतानि विद्यन्ते, यश्च स्वाश्रमे—गृह्याकर्म्मकर्त्तुरात्मीयाश्रमे,—समानाश्रमे व्यवस्थितः,—गृहस्थः,—इति यावत्। सोऽयमभिरूपो विज्ञेयः॥

लौकिके लोकसामान्ये क्रव्यादाग्नौ वृथा हुतम्।
याज्ञिकं पुण्यमायुष्यं कर्म्मणा नोपपद्यते॥ १३॥

सामान्यं साधारणमित्यनर्थान्तरम्। लोकसामान्ये—असंस्कृते इत्यर्थः। लौकिकस्याग्नेर्व्विशेषणमिदम्। तदयमर्थः। असंस्कृते लौकिके अग्नौ, क्रव्यादाग्नौ श्मशानाग्नौ च, हुतम् (भावे निष्ठा) होमः, वृथा भवति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेव विवृणोति। आयुष्यम्—आयुषे हितम्, याज्ञिकम्—यज्ञोद्भवं पुण्यं तेन कर्म्मणा नोत्पद्यते—इति। तथा च, संस्कृतं लौकिकमग्निमभिप्रेत्य तत्र होतुः फलवादं वक्ष्यति। लौकिकस्याप्यग्नेः संस्कारात् परं न लौकिकत्वम्,—इत्यसङ्गतैषा कल्पना रघुनन्दनस्य। कस्मात्?। प्रमाणाभावात्। तथा त्वस्याभ्युपगमे च लौकिकेऽग्नौ होतुः फलवचनं न खल्वपि उपपत्स्यते। न खल्वसंस्कृते लौकिके अग्नौ होमं मन्यसे। अपि चैवं सति, "अन्वष्टकास्वष्टकावदग्नौ हुत्वा"—इति विष्णुसूत्रे अग्निग्रहणात् पितृयज्ञहोमस्य लौकिकाग्नौ निषेधाच्च अन्वष्टकायामनग्निमतां नाधिकारः,—इति स्वोक्तमपि व्याहन्येत। लौकिकस्याप्यग्नेः संस्कारात् परं लौकिकत्वाभावे तत्रैव होमस्योपपत्तेः कथमनग्निमतां तत्रानधिकारमात्थ। तदास्तां तावदार्षवचनविरोधो यावत् स्ववचो व्याघातमपि नालोचयसि,—इति किमत्र ब्रूमः। यथा चानग्निमतामप्यस्त्यधिकारोऽन्वष्टकायां तथा गृह्यभाष्येऽभिहितमस्माभिः॥

वैदिके लौकिके वाऽपि यज्जुहोति प्रयत्नतः।
वैदिके ब्रह्मलोकः स्यात् लौकिके पापनाशनम्॥१४॥

वैदिके लौकिके वा संस्कृते अग्नौ यज्जुहोति, तस्य फलवचनमुत्तरार्द्धम्॥

स्ववर्णाभिरनिन्द्याभिरद्भिरक्षतमिश्रितैः।
स्नानं चतुर्भिः कलसैः स्त्रीभिः स्त्रीं यच्च स्नावनम्॥१५॥

यत्र विवाहादौ स्त्रीभिः स्त्रीं कन्यां प्रति स्नावनं विधीयते, तत्र

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनिन्दिताभिः स्ववर्णाभिः समानवर्णाभिः स्त्रीभिः,—ब्राह्मणाः ब्राह्मणीभिः, क्षत्रियायाः क्षत्रियाभिः, वैश्यायाः वैश्याभिरित्यर्थः। चतुर्भिः कलशैः, अक्षतमिश्रितैः (लिङ्गव्यत्ययोऽत्र द्रष्टव्यः) यवमिश्रिताभिरद्भिः स्नपनं कर्त्तव्यम्॥

गौड़ी पैष्टी च माध्वी च विज्ञेयाः त्रिविधाः सुराः।
पाणिकर्म्मणि गौड़ी स्यात् सत्या माध्व्यधमा सुरा॥१६॥

पाणिकर्म्मणि गौड़ी सुरा सत्या स्यात्, माध्वी पुनरधमा। पैष्टी मध्यमेत्यर्थादुक्तं भवति। स्पष्टमन्यत्॥

"नग्निका तु श्रेष्ठा"—इति सूत्रोक्तां नग्निकां व्याकुरुते,—

नग्निकान्तु वदेत् कन्यां यावन्नर्त्तुमती भवेत्।
ऋतुमती त्वनग्निका तां प्रयच्छेत्त्वनग्निकाम्॥ १७॥

यावन्न ऋतुमती रजस्वला भवेत्, तावत् कन्यां नग्निकां वदेत्। ऋतुमती पुनरनग्निका भवति। तां कन्यामनग्निकामृतुमतीमपि दद्यात्। तुरप्यर्थोभिन्नक्रमेण योजनीयः। तदेवमनग्निकामपि दद्यात्, नग्निका पुनः श्रेष्ठा, न पुनरनग्निकायाविवाहएव न भवतीत्यभिप्रायः। मनुरपि,—

"काममामरणात्तिष्ठेद्गृहे कन्यर्त्तुमत्यपि।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्"।

इति स्मरन् ऋतुमत्या अपि विवाहमनुजानाति। यानि पुनरनग्निकानिन्दापराणि स्मृतिवचनानि, तेषामनग्निकायाः अप्राशस्त्ये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नग्निकायाः प्राशस्त्ये च तात्पर्य्यम्, गोभिलीयव्यतिरिक्तविषयत्वं वा वर्णनीयम् ॥

अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जिता भवेत् कन्या कुचहीना च नग्निका ॥१८॥

रजसः,—इति सम्बन्धलक्षणा षष्ठी। रजः,—इति च ऋतुर्भण्यते। रजसा अप्राप्ता गौरी भवति;—तां ददद् गौरीदानफलं लभते इत्यर्थः। एवमुत्तरत्रापि वर्णनीयम्। रजसि प्राप्ते रोहिणी। अनेनापि प्राप्तरजस्काया अपि विवाहं दर्शयति। व्यञ्जितं व्यञ्जनं (भावे निष्ठा)। व्यञ्जनं चिह्नमित्यनर्थान्तरम्। तच्चार्थाद्यौवनस्य। न व्यञ्जितं यस्याः सेयमव्यञ्जिता—अनागतयौवनचिह्नेत्येतत्। कुचहीना नग्निकेत्यपरां नग्निकामाह ॥

व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकाम्।
पयोधरैस्तु गन्धर्व्वा रजसाऽग्निः प्रकीर्त्तितः ॥ १९ ॥

भुञ्जीत भुङ्क्ते। पयोधरैः समुत्पन्नैर्गन्धर्व्वा भुञ्जते। रजसा समुत्पन्नेनाग्निर्भोक्ता कथितः ॥

यस्मादेवम्,—

तस्मादव्यञ्जनोपेतामरजामपयोधराम्।
अभुक्ताञ्चैव सोमाद्यैः कन्यकान्तु प्रशस्यते ॥ २० ॥

अरजामरजस्काम्। तदीदृशीं कन्यकामभिप्रेत्य, प्रशस्यते (सकर्म-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कादपिभावे तिङ्) प्रशंसा क्रियते, आचार्य्येण,—इति वाक्यशेषः। तथा च गोभिलसूत्रम्। "नग्निका तु श्रेष्ठा"—इति। स्पष्टमन्यत्॥

विवाहे स्त्रीलक्षणविदोऽलाभे नवपिण्डान् कृत्वा स्त्रीलक्षणं परीक्षितव्यमित्याचार्य्येणोक्तम्। तथा च गोभिलसूत्रम्। "तदलाभे पिण्डान्"। "वेद्याः सीताया ह्रदाद्गोष्ठाच्चतुष्पथादादेवनादादहनादीरिणात्"। सर्व्वेभ्यः सम्भार्य्यं नवमम्'—इति। "पूर्व्वेषां चतुर्णां गृह्णन्तीमुपयच्छेत्"—इति च। तत्र, वेदिपिण्डादिग्रहणे फलार्थवादमाह,—

वेदिपिण्डात् क्रियावती सीतायाः फलते कृषिः।
अक्षोभ्या च ह्रदे ज्ञेया गोष्ठे भवति गोमती॥ २१॥
चतुष्पथे प्रकीर्णा स्यात् द्यूतस्थाने कलिप्रिया।
श्मशाने म्रियते भर्त्ता बन्ध्या भवति चोषरे॥ २२॥
नवमे सर्व्वएवैते कन्यायाः परिगृह्यन्ते।

वेदिपिण्डात् गृहीतात् क्रियावती भवति। सीतापिण्डात् गृहीतात् कृषिः फलते,—कृषिभूयिष्ठा भवतीत्यर्थः। सीता कृष्टक्षेत्रम्। ह्रदपिण्डे गृहीते अक्षोभनीया ज्ञातव्या। गोष्ठपिण्डे गृहीते गोमती भवति। चतुष्पथपिण्डे गृहीते प्रकीर्णा विक्षिप्ता—गृहेगृहे गमनशीलेत्येतत्। द्यूतस्थानपिण्डे गृहीते कलहप्रिया भवति। कलिः कलहः। श्मशानपिण्डे गृहीते भर्त्ता म्रियते—विधवा भवतीत्यर्थः। उषरपिण्डे गृहीते बन्ध्या भवति। नवमपिण्डे गृहीते कन्यायाः सर्व्वएवैते पूर्व्वोक्ताः फलवादाः परिगृह्यन्ते। किं कारणम्?। नवमस्य सर्व्वघटितत्वात्। तस्मात् नवमं पिण्डमाददानामिच्छयोपयच्छेद्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवोपयच्छेदित्यभिप्रायः । तथाच गोभिलसूत्रम् । "सम्भार्य्यमपिल्के" —इति । शाखान्तरेऽप्येवमेव प्रायः कलवादाः पठ्यन्ते । परन्तु तत्र क्रियावत्त्वादयोऽपत्यगताः श्रूयन्ते । तथा चोक्तम् ।

"गृह्णाना वेदिपिण्डञ्च प्रसूते याज्ञिकान् सुतान् ।
सीतापिण्डन्तु गृह्णाना सुतान् सूते कृषीबलान् ।
सर्व्वकामसमृद्धांश्च तृतीयस्य परिग्रहात् ।
गोष्ठपिण्डग्रहाच्चापि गोमिनः सुखिनस्तथा ।
इतस्ततश्च गन्तारः पञ्चमेनास्थिताः सुताः ।
षष्ठेन तु गृहीतेन भवन्ति द्यूतसेविनः ।
श्मशानपिण्डग्रहणाद्विधवा जायते ध्रुवम् ।
बन्ध्या वा विधवा वा स्यादष्टमग्रहणादपि ।
मिश्रमेतद्भवेत् सर्व्वं यतः पूर्व्वोदितं फलम् ।
नवमस्य ग्रहस्तस्मात् शुभो वा यदि वाऽशुभः" ।

इति ॥

पाणिग्रहणमन्त्रैस्तु नियतं दारलक्षणम् ॥ २३ ॥

पाणिग्रहणमन्त्राः गृह्योक्ताः गृभ्णामिते—इत्यादयः । तृतीया चेयं प्रकृत्यादित्वादभेदे द्रष्टव्या । पाणिग्रहणमन्त्राः निश्चितं दारलक्षणमित्यर्थः । तथाच मनुः ।

"पाणिग्रहणिकामन्त्रा नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" ।

इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विवाहे यो विधिः प्रोक्तो मन्त्रा दाम्पत्यवाचकाः।
वरस्तु तान् जपेत् सर्व्वान् ऋत्विग्राजन्यवैश्ययोः॥२४॥

विवाहे योविधिरनिर्दिष्टकर्त्तृकः,—"प्राक्ते नक्षत्रे षड़ाज्याहुतीर्जुहोति"—इत्यादिक आचार्य्येणोक्तः, तान् वरः कुर्य्यात्। अपर आह। 'विवाहे योविधिरग्निस्थापनादिः प्रोक्तः, तं विधिं वरः कुर्य्यात्'—इति। ये च दाम्पत्यवाचकामन्त्राः, तान् वरोजपेत्।

एवं वा—

विवाहे योविधिराचार्य्येणोक्तः, तत्र दाम्पत्यवाचका ये मन्त्राः, तान् सर्व्वान् वरो जपेत्। क्षत्रियवैश्ययोः पुनस्तान् मन्त्रान् ऋत्विक् जपेत्। तस्मात्,—"अपरेणाग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्द्धदेशेऽवसिञ्चति तथेतरां समञ्जन्त्वित्येतयर्चा"—इति सूत्रे 'औदकएव मन्त्रं पठति'—इति वर्णयन्ती सरला सरलैव॥

"अथ जन्यानामेकोध्रुवाणामपां कलसं पूरयित्वा"—इत्यादिसूत्रोक्ता ध्रुवा अपो व्याकुरुते,—

महानदीषु या आपः कौप्यान्याश्च ह्रदेषु च।
गन्धवर्णरसैर्युक्ता ध्रुवास्ता इति निश्चयः॥ २५॥

महानदीषु गङ्गाद्यासु या आपः, याश्च कूपोद्भवाभ्योऽन्यास्तड़ागादिसम्भवा आपः, ह्रदेषु अगाधजलेषु या आपः, ता इमाः शोभनगन्धवर्णरसैर्युक्ताः सर्व्वा अप्यापः ध्रुवाः,—इत्ययमाचार्य्यस्य निश्चयः। अन्ये तु वर्णयन्ति,—'कूपे या आपः, अन्याश्च तड़ागादिषु या आपः',—इति। तेषाम्—'कौप्यान्याः'—इति विसर्गलोपे सन्धिरार्षः द्रष्टव्यः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अथ जन्यानामेकोध्रुवाणामपां कलसं पूरयित्वा सहोदकुम्भः प्रावृतो वाग्यतोऽग्रेणाग्निं परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते"—इति सूत्रोक्तमुदकुम्भधारिणोऽवस्थानं विशिनष्टि,—

गन्धमाल्यैरलङ्कृत्य सकुम्भो वाग्यतः शुचिः ।
धारयेत् त्रिषु वर्णेषु प्रावृतांसो द्विजोत्तमः ॥ २६ ॥

गन्धमाल्यैरुदकुम्भमलङ्कृत्य सकुम्भो नियमितवचनः शुचिः, प्रावृतांसः—प्रावृतौ अंसौ यस्य सोऽयं प्रावृतांसो वस्त्राच्छादितस्कन्धद्वयः—इत्येतत् । द्विजोत्तमः—उत्तमो द्विजः, त्रिषु वर्णेषु धारयेत्,—ध्रुवा अपः,—इत्यर्थः ॥

यदा निष्क्रामयेत् कन्यां वरः पाणिं जिघृक्षयन् ।
अग्निं प्रदक्षिणं कृत्वा कटस्तीर्णं पदं व्रजेत् ॥ २७ ॥

यदा पाणिं ग्रहीष्यन् वरः कन्यां गृहान्निष्क्रामयेत्, तदा सा कन्या अग्निं प्रदक्षिणं कृत्वा कटस्तीर्णं कटविशिष्टं स्तरणयुक्तं पदं स्थानं व्रजेत् । एतदनेनोक्तं भवति । गच्छन्ती कन्या अग्निं प्रदक्षिणं कृत्वा कटमास्तृतकुशपर्य्यन्तं नयेत्,—इति । तथाच गोभिलसूत्रम् । "वर्हिषोऽन्तं कटान्तं प्रापयेत्"—इति । अथवा । पदं कटस्तीर्णं कृत्वा—कटे पदं संस्थाप्य व्रजेदित्यर्थः ॥

पदा प्रपद्य पन्थानं पतियानं संजपेद्वधूः ।
वरो वाऽच जपेन्मन्त्रमाकटान्तादिति स्थितिः ॥२८॥

पदा चरणेन प्रपद्य प्राप्य, कटमित्यर्थात् । बधूश्चरणेन कटप्राप्तेरनन्तरं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदा कटं प्रवर्त्तयन्तीत्येतत्। पन्थानं पतियानं—पथिलिङ्गं प्रमे पतियानः,—इति मन्त्रं संजपेत्। अजपन्त्यां बध्वां वरो वा अत्र मन्त्रं जपेत्। आकटान्तात्—कटस्य वर्हिरन्तप्राप्तिपर्य्यन्तम्—"वर्हिषोऽन्तं कटान्तं प्रापयेत्"—इतिसूत्रोक्तकर्म्मपर्य्यन्तं जपेदित्येषा स्थितिः शास्त्रमर्य्यादा ॥

लाजानाज्यं स्रुवं कुम्भं प्राजनाश्मानमेवच।
प्रदक्षिणानि कुर्व्वीत दम्पती तु विना ग्रही॥ २९ ॥

"ऊते पतिर्यथेतं परिव्रज्य प्रदक्षिणमग्निं परिणयति"—इतिसूत्रोक्ताग्निप्रदक्षिणकाले दम्पती लाजादीनामपि प्रदक्षिणं कुर्व्वीत—कुर्य्याताम्। क्वचित्तथैव पाठः। ग्रही विना। 'अन्यतोऽपिच'—इति ग्रहेरिः। ग्रही इति द्वितीयाद्विवचनान्तं पदम्। उदकग्राहं प्राजनग्राहञ्च विनेत्यर्थः। तुशब्दः पुनरर्थः। रघुनन्दनेन तु चतुर्थचरणमाकुलीकृत्य पठितम्—'दम्पती न विनाऽग्निकम्'—इति। तदनाकरम् ॥

तदेतत् सुव्यक्तमाह,—

प्राजग्राहमुदग्राहं ब्रह्माणमृत्विजं तथा।
एतानि वाह्यतः कृत्वा शेषाणान्तु प्रदक्षिणम्॥ ३०॥

प्राजनग्राहमुदकग्राहं ब्रह्माणमृत्विजञ्च, एतानि—(सामान्यविवक्षया व्यत्ययाद्वा नपुंसकनिर्देशः) एतान् वाह्यतः कृत्वा, शेषाणां लाजादीनां प्रदक्षिणं कुर्य्याताम् ॥

प्राजग्राहादीनां वाह्यतः करणे हेतुमाह,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणां दिशमास्थाय यमो मृत्युश्च तिष्ठतः ।
तयोस्तु रक्षणार्थाय तस्माद् ब्रह्मा वह्निर्भवेत् ॥ ३१ ॥

यस्मात् दक्षिणां दिशमाश्रित्य यमोमृत्युश्च तिष्ठतः, तस्मात् तयोर्वर-बध्वोः रक्षणार्थाय ब्रह्मा वह्निर्भवेत् । तुशब्दश्चशब्दार्थः समुच्चये भिन्न-क्रमेण योजनीयः । ब्रह्मा च वह्निर्भवेत्,—इति । स खल्वयं प्राजयाद्या-दीन् समुच्चिनोति ॥

अथेदानीं लाजहोममधिकृत्याह,—

सोमः प्रकृतिरेखा हि लाजानाश्रित्य तिष्ठति ।
विरुद्धमाज्यं सोमेन नाभिघारणमर्हति ॥ ३२ ॥

सोमः चन्द्रः, प्रकृतिरेखा सोमदैवत्या लाजानाश्रित्य तिष्ठति, आज्यञ्च सोमेन विरुद्धम्, तस्मात् न अतिघारणमर्हति लाजः ॥

कथन्तर्हि गोभिलेन,—"तं सोपस्तीर्णाभिघारितम्"—इत्यादिसूत्रेण लाजानामुपस्तरणमभिघारणञ्चोक्तम्? । तत्राह,—

शमीपलाशमिश्राणां लाजानामभिघारणम् ।
पूर्व्वाणां घृतमिश्राणामाचार्य्यैः कल्पितं तथा ॥ ३३ ॥

शमीपलाशमिश्राणाम्—शमीपत्रमिश्राणाम्, घृतमिश्राणां वा । "खा-दिरे बध्नाति पालाशे बध्नाति रोहितके बध्नाति"—इतिवत् विकल्पोऽत्र द्रष्टव्यः । तदेवम्भूतानां पूर्व्वाणाम्—पूर्व्वमासादितानां लाजानामभि-घारणं करणीयम् । अतएव 'आचार्य्यैः' गोभिलैः, 'तथा' शमीपलाश-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिश्राणामेव लाजानामासादनं तेषामेव चाभिघारणं कल्पितम्। तथाच गोभिलसूत्रम्। "शमीपलाशमिश्रांश्च लाजांश्चतुरञ्जलिमात्रान् शूर्पेणोपसादयन्ति पश्चादग्नेः"—इति। "सकृत् संगृहीतं लाजानामञ्जलिं भ्राता बध्वञ्जलावावपति"—इति। "तं सोपस्तीर्णाभिघारितमग्नौ जुहोति"—इति च। तस्मात्, केवलानां लाजानां नास्त्यभिघारणार्हता, किन्तु शमीपलाशमिश्राणां घृतमिश्राणां वा पूर्वमासादितानामित्यभिप्रायः। अपर आह। शमीपलाशमिश्राणां घृतमिश्राणाञ्च लाजानामासादनम्, घृतमिश्राणामासादनादेव आचार्य्यैरभिघारणं कल्पितम्, न पुनः परमार्थतोऽभिघारणमत्रास्ति,—इति॥

तथा लाजाञ्जलिर्बध्वा हूयतेऽङ्गुलिपर्व्वभिः।
एवं लाजहविःशेषं होतव्यं शूर्पजिह्वया॥ ३४॥

तथा—गोभिलोक्तप्रकारेण, अङ्गुलिपर्व्वभिर्लाजाञ्जलिर्बध्वा हूयते। एवं लाजहविःशेषं शूर्पजिह्वया होतव्यम्। गोभिलोक्तप्रकारश्च गृह्यसूत्रादुपलब्धव्यः॥

अवसिक्तन्तु विधिना पाणिग्राहन्तु प्राजनी।
रक्षणार्थमनुगच्छेत् सप्ताहं चाऽहमेव वा॥ ३५॥

विधिना—"अपरेणाग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्द्धदेशेऽवसिञ्चति तथेतराम्"—इत्यादिसूत्रोक्तप्रकारेण, उदकग्राहिणा अवसिक्तं पाणिग्राहं वरम्, तुशब्दात् वधूञ्च, सप्ताहं त्र्यहमेव वा प्राजनी अनुगच्छेत्। त्र्यहमेव च,—इति पाठेऽप्ययमेवार्थोवर्णनीयः। किमर्थमनुगच्छेत्?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रक्षणार्थम्। तदनेन, "प्राजनेनान्यः"—इति सूत्रोपदिष्टस्य प्राजनिनो विनियोगो दर्शितः॥

ब्राह्मस्यार्षस्य दैवस्य प्राजापत्यस्य याज्ञिकैः।
पूर्व्वं होमविधिः प्रोक्तः पश्चात् परिणयः स्मृतः॥३६॥

ब्राह्म्यादयः शब्दाः विवाहविशेषाणां वाचकाः। तथाच मनुः।

"चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान्।
अष्टाविमान् समासेन स्त्रीविवाहान् निबोधत।
ब्राह्म्यो दैवस्तथैवार्षः प्राजापत्यस्तथाऽसुरः।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः"।

इति। लक्षणममीषामन्यत्रानुसन्धेयम्। ब्राह्म्यदैवार्षप्राजापत्यविवाहेषु, प्रथमं लाजहोमविधिरुक्तः, पश्चात् परिणयः—अग्नेः परिणयनमुक्तं याज्ञिकैः। तथाच गोभिलसूत्रम्। "हुते पतिर्यथेतं परिव्रज्य प्रदक्षिणमग्निं परिणयति"—इत्यादि। ब्राह्मणार्षस्य,—इति पाठेऽपि* ब्रह्मणोऽयं ब्राह्मणः—ब्राह्म्यः इत्येतत्। तस्यार्षस्य चेति पूर्व्वोक्त एवार्थः॥

गान्धर्व्वासुरपैशाचा विवाहा राक्षसाश्च ये।
तेषां परिणयः पूर्व्वं पश्चाद्धोमो विधीयते॥३७॥

गान्धर्व्वादिषु विवाहेषु पूर्व्वमग्नेः परिणयनं पश्चाल्लाजहोमो विधीयते

---

* ब्राह्मस्यार्षस्य'—इत्ययमेव पाठः संग्रहकारैर्धृतः। आदर्शपुस्तके तु, —'ब्राह्मणार्षस्य'—इति पाठो दृश्यते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्माभिः। स खल्वयमाचार्य्यानुपदिष्टोविशेषः आचार्य्यपुत्त्रेणोपदिष्टः। आचार्य्यस्तु प्रशस्तान् विवाहानभिप्रेत्य होमानन्तरं परिणयनं सूचयाञ्चकार,—इति लिख्यते। तथाच स्मरणम्।

"चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयोविदुः"।

इति। कश्चित् पुनर्ब्राह्म्यादिशब्दानां विवाहनामत्वमविद्वानन्यथेमं ग्रन्थं वर्णयाञ्चकार,—'ब्राह्म्यस्यार्षस्य'—इत्यादिम्। 'ब्राह्मणस्य ऋषेर्देवस्य प्रजापतेर्विवाहे पूर्व्वं लाजहोमः, पश्चादग्नेः परितोनयनम्। गन्धर्व्वासुरपिशाचानां विवाहे, राक्षसानां रावणादीनाञ्च विवाहे, पूर्व्वं परिणयः पश्चाल्लाजहोमः'—इति। तदश्रद्धेयम्॥

अथेदानीम्—"तत्रैनां सकेशनखामभ्यज्य ह्रासयित्वाऽऽस्नावयन्ति"—इतिसूत्त्रोक्तं ह्रासनं व्याकुरुते,—

उद्वर्त्तनं नखच्छेदोरोमच्छेदनमेवच।
स्रंसनं मेखलायाश्च ह्रासनानि विदुर्व्बुधाः॥ ३८॥

उद्वर्त्तनं—कल्केन शरीरादाज्यादीनां दूरीकरणम्। मेखलायाः काञ्च्याः स्रंसनम्—अधःपातनम्। प्रसिद्धमन्यत्। एतानि ह्रासनानि जानन्ति पण्डिताः॥

चूडाकर्म्मणि सीमन्ते यश्च पाकः सदागृहे।
विवाहे चैवलाजानां नोक्तो निर्व्वपणो विधिः॥ ३९॥

चूडाकर्म्मणि,—"आनडुहोगोमयः कृसरः स्थालीपाकोवृथापकइत्युत्तरतः"—इतिसूत्त्रोक्तोयः स्थालीपाकः, यश्च सीमन्तकरणे,—"कृसरः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थालीपाकउत्तरघृतस्तमवेक्षयेत्''—इति सूक्तोक्तः स्थालीपाकः, यस्य सर्व्वदा भोजनाद्यर्थं गृहे पाकः, यस्य विवाहे लाजानां पाकः, तेष्वेतेषु निर्व्वपणोविधिः—(निर्व्वपणः—इति अणन्तलेपि वृद्धेरभावः ।)—निर्व्वपणसंबन्धी विधिः, निर्वपणरूपोवा विधिः,—'अमुष्मै त्वा जुष्टं निर्व्वपामि'—इत्येवंरूपः, आचार्य्यैर्नोक्तः ॥

दक्षिणाकपर्द्दाः शिष्टा आत्रेयास्त्रिकपर्द्दिनः ।
आङ्गिरसः पञ्चचूड़ा मुण्डा भृगोः शिखिनोऽन्ये ॥ ४० ॥

'शिष्टाः कौण्डिन्यादयः'—इति दीक्षितभाष्यम् । दक्षिणस्यां कपर्द्दो येषां तइमे दक्षिणाकपर्द्दाः भवन्ति । कपर्द्दोजटा शिखेत्यनर्थान्तरम् । मस्तक-दक्षिणभागे शिखिनोभवन्त्यमी,—इत्यर्थः । अपरे पुनरेतदविद्वांसोभाषन्ते,—'शिष्टाः कौण्डिन्यादयोविवाहे त्रीन् कपर्द्दान् प्रयच्छन्ति दक्षिणाः'—इति । आत्रेयास्त्रिकपर्द्दिनोभवन्ति । आङ्गिरसः पञ्चचूड़ाः—पञ्चशिखाभवन्ति । भृगोर्वंशजाताः—भार्गवाः, मुण्डितशिरसोभवन्ति । उक्तेभ्योऽन्ये, शिखिनः—अनियतशिखाः भवन्तीत्यर्थः । एतदपि,—

"वाशिष्ठाः पञ्चचूड़ाः त्रुस्त्रिचूड़ाः कौण्डपायिनः" ।

इत्यादिविशेषविधिव्यतिरिक्तविषयं द्रष्टव्यम् । कौथुमराणायनादीनामपि सशिखमेव वपनं गृह्यसूत्रभाष्ये समर्थितमस्माभिः । तदनेन,—"उदगग्नेरुत्सृप्य कुशलीकारयन्ति यथागोत्रकुलकल्पम्''—इति सूत्रोक्तोगोत्रकुलकल्पोव्याख्यातः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्व्वयज्ञेषु विप्राणामद्भिः पूर्व्वं प्रवर्त्तते ।
तस्मात् सुरोत्तमाह्यापोऽद्भिरेवाभिषेचयेत् ॥ ४१ ॥

सर्व्वकर्म्मसु विप्राणां प्रथममद्भिः क्रिया प्रवर्त्तते । तस्मात् कारणात्—आपएव सुरोत्तमाः । अतः, अद्भिरेव कन्यामभिषेचयेत् । तदनेन, —"सुहृत् सुरोत्तमेन सशरीरां त्रिर्मुर्द्धन्यभिषिञ्चेत्"—इति सूत्रस्थं सुरोत्तमपदं व्याख्यातम् । आह । कस्मात् पुनः कारणादापः सुरोत्तमाः उच्यन्ते? । उच्यते । नैघण्टुककाण्डे तावत् 'सुरा'—इत्युदकनामसु पठितम् । तच्च तत्र पञ्चविंशतितमं नाम । तस्मादुत्तममुदकमेव सुरोत्तमशब्दस्यार्थः ॥

ब्रह्मचारी व्रतादेशे व्रतनाम प्रवाचयेत् ।
चरिष्ये यावदन्ताय साविचे चान्तकीर्त्तनम् ॥ ४२ ॥

"अग्नेव्रतपते इति हुत्वा"—इति सूत्रोक्ते व्रतादेशे । अथवा । व्रतस्यादेशोयत्र तस्मिन्, व्रतादेशे,—'अग्ने व्रतपते व्रतं चरिष्यामि'—इत्यादिमन्त्रपञ्चके,—इत्येतत् । ब्रह्मचारी व्रतस्य नाम प्रवाचयेत्—प्रकथयेत् । यावदन्ताय व्रताचरणं तस्याप्यन्तस्य कीर्त्तनं कुर्य्यात् । व्रतादेशशब्दात्,—"समिधमाधेहि"—इत्यादि सूत्रोक्तं व्रतानामादेशं मा प्रशाङ्क्षीदिति 'सावित्रेच'—इत्याह । सावित्रे व्रते—महाप्रवचनीयापरनामधेये, उपनयनव्रते,—इत्येतत् । तस्य सावित्र्यध्ययनार्थत्वात सावित्रत्वम् । च-शब्दादनुप्रवचनीये च गोदानादौ । तत्रोदाहरणम् । 'अग्ने व्रतपते व्रतं चरिष्यामि,—इत्येवमादयः पञ्च मन्त्राः पद्यमान-

5 P 2

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्त्रकाण्डे पद्यन्ते। तत्र च, अग्ने व्रतपते व्रतं सावित्रं अष्टवर्षं अष्टमासं अष्टदिनं वा चरिष्यामि,—इति ब्रूयात्। एवमपरेष्वपि मन्त्रेषु ऊहनीयम्। एवं गोदानादिव्रतेष्वप्यूहनीयम् ॥

समामासाश्चाहोरात्रास्तुल्याब्राह्मणचोदिताः।
सावित्रमष्टभिर्वर्षैः कार्य्यं मासैर्दिनैश्च वा ॥ ४३ ॥

समाः—संवत्सराः, मासाः, अहोरात्राश्च, ब्राह्मणेन तुल्याः कथिताः। अतः सावित्रं व्रतमष्टभिर्वर्षैर्मासैर्दिनैरपिवा करणीयम्। अयमर्थः। आचार्य्येण,—"गर्भाष्टमेषु ब्राह्मणमुपनयेत्"—इति गर्भाष्टमे उपनयनं सूत्रयित्वा, "अथातः षोड़शे वर्षे गोदानम्"—इति षोड़शवर्षे गोदानस्य सूत्रणात् अष्टौ वर्षाः सावित्रव्रतस्य कालाः लभ्यन्ते। ब्राह्मणेन तु समामासाहोरात्राणां तुल्यत्ववचनात् अष्टौ मासाः अष्टौ दिनान्यपि तस्य कालः,—इति निर्णीयते। तस्मात्,—"आषोड़शाद् ब्राह्मणस्यानतीतः कालोभवति"—इत्येतस्मिन्नपि कल्पे, अन्ततोऽष्टौ दिनान्यपि सावित्रव्रतमाचरणीयम्,—इति सिद्धम्। तथा च ब्राह्मणम्। "योवै मासः संवत्सरः"—इति। "आदित्योवा सर्व्वऋतवः, सयदैवो-देत्यथ वसन्तो, यदा सङ्गवोऽथ ग्रीष्मो, यदा मध्यन्दिनोऽथ वर्षा, यदाऽपरान्होऽथ शरत्, यदाऽस्तमेत्यथ हेमन्तशिशिरौ"—इति च। अत्र खलु "सर्व्वान् ऋतून् अहनि सम्पादयति, सर्व्वे च ऋतवः संवत्सरः, तस्मात् अहः संवत्सरशब्देनोच्यते"—इति पूर्व्वमीमांसाभाष्ये शवरस्वामिनः। केचित् पुनरेतदविद्वांसः,—"द्वादश वै रात्रयः संवत्सरस्य प्रतिमा"—इति ब्राह्मणवाक्यमिहोदाहरन्ति। तदसङ्गतम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कस्मात्?। तत्र संवत्सरशब्दस्य साक्षात् प्रतिमाशब्देन संयोगात्। एतच्च षष्ठाध्याये प्रपञ्चितं, तत्रैव द्रष्टव्यम्। अलमिह ग्रन्थगौरवेण॥

सावित्रं यावदन्ताय धार्य्यं सर्व्वाश्रमस्थितैः।
चूड़ाकरणधर्म्मेण गोदाने चास्य वापनम्॥ ४४॥

सर्व्वैराश्रमस्थितैः—प्रस्तावात् ब्रह्मचर्य्याश्रमस्थितैः सर्व्वैरित्यर्थः। यावदन्ताय सावित्रं व्रतं धार्य्यम्—इत्यादरार्थमुक्तम्। तेन, गोदानादि व्रतान्तराणां यथावदनुष्ठानासम्भवेऽपि, सावित्रव्रतमवश्यमनुष्ठेयमिति सिध्यति। अपरस्त्वाह। 'सर्व्वाश्रमस्थितैः—सर्व्वेषां; ब्रह्मचारि-गृहस्थ-वानप्रस्थ-यतीनामाश्रमस्थितैर्विप्रैः, सावित्रम्—सवितुरिदं मन्त्रं; सावित्र्या अभिमन्त्रितं यज्ञोपवीतं धार्य्यम्, यावदन्ताय मरणपर्य्यन्तम्'—इति। अनयोर्युक्तायुक्तत्वे सूरिभिरुन्नेये। मम तु, 'पूर्व्वाश्रमस्थितैः'—इत्येव पाठः प्रतिभाति। गोदाने गोदानाङ्गकेशान्तकरणे चूड़ाकरणोक्तप्रकारेण अस्य ब्रह्मचारिणोवापनं करणीयम्। तथा च गोदानोपक्रमे गोभिलसूत्रम्। "चूड़ाकरणेन केशान्तकरणं व्याख्यातम्"—इति॥

विप्राणामग्निराचार्य्य इन्द्रस्त्राता व्रते व्रते।
तस्मात् सर्व्वव्रतान्तेषु चरुरैन्द्रोविधीयते॥ ४५॥

यस्मात् अग्निर्विप्राणामाचार्य्यः, इन्द्रश्च सर्व्वेषु व्रतेषु पालनकर्त्ता, तस्मात् कारणात् सर्व्वव्रतान्तेष्वैन्द्रश्चरुः क्रियते। सखल्वयमनुप्रवचनीयव्रतान्तेषु विधिर्द्रष्टव्यः। सह्यप्रवचनीयापरनामधेयस्योपनयनव्रतस्यान्ते

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तु सावित्रएव चरुर्भवति। तथा च गोभिलसूत्रम्। "ऐन्द्रः स्थालीपाकस्तस्य जुहुयादृचं साम यजामहइत्येतयर्चा सदसस्पतिमद्भुतमितिचोभाभ्यां वा" "अनुप्रवचनीयेष्वेवं सर्व्वत्र"—इति। "तस्यान्ते सावित्रश्चरुः"—इति च॥

अजिनं सर्व्वदैवत्यमैन्द्रोदण्डइति स्मृतः।
सावित्रीं मेखलामाहुस्तस्मात् सर्व्वाणि धारयेत्॥ ४६॥

यस्मात्,—"ऐणेयरौरवाजान्यजिनानि"—इति सूत्रोक्तमजिनं सर्व्वदैवत्यं, "पार्णबैल्वाश्वत्थादण्डाः"—इति सूत्रोक्तोदण्डइन्द्रदैवत्य इत्याचार्य्यैः स्मृतः; "मुञ्जकाशताम्बल्योरशनाः"—इति सूत्रोक्तां मेखलां सावित्रीम्—सवितृदेवताकामाहुराचार्य्याः, तस्मात् कारणात् सर्व्वाण्येतानि धारयेत्—ब्रह्मचारी। तथा च गोभिलसूत्रम्। "मेखलाधारण-भैक्षचर्य्य-दण्डधारण-समिदाधानोदकोपस्पर्शन-प्रातरभिवादा-इत्येते नित्यधर्म्माः"—इति। मनुरपि,—

"यद् यस्य विहितं चर्म्म यत् सूत्रं या च मेखला।
योदण्डोयच्च वसनं तत्तदस्य व्रतेष्वपि"।

इति स्मरति॥०॥

मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्येद्विनष्टानि गृहीत्वाऽन्यानि मन्त्रतः॥४७॥

विनष्टानि मेखलादीनि अप्सु उदके प्रास्येत् प्रक्षिपेत्। किं कृत्वा?। अन्यानि मेखलादीनि मन्त्रेण गृहीत्वा। तत्र, मेखलादण्डमन्त्रौ गृह्यसूत्रोक्तौ। 'अजिनमन्त्रस्य स्वशाखायामभावात्,—"मित्रस्य चक्षु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वरुणं बलीयः"—इति तैत्तिरीयशाखापरिपठितो द्रष्टव्यः। उपवीत-मन्त्रोऽपि—("यज्ञोपवीतमसि"—इति) शाखान्तरादुपादेयः'—इति भट्टनारायणोपाध्यायाः। उपवीते विशेषं वक्ष्यति। कमण्डलु-मन्त्रोऽप्यनुसन्धेयः ॥०॥

अथेदानीम्—"यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा"—इत्यादिसूत्रोक्तं यज्ञोपवीतं व्याकरोति,—

यज्ञोपवीतं कुर्व्वीत सूत्रेण नवतान्तवम्।
देवतास्तत्र वक्ष्यामि आनुपूर्व्वेण याः स्मृताः॥४८॥

सूत्रेण यज्ञोपवीतं कुर्व्वीत। कीदृशम्?। नवतान्तवम्। नवतन्तु-घटितमित्यर्थः। तत्र—तेषु तन्तुषु, आनुपूर्व्येण—क्रमेण, या देवता आचार्य्यैः स्मृताः, ता अहं वक्ष्यामि ॥०॥

ॐकारः प्रथमस्तन्तुर्द्वितीयश्चाग्निदैवतः।
तृतीयोनागदैवत्यश्चतुर्थः सोमदैवतः॥४९॥
पञ्चमः पितृदैवत्यः षष्ठश्चैव प्रजापतिः।
सप्तमो वासुदैवत्योऽष्टमो यमदैवतः॥५०॥
नवमः सर्व्वदैवत्यइत्येते नवतन्तवः।
द्विगुणं त्रिगुणं वाऽपि एकग्रन्थिकृतं विदुः॥५१॥

ॐकारादयस्तन्तुदेवताः। वासुदैवत्यः,—इत्युभयपदवृद्धिः। तदेतन्नव-तन्तुकं यज्ञोपवीतं द्विगुणं द्विसरम्। अपि वा, त्रिगुणं त्रिसरं एकेन-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रन्थिनाकृतं विदुः जानन्त्याचार्य्याः। 'वाऽपि'—इति व्यत्यासेन प्रयुक्ते, —अपि वा इत्यर्थः। द्विगुणम्—इति त्रिगुणत्वासम्भवे द्विगुणत्वं बोद्धव्यम्,—इति नारायणोपाध्यायाः। कात्यायनेनापि त्रैगुण्यमेवो-क्तम्। तथाच कर्म्मप्रदीपे,—

"त्रिवृदूर्द्ध्ववृतं कार्य्यं तन्तुत्रयमधोवृतम्।
त्रिवृतञ्चोपवीतं स्यात्तस्यैकोग्रन्थिरिष्यते"।

इति। अयमपि परतस्त्रैगुण्यमभ्यसिष्यति। "कार्पासमुपवीतं षट्तन्तु त्रिवृद्ब्राह्मणस्य"—इति पैठिनसिवचनं गोभिलीयव्यतिरिक्तविषयम्। कथं ज्ञायते?। शाखान्तरसूत्रकारत्वात्तस्य। नवतन्त्वसम्भवे षट्तन्तु विधायकम्—इति परिशिष्टप्रकाशः॥

अत्र पृच्छति,—

केनैवोत्पादितं सूत्रम्? केन वा त्रिगुणीकृतम्?।
केनवाऽस्य कृतोग्रन्थिः? केनमन्त्रेण मन्त्रितम्?॥५२॥

ऋज्वर्थः श्लोकः॥

उत्तरमाह,—

ब्रह्मणोत्पादितं सूत्रं विष्णुना त्रिगुणीकृतम्।
रुद्रेण तु कृतोग्रन्थिः सावित्र्या चाभिमन्त्रितम्॥५३॥

ब्रह्मणासूत्रमुत्पादितम्, विष्णुना तत् त्रिगुणीकृतम्, रुद्रेण तत्र ग्रन्थिः कृतः, सावित्र्या तदभिमन्त्रितम्। सावित्री गायत्री। तुशब्दः स्वस्व-मन्त्रसंबन्धद्योतनार्थः, सर्व्वत्र संबन्धनीयः,—इति दीक्षितरामकृष्णस्य स्वरसः। 'इदानीम्—"ब्रह्मयज्ञानम्"—इति मन्त्रेण सूत्रोत्पादनम्,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"इदं विष्णुः"—इति मन्त्रेण त्रिगुणीकरणम्, "आवोराजानम्"—इति मन्त्रेण तत्र ग्रन्थिकरणम्, "तत्सवितुः"—इति मन्त्रेणाभिमन्त्रणम्, ततोधार्य्यम्,'—इति दीक्षितभाष्यम् ॥०॥

यज्ञोपवीतस्य परिमाणमाह,—

स्तनादूर्द्ध्वमधोनाभेर्न कर्त्तव्यं कथञ्चन।
स्तनादूर्द्ध्वं श्रियं हन्ति नाभ्यधस्तात्तपःक्षयः॥५४॥

स्तनादूर्द्ध्वं नाभेरधश्च यज्ञोपवीतं कथञ्चन न करणीयम्। स्तनादूर्द्ध्वं यज्ञोपवीतं कुर्व्वन् श्रियं हन्ति। नाभेरधस्तात् कुर्व्वतस्तपःक्षयोभवति।

अत्र किञ्चिद्वक्तव्यमस्ति। तत्र तावत्,—

"पृष्ठवंशे च नाभ्याञ्च धृतं यद्विन्दते कटिम्।
तद्धार्य्यमुपवीतं स्यान्नातोलम्बं न चोच्छ्रितम्"।

इति कर्म्मप्रदीपे नाभ्यां धृतस्योपवीतस्य कटिपर्य्यन्तं लम्बनमनुशिष्टम्। तदनेन विरुध्यते। कथं कृत्वा?। नाभेरधस्तात् करणस्यात्र निषेधात्। उच्यते। उपवीतस्य धारणं न नाभेरधस्तादित्येतदत्र प्रतिपिपादयिषितम्। लम्बता पुनः कटिपर्य्यन्तमेवानुशिष्टा न निवार्य्यते। अतोन विरोधः। ननु, तथापि विरोधः। कुतः?। यतो "न चोच्छ्रितम्"—इत्यनेन नाभेरूर्द्ध्वमेव धारणं कात्यायनस्याननुमतमवगच्छामः,। आचार्य्यपुत्रस्तु "स्तनादूर्द्ध्वं न कर्त्तव्यम्"—इति वदन् नाभेरूर्द्ध्वमपि स्तनादधस्तात् करणमनुजानाति। नैष दोषः। कस्मात्?। यस्मात् स्तनादूर्द्ध्वं न कर्त्तव्यमिति वाक्यं स्तनादूर्द्ध्वं करणं शक्नोति निषेद्धुम्, न नाभेरूर्द्ध्वं करणमनुमन्तुम्। तत्रास्य

5 Q

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सामर्थ्याभावात्। अर्थाद्धि खल्वयमर्थोऽवगम्यते। सत्यायमवगम्यमानोपि वचनान्तर-विरोधान्न शक्नोत्यात्मानं लब्धुम्। यद्धि नाभेरूर्द्ध्वं न क्रियते, न क्रियतएवैतत् स्तनादूर्द्ध्वमिति नास्ति विरोधः। किमर्थं तर्हि स्तनादूर्द्ध्वमित्यभिधानम्?। ननु स्तनादधोपि नाभेरूर्द्ध्वञ्चेत् न कर्त्तव्यम्,—इत्युक्तम्। दोषातिशयार्थम्,—इति गृहाण। अथवा। उभयोरप्यस्मच्छाखायामुपदेशात् सम्भवासम्भवाभ्यामनयो र्व्यवस्था भविष्यति। कथं नाम?। सम्भवे कर्म्मप्रदीपोक्तम् परिमाणम्, असम्भवे पुनरत्रोक्तम्,—इति न विरोधः। तदत्रैव कल्पे नाभेरधःकरणं निषिध्यते, न कर्म्मप्रदीपोक्तकल्पे,—इति तत्र कटिपर्य्यन्तं लम्बनमविरुद्धम्। निन्दाप्यत्रोक्ता न कर्म्मप्रदीपोक्तं परिमाणं निन्दति। विवक्षितार्थ-स्तुतिपरत्वात्तस्याः। "न निन्दा निन्द्यं निन्दितुं प्रवर्त्तते, अपितु इतरत् स्तोतुम्"—इति हि तन्त्रस्थितिः। तदिदं वचनमाचार्य्यपुत्रस्येत्येतदविदुषोनारायणोपाध्यायस्य,—'कर्म्मप्रदीपोक्तम् परिमाणं गोभिलीयानाम्। अन्येषान्तु,—

"स्तनादूर्द्ध्वमधोनाभेर्न कर्त्तव्यं कथञ्चन"।

इति देवलोक्तं परिमाणम्'—इति प्रलापोनादरणीयः ॥०॥

"सूत्रेण नवतान्तवम्"—इत्येतत्तावदुक्तम्, सूत्रमिदानीं व्याकुरुते,—

गोभिर्बालपवित्रेण धार्य्यमाणेन नित्यशः।
न स्पृशन्तीह पापानि त्रियं गात्रेषु तिष्ठति॥ ५५॥

गोभिः,—इति व्यत्ययात् षष्ठ्यर्थे तृतीया। एवमुत्तरत्रापि बोद्धव्यम्। गवां ये बालाः—केशाः, तन्निर्मितेन पवित्रेण यज्ञोपवीतेनेत्यर्थः।

For Private and Personal Use Only

कुतः?। "यज्ञोपवीतं परमं पवित्रम्"—इति दर्शनात्। अभिधान-काण्डे पाठाच्च। तथा देवलोऽपि,—

"कार्पास-क्षौम-गोवाल-शर-वल्क-तृणोद्भवम्।
सदा सम्भवतोधार्य्यमुपवीतं द्विजातिभिः"।

इति गोवालनिर्म्मितयज्ञोपवीतस्य धारणं स्मरति। तदनेन गोवाल-निर्म्मितपवित्रेण नित्यशोधार्य्यमाणेन इह शरीरे, इह लोके वा, पापानि न स्पृशन्ति। पवित्रपापयोर्विरोधात्। तथा, गात्रेषु श्रीर्लक्ष्मीस्तिष्ठति। श्रियम्,—इति व्यत्ययात् प्रथमार्थे द्वितीया॥

गोभिर्बालपवित्रेण यस्तु सन्ध्यामुपासते।
गोधर्म्मेष्वेव वर्त्तन्ते न स पापेन लिप्यते॥५६॥

उपासते—उपास्ते। वर्त्तन्ते-वर्त्तते। गोधर्म्मः पवित्रत्वम्। कथं ज्ञायते?। "गावः पवित्रं परमम्"—इति स्मरणात्। अतएव, स पापेन न लिप्यते,—इति पूर्व्ववदर्थः। अपर आह। 'गोधर्म्मेषु गोदान-धर्म्मेषु वर्त्तते,—गोदान पुण्यं भवतीत्यर्थः'—इति॥

गोभिर्बालपवित्रेण यस्तु ह्यग्निमुपासते।
पञ्चाग्नयो हुतास्तेन यावज्जीवं न संशयः॥५७॥

यावज्जीवं पञ्चाग्नयस्तेन हुताः,—यावज्जीवं पञ्चाग्निहोमफलं स प्राप्नोतीत्यर्थः। पञ्चाग्नयस्,—

"पवनः पावनस्त्रेता यस्य पञ्चाग्नयो गृहे"।

5 Q 2

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युक्तलक्षणाः। व्याख्यातमन्यत्। तदत्र, गोवालनिर्म्मितयज्ञोपवीतस्य प्राशस्त्यमात्रावगतेरप्रतिषेधाच्च कार्पासादिसूत्रनिर्म्मितमप्युपवीतं भवति। तथाच स्मृत्यन्तरम्।

"कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञोवैश्यस्याविकसौत्रिकम्"।

इति। गोवालनिर्म्मितपवित्रत्वस्माकं प्रशस्यते,—इति द्रष्टव्यम्। नारायणोपाध्यायः पुनरेतद्बुद्ध्वा, गोभिलीयानामपि कार्पासाद्यसम्भवे गोवालैर्यज्ञोपवीतमिच्छति॥

अथेदानीं ब्रह्मचारिणाऽन्या समित् यत्र होतव्या, तमग्निमाह,—

आचार्य्येणाभ्यनुज्ञातआचार्य्याग्नौ विधिर्यथा।
प्रणीतेऽग्नौ समिद्दद्यादन्त्या सा ब्रह्मचारिणाम्॥५८॥

आचार्य्येणाभ्यनुज्ञातोब्रह्मचारी, यथा विधिस्तथा, आचार्य्यस्याग्नौ समित्—समिधं, दद्यात्—जुहुयात्। स्वयं प्रणीते वा अग्नौ समिधं जुहुयात्। सेयं समित्, ब्रह्मचारिणामन्त्या समिदित्युच्यते। तत्र, यद्याचार्य्याग्नौ अन्त्यां समिधं जुहोति, तदा नासावग्निरस्य गृह्यो भवति। तदा खलु विवाहाग्निरेव गृह्यः स्यात्। यदा पुनः स्वयं प्रणीतेऽग्नौ जुहोति, तदा सएवास्य गृह्योऽग्निर्भवति। "ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन्"—इत्यादिना अन्त्यसमिदाधानार्थमग्निप्रणयनं सूत्रयित्वा, "सएवास्य गृह्योऽग्निर्भवति"—इति सूत्रयन्नाचार्य्योप्येतदेवाह। अनेनाप्युक्तम्,—'अन्त्या समिद्विवाहस्य'—इति। 'अन्त्या सा ब्रह्मचारिणाम्'—इति च ब्रुवन् प्रणीतस्यैवाग्नेर्गृ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलं भङ्ग्यन्तरेणाह। कथं ज्ञायते?। अन्या समित्,—इत्याधानकालाभिधानात्, प्रणीते चाग्नौ हुतायाः समिधोऽन्यत्ववचनात्। तथाच, 'अन्या सा ब्रह्मचारिणाम्'—इत्यत्र, सा,—इति सन्निहिततराप्रणीतेऽग्नौ होतव्यैव समित् परामृश्यते,—इति न किञ्चिदनुचितम्। स खल्वयम्,—"खादिरे बध्नाति, पालाशे बध्नाति, रोहितके बध्नाति"—इति वद्विकल्पः,—आचार्य्याग्नौ वा जुहुयात्, प्रणीते वा अग्नौ जुहुयात्,—इति। आचार्य्याग्नौ,—इति, प्रणीतेऽग्नौ,—इति चाग्निशब्दस्य द्विरुच्चारणस्याप्येतदेवप्रयोजनम्। अन्यथा अनर्थकत्वापत्तेः। दीक्षितस्त्वेतदजानानः व्याचष्टे,—'आचार्य्याग्नौ स्थण्डिले प्रणीते'—इति। तदसङ्गतम्। न खल्वाचार्य्याग्नेरग्निप्रणयनस्यार्थवत्तां पश्यामः।

"न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्"।

इति कर्म्मप्रदीपे आचार्य्याग्नावपि ब्रह्मचारिणः समिद्धोमानुज्ञानात्। आचार्य्याग्नौ,—इति चाधिकरणनिर्देशात्। अलं पल्लवितेन॥

अथेदानीम्,—"आश्वयुज्यां पौर्णमास्यां पृषातके पायसश्चरुरौद्रः" —इति सूत्रोक्तं पृषातकं, तस्य स्थानमाह,—

दधि सर्पिश्च संयुक्तः प्रोक्तोह्येष पृषातकः।
होमकाले तु तस्याग्नेः स्थानमुत्तरपूर्व्वतः॥ ५९॥

दधि प्रसिद्धम्। सर्पिर्घृतम्। तदेतत् द्वयं संयुक्तं सत्, पृषातकः प्रोक्तम्। संयुक्तः,—इत्यादौ व्यत्ययात् पुंस्त्वम्, विधेयप्राधान्य-विवक्षया वा समर्थनीयम्। होमकाले तु तस्य पृषातकस्य स्थानम्,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्नेरुत्तरपूर्व्वतः,—ऐशान्यां दिशि, स्यात्। भट्टनारायणस्त्वेतदजानानः, —अग्नेरुत्तरतः पृषातकस्य स्थानमाह ॥

आश्वयुजीकर्म्मण्येव;—"गोनामभिश्च पृथक् काम्यासीत्येतत्प्रभृतिभिः" —इति सूत्रोक्तानि गोनामान्याह,—

काम्या प्रिया च हव्या च इड़ा रन्ता सरस्वती।
मही विश्रुता चाघ्न्याच गोनामानि विदुर्बुधाः॥ ६० ॥

छजुरचरार्थः। चकाराः 'असि' शब्दस्याध्याहारार्थाः,—इति दीक्षितभाष्यम्। 'अघ्न्या'—नाम्ना खल्वत्र होमोनास्तीत्यष्टावाहुतयो भवन्ति। तथाच कर्म्मप्रदीपः।

"धृतिहोमे न प्रयुञ्ज्याद्गोनामसु तथाऽष्टसु।
चतुर्थीमघ्न्या इत्येतद्गोनाम्नि न हि हूयते"।

इति ॥

मधुपर्कं पिबेन्मन्थमन्ततो हृदयं स्पृशेत्।
अपूपानां चरोश्चापि सर्व्वस्थानान्यनक्ति च॥ ६१ ॥

मधुपर्कं वक्ष्यमाणलक्षणं पिबेत्। मन्थमपि वक्ष्यमाणलक्षणम्—दधिमन्थमधुमन्थोदमन्थभेदात् त्रिविधं, पिबेत्। अन्ततः—पानात् परं, हृदयं स्पृशेत्। अष्टकाविधौ अपूपानां चरोश्च सर्व्वाण्यवदानस्थानानि, अनक्ति च घृतेनाप्लावयति च। तदेतद्यथार्थमभिप्रेतम्। कथं नाम?। चतुरवत्तिनां द्वे अवदानस्थाने भवतः—मध्यं पूर्व्वार्द्धञ्च। पञ्चावत्तिनां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुमस्त्रीष्ववदानस्थानानि भवन्ति—मध्यं पूर्व्वार्द्धः पश्चार्द्धश्च,—इति। तदेतत् सर्व्वमस्मत्कृतगृह्यसूत्रभाष्यादुपलब्धव्यम्। अलमिह ग्रन्थ गौरवेण॥

अथेदानीम्,—"विष्टरपाद्यार्घ्याचमनीयमधुपर्कानेकैकशस्त्रिस्त्रिर्वेदयेरन्"—इति सूत्रोक्तमर्घ्यादिकं व्याकुरुते,—

दध्यक्षतसुमनसश्चापश्चेति चतुष्टयम्।
अर्घ्यएष प्रदातव्यो गृह्ये ये अर्घ्यार्हाः स्मृताः॥ ६२॥

दधि, अक्षताः—यवाः, सुमनसः—पुष्पाणि, आपः—उदकम्,—इत्येतत् चतुष्टयं मिलितमर्घ्यः। स खल्वेष प्रदातव्यः। कस्मै?। "षड़र्घ्या भवन्ति"—इति सूत्रेण गृह्ये ये अर्घ्यार्हाः स्मृताः, तेभ्यः॥

अपरमर्घ्यमाह,—

दध्यक्षतः सुमनसोघृतं सिद्धार्थकाः यवाः।
पानीयञ्चैव दर्भाश्च अष्टाङ्गोह्यर्घ्यउच्यते॥ ६३॥

अक्षतस्तण्डुलः। यवानां पृथगुपदेशात्। सिद्धार्थकाः श्वेतसर्षपाः। पानीयमुदकम्। प्रसिद्धमन्यत्। अष्टावङ्गानि यस्य, सोऽयमष्टाङ्गोऽर्घ्यउच्यते॥

मधुपर्केणार्च्चनप्रकारमाह,—

सर्पिषा मधुना दध्ना अर्च्चयेदर्हयन् सदा।
ऋषिप्रोक्तेन विधिना मधुपर्केण याज्ञिकः॥ ६४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याज्ञिकः, सदा—"परिसंवत्सरानर्हयेयुः" "पुनर्यज्ञविवाहयोश्च"—इति गृह्योक्तसर्व्वकाले, मधुपर्केणार्हयन्—पूजयन्, ऋषिप्रोक्तेन गोभिलोक्तेन विधिना, सर्पिषा मधुना दध्ना—इत्येतत् त्रितयेनार्च्चयेत् ॥

कंसे त्रितयमासिच्य कंसेन परिसंवृतम्।
परिश्रितेषु देयः स्यान्मधुपर्कइति ध्रुवम् ॥ ६५ ॥

कंसे कांस्यपात्रे, त्रितयम्—सर्पिर्मधु दधि चासिच्य, कंसेन परि सर्व्वतोभावेन संवृतम्—सम्यगाच्छादितं कृत्वा, परिश्रितेषु—अर्हणीयस्य सर्व्वतः समाश्रितेषु गृह्येषु,—इत्यर्थः। तथाच वाजसनेयके प्रवचने। "यत्र चार्ह्य आगच्छति, सर्व्वे गृह्यादितरे तत्र वेष्टयन्ति"—इति। अपर आह। 'कटादिना परितः श्रितेषु सर्व्वतो वेष्टितेषु स्थानेषु', —इति। तदेवं मधुपर्कोदेयः स्यात्,—इति ध्रुवं निश्चयः ॥

मधुपर्के तथा सोमे अप्सु प्राणाहुतीषु च।
अनुच्छिष्टो भवेद्विप्रोयथा वेदविदोविदुः ॥ ६६ ॥

मधुपर्कभक्षणे, सोमभक्षणे, अप्सु—उदके आस्येन होमे पूर्व्वोक्ते, प्राणाहुतीषु च—उपनिषद्ब्राह्मणोक्तेषु प्राणव्यानापानसमानोदानरूपपञ्चाहुतिषु, विप्रोनोच्छिष्टोभवति, यथा वेदविदोजानन्ति ॥

प्राणाहुतिषु सोमेषु मधुपर्के तथैव च।
आस्यहोमेषु सर्व्वेषु नोच्छिष्टोभवति द्विजः ॥ ६७ ॥

आस्यहोमेषु—"सर्पिरास्येन जुहुयात्"—इत्यादि सूत्रोक्तेषु। सर्व्वेषु,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिकरणादन्येष्वप्येवंविधेषु—उपाकरणादावक्षतधानाभक्षणादिषु, द्विजेनोच्छिष्टोभवति। तदेतद्विशेषाभिधित्सया पुनरारम्भः। पूर्व्वं विप्रपदोपादानात् राजन्यवैश्ययोरुच्छिष्टताऽऽशङ्कापि स्यात् कस्यचिन्मन्दमतेरिति वा पुनरारम्भः। समादरार्थो वा ॥

अन्यमपि मधुपर्कमाह,—

> दधनि पयसि वाऽथवा कृतान्ने
> मधु दद्यान्मधुपर्कमेतदाहुः।
> दधि मधु-सलिलेषु सक्तवः
> पृथगेते विहितास्त्रयस्तु मन्थाः ॥ ६८ ॥

दधनि, पयसि—दुग्धे वा, कृतान्ने—ओदनादौ वा,. मधु दद्यात्—क्षिपेत्। दध्यात्,—इतिपाठे धारयेदित्यर्थः। एतन्मधुपर्कमाहुराचार्य्याः। दधि-मधु-सलिलेषु सक्तवोदेयाः। तदिमे त्रयोमन्था भवन्ति;—दधिमन्थः, मधुमन्थः, उदमन्थश्च,—इति। तदिदम्—"रसोऽसि वानस्पत्योरसं मयि धेहीति मधुमन्थस्य पिबेदिति गौतमः वानस्पत्यइति प्रवचनम्, तथा दधिमन्थोदमन्थयोः"—इति द्राह्यायणादिकल्पसूत्रोक्तानां दधिमन्थमधुमन्थोदमन्थानां निर्व्वचनं प्रसङ्गागतमिति बोद्धव्यम्।

कल्पसूत्रवृत्तिकाराअग्निस्वामिनोप्येवमेव श्लोकमिमं पठितवन्तः द्वितीयस्त्वन्यथेमं श्लोकं पठति—

(दधनि पयसि वा कृतान्ने मधु निदध्यान्मधुपर्कमाहुः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दधिमधूदकं वाऽपि सक्ताविव्येते विहितास्त्रयस्तु मन्थाः ।)
इति । अत्रापि पाठे पूर्व्वोक्तएवार्थः ।

एवन्तावत् च्छन्दोगानां स्वशाखापरिभाषितश्चतुर्विधोमधुपर्को भवति;—दधि-मधु-घृतम्, दधनि मधु, पयसि मधु, कृतान्ने मधु-चेति । एवञ्च, सर्व्वत्रैव मधुपर्कः—इति समाख्याऽनुगृह्यते । तत्र प्रथमोमधुपर्कः कांस्यस्थः कांस्यापिधानश्च भवति। द्वितीयेऽप्यमुं विशेषं वच्यामः । शिष्टयोरनियमः। कथं ज्ञायते? । पूर्व्वस्मिन्नेव मधुपर्के तदभिधानात्। शिष्टयोरनभिधानाच्च । नचेदं वाक्यं घृतासम्भवपरम्। प्रमाणाभावात्। आराच्चाभिधानात् । यदि हि घृतासम्भवएव विधि-रयं स्यात् । तदनुपदमेवैतदपि कुर्य्यात् । तस्माद् व्यवहितकर-णादवगच्छामः,—पृथगेवैते मधुपर्कप्रकाराः,—इति। अपिच। 'अथवा' 'वा' शब्दयोरुपादानादेकार्थत्वाच्च विकल्पएवामीषां युक्तोवर्णयितुम्। तथा चोक्तम् । "एकार्थास्तु विकल्पेरन्"—इति। 'पृथक्'—इति वचनाच्चैवमवगच्छामः। तच्च यद्यपि पराचीनम्, तथाप्यविशेषात् पूर्व्वत्राप्यनुषञ्जनीयम्। पयःकृतान्नाभ्यामपि मधुपर्काभिधानममुमर्थ-मुपोद्बलयति। घृतालाभे,—इत्यकरणाच्च। तस्मादियमेवावधारणा,—प्रथमएव मधुपर्कः कांस्यस्थः कांस्यापिधानश्च भवति, नान्तिमौ—इति । 'कंसे त्रितयमासिच्य'—इति ब्रुवन्नाचार्य्यपुत्रस्त्रितयस्यैव कंसे समासेचनं कंसेनापिधानञ्च, न द्वयोः,—इति दर्शयति । यथा खल्वभिक्रमणं प्रयाजमात्रस्यैवाङ्गं न पुनरनुयाजादीनां प्रकरणोपा-त्तानाम्,—इति तृतीयाध्याये सिद्धान्तितम्, तद्वदत्रापि स्यात्। अतएव,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"साक्षतं सुमनोयुक्तमुदकं दधिमिश्रितम् ।
अर्घ्यं, दधिमधुभ्याञ्च मधुपर्को विधीयते ।
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ ।
कांस्यापिधानं कांस्यस्थं मधुपर्कं निवेदयेत्" ।

इति कर्मप्रदीपेऽपि मधुपर्कपदं स्वोक्तमेव मधुपर्कमाह, नापरम् । व्यक्तिवचनं खल्वेतत् सन्निहितामेव व्यक्तिं शक्नोति वदितुं नासन्निहिताम् । आग्नेयीन्यायात् । तस्मादाद्यौ मधुपर्कौ कांस्यापिधानौ कांस्यस्थौ च भवतः, नापरौ,—इति सिद्धम् ।

यच्च,—"दधनि मध्वानीय सर्पिर्वा मध्वलाभे"—इति गृह्यान्तरम् । तदन्येषामेव नास्माकम् । कस्मात्? । अस्मच्छास्त्रे तदनुपदेशात् । विशेषस्योपदेशाच्च ।

रघुनन्दनस्तु च्छन्दोगोप्येतदजानानः,—दधिमधुमात्रेण मधुपर्काभिधानं घृतासम्भवपरम्'—इति स्वच्छन्दादेव परिकल्प्य, 'तत्सम्भवे गोभिलः'—इत्यभिधाय, "मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन"—इति पारस्करगृह्यसूत्रम्; "पिहितं कांस्यस्थम्"—इत्याकुलीकृत्य लिखित्वा, 'पूर्ववचने पात्रानुपदेशात् कांस्यपात्रं विनापि मधुपर्कोदीयते'—इति ब्रुवन् कल्पनानैपुण्यमात्मनः ख्यापयाञ्चकार ।

तदसङ्गतम् । मधुपर्कान्तरे मधुपर्कान्तरोक्तविशेषस्य संश्लेषाभावात् । 'यद्धि यदुपक्रम्य श्रुतं तत्तत्रैवाङ्गं नान्यत्र,'—इति भवानेवाह । प्रथमयोर्हि मधुपर्कयोर्विशेषः श्रूयते, नापरत्र । स खल्वयं विशेषएवान्यत्र नास्ति । तत्कृतएव तत्र पात्रानुपदेशात् प्रथमावपि मधुपर्कौ कांस्यपात्रं विना देयौ स्याताम् । तस्मात् न किञ्चिदेतत् । अपिच ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्वभावे घृतेन मधुपर्कं गृह्यान्तरकाराः स्मरन्ति, भवान् पुनः स्वातन्त्र्यातिशयान्मन्यते,—घृतासम्भवे दधिमधुमात्रेण मधुपर्कः—इत्यहो प्रमादः। घृतासम्भवे वचनस्य विषयत्वे खल्वशक्तविषयमेव वचनमिति कांस्यपात्रासम्भवेपि शक्यं नेतुम्। तस्याशक्तविषयत्वस्य भवतामविवादात्। तत् कथमेतद्वचनावष्टम्भेन दधिमधुघृतवाक्ये श्रूयमाणस्यापि कांस्यपात्रस्योपलक्षणतां भङ्ग्यन्तरेणाभ्युपगच्छति। वाक्ययोरनयोः परस्परमसम्बन्धात्। सोऽयं भवदीयएव वाणोभवन्तं प्रहरति। अपिच। साहसिकः खलु भवान् यः पारस्करीयं सूत्रं गोभिलीयमिति ब्रुवन् पारमर्षञ्च सूत्रमाकुलयन्नापत्रपते,—इति किमत्र ब्रूमः॥

अथेदानीम्—" "शृतमभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत्"—इति सूत्रोक्तं चरोरभिघारणं प्रत्यभिघारणञ्च व्याकुरुते,—

पवित्रान्तर्हितं कृत्वा चरुं प्राज्ञोऽभिघारयेत्।
उद्वास्य चैव विधिना एवं तन्त्रं न लुप्यते॥ ६९॥

प्राज्ञोबुद्धिमान्, उदगग्रेण पवित्रेण चरुमन्तर्हितं व्यवहितं कृत्वा; चरुमध्ये उदगग्रं पवित्रं निधायेत्यर्थः। अभिघारयेत्—घृतस्रुवेणाप्लावयेत्। चरुमुत्तरस्यां दिशि उद्वास्य उत्तार्य्य च, पूर्व्वोक्तेनैव विधिना पुनरभिघारयेत्। एवं कृते तन्त्रमङ्गविस्तारोन लुप्यते॥

चतुर्मुष्टिश्चरुः कार्य्यश्चतुर्णामुत्तरोऽपि वा।
कपालस्य प्रमाणेन अपूपानष्टकाविधौ॥ ७०॥

चरुतन्त्रे चतुर्मुष्टिपरिमितश्चरुः कर्त्तव्यः। अपि वा,—अथवा, बहु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दैवत्ये चरौ चतुर्णां मुष्टीनामुत्तरोऽधिकोऽपि चरुः कर्त्तव्यः। अष्टकाविधौ तु कपालस्य प्रमाणेन अपूपान्—मण्डकान् कुर्य्यात्। मुष्टिः पलमित्यनर्थान्तरम्। बद्धपाणिः कस्मान्नोच्यते?। आचार्य्यविरोधादित्याह। एवं खल्वेकदैवत्येपि चरौ चतुर्मुष्टिकरणे आचार्य्यसूत्रं विरुध्येत। तथाच सूत्रम्। "अमुष्मै त्वा जुष्टं निर्व्वपामीति देवतानामादेशं सकृत् द्विस्तूष्णीम्"—इति। तस्मात्,—मुष्टिरत्र पलमेव,—इति प्रतिपद्यामहे। तदिदं हविःपरिमाणपरं वचनम्। अतएव कर्म्मप्रदीपेऽपि,—

"देवतासंख्यया ग्राह्या निर्व्वापास्तु पृथक् पृथक्।
तूष्णीं द्विरेव गृह्णीयाद्धोमश्चापि पृथक् पृथक्।
यावता होमनिर्वृत्तिर्भवेद्वा यत्र कीर्त्तिता।
शेषञ्चैव भवेत् किञ्चित्, तावन्तं निर्वपेच्चरुम्"।

इत्यत्र परवचनेन हविःपरिमाणमेवोक्तम्, न मुष्टिसंख्या। तस्याः पूर्व्ववचनेनैवोक्तत्वात्। 'तावन्तं चरुं निर्वपेत्'—इत्यस्यावचनव्यक्तेर्हविः परिमाणएव तात्पर्य्यावगतेश्च। तदनयोः परिमाणयोर्विकल्पो बोद्धव्यः। द्वयोरप्यस्मच्छास्त्रोक्तत्वात्। कात्यायनोऽपि 'भवेद्वा'—इति वा शब्देन परिमाणान्तरं सूचयति॥

**चतुर्भागं पाणितलात् कपालं याज्ञिकाविदुः।
पृथक्कपालान् कुर्व्वीत अपूपानष्टकाविधौ॥७१॥**

पाणितलाच्चतुर्भागं कपालं याज्ञिकाः जानन्ति। तदिदं कपालं यज्ञ एवोपयुक्तम्। अष्टकाविधौ पुनर्नैतादृशं कपालं, किन्तु तत्र पृथक्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कपालान्—अन्यादृशकपालसंस्कृतानपूपान् कुर्व्वीत। अथवा। करतलाच्चतुर्भागं कपालमित्येकं वाक्यम्। तदिदं न्यूनतरकपालपरिमाणाभिप्रायं वचनम्,—न पुनरतोऽपि न्यूनपरिमाणं कपालं कुर्य्यादित्ययमत्रार्थः। एवं खल्वनेन वाक्येन,—"त्रैयम्बकप्रमाणान्"—इति सूत्रम्—

"त्रैयम्बकं करतलमपूपामष्टकाः स्मृताः"।

इति वचनञ्च न विरोत्स्यते। अष्टकाविधौ पृथककपालान्—नाना कपालसंस्कृतान् अपूपान् कुर्व्वीत,—इत्यपरं वाक्यम्। तदनेन,—"एककपालान्"—इति सूत्रं व्याख्यातम्॥

वपाहोमे मुखेनैवहोमे स्विष्टकृते तथा।
व्यहृतीर्न प्रयोक्तव्या मुखे नाप्सु च लक्षणम्॥ ७२॥

"स्थालीपाकावृता वपामवदाय स्विष्टकृदावृतावाऽष्टकायै स्वाहेति जुहोति"—इति सूत्रोक्ते वपाहोमे, मुखेन होमे—पूर्व्वोक्ते, स्विष्टकृद्धोमे च, मन्त्रानादेशे प्रयोक्तव्यत्वेन पूर्व्वमभिहिताः व्याहृतयोन प्रयोक्तव्याः। एषु मन्त्रस्योपदेशात्—एषु कर्त्तव्येषु एतदनुकूलं यत् किञ्चित् क्रियते, तत्र न व्याहृतिप्रयोगः,—इत्ययमत्रार्थः। व्याहृतीः,—इत्यत्र पूर्व्वसवर्णादिरष्टव्यः। "जातरूपेण वाऽऽदाय कुमारस्य मुखे जुहोति"—इत्यादिसूत्रोक्ते मुखहोमे, उदकहोमे च पूर्व्वोक्ते, लक्षणं गोभिलोक्तं न कर्त्तव्यम्॥

सन्ततः प्रणवः कार्य्यः पितृयज्ञेषु ब्राह्मणैः।
उपांशुकरणञ्चापि सह कत्ना समस्वरैः॥ ७३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पितृयज्ञेषु पितृकर्म्मसु, कर्त्ता कर्म्मकर्त्ता सह, समस्तैर्ब्राह्मणैः, सन्ततोऽविरतः,—प्रतिमन्त्रमित्यर्थः। प्रणवओंकारः करणीयः। होमे, अन्यत्र च,—

"नोङ्कुर्य्याद्धोममन्त्राणां पृथगादिषु कर्हिचित्।
अन्येषाञ्च विकृष्टानां कालेनाचमनादिना"।

इति कर्म्मप्रदीपोक्तं द्रष्टव्यम्। उपांशु,—

"शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन्।
किञ्चिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः"।

इत्युक्तलक्षणं यथा भवति, तथा करणञ्च ज्ञेयम्। अथवा। उपांशुशब्दोविविक्तपर्य्यायोऽव्ययम्। तदयमर्थः। उपांशु विविक्ते पितृयज्ञस्य करणं बोद्धव्यम्। तथाच मनुः।

"शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्"।

इति॥

"आसायमाहुतेः प्रातराहुतिर्नात्येति"—इत्यादि सूत्रैरतीतहोमानामागामिहोमकाले करणमुपदिष्टम्। तत्र, किमतीतहोमं कृत्वा आगामिहोमः कर्त्तव्यः, आहोस्वित् आगामिहोमं कृत्वा अतीतहोमः करणीयः?-इत्येतदिदानीं वर्णयिष्यामः,—

कालातीतेषु होमेषु उत्तरेष्वागतेषु च।
कालातीतानि हुत्वैव उत्तराणि समारभेत्॥७४॥

स्पष्टार्थः श्लोकः॥

यान्यतीतान्यतिक्रम्य उत्तराणि समारभेत्।
न देवाः पितरस्तस्य प्रतिगृह्णन्ति तद्धविः॥७५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यः पुनर्यानि अतीतानि कर्म्माण्यकृत्वा उत्तराण्यारभते, देवाः पितरश्च तस्य तत्—अतीतहोमीयं हविर्न प्रतिगृह्णन्ति । अथवा । 'यानि'—इति यः,—इत्यर्थे व्यत्ययात् पदम् । यः अतीतान्यकृत्वा उत्तराण्यारभते, देवाः पितरश्च तस्य तत्—सर्व्वमपि हविर्न प्रतिगृह्णन्ति ॥ अथेदानीम्—"अग्नये स्वाहेति पूर्व्वां तूष्णीमेवोत्तरां मध्ये चैवापराजितायाञ्चैव दिशीतिषायम्"—इति सूत्रोक्तामपराजितां दिशं व्याकुरुते,—

प्रक्रमणे तथोद्वाहे होमे स्विष्टकृते तथा ।
यस्यां दिशि विधिं प्राहुस्तामाहुरपराजिताम् ॥ ७६ ॥

प्रक्रमणे—वध्वाः सप्तपदीगमने,तथोत्तरविवाहे, स्विष्टकृद्धोमे च, यस्यां दिशि विधानं प्राहुराचार्य्याः, तां दिशमपराजितां ब्रुवन्त्याचार्य्याः; प्रागुदीचीमैशानीमित्यर्थः । तथाच प्रक्रमणे गोभिलसूत्रम् । "सूर्पेण शेषमग्नावोप्य प्रागुदीचीमभ्युत्क्रामयन्त्येकमिषइति"—इति । तथोत्तरविवाहे । "प्रागुदीच्यां दिशि यद्ब्राह्मणकुलमभिरूपम्"—इति । तथा स्विष्टकृद्धोमे । "अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धपूर्व्वार्द्धे जुहुयात्"—इति ॥

अयुक्तमम्ललवणैरपर्य्युषितमेवच ।
हविष्यमेतदन्नाद्यमसुरैश्चाप्यसंयुतम् ॥ ७७ ॥

अम्ललवणैर्न युक्तम्, न च पर्य्युषितम्, नाप्यसुरैर्मिश्रितम् । तदीदृशमोदनाद्यं हविष्यमाहुः । असुरः—इति नैघण्टुककाण्डे मेघनामसु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पठितम्। तच्च तत्रोनविंशत्तमं नाम। तथा च, असुरैर्मेघैर्मेघजलैर्न मिश्रितमित्येतत्। मेघोदकस्यापवित्रत्वात्। तथाच स्मरणम्।

"स्नानमाचमनं दानं देवतापितृतर्पणम्।
शूद्रोदकैर्न कुर्व्वीत तथा मेघाद्विनिःसृतैः"।

इति। अथ वा। असुरैः—क्षारविदाहिभिरमिश्रितमित्यर्थः। कथं ज्ञायते?। शृणु यथा ज्ञायते। असुरूपतापः—इति ह्यनर्थान्तरम्। असुं रान्ति ददति ये क्षारादयस्ते खल्विमे असुराः भण्यन्ते। असुरैः,—इति लिङ्गव्यत्ययाद्वा पदं द्रष्टव्यम्। असुराभिरित्यर्थः। असुरा रजनी हरिद्रेत्यनर्थान्तरम्। बहुवचनादन्यैरप्येवंविधैरमिश्रितम्—इति। अपरस्त्वाह। 'असुरैरश्वादिभिर्न भक्षितम्'—इति।

तदनेन,—"हविष्यमन्नं प्रथमं परिजपितं भुञ्जीत"—इति सूत्रोक्तं हविष्यमन्नं व्याख्यातम्। "तावुभौ तत्प्रभृति त्रिरात्रमक्षारलवणाशिनौ"—इत्यादिना सूचितमक्षारलवणमप्यनेनैव व्याख्यातं वेदितव्यम्। एतदनुपदमेव 'हविष्यमन्नम्'—इति सूत्रणात्। तस्यैव खल्वक्षारलवणाशनस्य प्रथमे अशने विशेषविवक्षया सूत्रमिदं प्रवृत्तं,—'हविष्यमन्नम्'—इत्यादि। तदत्र, लवणमात्रप्रतिषेधात्,—क्षारमृत्तिकादिकृतलवणभिन्नं लवणमक्षारलवणम्,—इति रघुनन्दनव्याख्यानं नादरणीयम्। यच्च,—"लवणे सैन्धवसामुद्रे"—इति हविष्यान्नविषयं स्मरणान्तरम्। तदप्येतद्व्यतिरिक्तविषयं बोद्धव्यम्। कस्मात् कारणात्?। स्वशास्त्रपरिभाषायाः शीघ्रमुपस्थितत्वात्॥

इक्षवः सर्व्वखल्वाश्च कोद्रवा वरटैः सह।
अकृताग्रयणाभक्ष्या येषां नोक्ताहविर्गुणाः॥ ७८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्तवः, सर्व्वेखल्वाः चणकाः, कोद्रवाः प्रसिद्धाः, वरटोवरटीत्यनर्थान्तरम्। तैर्वरटैः सह, इमे इत्तुप्रभृतयः अक्षताग्रयणाः भक्षणीयाः। येषां हविर्गुणाः नोक्ताः—येषां हविष्ट्वं नोक्तं, तदिमे इत्तुप्रभृतयः इत्यर्थः। न क्षतं आग्रयणं नवशस्येष्टियैः, तदिमे अक्षताग्रयणाः—अक्षतनवशस्येष्टयोभण्यन्ते ॥

नवयज्ञेऽधिकारस्थाः श्यामाकाव्रीहयोयवाः।
नाश्नीयान च हुत्वैवमन्येष्वनियमः स्मृतः ॥ ७९ ॥

नवयज्ञे योऽधिकारः, तत्र तिष्ठन्ति,—इति नवयज्ञेऽधिकारस्थाः,—नवयज्ञे अधिकृताः—इत्येतत्। तदित्थम्भूताः श्यामाकादयः न हुत्वा—होममकृत्वा नवयज्ञमकृत्वा,—इति यावत्। नाश्नीयाः नाश्ननीयाः। अन्येषु पुनर्गोधुमादिषु एवमनियमः होमस्यानियमः स्मृतः। अतएव गोभिलेन व्रीहियज्ञमभिधाय, "एतयैवावृता श्यामाकयवानाम्"—इति त्रिष्वेव नवयज्ञः सूचितः। गोधूमादिषु तु करणेऽभ्युदयः, अकरणेऽपि न प्रत्यवायः। सोऽयमाचार्य्यानुक्तो विशेषः। श्यामाकयज्ञोऽपि वनस्थस्यैव। "श्यामाकोवनिनः स्मृतः"—इति वचनात् ॥

अथेदानीं श्राद्धमधिकृत्य पृच्छति,—

श्राद्धे ब्राह्मणएकश्चेत् स्वल्पञ्च प्रकृतं यदि।
वैश्वदेवं कथं तत्र? इति मे संशयोमहान् ॥ ८० ॥

श्राद्धे यद्येकोब्राह्मणः स्यात्, प्रकृतं श्राद्धोपयुक्तमन्नं वा यद्यल्पं स्यात्, तदा तत्र कथं वैश्वदेवं भवति,—इति मम महान् संशयः। तदिदं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रश्नद्वयम्—बहुद्रव्यसद्भावेऽपि ब्राह्मणासम्पत्त्या एकब्राह्मणपक्षे कथं वैश्वदेवं स्यात्,—इति। ब्राह्मणसम्पत्तिसम्भवेऽपि द्रव्यस्याल्पत्वेन बहु-ब्राह्मणभोजनासम्भवे कथं वैश्वदेवं स्यात्,—इति च॥

अत्रोत्तरमाह,—

प्रणीतान्नाद्यमुद्धृत्य सर्व्वस्य प्रकृतस्य तु।
ब्राह्मणाय प्रदातव्यम्, एवं भवति सम्पदि॥८१॥

प्रकृतस्य श्राद्धार्थमुपकल्पितस्य सर्व्वस्य, प्रणीतं प्रणेतुं योग्यमन्नाद्यमु-द्धृत्य पृथक् कृत्वा, वैश्वदेवार्थमित्यर्थः। दैवस्य प्रश्नविषयत्वादुत्त-रमपि तद्विषयमेव भवति। तद्देवं दैवार्थमन्नं पृथक् कृत्वा निवेद्य श्राद्धात् परं तदन्नं ब्राह्मणाय कस्मैचित् प्रदातव्यं प्रतिपादयितव्यम्। तथा च वशिष्ठः।

"यद्येकं भोजयेत् श्राद्धे दैवं तत्र कथं भवेत्?।
अन्नं पात्रे समुद्धृत्य सर्व्वस्य प्रकृतस्य तु।
देवतायतने कृत्वा ततः श्राद्धं समापयेत्।
प्रास्येदग्नौ तदन्नन्तु दद्याद्वा ब्रह्मचारिणे"।

इति।

"एकस्मिन् ब्राह्मणे दैवे साग्नेरग्निर्भवेत् सदा।
अनग्नेः कुशमुष्टिः स्यात् श्राद्धकर्म्मणि सर्व्वदा"।

इति च स्मृत्यन्तरम्। स खल्वयं बहुद्रव्यसद्भावेऽपि ब्राह्मणासम्पत्तौ विधिः। कथं ज्ञायते?। द्रव्यविशेषणतया सर्व्वस्येति श्रुतेः। सहि भूरिद्रव्यकृत्स्नवाची। अतोऽवगच्छामः—भूरिद्रव्यसद्भावेऽपि ब्राह्मणा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्पत्तौ विधिरयम्—इति। तमिमं विधिं ब्राह्मणसम्पत्तावपि द्रव्यस्याल्पत्वे, अतिदिशति,—एवं भवति सम्पदि,—इति। ब्राह्मणसम्पत्तावपि द्रव्यस्याल्पत्वे एवमेव कर्त्तव्यमित्यर्थः॥

तत्र सामगस्य प्रशंसामाह,—

यद्येकं भोजयेत् श्राद्धे च्छन्दोगं तत्र भोजयेत्।
ऋचो यजूंषि सामानि त्रैविद्यं तत्र तिष्ठति॥ ८२॥

पूर्व्वार्द्धस्य हेतुरूपमुत्तरार्द्धम्। त्रैविद्यं त्रयोवेदाः। स्वार्थे तद्धितः। तत्र च्छन्दोगे। ऋज्वन्यत्॥

तत्र फलार्थवादमाह,—

ऋग्भिस्तु पितरः प्रीतायजुर्भिस्तु पितामहाः।
सामभिः प्रपितामहास्तस्मात्तं तत्र भोजयेत्॥ ८३॥

तं च्छन्दोगम्। तत्र श्राद्धे। शिष्टमन्यत्॥

अटेत पृथिवीं कृत्स्नां सशैलवनकाननाम्।
लभेत यदि पित्रर्थे साम्नामक्षरचिन्तकम्॥ ८४॥

वनकाननयोरवान्तरभेदविवक्षया पृथगुपन्यासः। अथवा। वनं नीरं जलमित्यनर्थान्तरम्। काननशब्दस्य गृहमप्यर्थोऽस्ति॥

एकस्य पुनः पुनः श्राद्धभोक्तृत्वेऽपि दोषोनास्तीति प्रसङ्गादाह,—

दर्भाः कृष्णाजिनं मन्त्राब्राह्मणाश्च विशेषतः।
नैते निर्माल्यतां यान्ति नियोज्यास्तु पुनः पुनः॥८५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृष्णाजिनं मृगचर्म्म। प्रसिद्धाश्चान्ये। एते दर्भादयोनिर्माल्यतां निर्वीर्य्यतां न प्राप्नुवन्ति। तस्मात्, पुनः पुनरपि नियोज्याः। तत्त्व-कारस्त्वन्यथेमं श्लोकं पठति;—

दर्भाः कृष्णाजिनं मन्त्राब्राह्मणाहविरग्नयः।

अयातयामान्येतानि नियोज्यानि पुनः पुनः।

इति। एवं खल्वग्निमस्लोके,—"निर्माल्याश्चितिपावकाः"—इति वच-नमाञ्जस्येनोपपद्यते। तत्र, अयातयामत्वम् अपि अनिर्म्माल्यता पर्य्यव-साधि बोद्धव्यम्। कुतः?।

"जीर्णञ्च परिभुक्तञ्च यातयाममिदं द्वयम्"।

इत्युक्तेः। स्मृत्यन्तरेतु विशेषः;—

"संग्रहाद्वत्सरं यावत् शुद्धिः स्यादिभवर्हिषाम्।

अतः परं न गृह्णीयात् जपादौ यज्ञकर्म्मणि"।

इति। 'अत्रच,—

"मासे नभस्यमावस्या तस्यां दर्भचयोमतः।

अयातयामास्ते दर्भाविनियोज्याः पुनः पुनः"।

इति मरीचिवचनात् श्रावणामस्यायामेव चितानां दर्भाणामयातया-मत्वम्'। एवमेके। 'सर्व्वदैव चितानां दर्भाणामयातयामत्वम्। मरी-चिवचनन्तु,—

"वार्षिकांश्चतुरोमासान् नाहरेत् कुशमृत्तिकाः।

आददीत लभावे तु सद्योयस्योपयोजनम्"।

इत्यस्य निषेधस्यापवादकम्'। एवमपरे। तदत्र भवन्तोभूमिदेवाः प्रमाणम्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किममीषां न भवत्येव निर्माल्यता?। एवं खलु प्राप्तम्। ततइद-मारभ्यते,—

दर्भाः पिण्डेषु निर्माल्याविप्राः प्रेतान्नभोजने।
मन्त्राः शूद्रेषु निर्माल्यानिर्म्माल्याश्चितिपावकाः॥८६॥

पिण्डेषु प्रक्षिप्तादर्भानिर्माल्याभवन्ति—कर्म्मानर्हादृत्यर्थः। प्रेतान्नस्य—प्रेताशौचिनामन्नस्य प्रेतश्राद्धान्नस्य वा भोजने कृते, विप्रानिर्म्माल्या-भवन्ति। शूद्रेषु प्रयुक्तामन्त्रानिर्म्माल्याभवन्ति। चितायां ये अग्नयः ते निर्म्माल्याभवन्ति॥

पिण्डार्थं ये स्तृतादर्भास्तर्पणन्तु कृतन्तु यैः।
धृतैः कृते च विण्मुत्रे त्यागस्तेषां विधीयते॥८७॥

ये दर्भाः पिण्डनिर्व्वपणार्थं स्तृताः, यैश्च दर्भैः,—"यैः, कृतं पितृतर्पणम्" —इति स्मरणात्—पितृतर्पणं कृतम्, धृतैर्दर्भैः—(इत्थम्भावे तृतीया) —विण्मुत्रे कृते च, तेषां दर्भाणां परित्यागः क्रियते॥

अवसिता प्रासङ्गिकी कथा। प्रकृतामिदानीमनुवर्त्तामहे,—

उरसि पितरोभुङ्क्ते वामपार्श्वे पितामहाः।
प्रपितामहादक्षिणतः पृष्ठतः पिण्डतक्षुकाः॥८८॥

श्राद्धे एकस्य ब्राह्मणस्य भोजने, तस्योरसि हृदये—अग्रतइत्येतत्। पितरोभुञ्जते। परतोप्येवं वर्णनीयम्। 'पिण्डतक्षुकाः पिण्डलेपभुज श्चतुर्थाद्याः पितरः',—इति दीक्षितभाष्यम्। तइमे पृष्ठतोभुञ्जते॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथाऽनृते।
पतितानाञ्च संभाषे दक्षिणं श्रवणं स्पृशेत्॥ ८९॥

क्षुते कृते। निष्ठीवने श्लेष्मादिनिरसने कृते। दन्तोच्छिष्टे—दन्तलग्नोच्छिष्टे, जिह्वाभिमर्षणयोग्ये निगीर्णे वा,—इत्यभिप्रेतम्। कथं ज्ञायते?। "दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिमर्षणात्, प्राक् च्युतेरित्येके। च्युतेरास्रावतद्विद्यान्निगिरन्नेव तत् शुचि:"—इति स्मरणात्। तथा अनृते मिथ्यावचने कथिते, पतितानां सम्भाषे च, दक्षिणं कर्णं स्पृशेत्। स खल्वयं कर्म्मकाले विधिरित्यवगच्छामः। "सुप्त्वा भुक्त्वा क्षुत्वा स्नात्वा पीत्वा विपरिधाय च, रथ्यामाक्रम्य श्मशानञ्चाचान्तः पुनराचामेत्"—इति गोभिलसूत्रमपि कर्म्मकालादन्यत्र,—इति च प्रतिपद्यामहे। किं कारणम्?। परस्परविरोधो न भविष्यति,—इति। तथाच स्मरणम्।

"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने।
कर्म्मस्थएषु नाचामेत् दक्षिणं श्रवणं स्पृशेत्"।

इति॥

दक्षिणकर्णस्पर्शे हेतुविवक्षया इदमाह,—

मरुतः सोमइन्द्राग्नी मित्रावरुणौ तथैव च।
एते सर्व्वे च विप्रस्य श्रोत्रे तिष्ठन्ति दक्षिणे॥ ९०॥

एतस्मात् कारणात् दक्षिणश्रवणं स्पर्ष्टव्यम्। मरुतोवायवः अमरा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा। सोमादीनां पृथगुपन्यासोविशेषविवक्षया भविष्यति। मित्रावरुणौ,—इति देवताद्वन्द्वे दीर्घः॥

आत्मतन्त्रेषु यन्नोक्तं तत् कुर्य्यात् पारतन्त्रिकम्।
विशेषाः खलु सामान्याये चोक्ता वेदवादिभिः॥९१॥

तन्त्रं शास्त्रमित्यनर्थान्तरम्। आत्मनस्तन्त्रेषु यन्नोक्तं, तत् परतन्त्रोक्तं कुर्य्यात्। ये च सामान्याः सर्व्वशाखिसाधारणाः, विशेषाः,—

"नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्"।

इति।

"सन्तोषं परमास्थाय सुखार्थी संयतोभवेत्"।

इति चैवमादाय, वेदवादिभिर्मन्वादिभिरुक्ताः, ते च कर्त्तव्याः। एवं वा—

ये च साधारणविशेषाः—आचमनादयः, मन्वादिभिरुक्तास्तेच कर्त्तव्याः। तदिदं श्रौताभिप्रायं वचनम्। कथं ज्ञायते?।

"स्मार्त्तं साधारणं तेषु ग्राह्यं श्रौतेषु कर्म्मसु"।

इति गृह्यपरिशिष्टान्तरदर्शनात्। एवं वा—

ये च सामान्याः साधारणाः—परिभाषारूपाः इत्येतत्। विशेषाः—"उच्चैर्ऋचा क्रियते उच्चैः साम्ना उपांशु यजुषा"—इत्येवमादयः, वेदवादिभिरुक्ताः, ते च कर्त्तव्याः। वेदं वदितुं शीलं येषां तदिमे वेदवादिनो वेदप्रवक्तारः कठादयो भण्यन्ते। न खलु तत्र भवन्तो मन्वादयो वेदवादिनः, स्मर्त्तारोहि ते वेदार्थस्य।

एवं वा—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सामान्याः—समानकर्म्माश्रयाः ये विशेषाः वेदवादिभिरुक्ताः, ते च करणीयाः। तदनेन,—शाखान्तरीयगुणानामपि शाखान्तरे उपसंहारः कर्त्तव्यः—इत्युक्तं भवति। तथाच गृह्यपरिशिष्टान्तरम्।

"श्रौतेषु सर्व्वशाखोक्तं सर्व्वस्यैव यथोचितम्"।

इति। सेयं शाखान्तराधिकरणन्यायमूला स्मृतिरिति द्रष्टव्यम्। किं भवति तर्हि प्रयोजनं पूर्व्वार्द्धस्य? ननु परार्द्धेनैव गुणोपसंहार उपदिष्टः। उच्यते। यदात्मतन्त्रे उपदिष्टं तत्र परतन्त्रोक्तगुणोपसंहारः परार्द्धस्यार्थः। यत् पुनर्नोपदिष्टमेवात्मनस्तन्त्रे, तदपि परतन्त्रोक्तं करणीयमिति प्रयोजनं पूर्व्वार्द्धस्य। यथा खल्वग्निहोत्रमस्मच्छाखायां नोपदिष्टं, तदपि याजुर्व्वैदिकमनुष्ठीयतेऽस्माभिः। तदेतत् परिशिष्टकृतः कात्यायनस्य वचनसंवादेनावधार्य्यते। तच्चोदाहरिष्यामः॥

ऊनोवाऽप्यतिरिक्तोवा यः स्वशास्त्रोक्तमाचरेत्।
तेन सन्तनुयात् यज्ञं न कुर्य्यात् पारतन्त्रिकम्॥ ९२॥

स्वशास्त्रे न्यूनोवा अधिको वा योविधिरुक्तः; तं स्वशास्त्रोक्तं विधिमाचरेत्। तेनैव यज्ञं विस्तारयेत्। परतन्त्रोक्तं न कुर्य्यात्॥

यः स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत्।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति॥ ९३॥

यः पुनः स्वशाखोक्तं त्यक्त्वा परशाखोक्तमाचरति, स खल्वयमृषिं स्वशाखाचार्य्यमप्रमाणं करोति। स खल्वृषिमप्रमाणं कृत्वा अन्धे तमसि—नरके पतति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदमिदानीं सन्दिह्यते। एवन्तावत्—‘आत्मतन्त्रेषु यन्नोक्तम्’—इत्यनेन पारतन्त्रिकमपि कर्त्तव्यतयोपदिष्टम्, ‘ऊनोवाप्यतिरिक्तोवा’—इत्यनेन ‘यः स्वशाखोक्तमुत्सृज्य’—इत्यनेन च पुनरेतन्निषिद्धम्, किं पुनरत्र तत्त्वम्?। उभयं तत्त्वमित्याह। कुतः?। उभयोरेवोपदेशात्। विरुद्धं तर्हि?। न। विषयभेदात्। कथम्?। उच्यते। ‘आत्मतन्त्रेषु यन्नोक्तम्’—इति तावत् श्रौताभिप्रायम्। ‘ऊनोवा’—इत्यादिकन्तु गृह्यशास्त्राभिप्रायकम्; इति विषयभेदादुभयं तत्त्वमिति निश्चीयते। कथं पुनर्ज्ञायते;—गृह्यशास्त्राभिप्रायेणोत्तरः पक्षः—इति?। पारिशेष्यादिति ब्रूमः। श्रौताभिप्रायेण पूर्व्वः पक्ष इति खल्ववोचाम। तस्मादुत्तरः पक्षः पारिशेष्याद्गृह्यशास्त्राभिप्रायेण भविष्यति।

इतश्चैतदेवं भविष्यति,—अप्रमाणमृषिं कृत्वेत्यभिधानात्। नो खल्वपि श्रौतेषु पारशाखिकमाचरन् ऋषिमप्रमाणं करोति। न खल्वृषिः कर्त्ता वेदस्य। नित्योहि वेदराशिर्मीमांसकानाम्, अपौरुषेयश्चान्येषाम्। ‘प्रवक्तेतिचेत्,—इति चेद्भवान् पश्यति; माभूत् कर्त्ता ऋषिर्वेदस्य, प्रवक्ता तु भवति’। ‘भवतु, किमतो भवति?’। ‘एतदतो भवति,—यद्येवं, श्रौतेष्वपि पारशाखिकमाचरन् प्रवक्तारमृषिमप्रमाणं करोति’। ‘नैतत् साधु मन्यामहे। पूर्व्वसिद्धां हि वाचमृषिः प्रोवाच। पारशाखिकञ्चाचरन् तामेव वाचमप्रमाणं करोति, न ऋषिम्। न वा, नित्यनिर्दोषस्य पूर्व्वसिद्धस्य वेदस्य अप्रामाण्यमनुपन्यस्य परसिद्धस्य प्रवक्तुर्ऋषेरप्रामाण्यं युक्तमुपन्यसितुम्। तदधीनसिद्धत्वात्तस्य। गृह्यशास्त्राभिप्रायत्वे तु वाक्यस्यैतत् स्यात्। वेदार्थ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनुस्मरन् खल्वृषिः प्रयोगशास्त्रं रचयाञ्चकार। तच्चातिक्रामन् नून-मृषिमप्रमाणं करोति। तदनुमितां श्रुतिमपि,—ऋषिमप्रमाणं कुर्व्वन्नेव अप्रमाणं करोति'। शास्त्रान्तरदर्शनाच्चैवमवगच्छामः। तथाच गृह्यपरिशिष्टान्तरम्।

"प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः।
प्रयोगशास्त्रताहानेरनारम्भविधानतः।
वक्तव्यं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम्।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतोभवेत्।
श्रौतेषु सर्व्वशाखोक्तं सर्व्वस्यैव यथोचितम्।
स्मार्त्तं साधारणं तेषु ग्राह्यं श्रौतेषु कर्म्मसु"।

इति। 'यथोचितम्'—इति कुर्व्वन्नविरोधिनएव परोक्तस्य करणमनुजानीते। कात्यायनोऽपि कर्म्मप्रदीपे,—

"अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्म्मकारिणाम्।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया"।

इति गृह्यशास्त्राभिप्रायेण परोक्तां क्रियां निन्दित्वा,—

"यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत्"।

इति श्रौतमेवाग्निहोत्रादिकं पारशाखिकं कर्त्तव्यमुपदिशति। तदेवमादिभिर्व्वचनैरवगच्छामः,—श्रौतेषु पारशाखिकं करणीयं न गृह्योक्तेषु,—इति।

आह। 'यदि प्रयोगशास्त्रं गृह्यादि परैर्न समुच्चीयते, परं तर्हि सामान्यं विधानमनर्थकं भवति'। 'यदि भवत्यनर्थकं, किमिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वयमुपालभ्येमहि'। 'न युष्मानुपालभामहे,—किन्तु, माभूदनर्थकमिति तदपि समुच्चिनुमः,—इति ब्रूमहे'। 'निरङ्कुशत्वात्ते तुण्डस्यैवं ब्रवीषि, न तु प्रमाणोपेतं ब्रवीषि। प्रयोगशास्त्रविरोधाद्धि नायं समुच्चयः सेद्धुमर्हति। योहि सामान्यस्यविधानस्यानर्थकत्वं परिजिहीर्षुस्तदपि समुच्चिनोति, स खल्वयं स्वशास्त्राचार्य्यमृषिं प्रमाणं सन्तमप्रमाणं करोति। क्रममपि प्रयोगशास्त्रीयं विरुणद्धि। उत्सृजति च स्वशाखाश्रयं विधानम्। सेयं पितरमुपेक्ष्य श्वशुरे गाढ़ा भक्तिः। कात्यायनोऽपि,—

"स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः।
कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम्"।

इत्यनेन एनं निन्दति। योहि ऋषिभिर्निन्द्यते, स कथं श्रद्धेयस्तत्र भवतां शिष्टानाम्'। 'अथ यथोभयमपि न विरोत्स्यते, तथा करिष्यामः'। 'नैवं शक्यम्'। 'कस्मात्?'। 'असम्भवात्। स्वशाखाश्रयस्य खल्वन्तराऽन्तरा किमपि किमपि सामान्यं विधानं निवेशयन् सामान्यमपि विधानमाकुलयति, स्वशाखाश्रयमपि। सोयं समुच्चयो न प्रयोगशास्त्रं नापि सामान्यं विधानमुपकरोति, क्रममन्यथयन् प्रधानमपि विगुणयति। तथाच, वृद्धिमिष्टवतो मूलमपि नष्टम्'। 'अथ, क्रमः पदार्थानामुपकारे वर्त्तते। पदार्थप्राप्तेरुत्तरकालं हि क्रम आपतति। यदा च पदार्थः प्राप्नोति, तदा क्रमएव नास्ति। न खलु पश्चिमसिद्धेन क्रमेण विरोधात् पूर्व्वसिद्धः पदार्थएव न कर्त्तव्योभवति। तस्मात्, न्यायविरोधस्तत्पक्षे दोषः'। 'भवेदेतदेवम्,—यदि वचनमत्रार्थे प्रमाणं न स्यात्। अस्ति च वचनम्—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रयोगशास्त्रम्—इत्यादि। किमिवहि वचनं न कुर्य्यात्। नहि वचनस्य कश्चिदतिभारोनाम। भवदीयेऽपि पक्षे न्यायान्तरविरोधो जागर्त्ति। न च पदार्थोऽपि पूर्व्वसिद्धः। सिसाधयिषितः खल्वेष भवता। विषमश्चायमुपन्यासः। सर्व्वपदार्थानां शेषभूताः खल्वाचमनादयः प्राबल्यादनुष्ठीयन्ते, न सर्व्वे। नचात्रानुतिष्ठासितानां शेषत्वं प्रामाणिकम्।

भिन्नानि चेमानि कर्म्माणि प्रयोगशास्त्रीयाणि सामान्यानि च नाम साम्येऽपि, यथासम्भवं रूपभेदादिभ्योहेतुभ्यः। संयोगचोदनाभेदमप्येतेषु बहुलमुपलभामहे। तत्रैवंसति कुत्र कस्य गुणानुपसंहरसि। कर्म्मभेदे गुणोपसंहारन्यायस्याविषयात्। आह्वोसि चेत्, प्रयोगशास्त्रीयं विधानमनुष्ठाय यथासम्भवं सामान्यमपि विधानं कामं पृथगेवानुतिष्ठ। किमित्युभयमपि विधानमन्यथयित्वा नरसिंहाकारमभिनवं विधानान्तरं स्वरुच्यैव निर्म्मिणोषि। यथा खल्वेकस्माद्वाक्यादाख्यातपदमन्यस्माच्च नामपदं गृहीत्वा योवाक्यार्थः सम्पद्यते पुरुषकल्पनामूलः, तादृशोह्ययं परिचिकल्पयिषितः प्रयोगोभवति। स खल्वनपेक्षणीयस्तत्रभवताम्। तथाचोक्तम्। "धर्म्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्"—इति। अतएव स्वशाखाश्रययोर्वैश्वदेवबलिकर्म्मणोरन्ते सामान्ययोरपि तयोः काममनुष्ठानं कात्यायनः स्मरति कर्म्मप्रदीपे,—

"न स्यातां काम्यसामान्यजुहोतिबलिकर्म्मणी।
पूर्व्वं नित्यविशेषोक्तजुहोतिबलिकर्म्मणोः।
काममन्ते भवेयातां न तु मध्ये कदाचन।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैकस्मिन् कर्म्मणि तते कर्म्मान्यत्तायते यतः" ।

इति । यदि समुच्चयं कात्यायनोऽभिप्रैष्यत्, नूनमवदिष्यत् । अवदनाच्चावगच्छामः,—नैष समुच्चयः कात्यायनस्याभिप्रेतः,—इति । तस्मादियमेवावधारणा,—श्रौतेषु पारशाखिकं सामान्यञ्च विधानं कर्त्तव्यम्, गृह्योक्तेषु तु पारशाखिकं न कर्त्तव्यमेव, सामान्यञ्च विधानं गृह्योक्तविधानानुष्ठानादनन्तरमिच्छया प्रयोगान्तररूपेण करणीयम्,—इति । तदेवं सति "प्रयोगशास्त्रम्"—इत्यादीनि वचनान्यनुगृहीतानि भवन्ति नान्यथा । श्रौतेषु च तासु तासु शाखासु तत्तत्शाखिनामेवर्त्विजां कर्म्मोपदिष्टं न सर्व्वेषाम्, सर्व्वशाखिभिश्च-र्त्विग्भिः प्रायोयज्ञोनिर्व्वहति, न तावन्मात्रैः,—इति विशेषोऽप्यस्ति । अन्येपि विशेषाः शाखान्तराधिकरणे शारीरके च द्रष्टव्याः' ।

रघुनन्दनस्त्वेतदबुद्धा वचनञ्चाजानानः,—'सर्व्वत्रैवाविशेषेणाकाङ्क्षितं पारशाखिकं करणीयं न अनाकाङ्क्षितम्'—इति स्वरुच्यैव कल्पयाञ्चकार । तदश्रद्धेयम्। आकाङ्क्षाऽपि तदभिप्रेता न प्रामाणिकी। यत्र हि यावती इतिकर्त्तव्यता निर्दिष्टा, तत्र ततएव आकाङ्क्षा निवर्त्तते—विशेषहेतुं विना,—इति हि तान्त्रिकानां निर्णयः । अवश्यञ्च तेनाप्येतद्वक्तव्यम् । अन्यथा पारशाखिकगुणोपसंहारेप्याकाङ्क्षा न निवर्त्तेत। इत्यस्तु किं विस्तरेण ॥

पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितम् ।
गौभिले ये न गृह्णन्ति न ते ज्ञास्यन्ति गौभिलम् ॥
॥ ९४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरुक्तम्—उक्तस्य पुनःकथनम्। अतिक्रान्तम्—अतिक्रम्य संबन्धः व्यवहितयोजना इति यावत्। यच्च सिंहावलोकितम्—सिंहावलोकितन्यायेन पराचीनस्य पूर्व्वेणान्वयः। ये खल्वेतत् त्रयं गोभिले—गोभिलगृह्यशास्त्रे न गृह्णन्ति, ते गोभिलगृह्यशास्त्रं तत्त्वतो न जानन्ति। उदाहरणममीषां गृह्यसूत्रादस्मत्कृततद्भाष्याच्चोपलब्धव्यम्। विस्तरभयान्नेह प्रस्तूयते ॥

एतच्छास्त्राध्ययनफलमाह,—

गोभिलाचार्य्यपुत्रस्य योऽधीते संग्रहं पुमान्।
सर्व्वकर्म्मस्वसंमूढः परां सिद्धिमवाप्नुयात्॥ ९५ ॥

गोभिलाचार्य्यपुत्रस्य संग्रहमिमं गृह्यासंग्रहाख्यं यः पुमानधीते, स खल्वयं सर्व्वकर्म्मसु गृह्योक्तेषु असंमूढः मोहरहितः परामुत्कृष्टां सिद्धिं प्राप्नोति ॥

अत्रैव शिवम् ॥

श्लोकाः—९५

आदितः श्लोकाः—२०८ ॥

कैकयेषु वसता द्विजन्मना
तन्त्रजालमवलोक्य निर्म्मितम्।
जीरन्ध्रमणिचन्द्रसम्मिते
वत्सरे वृषगते रवाविदम्॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्गस्थितिप्रत्यवहारहेतौ
अलोकसामान्यनयप्रवृत्तौ ।
दोषाकरेणादरमादधाने
समर्पितं भाष्यमिदं स्मरारौ ॥ २ ॥

सत्यपि दोषकलापे गुणलेशनिबद्धपक्षपातानाम् ।
जनयतु विदुषां तोषं कृतिरेषा चन्द्रकान्तस्य ॥ ३ ॥

यद्यपि भवति कृतीनामुपहास्यमिदं गुणेन हीनत्वात् ।
परिशीलयन्तु शिष्यास्तथापि गुरुगौरवार्द्रमनसो मे ॥ ४ ॥

अन्ध इव स्फुटदोषे गुणेषु विरलेषु वैनतेय इव ।
जयति जगत्यां लोकः कतिपय इह नौमि तं भक्त्या ॥ ५ ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गृह्यासंग्रहभाष्ये द्वितीयः प्रपाठकः समाप्तः ॥ समाप्तश्चायं गृह्यासंग्रहः ॥

शुभमस्तु ॥ श्रीरस्तु ॥

For Private and Personal Use Only

श्राद्धकल्पः ।

गोभिलप्रणीतः ।

तत्र

प्रथमा कण्डिका ।

वातोयस्य चिराय चामरधरोवेदादयोवन्दिनः
सूर्य्याचन्द्रमसौ प्रदीपसदृशौ स्वस्मिन् महिम्नि स्थितिः ।
सर्गोरक्षणमप्ययस्य जगतां कृत्यं गुणामन्त्रिणो-
भृत्यास्ते ऋतवोविचित्रविभवाः कस्मैचिदस्मै नमः ॥
उदयतु मानसगगने पित्रोः पद-नख-सुधाकर-श्रेणी ।
अन्तर्गतमपि भूयोया तमसां राशिमुपहन्ति ॥
विलोक्य पारमर्षाणि तन्त्राण्यालोच्य संग्रहान् ।
छन्दोगश्राद्धकल्पस्य भाष्यमाभाष्यतेऽधुना ॥

तत्रभवान् सूत्रकारोग्टह्यसूत्रोद्दिष्टस्यान्वाहार्य्यस्यान्येषाञ्च श्राद्धानां प्रयोगं प्रतिपिपादयिषुः श्राद्धकल्पाख्यमिदं शास्त्रं रचयाञ्चकार । छन्दोगश्राद्धप्रयोगजिज्ञासूनां सुखावगतये तस्येयमल्पग्रन्था वृत्तिरारभ्यते । व्याचिख्यासितस्य श्राद्धकल्पशास्त्रस्येदमादिमं सूत्रम्—

अथ श्राद्धम् ॥ १ ॥

वर्त्तिष्यते,—इति सूत्रशेषः । तत्रायमथशब्दआनन्तर्य्यार्थः । सम्बन्धकरणार्थश्च । उच्चार्य्यमाणश्च मङ्गलप्रयोजनोभवति । आनन्तर्य्यार्थत्वात्,—"अमावस्यायां तत् श्राद्धम्" "इतरदन्वाहार्य्यम्"—इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रयता भगवता गृह्यकारेणाग्निमतामन्वाहार्य्यं नाम श्राद्धं विहितम्। न च तस्येतिकर्त्तव्यता काचिदभिहिता। भवितव्यन्तु तया। अनग्निमतामपि श्राद्धं सपरिकरं वक्तव्यम्। अतो गृह्यशास्त्राध्ययनानन्तरं श्राद्ध-प्रयोग-प्रतिपित्सया श्राद्धकल्पाख्यमिदं शास्त्रमध्येतव्यमित्ययमर्थः। आवसथ्याधानादीनि कर्म्माणि गृह्यकारेणोक्तानि। श्राद्धन्तु न तथोक्तम्। तदिदानीमस्माभिर्वक्तव्यमित्यभिप्रायः।

सम्बन्धकरणस्य च प्रयोजनम्;—गृह्योक्ताः परिभाषाः कथमत्रापि प्राप्नुयुः—इति। कथं च न प्राप्नुयुः? । शास्त्रान्तरत्वादस्य, गृह्यकर्म्मविषयत्वाच्च परिभाषाणाम्। शास्त्रान्तरं खल्वेतत् श्राद्धकल्पाख्यं गृह्यशास्त्रात्। परिभाषाश्च गृह्यकर्म्मविषयाभवन्ति,—इति गृह्यभाष्येऽवोचाम। अथापि स्यात्,—अन्वाहार्य्यस्य गृह्योक्तत्वात् तत्र गृह्योक्ताः परिभाषाः प्राप्नुयुः?—इति। अत्रोच्यते। सत्यं प्राप्नुयुरग्निमतामेव। तेषामेव श्राद्धस्यान्वाहार्य्यपदाभिधेयत्वात्। अनग्निमतामपि श्राद्धे कथं नु ताः प्राप्नुयुरिति खल्वसौ सम्बन्धः क्रियते। उच्यते। अनग्निमतामपि प्राप्नुयुः,—इति पश्यामः। किं कारणम्?। यदयं पिण्डपितृयज्ञधर्म्मानत्र प्रदेक्ष्यति। एवन्तर्हि सम्बन्धकरणात् कौथुमादिविषयत्वमस्यावगम्यते। तस्मात्,—गोभिलगृह्योक्तस्यैव पिण्डपितृयज्ञस्य धर्म्मात्र प्रदिश्यन्ते। अन्यथा न ज्ञायते,—कस्य पिण्डपितृयज्ञस्य धर्म्माः प्रदिश्यन्ते,—इति।

श्राद्धम्,—इति कर्म्मणोनामधेयम्। तथाचापस्तम्बसूत्रम्। "अथैतन्मनुः श्राद्धशब्दं कर्म्म प्रोवाच"—इति। तदिदम्—"तस्येदम्"—इति वा, "तेन कृतम्"—इति वा, "चूड़ादिभ्य उपसंख्यानम्"—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति वा भवति। सेयं यथाकथञ्चिद्व्युत्पत्तिः। प्रसिद्धिस्तु वक्ष्यमाण-लक्षणे कर्मणि द्रष्टव्या। यच्च रघुनन्दनेन,—

"संस्कृतं व्यञ्जनाद्यान्नं पयोदधि घृतं मधु।
श्रद्धया दीयते यस्मात् तेन श्राद्धं निगद्यते"।

इति पुलस्त्यवचनं श्राद्धशब्दस्य कर्मनामधेयतायां प्रमाणम्—इति, तद्वचनबलेनैव,—श्रद्धयाऽन्नादेर्यद्दानं तत् श्राद्धम्—इति चाभिहितम्। तदसङ्गतम्। दानार्थे तद्धितस्याननुशासनात्। अपिच। दीयते,—इति कर्मणि तिङः श्रवणादन्नं खल्वत्र विशिष्यते। तेन, दीयमानस्यान्नादेरेव श्राद्धत्वमुच्यते, न कर्मणः। दृश्यते खल्वन्यत्राप्यन्नस्य श्राद्धव्यपदेशः,—"अदैवं भोजयेत् श्राद्धम्"—इति, "श्राद्धभुक् चाष्ट वर्जयेत्"—इति, "श्राद्धभोक्ता च कर्त्ता च"—इति, "अशक्तौ श्राद्धभोजने"—इति चैवमादौ बहुलम्। तदिदं पुलस्त्यवचनं न श्राद्धशब्दस्य कर्मनामधेयतायां नवोक्तार्थतायां प्रमाणमित्यफलमेव प्रलपितम्। न खल्वन्नादेर्दानमेव श्राद्धं। किन्तु यत्रैतत् श्रद्धया दीयते, तदेव कर्म श्राद्धशब्दाभिधेयं भवपि। कथं ज्ञायते?।

"प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत् प्रियमात्मनः।
श्रद्धया दीयते यत्र तत्श्राद्धं परिकीर्त्तितम्"॥

इति पृथ्वीचन्द्रोदयादिधृतमरीचिवचनात्। इत्यास्तां विस्तरः॥१॥०॥

अमावस्यायां पितृभ्योदद्यात्॥२॥

ऋजुरक्षरार्थः। अमावस्यायाम्,—इति सप्तमीनिर्देशात् निमित्तत्वमस्याअवगच्छामः। स्मरन्ति च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"न निर्व्वपति यः पिण्डं प्रमीतपितृकोनरः।
इन्दुक्षये मासि मासि प्रायश्चित्तीयते तु सः"।

इति। न च, कृष्णपक्षनिमित्तकएव श्राद्धे प्रशस्तकालोऽमावस्येत्यभिप्रायेणेदं वचनम्—इति भ्रमितव्यम्। प्रशस्तकालस्यातिक्रमे प्रायश्चित्ताभ्यनुज्ञानानुपपत्तेः। नचात्र कृष्णपक्षस्य नामापि श्रूयते। तथा याज्ञवल्क्यः।

"अमावस्याऽष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्"।

इति कृष्णपक्षाद्भेदेनैवामावस्यां स्मरति। तथा मत्स्यपुराणे,—

"अमावस्याष्टकाकृष्णपक्षपञ्चदशीषु च"।

इत्यादीन्यभिधाय,—

"एतच्चानुपनीतोऽपि कुर्य्यात् सर्व्वेषु पर्व्वसु।
श्राद्धं-साधारणं नाम सर्व्वकामफलप्रदम्।
भार्य्याविरहितोऽप्येतत् प्रवासस्थोऽपि नित्यशः।
शूद्रोऽप्यमन्त्रवत् कुर्य्यादनेन विधिना बुधः"।

इत्यमावस्यायां कृष्णपक्षे च पृथक् पृथक् श्राद्धमभिहितम्। तदिदं साधारणं नाम श्राद्धम्,—इत्यनग्निमतामप्यमावस्यायां कृष्णपक्षे च करणीयं भवति। अन्यथा साधारणत्वमस्य पीड्येत। अपि च मात्स्ये तावत् पुराणे, पूर्व्वस्मिन्नध्याये,—

"पितृयज्ञन्तु निर्व्वर्त्त्य तर्पणाख्यं द्विजोऽग्निमान्"।

इत्यादिना,—

"तत्रानेन विधानेन देयमग्निमता सदा"।

इत्यन्तेन ग्रन्थेनाग्निमतां श्राद्धमभिधाय,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अतः परं प्रवक्ष्यामि विष्णुना यदुदीरितम्।
श्राद्धं साधारणं नाम भुक्तिमुक्तिफलप्रदम्"।

इत्यादिना, "एतच्चानुपनीतोऽपि"—इत्याद्यन्तेन ग्रन्थेन अग्निमतामनग्निमताञ्च साधारणं श्राद्धं परस्मिन्नध्याये समुपदिष्टम्। अतएव, 'अग्निमत्श्राद्धम्'—इति, 'साधारणाभ्युदयकीर्त्तनम्'—इति चैतावध्यायावाचक्षते। तात्पर्य्यभेदकल्पनारसिकोरघुनन्दनस्त्वेतदजानानः कण्ठोक्तमपि साधारणत्वञ्चान्यथयन्,—'अमावस्यायां यन्नित्यत्वाभिधानं तत्साग्निपरं कृष्णपक्षस्य यन्नित्यत्वाभिधानं तत्साग्निभिन्नस्य'—इत्यतत्त्वमेवार्द्धजरतीयं ब्रुवन् तत्त्वप्रवक्तारञ्चात्मानं ख्यापयन् नापत्रपते। तथा मार्कण्डेयपुराणम्।

"कार्य्यं श्राद्धममावास्यां मासिमास्युडुपक्षये।
तथाऽष्टकास्वप्यवश्यमिच्छाकालं निबोध मे"।

इति। उडुपक्षयोऽमावस्या। सोऽयं निमित्तकालयोरभेदोनित्यतामस्य सूचयति। एतदपि तत्रैव सुव्यक्तमुक्तम्।

"दर्शस्तत्र निमित्तं वै कालश्चन्द्रक्षयात्मकः।
नित्यतां नियतः कालस्तस्याः संसूचयत्यथ"।

इति। चन्द्रक्षयात्मकः कालोऽपि दर्शएव। अतएव, यदेव निमित्तं सएव कालः—इति निमित्तनियतः कालस्तस्य नित्यतां सूचयति,—इत्याह। अपरे पुनरेतदविद्वांसोव्याचक्षते,—"मासि मासि कार्य्यं यत् श्राद्धं तत् चन्द्रक्षयेऽमावस्यां प्राप्यातिप्रशस्तम्। चन्द्रक्षयाभावेऽपि वर्द्धमानायां श्राद्धविधानेन अमावस्याऽभावेऽपि चतुर्दश्यन्तयामे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धविधानेन च विशिष्टविधित्वानुपपत्तेः"—इति। तदिदमनार्षं कपोलकल्पितमित्युपेक्षणीयम्।

तस्मात्,—नेदं कृष्णपक्षनिमित्तश्राद्धस्य प्रशस्तकालाभिप्रायं सूत्रं वर्णनीयम्। असंशब्दितत्वात्। प्रमाणाभावाच्च। इत्यास्थेयम्।

पितृभ्यः,—इति चतुर्थ्या पितॄणामत्र देवतात्वम्। तथाचापस्तम्बसूत्रम्। "तत्र पितरो देवताः"—इति। देवतात्वन्तु देशनादेशितचतुर्थ्यन्तपदनिर्देश्यत्वं वेदमेयत्यागोद्देश्यत्वं वा,—इत्यन्यदेतत्। तस्मात्,—यागोऽयम्। "यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्" —इति जैमिनिसूत्रात्। ददातिप्रयोगस्तु गौणः। उद्देश्यगतस्वामित्वजनकस्त्यागो हि दानम्। न च पित्रादीनां स्वामित्वमस्ति। ब्राह्मणस्येति चेन्नानुद्देश्यत्वात्। इति चेत् पश्यसि,—माभूत् पित्रादीनां स्वामित्वं ब्राह्मणस्य तु भविष्यति,—इति। तदपि नास्ति। कस्मात्?। अनुद्देश्यत्वाद्ब्राह्मणस्य। कथं पुनरनुद्देश्यत्वं ब्राह्मणस्य?। प्रमाणाभावात्। पितॄणामेव तथात्वोपदेशाच्च। तथा आपस्तम्बोऽपि। "ब्राह्मणास्त्वाहवनीयार्थे"—इति सूत्रयन् अनुद्देश्यत्वं स्वामित्वाभावञ्च ब्राह्मणानां दर्शयति। यथा खल्वाहवनीयोऽग्निरनुद्देश्योऽपि प्रतिपत्तिस्थानं देवतोद्देशेन त्यक्तस्य द्रव्यस्य, एवमिहापि पितर एवोद्देश्याः ब्राह्मणास्तु प्रतिपत्तिस्थानमेव परं न पुनरुद्देश्याः,—इति। त्यागोऽयं ब्राह्मणस्य स्वामित्वमुत्पादयतीत्यत्रापि न प्रमाणम्। पित्रुद्देशेन त्यक्तस्य खल्वस्वामिकतया ब्राह्मणे तस्य प्रतिपत्तौ उपादानमेव हि तस्य स्वामित्वमुत्पादयेत्, नासौ त्यागः प्रामाणाभावात्,—इति स्थिष्यते। न हि भवन्ति वक्तारः,—पितॄणां श्राद्धमितिवत् ब्राह्मणानां श्राद्ध-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिति। अपिच। "अप्सु पिण्डान् सादयेत्" "प्रणीते वाऽग्नौ" "ब्राह्मणं वा भोजयेत्" "गवे वा दद्यात्"—इत्यस्मद्गृह्यकारेण ब्राह्मणस्य भोजनमात्रोपदेशात् तस्य स्वामित्वं नोत्पद्यते,—इत्यवगच्छामः। न खलु येन ब्राह्मणं भोजयति, तत्रास्य स्वामित्वम्। तदुद्देशेन त्यागस्याभावात्। तस्य प्रतिग्रहाभावाच्च। अन्यथा यावद्भवति—परान्नमसौ भुङ्क्ते,—इति, तावद्भवति—परान्नमसौ प्रतिगृह्णाति,—इति। तथाच तत्रभवतामृषीनामुभयोस्तुल्यदोषवादोन स्यात्। न चैवं शिष्टाः प्रतियन्ति। अवादिसामान्याच्चैतदेवं प्रतिपत्तव्यम्। न खल्वप्सु पिण्डानां सादने प्रणीते वा अग्नौ, गवे वा दाने तत्र स्वामित्वमवादीनामुत्पद्यते। तस्मात्, तत्सामान्यात् ब्राह्मणस्यापि न तत्र स्वामित्वमुत्पद्यते,—इत्यास्थेयम्।

होमस्तर्ह्ययं स्यात्, प्रणीतेऽग्नौ सादनोपदेशात्। न,—इत्युच्यते। आसेचनाधिकं हि यजतिं होममाचक्षते मीमांसकाः। न खल्वत्र यजतिरासेचनाधिकः, किन्तु पश्चाद्भाविनी प्रतिपत्तिरेव निमित्तान्तरप्रणीते अग्नावुपदिश्यते,—इति नासौ होमः। यदि वा होमोऽयं भवेदपि, किन्त्वव तेन भविष्यति, दानं खल्वसौ न भवत्येव। तस्मात्,—'ब्राह्मणास्त्वाह्वनीयार्थे,—इत्यनेन स्वामित्वजनकस्त्यागोदानम्,—इति दानलक्षणमत्रास्ति,—इति सूचितम्,'—इति, 'अस्तिचोद्देश्यताऽपि ब्राह्मणस्य, तद्गतस्वामित्वाभिसन्धानेन द्रव्यत्यागात्'—इति च वदन् स्थूलहस्तः परास्तः।

पितृभ्यः,—इति च पितृपितामह प्रपितामहपरम्। कथं ज्ञायते?। पिण्डपितृयज्ञे तेषामेवोद्देश्यत्वात्। अत्रापि तस्यैव धर्मप्रदेशाच्च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मातामहादीनान्तु श्राद्धं पृथग्वचनेनोपदेच्यति। तदिदं बहुवचनम्, —"क्षौमे वसानावग्निमादधीयाताम्"—इत्यादिवदभिधानक्रियाऽपेक्षया साहित्यं बोधयति। उद्देशक्रिया हि प्रत्येकं परिसमाप्यते,—इति न तामपेक्ष्य साहित्यं सम्भवति। त्यागक्रियापेक्षयेति चेन्न नानात्वात्। इति चेत् भवान् पश्यति,—माभूत् उद्देशक्रियापेक्षया साहित्यं त्यागक्रियापेक्षया तु भविष्यति। नैष दोषः। कस्मात्?। नानात्वात् त्यागक्रियायाः। त्यागक्रिया हि प्रत्येकमेवोपदिष्टा गृह्यकारेण। तथाच गृह्यसूत्रम्। "पितुर्नाम गृहीत्वाऽसावेषते पिण्डोये चात्वामनु यांश्च त्वमनु तस्मै ते स्वधेति" "अप उपस्पृश्यैवमेवेतरयोः"—इति। यद्यपि, अन्वष्टक्यकर्म्मणेतत् सूचितम्, तथापि—"अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञो व्याख्यातः"—इति सूत्रेणान्वष्टक्यधर्म्मस्य पिण्डपितृयज्ञेऽतिदेशात्, इहापि पिण्डपितृयज्ञधर्म्मप्रदेशात् अत्रापि प्रत्येकमेव त्यागः सिध्यति। सूत्रकारोऽप्यत्रार्घ्यादौ प्रत्येकं त्यागमुपदेच्यति। पितृभ्यः,—इति चतुर्थ्या अन्यथानुपपत्त्याहि देवतात्वं पितॄणां कल्पनीयम्। तच्च बहुवचनात् सहितानां परिचिकल्पयिषितम्। साहित्यस्य च त्यागक्रियापेक्षया परिचिकल्पयिषया त्यागस्यैकत्वमानुमानिकम्। प्रत्यक्षस्तु प्रत्येकं त्यागोपदेशः। तस्मात्,—अनन्यथासिद्धप्रत्येकत्यागोपदेशबलात् न मिलितानां देवतात्वम्। शक्यं हि बहुवचनमभिधानक्रियापेक्षयापि नेतुम्। "असावेतत्ते,—इति यजमानस्य पित्रे, असावेतत्ते,—इति यजमानस्य पितामहाय, असावेतत्ते,—इति यजमानस्य प्रपितामहाय,"—इत्यपि निगमो भवति ॥०॥ २ ॥०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चमीप्रभृति वाऽपरपक्षस्य ॥ ३ ॥

'पितृभ्योदद्यात्'—इत्यनुवर्त्तते । अपरपक्षस्य कृष्णपक्षस्य । तथाच श्रूयते । "पूर्व्वः पक्षोदेवानामपरः पक्षः पितॄणाम्"—इति। "योऽपक्षीयते सोऽपरपक्षः"—इत्यपि निगमोभवति । वाशब्दो वैकल्पिकं कल्पान्तरं समुच्चिनोति । कथं नाम ? । पञ्चमीप्रभृति वा दद्यात् प्रतिपत्प्रभृति वा,—इति । तथाच गौतमः । "पञ्चमीप्रभृति वाऽपरपक्षस्य, यथाश्राद्धं सर्व्वस्मिन् वा"—इति । अथवा । वाशब्दो वक्ष्यमाणकल्पापेक्षया विकल्पार्थः ॥०॥ ३ ॥०॥

यदहरुपपद्येत ॥ ४ ॥

'वाऽपरपक्षस्य'—इत्येतदिहापि सम्बध्यते । कुतः ? । मध्यपठितस्य विशेषाभावात् । तदयमर्थः । अपरपक्षस्य यदहर्यस्मिन्नहनि उपपद्येत सम्पद्येत द्रव्यादिकम्, तदहर्व्वा पितृभ्योदद्यात्,—इति । उपपद्यते,—इति पाठेऽपि तथैवार्थः । सोऽयं विकल्पः,—पञ्चमीप्रभृति वा दद्यात्, यदहरुपपद्यते तदहर्वा दद्यात्,—इति ।

तदनेन सूत्रद्वयेन कृष्णपक्षनिमित्तमपि श्राद्धमुपदिष्टं भवति । तदिदं श्राद्धद्वयम्—अमावस्यानिमित्तं कृष्णपक्षनिमित्तञ्च,—इति । तत्र, कृष्णपक्षनिमित्तएव श्राद्धे प्रशस्तकालोऽमावस्येति तन्त्रान्तरकाराः स्मरन्ति । तथाच निगमः । "अपरपक्षे यदहः सम्पद्यते अमावस्यायान्तु विशेषेण"—इति । नचैतावता अमावस्यायाः निमित्तत्वं शक्यमपह्नोतुम् । न खल्वन्यस्य प्रशस्तकालो न भवत्यन्यस्य निमित्तमित्यत्र किञ्चित् प्रमाणमस्ति । अभिहितञ्चैतदस्माभिरधस्तादेव ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निगमवचनमात्रदर्शी रघुनन्दनस्त्वाह,—'अमावस्या न निमित्तान्तरं, किन्तु कृष्णपक्षनिमित्तश्राद्धस्य प्रशस्तकालः'—इति। तदश्रद्धेयम्। अपरपक्षे यदहः सम्पद्यते तदहः कुर्य्यात्, कृतेऽप्यपरपक्षे यस्मिन् कस्मिंश्चिदहनि, अमावस्यायान्तु विशेषेण यत्नेन कुर्य्यात्, तुशब्दात् पूर्व्वस्मादन्यदिदं श्राद्धम्—इति यदि निगमवचनस्यार्थः, तदा तदपि तन्मतमुन्मूलयति,—इत्यस्तु किं विस्तरेण ॥०॥ ४ ॥०॥

इयमपरा सूत्रद्वययोजना,—

पञ्चमीप्रभृति वाऽपरपक्षस्य ॥ ३ ॥

अपरपक्षस्य,—

"आषाढीमवधिं कृत्वा यः स्यात् पक्षस्तु पञ्चमः।
स विज्ञोऽपरः पक्षः कन्यां गच्छतु वा नवा"।

इत्यादि स्मृत्युक्तलक्षणस्य। वाशब्दः,—

"अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्य्याद्दिने दिने।
त्रिभागहीनं पक्षं वा त्रिभागन्त्वर्द्धमेव वा"।

इति ब्रह्मपुराणाद्युक्तकल्पान्तरापेक्षया विकल्पार्थः। तत्र, 'अर्द्धम्'—इति पक्षस्यार्द्धमष्टम्यादिकमर्थः। अर्द्धं पक्षम्,—इत्यन्वयोपपत्तेः। न तु त्रिभागस्यार्द्धम्। अर्द्धत्रिभागयोर्द्वयोरपि पक्षविशेषणतया समत्वेन परस्परमन्वयानुपपत्तेः। तथाच गौतमः। "अथापरपक्षे श्राद्धं पितृभ्योदद्यात् पञ्चम्यादि दर्शान्तमष्टम्यादिदशम्यादि सर्व्वस्मिंश्च"—इति। यच्च,—

"पञ्चम्या उत्तरे दद्यादुभयोर्वंशयोर्च्चणम्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति वचनम्। पञ्चमीमारभ्योत्तरतिथिषु,—इति तस्यार्थः। "पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोः"—इति हेमाद्रिप्रभृतयः पठन्ति। आश्विनकृष्णशुक्लपक्षपञ्चम्योर्मध्ये,—इति वर्णयन्ति च। सोऽयमपरपक्षश्राद्धस्य गौणकालः।

"भौजङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम्"।

इत्यपि वचनं भवति। एतेन,—

"पञ्चम्यूर्द्धञ्च तत्रापि दशम्यूर्द्धं ततोऽप्यति"।

इति विष्णुधर्म्मोत्तरवचनमपि व्याख्यातं वेदितव्यम्। पञ्चमीमारभ्यकरणेऽपि त्रिभागहीनत्वं पक्षस्य नानुपपन्नम्। प्रतिपदादितिथिचतुष्कस्य चतुर्द्दश्याश्च त्यागेन तदुपपत्तेः। स्मरन्ति च।

"श्राद्धं शस्त्रहतस्यैव चतुर्द्दश्यां महालये"।

इति। त्रिभागादिकल्पेष्वेषैव रीतिरनुसर्त्तव्या। पक्षकल्पाश्रयणे तु चतुर्द्दश्यामपि श्राद्धं कर्त्तव्यमेव भवति। पक्षव्यापकतायाः प्रकारान्तरेणानुपपत्तेः। तथाच कार्ष्णाजिनिः।

"नभस्यस्यापरे पक्षे श्राद्धं कुर्य्याद्दिने दिने।
नैव नन्दादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्द्दशी"।

इति। तथा ब्रह्माण्डपुराणम्।

"कन्यां गते सवितरि दिनानि दश पञ्च च।
पार्व्वणेन विधानेन श्राद्धं तत्र विधीयते"।

इति। तथा तत्रैव।

"कन्यां गते सवितरि यान्यहानि तु षोड़श।
क्रतुभिस्तानि तुल्यानि देवोनारायणोऽब्रवीत्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। इदञ्च षोड़शत्वमाश्विनशुक्लप्रतिपदा सह द्रष्टव्यम्। कथं ज्ञायते?।

"अहः षोड़शकं यत्तु शुक्लप्रतिपदा सह।
चन्द्रक्षयाविशेषेण साऽपि दर्शात्मिका स्मृता"।

इति देवलवचनात्। कन्यां गते सवितरि,—इति कन्यासम्बन्धस्य प्राशस्त्यमभिप्रेत्योक्तम्। तदाह शाट्यायनिः।

"कन्यास्थार्कान्वितः पक्षः सोऽत्यन्तं पुण्य उच्यते"।

इति। वृद्धमनुः।

"मध्ये वा यदि वाऽप्यन्ते यत्र कन्यां व्रजेद्रविः।
स पक्षः सकलः श्रेष्ठः श्राद्धषोड़शकं प्रति"।

इति। एवञ्च, 'कन्यां गच्छतु वा नरा'—इति समस्तपक्षाभिप्रायं वचनं भवति। ब्रह्मपुराणवचने, 'एववा'—इति निपातसमुदायो विकल्पवाची। 'एवच'—इति यथा। न तु एवशब्दो नियमार्थः, वाशब्दो विकल्पार्थः,—इति निपातद्वयम्। त्रिभागकरणे, 'अर्द्धमेव,' —इति नियमानुपपत्तेः। अतएव सकृत्करणमप्याह नागरखण्डम्।

"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे।

इति। एकस्मिन्नपि,—इत्यपिकारादनुकल्पोयम्। न चैतत् कन्यास्थरवि निमित्तश्राद्धपरं वचनम्। एकस्मिन्नपि,—इत्यपिकारलभ्यस्यानेकत्र-करणस्य तत्राभावात्। सकृद्धि तत्करणमिष्यते। तथाच गर्गः।

"पक्षश्राद्धं यदा कुर्य्यात्तर्पणन्तु दिने दिने।
सकृन्महालये चैवं परेऽहनि तिलोदकम्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति । तथा नारदः ।

"सङ्क्रान्महालये काम्ये पुनः श्राद्धेऽखिलेषु च ।
अतीतविषये चैव सर्व्वमेतत् विचिन्तयेत्" ।

इति सङ्क्रान्महालयं दर्शयति । एतत्,—इति नन्दादिवर्जनम् । तथा कात्यायनः ।

"अशक्तः पक्षमध्ये तु करोत्येकदिने यदा ।
निषिद्धेऽपि दिने कुर्य्यात् पिण्डदानं यथाविधि" ।

इत्येकदिनेऽपि करणं सुस्पष्टमुपदिशति । तदत्र अपरपक्षश्राद्धे बहु-वक्तव्यमस्ति । ग्रन्थगौरवभयादुपारम्यतेऽस्माभिः ।

अथैवमपरपक्षस्य पारिभाषिकत्वे कृष्णपक्षमात्रं श्राद्धकालो न सूचितं भवति ? । माभूदनेन ग्रन्थेन, सूचयिष्यते तु ॥०॥ ३ ॥०॥

यदहरुपपद्येत ॥ ४ ॥

यदहर्द्रव्यदेशपात्रमुपपद्येत, तदहः पितृभ्यो दद्यात् । तथाच गौतम-सूत्रम् । "द्रव्यदेशब्राह्मणसन्निधौ वा"—इति । द्रव्यसम्पत्तिरत्र नव-शस्यादिप्राप्तिरूपा । स्मरन्ति च ।

"यष्टव्याः पितरोराजन्! नवशस्यफलोदकैः ।
पार्व्वणेन विधानेन खड्गमांसे तथाऽऽगते" ।

इति । नवशस्यमपि ब्रीहियवरूपं द्रष्टव्यम् । कुतः ? । नवयज्ञे तथा दर्शनात् । तथाच छन्दोगपरिशिष्टम् ।

"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाकोवनिनः स्मृतः" ।

इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव!।
न तावाद्यौ महाराज! विना श्राद्धं कथञ्चन"।

इति च स्मर्य्यते पुराणेषु। तदनेन नवशस्यादिप्राप्तिः श्राद्धनिमित्तमित्युक्तं भवति। नवान्नेन कर्म्मानुष्ठानं निमित्तम्,—इत्यसङ्गतैषा कल्पना। प्रमाणाभावात्।

"नक्षत्रग्रहपीड़ासु दुष्टस्वप्नावलोकने।
इच्छाश्राद्धानि कुर्व्वीत नवशस्यागमे तथा"।

इति पुराणवाक्येऽप्यागमस्य प्राप्तिरूपत्वात्।

"वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः"।

इति कालान्तरन्त्वन्येषां मन्तव्यम्। कस्मात्?। 'धान्यपाकवशादन्ये' —इति नवयज्ञे तथा दर्शनात्। अन्ये खल्वाचार्य्याः धान्यान्तरपाकवशादपि नवयज्ञमिच्छन्ति। शालयः किल वृश्चिके पच्यन्ते। रघुनन्दनस्तु नवशस्येष्टिदृष्टपरिकल्पनां श्राद्धेऽभ्युपगच्छन्नप्याह। 'वृश्चिकशुक्लपक्षो न कालान्तरं किन्त्वतिपतितव्रीहिश्राद्धस्य गौणकालमध्ये तस्य प्राशस्त्यमात्रम्'—इति। देशसम्पत्तिस्तीर्थप्राप्तिरूपा। कथं ज्ञायते?।

"गत्वैव तीर्थं कर्त्तव्यं श्राद्धं तत्प्राप्तिहेतुकम्।
पूर्व्वाह्नेऽप्यथवा प्रातर्देशे स्यात् पूर्व्वदक्षिणे"।

इत्यादिवचनेभ्यः। पात्रसम्पत्तिः श्रोत्रियब्राह्मणप्राप्तिरूपा। कुतः?।

"तस्मात् दद्यात् सदोद्युक्तोविद्वत्सु ब्राह्मणेषु च"।

इत्यादि स्मरणात्। तदेतासु द्रव्यदेशपात्रोपपत्तिषु यत् श्राद्धं, न तत्र कृष्णपक्षाद्यपेक्षा अवश्यं कर्त्तव्या। कथं ज्ञायते?। यदहरमीषामुपपत्तिस्तदहः श्राद्धविधानेन तदसम्भवात्। स्मरन्ति च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"तीर्थद्रव्योपपत्तौ च न कालमवधारयेत् ।
पात्रञ्च ब्राह्मणं प्राप्य सद्यः श्राद्धं विधीयते" ।

इति ।

"यथा चैवापरः पक्षः पूर्व्वपक्षाद्विशिष्यते ।
तथा श्राद्धस्य पूर्व्वाह्णादपराह्णोविशिष्यते" ।

इत्यादिकमप्येतद्विषयं द्रष्टव्यम् । गौतमोऽपि । "द्रव्यदेशब्राह्मण सन्निधौ वा कालनियमः शक्तितः"—इति सूचयन्नेतदेवाह ॥०॥ ॥ ४ ॥०॥

तदहर्ब्राह्मणानामन्त्र्य पूर्व्वेद्युर्वा ॥ ५ ॥

यदहः श्राद्धं तदहः पूर्व्वस्मिन् वा अहनि ब्राह्मणानामन्त्र्य निमन्त्र्य, 'पितृभ्योदद्यात्'—इत्यनुवर्त्तते । 'तदहर्वा'—इति पाठे, पूर्व्वत्राच चोभयत्रैवैतत् सम्बन्धनीयम्। कुतः?। मध्यपठितस्य विशेषाभावात् । कथं नाम?। यदहरुपपद्येत, तदहर्वा पितृभ्योदद्यात्,—इति । तदहर्वा पूर्व्वेद्युर्वा ब्राह्मणानामन्त्र्य पितृभ्योदद्यात्,—इति च ।

ब्राह्मणग्रहणं राजन्यादिनिरासार्थम् । यद्यप्यामन्त्रणमिहोपदिश्यते, तथापि निमन्त्रणमेवार्थः। अतिक्रमनिषेधोह्यत्र सूचयिष्यते । "यत्र प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्"—इति हि स्मरन्ति । अभिलापे त्वामन्त्रणमेवास्मच्छास्त्रानुशिष्टं प्रयोज्यं, न निमन्त्रणम्,—इति द्रष्टव्यम् ।

अत्र चामावस्यादौ पूर्व्वेद्युर्निमन्त्रणम्, असम्भवे तदहरपि । तथाच स्मर्य्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"निमन्त्रयीत पूर्व्वेद्युः सम्यग्विप्रान् यथोदितान्।
असम्भवे परेद्युर्वा ब्राह्मणांस्तान् निमन्त्रयेत्"।

इति।

"श्वः कर्त्ताऽस्मीति निश्चित्य दाता विप्रान् निमन्त्रयेत्।
निरामिषं सकृद्भुक्त्वा सर्व्वसुप्तजने गृहे।
असम्भवे परेद्युर्वा ब्राह्मणांस्तान् निमन्त्रयेत्"।

इति चैवमादि। द्रव्याद्युपपत्तेस्तु भाविन्याः पूर्व्वेद्युर्निश्चयासम्भवेन तदहरेव निमन्त्रणं भवति। एतेन,—

"पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते।
निमन्त्रयीत त्र्यवरान् सम्यग्विप्रान् यथोदितान्"।

इत्याद्याः स्मृतयोऽपि व्याख्याताः। 'असम्भावितमैथुनान् यत्यादींस्तदहरामन्त्रयेत् अङ्गानां प्रधानकालत्वनियमात्, सम्भावितमैथुनांस्तु पूर्व्वेद्युः'—इति नीलाम्बरोपाध्यायाः। वचनमप्युदाहरन्ति।

"निमन्त्रयेच्च पूर्व्वेद्युः पूर्व्वोक्तांस्तु द्विजोत्तमान्।
अप्राप्तौ तद्दिने वाऽपि हित्वा योषित्प्रसङ्गिनम्"।

इति। महायशसाऽप्येषैव व्यवस्था वर्णिता। प्रमाणाभावात् पुनरुपेक्षिताऽस्माभिः। अनिर्दिष्टकालं खल्वङ्गं प्रधानस्य काले क्रियते। निर्दिष्टश्चेह कालः। वचनमपि पूर्व्वेद्युरप्राप्तौ तद्दिने निमन्त्रणमाह, न प्राप्तौ। तत्रैव, 'हित्वा योषित्प्रसङ्गिनम्'—इति विशेषः। स खल्वयं विशेषो न यतिष्वेवावतिष्ठते। प्रमाणविशेषाभावात्। तस्मादस्मदुक्तैव व्यवस्था शास्त्रार्थः ॥०॥ ५ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनिन्द्येनामन्त्रितोनापक्रामेत् ॥ ६ ॥

अनिन्द्योलोकापवादरहितः । तेनामन्त्रितोनिमन्त्रितोब्राह्मणः, नापक्रामेत् न प्रत्याचक्षीत । प्रत्याख्याने प्रत्यवायापत्तेरित्यभिप्रायः । तथाच मनुः ।

"केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः ।
कथञ्चिदप्यतिक्रामन् पापः शूकरतां व्रजेत्" ।

इति । यथैतत्, तथा निमन्त्रयिताऽपि निमन्त्रितान् यथान्यायमपूजयन् प्रत्यवैति,—इत्यर्थात् सिद्धम् । स्मरन्ति च ।

"आमन्त्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत् ।
अतिकृच्छ्रासु घोरासु तिर्य्यग्योनिषु जायते" ।

इति । अस्मिन्नवसरे,—"आमन्त्रितोवा नान्यदन्नं गृह्णीयात्"—इति सूत्रमधिकं पठन्ति गौड़ाः । निगदव्याख्यातं तत् ॥०॥ ६ ॥०॥

अथेदानीं निमन्त्रणीयान् ब्राह्मणान् विशिनष्टि,—

स्नातकान् ॥ ७ ॥

'आमन्त्र्य',—इति, 'पितृभ्योदद्यात्',—इति च इयमितःप्रभृति सर्व्वत्र सम्बन्धनीयम् । योग्यत्वात् । श्लोकमपि उदाहरन्ति ।

"येन यस्याभिसम्बन्धोदूरस्थस्यापि तस्य सः ।
अर्थतोह्यसमर्थानामानन्तर्य्यमकारणम्" ।

इति । त्रयः स्नातकाः गृह्यसूत्रे निर्द्दिष्टाः,—विद्यास्नातकोव्रतस्नातकोविद्याव्रतकस्चेति । उत्तराधरभावोऽप्यमीषां तत्रैव द्रष्टव्यः ॥०॥ ७ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एके यतीन्* ॥ ८ ॥

यतयस्त्रिदण्डिनइहाभिप्रेयन्ते । कथं ज्ञायते? ।

"यतिस्त्रिदण्डः करुणा राजतं पात्रमेव च" ।

इति ।

"शिखिभ्योधातुरक्तिभ्यस्त्रिदण्डिभ्यः प्रदापयेत्" ।

इति चैवमादि स्मरणात् । तदमे यतयोनिमन्त्रणीयाः,—इत्येकेषां-मतम् । अस्मादवगच्छामः,—यतयोन निमन्त्रणीयाः,—इत्यन्येषां मतम्,—इति । कस्मात् पुनः कारणात् यतयोन निमन्त्रणीयाः,—इति तत्र भवन्तोमन्यन्ते? । स्मर्त्तारोह्यमीषां भोजने अभ्युदयविशेषं स्मरन्ति ।

"सर्व्वारम्भनिवृत्तानां यतीनां दत्तमक्षयम्" ।

इत्यादि बहुलम् । उच्यते । श्राद्धे किल मधुमांसैः पितरोऽतिशयं प्रीयन्ते । एषा हि तेषामाशंसा ।

"योदद्यादन्नमस्माकं तत्सर्व्वं मधुना सह ।
आमिषेण समायुक्तं शस्तेन मृगपक्षिणाम्" ।

इति । तथाचोपदेक्ष्यति तृप्तिविशेषं मांसविशेषेण । यतयस्त्वमधु मांसाशिनोभवन्ति । अतएव, "यतिपात्रकं श्राद्धं मधुमांसवर्ज्जितं कार्य्यम्"—इति वामनपद्धतिः । तदिदमनिमन्त्रणकारणं यतीनाम् ।

कस्य हेतोस्तर्ह्यमी निमन्त्रणीयाः भवन्त्यन्येषाम्? । यतिपात्रक-श्राद्धस्य महाफलत्वादित्याह ।

---

* एके यतीन् वा,—इति कस्यचिन्मते सूत्रपाठः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अपि स्यात् स कुले जन्तुर्भोजयेद् यस्तु योगिनः।
विप्रान् श्राद्धे प्रयत्नेन तेन तृप्यामहे वयम्"।

इत्यपि पितृगीता गाथा भवति। दक्षोऽपि स्मरति।

"विना मांसेन मधुना विना दक्षिणयाऽऽशिषा।
परिपूर्णं भवेत् श्राद्धं यतिषु श्राद्धभोजिषु"।

इति ॥०॥ ८ ॥०॥

गृहस्थसाधून् वा ॥ ९ ॥

गृहस्थाश्च साधवश्च, तान् गृहस्थसाधून्। वाशब्दः स्नातकापेक्षया विकल्पार्थः। तत्र, स्नातकाः—गृहस्थाश्रमप्रवेशोन्मुखाः। गृहस्थास्तु तत्र कृतप्रवेशा भार्य्यासहिताः। भार्य्यां हि गृहमाचक्षते,—इति सभार्य्याएव गृहस्थादृहाभिप्रेयन्ते। तथाच स्मरणम्।

"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
तया हि सहितः सर्व्वान् पुरुषार्थान् समश्नुते"।

इति। ये पुनर्गृहस्थाश्रमे कृतप्रवेशाश्रपि मृतभार्य्याः सन्तः पुनर्भार्य्यामर्थयमानाः स्नातकव्रतानुष्ठानपरावा भवन्ति, तइमे साधवो भण्यन्ते। कन्यायाः खल्वलाभे,—

"अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्"।

इति स्नातकव्रतानुष्ठानमस्य मुनयः स्मरन्ति। शास्त्रानुमतञ्चानुतिष्ठन् कथं न साधुः स्यात्। 'साधुत्वं गृहस्थविशेषणम्,'—इत्यसङ्गतैषा वर्णना महायशसः। "स्नातकान्" "एकैयतीन्" "गृहस्थसाधून् वा" —इत्याश्रमविशेषावस्थायिनएव हि निमन्त्रणीयाइहोपदिश्यन्ते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्म्मांस्तु पश्चादुपदेक्ष्यति। न खल्वसाधूनपि स्नातकान् निमन्त्रणीयान् मन्यसे, कथं साधुत्वं गृहस्थस्य विशेषणमात्थ!। अथ मन्यसे,—पश्चादुपदिष्टैर्धर्म्मैरसाधवः स्नातकाः व्यावर्त्तिष्यन्ते,—इति। गृहस्था अप्यसाधवस्तथैव तर्हि व्यावर्त्तिष्यन्ते,—इति विफलोऽयमारम्भः। कात्यायनोऽपि,—"गृहस्थान्" "साधून् वा"—इति गृहस्थाद्भेदेनैव साधून् सूचयाञ्चकार ॥०॥ ९ ॥०॥

तदेवं स्वरूपतोनिमन्त्रणीयानभिधाय धर्म्मानमीषामुपदिशति,—

श्रोत्रियान् ॥ १० ॥

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्यवा।
षट्कर्म्मनिरतोविप्रः श्रोत्रियोनाम धर्म्मवित्"।

इत्युक्तलक्षणान् ॥०॥ १० ॥०॥

वृद्धान् ॥ ११ ॥

"न तेन वृद्धो भवति येनास्य पलितं शिरः।
योवै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः"।

इत्युक्तलक्षणान्। श्रोत्रियाणां खल्वसम्भवे, ज्ञानवृद्धाअपि निमन्त्रणीयाः,—इत्येवमर्थोऽयमारम्भः।

एवं वा—

वृद्धान् अधिकवयस्कान्। तथाच वशिष्ठः। "परिणतवयसः"—इति। अपिच। गौतमः खल्वाचार्य्यः,—"युवभ्योदानं प्रथममेके पितृवत्"—इति सूचयन् यद्वयस्कः पित्रादिः प्रमीतः तद्वयस्काएव ब्राह्मणाः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निमन्त्रणीयाः,—इत्येकेषां मतं दर्शयति। सोऽयं वृद्धोपदेशो वृद्ध-श्राद्धविषयः पर्य्यवस्यति। अवृद्धान्,—इति वा पाठः। युवभ्यो-दानं प्रथमम्—इति सूत्रसमानार्थः ॥०॥ ११ ॥०॥

अनवद्यान् ॥ १२ ॥

न अवद्यान् अनवद्यान्। अवद्योनिन्द्यइत्यनर्थान्तरम्। लोकापवाद-रहितानित्यर्थः। अथवा। विशुद्धमातापितृकाः स्वयमपि लोकाप-वादरहितादृहाभिप्रेयन्ते। कथं ज्ञायते?। शास्त्रान्तरदर्शनात्। तथाच वशिष्ठः। "यस्य दशपुरुषं पितृमातृवंशः श्रोत्रियोविज्ञायते विद्वांसः स्नातकाश्चेति पंक्तिपावनाः"—इति। तथोशना। "पञ्च-पुरुषपारम्पर्य्यादखण्डितचारित्रमर्य्यादः पंक्तिपावनः"—इति। मनुरपि स्मरति।

"अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च।
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः"।

इति। अवद्याश्च विस्तरेण तन्त्रान्तरेषूपदिष्टास्तेभ्यएवावगन्तव्याः। ग्रन्थगौरवभयादुपारम्यतेऽस्माभिः ॥०॥ १२ ॥०॥

स्वकर्म्मस्थान् ॥ १३ ॥

स्ववर्णाश्रमोचितकर्म्मनिष्ठान्। स्मरन्ति च।

"अव्युत्क्रान्ताः स्वधर्म्मेभ्यस्तेद्विजाः पंक्तिपावनाः"।

इति ॥०॥ १३ ॥०॥

पूर्व्वोक्तानां खल्वमीषाम्,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभावेऽपि शिष्यान् स्वाचारान् ॥ १४ ॥

अपिर्भिन्नक्रमे। पूर्व्वोक्तानामभावे, शोभनाचारान् शिष्यानपि,—इत्यर्थः। अपि शब्दोमातामहादीन् समुच्चिनोति। तथाच मनुः।

"एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः।
मातामहं मातुलञ्च स्वस्त्रीयं श्वशुरं गुरुम्।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्"।

इति। तदत्र, 'स्वाचारान्',—इति पुनः कुर्व्वन् आचारवत्तयैवामीषां निमन्त्रणीयत्वं न पुनः श्रोत्रियत्वादेरत्यन्तमपेक्षा,—इति दर्शयति। अन्यथा, 'अनवद्यान्'—इत्यादेः सूचितत्वात् स्वाचारानित्यनर्थकं स्यात्। मनुरपि, श्रोत्रियादीनभिधाय मातामहादीनामनुकल्पत्वम-भिदधानएतदेवाह। यच्चाहतुर्वशिष्ठकात्यायनौ।

"यस्य चैव गृहे मूर्खोदूरे चैव बहुश्रुतः।
बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः।
ब्राह्मणातिक्रमोनास्ति विप्रे वेदविवर्ज्जिते।
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते"।

इति। तदपि बहुश्रुताय दातव्यम्,—इति, ज्वलन्तमग्निमुत्सृज्य,—इति चाभिधानात् मुख्यकल्पगोचरमितिपर्य्यवस्यति। तथा भविष्य-पुराणे।

"तस्मान्नातिक्रमेत् प्राज्ञो ब्राह्मणान् प्रातिवेश्मिकान्।
सम्बन्धिनस्तथा सर्व्वान् दौहित्रान् विट्पतिं तथा।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भागिनेयं विशेषेण तथा बन्धून् गृहाधिपान्।
नातिक्रमेन्नरश्चैतान् सुमूर्खानपि गोपते!"।

इति। तदनेन,—

"श्रोत्रियायैव देयानि हव्यकव्यानि नित्यशः।
अश्रोत्रियाय दत्तानि तृप्तिं नायान्ति देवताः"।

इति वशिष्ठादिवचनानामपि मुख्यकल्पविषयत्वं व्याख्यातम्। तस्मादनुकल्पमातामहादिषु नैष नियमः,—इति सिद्धम्॥०॥ १४ ॥०॥

अथेदानीं ये न निमन्त्रणीयाः, तानाह,—

द्विर्नग्न-शुक्ल-विक्लिध-श्यावदन्त-विद्धप्रजनन-व्याधिताधिक-व्यङ्ग-श्विचि-कुष्ठि-कुनखिवर्ज्जम्॥ ॥ १५ ॥

द्विर्नग्नादिवर्ज्जं पूर्व्वोक्तान् निमन्त्रयेत्। तत्र, द्विर्नग्नः,—

"यस्य त्रिपुरुषादासीदुभयोर्गोत्रयोरपि।
वेदस्याग्नेश्च विच्छेदो द्विर्नग्नः स प्रकीर्त्तितः"।

इति सुमन्तुनोक्तः। रघुनन्दनस्त्वेतदजानन्नाह,—'द्विर्नग्नो दुश्चर्म्मा अप्रावृतमेढ्रः,'—इति। तदश्रद्धेयम्। न खलु द्विर्नग्नशब्दो दुश्चर्म्माणमभिधत्ते। तत्रास्य सामर्थ्यविरहात्। अतएव,—"द्विर्नग्नः कीलदुश्चर्म्मा शुक्लोऽतिकपिलस्तथा"। इत्येकस्मिन् वचने द्वयोरुपादानं सङ्गच्छते। 'शुक्लोऽतिगौरः'—इति नीलाम्बरोपाध्यायादयः। 'शुक्लामण्डलकुष्ठी अशुरत्वादी षण्डकुष्ठीतिवा, अतिगौरो वेत्येके'—इति महायशाः। विक्लिधः,-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"यस्य नैवाधरोष्ठाभ्यां छाद्यते दशनावली।
विक्लिधः स तु विज्ञेयोब्राह्मणः पंक्तिदूषकः"।

इति सुमन्तुनोक्तः। 'विक्लिधोविचर्च्चिकाबहुलः'—इति कल्पतरुः। 'नाभेरधोविचर्च्चिकादियुक्तः'—इति रघुनन्दनः। 'गलद्घ्राणः'—इति शङ्खधरः। 'पूतिगन्धिघ्राणः श्रौदुम्बरकुष्ठीतिवा'—इति महायशाः।

एकोद्वौ वहवो वा दन्ताः यस्य श्यावाः भवन्ति, सोऽयं श्यावदन्तः—स्वभावकृष्णदन्तोभण्यते। श्यावः कृष्णः,—इत्यनर्थान्तरम्। 'शावदन्त'—इति केचित् पठन्ति। दन्तद्वयमध्यगतक्षुद्रदन्तः,—इति तत्रार्थः।

विद्धं प्रजननं यस्य, सोऽयं विद्धप्रजननः। "लिङ्गचर्म्मणि केषाञ्चिद्वेधः क्रियते, तत्र स्त्रीचित्तरञ्जनार्थं काष्ठशकलमर्प्यते,—इति दाक्षिणात्ये प्रसिद्धम्"—इति नीलाम्बरोपाध्यायाः। 'अस्मर्य्यादिदोषै विद्धं प्रजननं यस्य सः'—इति केचित्। 'मृतापत्यः'—इत्यन्ये। तत्त्वकारस्तु वेधकर्त्तनयोर्भेदमजनाद,—'विद्धप्रजननः कर्त्तितशिश्नः'—इति।

व्याधितः पापरोगयुक्तः, उभयभागक्लेदितव्रणो वा। तथाच देवलः। "उन्माद, स्त्वग्दोषो, राजयक्ष्मा, श्वासो, मधुमेहो, भगन्दरो, महोदरोऽश्मरीत्यष्टौ पापरोगाः। जड़ान्धवधिरकुणिरिति विकलेन्द्रियाः। उभयभागक्लेदितव्रणाः। पापिष्ठतमाश्चेति। एते पञ्चविधाः प्रोक्तावर्ज्जनीयानराधमाः"—इति। अत्र चोभयभागक्लेदितव्रणस्य नाभेरधोभागगतत्वेनोपरिभागगतत्वेन च द्वैविध्यात् पञ्चविधत्वं नानुपपन्नम्। मनुरपि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"वोत्त्वान्धो नवतेः, काणः षष्टेः, श्वित्री शतस्य तु ।
पापरोगी सहस्रस्य दातुर्नाशयते फलम्" ।

इति पापरोगिणोवर्जनं स्मरति । पापरोगपदार्थानभिज्ञस्तु कुल्लूकभट्टः,—'पापरोगी रोगराजापहतः'—इत्येतावन्मात्रं व्याचष्टे । तदनादरणीयम् । 'व्याधितोदुश्चिकित्स्यव्याधिः'—इति महायशाः । 'महारोगी'—इति रघुनन्दनः ।

अधिकोऽधिकाङ्गः । कस्मात्? । 'व्यङ्गि'—इत्यत्राङ्गेन वैगुण्यदर्शनादत्रापि तेनैवाधिक्यस्य वर्णयितुमुचितत्वात् । तथाच शङ्खः ।

"हीनाङ्गा अतिरिक्ताङ्गा ब्राह्मणाः पंक्तिदूषकाः" ।

इति । 'अधिकाङ्ग'—इत्येव केचित् पठन्ति । व्यङ्गी विकलाङ्गः, हीनाङ्गोवा । 'विकलेन्द्रियः',—इति केचित् । केचित् न पठन्त्येव । श्वित्री श्वेतकुष्ठी,—इति भानूपाध्यायप्रभृतयः । स्थूलपादः—इति कल्पतरुः । कुष्ठी उक्तातिरिक्तकुष्ठरोगवान् । बहवः कुष्ठभेदाः पुराणेषु पठ्यन्ते । तथाच भविष्ये ।

"शृणु कुष्ठगणं विप्र ! उत्तरोत्तरतोगुरुम् ।
विचर्च्चिका तु दुश्चर्म्मा चर्च्चरीयस्तृतीयकः ।
विकर्च्चुर्व्रणताम्रौच कृष्णश्वेते तथाऽष्टकम् ।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु ।
व्रणवत् सर्व्वगात्रेषु गण्डे भाले तथा नसि" ।

इत्यादि । कुनखी स्वभावतः सङ्कुचितनखः । इतरे दिनंशादयो न निमन्त्रणीयाः ।

आह । अनर्थकोऽमीषां वर्ज्जनोपदेशः? । यदा स्नातकादयो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निमन्त्रणीयाः—इत्युच्यते; ज्ञायत एव,—एभ्योऽन्ये न निमन्त्रणीयाः, —इति। नैषदोषः। स्नातकादीनामपि शुक्लत्वादिसम्भवात् तेषां वर्ज्जनार्थोऽयमुपदेशो भविष्यति,—इति। ननु, द्विर्नग्नत्वस्य तत्रासम्भवः? 'श्रोत्रियान्'—इति हि सूचितम्। अवद्याश्चैते शुक्लादयः कथं निमन्त्रणीयाः स्युः। 'अनवद्यान्'—इति हि सूचितम्। अपिच। श्रोत्रियाणां शारीरदूषणैर्युक्तानामप्यवर्जनीयत्वमेव मुनयः स्मरन्ति। यथा वशिष्ठः।

"अथ चेत् मन्त्रविद्युक्तः शारीरैः पंक्तिदूषणैः।

अदूष्यं तं यमः प्राह पंक्तिपावन एव सः"।

इति। एवन्र्हि अन्यथा वर्णयिष्यामः। पूर्व्वोक्तानां निमन्त्रणीयानामसम्भवे द्विर्नग्नादिवर्जमन्येऽपि निमन्त्रणीयाः,—इत्येतदर्थोऽयमुपदेशः,—इत्यनवद्यम्॥०॥ १५ ॥०॥

अथेदानीं श्राद्धस्य प्रयोगं वक्तुमुपक्रमते,—

स्नातान् शुचीनाचान्तान् प्राङ्मुखानुपवेश्य दैवे युग्मान्॥ १६॥

स्नातान् कृताप्लवनान्। प्राप्तस्यापि स्नानस्य पुनः कथनमावश्यकत्वार्थम्। तेन, अस्नाताः श्राद्धं भुञ्जानाः प्रत्यवायिणो भवन्ति,—इति विज्ञायते। तथाच भारते।

"दैवं वा यदि वा पित्र्यं योऽश्नीयाद्ब्राह्मणादिषु।

अस्नातो ब्राह्मणोराजन्! तस्याधर्म्मोगरानृते"।

इति। अथवा। स्नातान्,—इति विशिष्टस्नानाभिप्रायं वचनम्। तथाच वायवीये।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"सुरभीणि तु स्नानानि गन्धवन्ति तथैव हि।
श्राद्धेष्वेतानि यो दद्यादश्वमेधफलं लभेत्"।

इति। शुचीन् सूतकाद्यशौचरहितान्। अन्यस्याशौचस्य स्नानाचमनाभ्यामेवापगमात्। आचान्तान् कृताचमनान्। तदनेन, पादप्रक्षालनमपि देयमित्युक्तं भवति। पादप्रक्षालनपूर्व्वमाचमनस्य गृह्यसूत्रेऽभिधानात्। तथाच गृह्यसूत्रम्। "प्रक्षाल्य पाणी पादौ च त्रिराचामेत् द्विः परिमृजीत"—इत्यादि। सदाचारसिद्धं खल्वेतत् पादप्रक्षालनदानादिकमिति न विशिष्टसूचितमिति स्मिष्यते। तदिदमर्थं परिभाषाप्राप्तस्याप्याचमनस्य पुनरिहोपदेशः। अथवा। "यज्ञोपवीतिनाऽऽचान्तोदकेन कृत्यम्"—इति परिभाषया कर्त्तुरेव प्राप्नोत्याचमनं न भोक्तुः,—इत्याचान्तान्—इत्याह।

तदित्थम्भूतान् ब्राह्मणान् प्राङ्मुखान्, युग्मान्—समान् द्विचतुरादीनित्येतत्। दैवे उपवेश्य,—प्रागग्रेषु कुशेषु,—इत्यर्थः। कथं ज्ञायते?। प्रतिमुखानामुपवेशनस्य सूत्रणात् प्राची दिक् खल्वागतैव हृदयमस्माकम्। आगतैव चेत्, न युज्यते विना कारणमुत्स्रष्टुम्। "प्राङ्मुखकरणस्थानादेशे"—इति सूत्रकारवचनाच्चैवमवगच्छामः। कात्यायनोऽप्याह

"यत्र दिङ्नियमो न स्याज्जपहोमादिकर्म्मसु।
तिस्रस्तत्र दिशो ज्ञेयाः प्राची सौम्यापराजिता"।

इति। देवलीयेऽपि प्रयोगे,—

"ये चात्र विश्वदेवार्थं विप्राः पूर्व्वं निमन्त्रिताः।
प्राङ्मुखान्यासनान्येषां द्विदर्भोपहितानि च"।

इत्युक्तम्॥०॥ १६ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अयुग्मान् यथाशक्ति पित्र्यएकैकस्योदङ्मुखान्॥ ॥ १७ ॥

अयुग्मान् विषमान् त्रिप्रभृतीन् शक्त्यनतिक्रमेण पित्र्ये, उपवेश्य,— इति योजना। 'स्नातान् शुचीनाचान्तान्'—इत्येतत् सर्व्वत्रापि सम्बन्धनीयम्। किमविशेषेण पित्रेर सर्व्वेषामर्थे एक एवायुग्मोवर्ग उपवेशनीयः ?। न। कथन्तर्हि ?। एकैकस्य पित्रादेरयुग्मान् उपवेश्य,—इति सम्बन्धः। कथन्नाम ?। त्रिलपक्षे तावत्,—पितुस्त्रीन्, पितामहस्य त्रीन्, प्रपितामहस्य त्रीन्,—इति। तदेतस्मिन् पक्षे नव ब्राह्मणाः सम्पद्यन्ते। एवमन्यत्राप्यूहनीयम्। तथाच गौतमः। "नवावरान् भोजयेदयुजोयथोत्साहं वा"—इति। "यद्यप्ययुग्मान् यथाशक्ति"—इति सूचितम्, तथाप्यतिशयविस्तारो न करणीयः अनिष्टापत्तेः। तथाच वशिष्ठः।

"द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा।
भोजयेत् सुसमृद्धोऽपि न प्रसज्येत विस्तरे।
सत्क्रियां देशकालौ च द्रव्यं ब्राह्मणसम्पदः।
पञ्चैतान् विस्तरोहन्ति तस्मान्नेहेत विस्तरम्"।

इति। तथा श्राद्धभाष्ये ब्रह्माण्डपुराणे,—

"देशकालधनाभावादेकैकमुभयत्र वा।
शेषान् वित्तानुसारेण भोजयेदन्यवेश्मनि।
यस्मात् ब्राह्मणबाहुल्याद्दोषो बहुतरोभवेत्।
श्रद्धानाशो मौनवासः श्राद्धतन्त्रस्य विस्मृतिः।
उच्छिष्टोच्छिष्टसंस्पर्शोनिन्दा दातृषु भोक्तृषु।
वितण्डया चापवादोजल्पन्ते ते पृथग्विधाः"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। ब्रह्मपुराणस्यैतदिति शूलपाणिः। स खल्वयं हेतूपनिबन्धनो-ब्राह्मणबाहुल्यनिषेधः,—इति सर्व्वेषामेव भवति। सर्व्वत्रैव तत्सम्भवात्। तदसम्भवे तु बाहुल्यकरणेऽप्यदोष एव।

कथमुपवेशयेत्?। उदङ्मुखान्। आसनानि चामीषां दक्षिणाग्रकुशानि भवन्ति। कथं ज्ञायते?। दक्षिणायाःदिशः पित्र्यत्वात्।

"दक्षिणाप्लवने देशे दक्षिणाभिमुखस्य च।
दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र क्रमः स्मृतः"।

इत्याभ्युदयिकप्रकरणे कात्यायनेन तथोक्तत्वाच।

"दक्षिणामुखयुक्तानि पितृणामासनानि च"।

इति च देवलीये प्रयोगे ॥०॥ १७ ॥०॥

पक्षान्तरमाह,—

द्वौ वा दैवे त्रीन् पित्र्ये ॥ १८ ॥

वाशब्दोविकल्पार्थः। दैवे द्वौ ब्राह्मणौ, पित्र्ये, त्रीन् ब्राह्मणान्, उपवेश्य,—इति सम्बन्धः। अत्रकल्पे,—पितुरेकं पितामहस्यैकं प्रपितामहस्यैकमुपवेशयेदिति मिलित्वा त्रयोब्राह्मणाः भवन्ति ॥०॥१८॥

अन्यमपि पक्षमुपदिशति,—

एकैकमुभयत्र वा ॥ १९ ॥

दैवे एकं पित्र्ये चैकमित्यर्थः। तदेवं द्वावपि ब्राह्मणावुपदिष्टौ यदा पुनरेक एव ब्राह्मणोलभ्यते, अनेकब्राह्मणद्रव्यौपयिकमन्नाद्यं वा न सम्पद्यते, तदाऽपि न श्राद्धलोपः। किन्त्वेकस्मिन्नेव ब्राह्मणे श्राद्धं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

करणीयम्। यद्यप्यत्र, एकब्राह्मणपक्षोनोपदिश्यते, तथापि न्यायागतत्वाद्ग्रन्थान्तरोपदेशाच्चादरणीयः । तथाच गृह्यासंग्रहः ।

"श्राद्धे ब्राह्मण एकश्चेत् स्वल्पञ्च प्रकृतं यदि ।
वैश्वदेवं कथं तत्र? इति मे संशयोमहान् ।
प्रणीतान्नाद्यमुद्धृत्य सर्व्वस्य प्रकृतस्य तु ।
ब्राह्मणाय प्रदातव्यमेवं भवति सम्पदि" ।

इति । श्राद्धकल्पपरिशिष्टे ।

"एकस्तु ब्राह्मणः श्राद्धे ह्यल्पन्तु प्रकृतं भवेत् ।
त्रयस्तु पितरः प्रोक्ताः कथं चाश्नन्ति ते त्रयः ।
उरसि पितरोभुङ्क्ते वामपार्श्वे पितामहाः ।
प्रपितामहादक्षिणतः पृष्ठतः पिण्डतर्कुकाः" ।

इति । परवचनं गृह्यासंग्रहेऽपि । तथा वशिष्ठः ।

"अपि वा भोजयेदेकं ब्राह्मणं वेदपारगम् ।
शुभशीलोपसम्पन्नं सर्व्वालक्षणवर्जितम् ।
यद्येकं भोजयेत् श्राद्धे दैवं तत्र कथं भवेत्? ।
अन्नं पात्रे समुद्धृत्य सर्व्वस्य प्रकृतस्य तु ।
देवतायतने कृत्वा ततः श्राद्धं समापयेत् ।
प्रास्येदग्नौ तदन्नन्तु दद्याद्वा ब्रह्मचारिणे" ।

इति । शङ्खः ।

"भोजयेदथवाऽप्येकं ब्राह्मणं पंक्तिपावनम् ।
दैवे कृत्वा तु नैवेद्यं पश्चादग्नौ तु तत्क्षिपेत्" ।

इति । तथा महायशोधृतं वचनम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"पितॄणां ब्राह्मणेयोश्चोद्दैवे त्वग्निं नियोजयेत्।
प्रणीतान्नाद्यमुद्धृत्य ततः श्राद्धं समापयेत्"।

इति। दैवेत्वग्निमिति साग्न्यभिप्रायं वचनम्। तथाच पृथ्वीचन्द्रोदये प्रचेताः।

"एकस्मिन् ब्राह्मणे दैवे साग्नेरग्निर्भवेत् सदा।
अनग्नेः कुशमुष्टिः स्यात् श्राद्धकर्म्मणि सर्व्वदा"।

इति। मातृश्राद्धे तु विप्रालाभे सुवासिनीरपि पूजयेदित्याहापरार्के वृद्धवशिष्ठः।

मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि।
पतिपुत्रान्विता भव्या योषितोऽष्टौ कुलोद्भवाः"।

इति। अष्टाविति वृद्धिश्राद्धविषयमिति कमलाकरः।

आह। यदा पुनरेकोऽपि ब्राह्मणो न लभ्यते, तदा किं ब्राह्मणाभावात् श्राद्धलोपः, अथवा ब्राह्मणप्रतिनिधिमुपादाय श्राद्धं करणीयम्? इति। ब्राह्मणप्रतिनिधिमुपादाय श्राद्धं करणीयमिति ब्रूमः। कुतः?। उच्यते। ब्राह्मणोहि गुणभावेन श्राद्धमुपकरोति। न च गुणस्य लोपे प्रधानमपि लोपनीयं भवति। "गुणलोपे च मुख्यस्य"—इति सिद्धान्तविरोधात्। गुणोहि नाम स भवति, यो मुख्यस्योपकारे वर्त्तते। सचेदुपादीयमानोमुख्यमुपरुणद्धि, गुणएवासौ न भवेत्। मुख्यं कथं सगुणं स्यात्,—इति खल्वसौ गुणेषु प्रवर्त्तते, न मुख्यं कथमुपरुध्येत,—इति। तस्मात् ब्राह्मणप्रतिनिधिमुपादाय श्राद्धं करणीयमिति प्रतिपद्यामहे। मुख्यालाभे प्रतिनिधिरुपादेयः,—इति दर्शितञ्च षष्ठेऽध्याये। तथाच्छन्दोगपरिशिष्टम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमाः व्रीहीणामिव शालयः"।

इति। कः पुनर्ब्राह्मणस्य प्रतिनिधिः?। दर्भवटुरित्याह। कथं ज्ञायते?। ब्राह्मणकार्य्ये तस्य दर्शनात्। तथाच गृह्यसूत्रम्। "यद्युवा उभयं चिकीर्षेद्धौत्रञ्चैव ब्रह्मत्वञ्चैव, तेनैवकल्पेन छत्रं वोदकमण्डलुं दर्भवटुं वा ब्रह्मासने निधाय"—इति। तथोपाकर्म्मणि छन्दोगपरिशिष्टम्। "कौशानृषीन् स्थलस्थान्"—इत्यादि। स्मरन्ति च।

"ब्राह्मणानामसम्पत्तौ कृत्वा दर्भमयान् द्विजान्।
कृत्वा श्राद्धं विधानेन पश्चाद्विप्रेषु दापयेत्"।

इति। तदत्र कुशमयब्राह्मणेऽपि श्राद्धकरणे प्रश्नप्रत्युत्तरादिकं सर्व्वमेव विधानं प्रकृतादेव भवति,—इत्यवगच्छामः। कुतः?। यतः कुशमयब्राह्मणपक्षेऽपि 'तेनैव कल्पेन'—इत्यनेन तत्र भवान् गृह्यकारः। सर्व्वमेव प्राकृतं कल्पमनुजानाति, ततोऽन्यत्रापि तथैव युक्तं प्रतिपत्तुम्। कारणस्याविशेषात्। न पुनः स्वमणीषिकोत्प्रेक्षया कस्यचिल्लोपः कल्पयितुमुचितः। तथाच श्राद्धे सत्यव्रतः।

"विधायाथ दर्भचयमासनेषु समाहितः।
प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत्"।

इति। प्रैषः प्रश्नः। प्रैषादनु—पश्चात् यो भवति, सोऽयमनुप्रैषः प्रत्युत्तरम्। तत्संयुक्तस्य विधानस्योपदेशात् सर्व्वमेव प्रश्नप्रत्युत्तरादिकं कर्त्तव्यमिति दर्शयति। तेन, दृष्टोऽस्मि,—इत्यादि प्रत्युत्तरमत्रापि भवत्यदृष्टार्थम्। समवेतत्वाभावात् प्रत्युत्तरविलोपोमा प्रशाङ्क्षीदिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हि प्रैषानुप्रैषसंयुक्तमित्याह। अन्यथा, अनर्थकं स्यात्। प्रतिनिधावपि हि सर्वत्र प्राकृती इति कर्त्तव्यता प्राप्नोति, किमिति प्रैषानुप्रैषौ विशेषतोऽभिधत्ते। न हि तृप्तिप्रश्नस्तृप्तिज्ञानार्थः। तस्य प्रकारान्तरेणोपपत्तेः। प्रश्नात् पूर्वं खल्वेतद्वक्ष्यति। तच्चावसरे वक्ष्यामः। निमन्त्रणन्तु उपस्थित्यादिदृष्टार्थतया अत्र लुप्यते। तस्यादृष्टार्थत्वे तु तदपि करणीयमेव।

आह। कुशमयब्राह्मणपक्षे प्रत्युत्तरमस्तीत्युक्तम्। कः पुनरेतत् करिष्यति?। श्राद्धकर्त्ता,—इति ब्रूमः। कस्मात्?। अन्यस्य प्रत्युत्तरयितुरभावात्। 'तेनैव कल्पेन'—इति वचनेन, कुशब्राह्मणपक्षेपि कर्त्तुरेव, "आवसोः सदने सीदामि"—इति मन्त्रपाठोपदेशाच्च। प्रतिनिधितया खल्वेतन्मन्त्रपाठः कर्त्तुरिष्यते। सचेहापि सम्भवति। तथाचाग्निपुराणीयं वचनम्।

"अलाभे ब्राह्मणानाञ्च श्राद्धं स्यात् कुशपत्रके।
प्रश्नोत्तरे स्वयं कुर्य्यादिति धर्म्मोव्यवस्थितः"।

इति। रघुनन्दनस्त्वेतदजानानः,—"प्रैषानुप्रैषसंयुक्तमित्यनेन यस्य प्रैषस्य प्रश्नस्य प्रत्युत्तरमवाधितं तदुक्तकर्म्मणोविधानात्, दर्भवटुरूपदर्भचयमादाय कर्म्मकरणे 'निमन्त्रितोऽस्मि' 'तृप्ताः स्मः'—इति प्रत्युत्तराभावात् निमन्त्रणतृप्तिप्रश्नयोरभावः, 'ॐ कुरुष्व'—इत्यादि प्रत्युत्तराणान्त्वन्येनापि सम्भवादनुज्ञादीनां कर्त्तव्यतैव"—इत्याह। तदसङ्गतम्। पूर्व्वोक्तकारणात्। प्रैषानुप्रैषसंयुक्तम्—इत्यस्य तथार्थत्वाभावाच्च। कल्पनारसिकोहि भवानेवं कल्पयति। 'प्रतिनिधौ यथाश्रुतमन्त्रपाठः'—इति, 'सर्व्वप्रतिनिधावेव नोहोऽत्र बाधः'—

5

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति च भवानेवाह। अन्येन प्रत्युत्तराभ्युपगमे चान्योऽपि यदा न लभ्यते, श्राद्धलोपश्चापद्येत। नचैतदुचितम् ॥०॥ १९ ॥०॥

मातामहानाञ्चैवम् ॥ २० ॥

मातामहानामप्येवं ब्राह्मणानामन्त्र्य श्राद्धं कुर्व्वीत,—इति कृत्स्नविध्यतिदेशः। पितृश्राद्धप्रयोगमध्ये कथनात् चशब्दाच्च पितॄणां मातामहानाञ्चैकेनैव प्रयोगेन श्राद्धं स्यात्। मातामहानाम्—इति मातामहप्रमातामहवृद्धप्रमातामहपरं वचनम्। स्मरन्ति च।

"मातुः पितरमारभ्य त्रयोमातामहाः स्मृताः।
तेषान्तु पितृवत् श्राद्धं कुर्य्युर्दुहितृसूनवः"।

इति ॥०॥ २० ॥०॥

तन्त्रं वा वैश्वदेविकम् ॥ २१ ॥

वैश्वदेविकं तन्त्रं पितॄणां मातामहानाञ्चैकं वा कुर्व्वीत। वाशब्दो-विकल्पार्थः। अस्मिन् कल्पे, मातामहानां वैश्वदेवश्राद्धं पृथक् न करणीयं, किन्तु पितॄणां मातामहानाञ्चैकमित्यर्थः ॥०॥ २१ ॥०॥

दैवपूर्व्वं श्राद्धं कुर्व्वीत ॥ २२ ॥

श्राद्धकर्म्मणि यत्किञ्चित् पित्र्ये क्रियते, तत्सर्व्वं दैवे कृत्वा करणीयम्—ऋते पिण्डदानादिभ्यः। यथैतत्, तथाऽवसरे वक्ष्यामः। तच्च पदार्थानुसमयेन कर्त्तव्यम्। कथं ज्ञायते?। आवाहने तथा दर्शनात्। आवाहनं खल्वादितोदेवानां सूचयित्वा परतः पितॄणां सूचयिष्यति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्मादवगच्छामः,—पदार्थानुसमयोऽस्मत्सूत्रकारस्याभिप्रेतः,—इति ॥ ॥०॥ २२ ॥०॥

पिण्डपितृयज्ञवदुपचारः ॥ २३ ॥

कर्त्तव्यः,—इति सूत्रशेषः । एतदनेनोक्तं भवति । सैवेतिकर्त्तव्यता, तएवमन्त्राः तादृशाएवधर्म्माः अत्रापि भवन्ति,—इति । तेन, अपसव्यं दक्षिणामुखेन वामजानुपातेन पित्र्यं कर्म्म करणीयम्, दैवन्तु सव्येन प्राङ्मुखत्वादिना दक्षिणजानुपातेन,—इति । तथाच च्छन्दोगपरिशिष्टम् ।

"दक्षिणं पातयेज्जानु देवान् परिचरन् सदा ।
पातयेदितरज्जानु पितॄन् परिचरन्नपि" ।

इति । "प्राची सौम्यापराजिताः"—इति च । तथा गृह्यसूत्रम् । "पितृयज्ञे त्वेव प्राचीनावीती भवति"—इति । एवं दैवं दैवतीर्थेन, पित्र्यं पितृतीर्थेन कर्त्तव्यम् । पात्रपूरणादिकमपि दैवपित्र्ययोस्तत्तत्तीर्थेन करणीयं भवति । कथं ज्ञायते ? ।

"पात्राणां पूरणादीनि दैवेनैव हि कारयेत्" ।

इत्याभ्युदयिकश्राद्धे च्छन्दोगपरिशिष्टदर्शनात् ।

तदस्मात् पिण्डपितृयज्ञधर्म्मप्रदेशात् पित्रर्थं चरुरत्र पृथक् पक्तव्यो भवति । "तस्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च मांसचरुञ्च"—इत्यन्वष्टक्यकर्म्मण्यस्मद्गृह्यकारेण पृथक् चरूपदेशात्, पिण्डपितृयज्ञे च,—"अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञोव्याख्यातः"—इति तेनैवोदनचरोरतिदेशात् । "सर्व्वस्य त्वेवान्नस्यैतान् बलीन् हरेत्—पित्र्यस्य वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाध्ययनस्य वाऽर्थार्थस्य वा"—इत्यपि गृह्यसूत्रं पित्र्यं पृथक् पाकं दर्शयति। छन्दोगपरिशिष्टे अग्नौकरणविचारश्लोकेऽप्येतस्यार्थस्य लिङ्गदर्शनमस्ति। तच्चोपरिष्टाद्वक्ष्यामः। स खल्वयं चरुः व्रीहिभिः स्यात्, न यवैः। कस्मात्?। "सकृत्संगृहीतं व्रीहिमुष्टिमवहन्ति"—इत्यन्वष्टक्ये गृह्यसूत्रात्। अपरे पुनरेतदविद्वांसो भाषन्ते,—'सर्व्वार्था-देव पाकात् श्राद्धमपि कर्त्तव्यं न पृथक् पाकान्तरं कार्य्यम्, अस्म-च्छाखायां पृथक्पाकानभिधानात्'—इति।

यदपि,—'यावदुक्तले क्रियमाणे पादप्रक्षालनादि न प्राप्नोति। व्रीहिगोधूमादीनामुपादानं न प्राप्नोति। लशुनादिवर्जनं न प्राप्नोति। एवं यावदुक्तानुष्ठाने विहिताकरणं निषिद्धकरणञ्च प्राप्नोति। शाखान्तरीयानुष्ठाने परिशिष्टकारैरभ्यनुज्ञा कृतेति यावत् सम्भवं पारतन्त्रिकमपि कार्य्यं नैतद्व्यतिरेकेण कर्म्म कर्त्तुं शक्यम्"—इति महायशसा वर्णितम्। तदप्यसङ्गतम्। कस्मात्?। यस्मात् पाद-प्रक्षालनादि यथा प्राप्नोति तथा पूर्व्वमस्माभिर्व्यवस्थापितम्। लशु-नादिवर्जनमपि सामान्यैर्वचनैर्भविष्यति। शाखान्तरीयानुष्ठाने परि-शिष्टकाराणां कुत्राभ्यनुज्ञा,—इति न खल्वधिगच्छामि। अनभ्यनुज्ञैव तु विज्ञायते। तथाच छन्दोगपरिशिष्टम्।

"अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्म्मकारिणाम्।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया"।

इति। तदनेन परोक्ता अयथाक्रिया च खल्वस्माकमक्रियैवेति का-त्यायनोऽब्रवीति। ननु मन्यसे,—'परोक्तानुष्ठानमन्तरेण न कर्म्म कर्त्तुं शक्यम्'—इति। तथा गृह्यासंग्रहः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"ऊनोवाऽप्यतिरिक्तोवा यः स्वशास्त्रोक्तमाचरेत्।
तेन सन्तनुयात् यज्ञं न कुर्य्यात् पारतन्त्रिकम्"।

इति। यावती इतिकर्त्तव्यता स्वशाखोक्ता, तावत्यैव यज्ञं तनुयात्, न तत्र पारतन्त्रिकं कुर्य्यात्,—इति गोभिलपुत्रः समुपदिशति। कात्यायनोऽपि,—अयथाक्रियां निन्दन्नेतदेवानुजानाति। स्वशास्त्रोक्तस्य प्रयोगस्य खल्वन्तराऽन्तरा पारतन्त्रिकस्य विशेषस्याभिनिवेशे, यथा खल्वेषोच्यते, नैषा तथा भवतीति व्यक्तमयथाक्रियैव सम्पद्यते। तदेवं पारतन्त्रिकमनुतिष्ठन् न स्वशाखाश्रयं विधानमनुतिष्ठसि, नापि पारशाखिकम्, किन्तु द्वयमप्यन्यथयित्वा नरसिंहाकारमभिनवं प्रयोगान्तरं निर्म्मिणोषि!। तच्चानुतिष्ठसि!। स्वशास्त्रोक्तस्य प्रयोगस्यान्तराऽन्तरा परशाखोक्तं विशेषं निवेशयन् व्यक्तं खल्वेतदुभयमेवान्यथयसि। तथाच, वृद्धिमिच्छतो मूलमपि ते नष्टम्,—इति किमत्र ब्रूमः!। यत् पुनर्गृह्यासंग्रहवचनान्तरम्,—

"आत्मतन्त्रेषु यन्नोक्तं तत् कुर्य्यात् पारतन्त्रिकम्।
विशेषाः खलु सामान्याः ये चोक्ता वेदवादिभिः"।

इति पारतन्त्रिकं कर्त्तव्यमुपदिशति। तत् श्रौताभिप्रायम्। तथाच कात्यायनः।

"यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत्"।

इति श्रौतमेवाग्निहोत्रादिकं पारशाखिकं कर्त्तव्यमाह। न च शाखान्तराधिकरणन्यायात् पारतन्त्रिकगुणोपसंहारो गृह्यायुक्तप्रयोगेऽपीति भ्रमितव्यम्। श्रौतविषयत्वात्तस्य। श्रौतेषु हि स्वेषु स्वेषु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदेषु स्वस्ववेदिनामेवर्त्विजां कर्म्मोपदिष्टम् न सर्व्वेषाम्। सर्व्ववेदिभि-र्ऋत्विग्भिर्यज्ञोनिर्व्वहति, न तावन्मात्रैः,—इत्यस्ति विशेषः। गृह्याद्युक्ते तु प्रयोगे नैषविशेषोऽस्ति। प्रत्यक्षश्चात्र परिशिष्टकाराणां निषेधः,—'ऊनोवाऽप्यतिरिक्तोवा'—इति, 'अक्रिया त्रिविधा'—इति चैव-मादिः। अथवा। यदात्मनस्तन्त्रेषु नोक्तमेव, तदेव पारतन्त्रिकं कर्त्तव्यमित्युपदिशति, न पुनः स्वशास्त्रोक्तस्य प्रयोगस्यान्तराऽन्तरा परोक्तस्य विशेषस्याभिनिवेशस्तस्यार्थः। वचनान्तरेण सुव्यक्तमस्य निषेधनात्। सामान्याश्रयाणां विशेषाणामप्यभिनिवेशोऽनारभ्याधी-तानामेव न प्रयोगान्तरोक्तानाम्। तथा चोक्तम्।

"प्रयोगः सूत्रकारोक्तोन समुच्चयमर्हति।
समुच्चये यतस्तस्य न निष्पत्तिर्न च क्रमः"।

इति। तथाच नीलाम्बरोपाध्यायधृतं गृह्यपरिशिष्टम्।

"प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः।
प्रयोगशास्त्रताहानादनारभ्यविधानतः।
बह्वल्पं वा गृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम्।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतोभवेत्।
श्रौतेषु सर्व्वशाखोक्तं सर्व्वस्यैव यथोचितम्।
स्मार्त्तं साधारणं तेषु ग्राह्यं श्रौतेषु कर्म्मसु"।

इति। तदिदं वचनम्,—प्रयोगशास्त्रं गृह्यादि, अनारभ्यविधानतः परैर्न समुच्चीयते,—इति वदत्, आरभ्याधीतैः सामान्यशास्त्रोक्तैः परशास्त्रोक्तैश्च समुच्चयं वारयति। ये पुनरनारभ्याधीताः सामन्य-धर्म्माः स्मर्य्यन्ते, तैस्तु समुच्चयमनुजानाति। तस्मात्, परिशिष्टोक्तादिव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनारभ्याधीताः सामान्याश्रयाविशेषाः स्वशास्त्रोक्तेऽपि प्रयोगे सन्निविशन्ते। अनन्यगतेर्व्वचनात्। परिशिष्टकारः खल्वस्माकमेतदनुजानाति,—'विशेषाः खलु सामान्याः'—इति ब्रुवाणः। पारतन्त्रिकस्य तु विशेषस्याभिनिवेशः सर्व्वतन्त्रविरुद्धएव। तदिमे सामान्याश्रयाविशेषाः स्वशास्त्राविरोधिनएव समुच्चीयन्ते, न पुनः स्वशास्त्रविरोधिनोऽपीत्यवगन्तव्यम्।

तेषां खल्वेषां सामान्याश्रयाणां विशेषाणामननुष्ठानेऽपि फलं भवत्येव। अनुष्ठाने पुनर्महानभ्युदयः। कथं ज्ञायते?। परिशिष्टकारैस्तथाऽनुशिष्टेः। तथाच पुरस्तादुदाहृतम्,—'बह्वल्पं वा स्वगृह्योक्तम्',—इति। 'ऊनोवाप्यतिरिक्तोवा'—इति च। तदनेन अल्पेपि स्वशास्त्रोक्ते कर्म्मणि कृते सर्व्वः कृतोभवति,—इति वचनेन तावन्मात्रकरणस्योपदेशेन च अन्तरेणापि सामान्याश्रयानां विशेषाणामनुष्ठानं फलसिद्धिर्विज्ञायते। मदनपारिजातेऽपि,—"असमर्थश्चेत् स्वगृह्योक्तमात्रमेव करोति, तावतैव तस्य शास्त्रार्थसिद्धेरुक्तत्वात्"—इति ब्रुवन्नेतदेवाह। अशक्यञ्च सर्व्वेषां सामान्याश्रयाणां विशेषाणामनुष्ठानम्। विक्षिप्ताः खल्वेते भूयःसु प्रदेशेषु प्रभूततराश्च भवन्ति, न शक्यन्ते सामस्त्येन ज्ञातुमनुष्ठातुञ्च। न चाशक्यमर्थं कर्त्तुं शास्त्रमस्मान् प्रेरयति। तथा सति तदेव न प्रमाणं भवेत्। विलुप्यन्ते किल कालवशाच्छास्त्राणि,—इत्यपि स्मर्त्तारोभवन्ति। तदेवं सामान्याश्रयाणां विशेषाणामननुष्ठानेऽपि फलसिद्धिर्भवतीति स्थितम्। अनुष्ठाने त्वमीषामभ्युदयविशेषोऽपि विज्ञायते। कुतएतत्?। यतस्तेषामप्यनुष्ठानाय शास्त्रमस्मान् प्रयुङ्क्ते। न हि तस्यानुष्ठानाय शास्त्र-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मस्मान् प्रयुङ्क्ते,—यस्यार्थोनास्ति। तथाच च्छन्दोगपरिशिष्टम्।

"यत्र स्यात् कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनीषिणः।

भूयस्त्वं ब्रुवते तत्र कृच्छ्रात् श्रेयोह्यवाप्यते"।

इति। अथैवं सामान्याश्रयाः ये प्रयोगविशेषाः पुराणादिषु स्मर्य्यन्ते, तेषामनर्थकत्वं प्राप्नोति। नैषदोषः। येषां स्वशाखायां प्रयोगविशेषोनोपदिश्यते, तेषां तद्विषयत्वोपपत्तेः। येषामप्यस्ति स्वशाखायां प्रयोगविशेषस्योपदेशः तेषामपि इच्छया तदनुष्ठानोपपत्तेश्च। यो हि सामान्यश्रयः प्रयोगः, स सर्व्वेषामेव भवितुमुचितः। सामान्याश्रयत्वादेव। स्वशास्त्रोक्तस्तु प्रयोगः स्वस्याभ्यर्हितः। तस्मात् स्वशास्त्रोक्तं प्रयोगमनुष्ठायान्ते कामं,—सामान्याश्रयोऽपि प्रयोगोऽनर्थकोमाभूत्—इति सोऽप्यनुष्ठीयताम्। न तु तद्रूपाश्रयेण स्वशास्त्रोक्तः प्रयोगोऽन्यथयितुं युक्तः। वैश्वदेवबलिकर्म्मणोः कात्यायनेन सुव्यक्तमेतस्यार्थस्योपदेशाच्च सर्व्वैवमवगच्छामः। तथाच च्छन्दोगपरिशिष्टम्।

"न स्यातां काम्यसामान्ये जुहोतिबलिकर्म्मणी।

पूर्व्वं नित्यविशेषोक्तजुहोतिबलिकर्म्मणोः।

काममन्ते भवेयातां न तु भवे कदाचन।

नैकस्मिन् कर्म्मणि तते कर्म्मान्यत्तायते यतः"।

इति। तदत्र, सामान्यविशेषयोः प्रयोगयोः कर्म्मान्यत्वं सुव्यक्तमेव-कात्यायनो ब्रवीति। तत् कुत्र कस्य गुणोपसंहारोभविष्यति। न खल्वन्यस्य कर्म्मणोगुणानामन्यस्मिन् कर्म्मण्युपसंहारोभवति। तस्मादियमेवावधारणा,—स्वशास्त्रोक्ते प्रयोगे परतन्त्रोक्तोविशेषोन करणीयः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सामान्याश्रयाः अनारभ्याधीतास्तु विशेषाः कर्त्तव्याः। परमेषामकरणेऽपि स्वशास्त्रोक्तमात्रस्यानुष्ठानादेव फलं भवति। करणे त्वभ्युदयः। सामान्याश्रयं प्रयोगान्तरन्तु, स्वशास्त्रोक्तप्रयोगस्यान्ते इच्छया पृथगनुष्ठेयम्। ततश्च, सामान्याश्रयस्य प्रयोगान्तरस्यानुष्ठाने महानभ्युदयः। अननुष्ठानेऽपि न फलहानिः,—इति। तदित्थं शास्त्रार्थमनुरुन्धानैरस्माभिः स्वशास्त्रोक्ते प्रयोगे परोक्तानां सामान्याश्रयप्रयोगान्तरोक्तानाञ्च विशेषाणां समुच्चयादुपारभ्यते। पूर्व्वे तु निबन्धारः,—एतदननुसन्धानाद्वा, पाण्डित्यातिशयख्यापनाद्वा, स्वशास्त्रोक्तस्य प्रयोगस्यान्तराऽन्तरा येभ्योयावन्तोऽरोचन्त ते तावतः परोक्तान् सामान्याश्रयप्रयोगान्तराभिहितांश्च विशेषानभिन्यवीविशन्त। तथाऽन्यत्रापि, प्रयोगान्तरविशेषान् प्रयोगान्तरे समुदचैषुः। तदश्रद्धेयम् ॥०॥ २३ ॥०॥

पित्र्ये द्विगुणाꣳस्तु दर्भान् ॥ २४ ॥

द्विगुणान् द्विगुणीकृतान् दर्भान् पित्र्ये कुर्य्यात्। दैवे तु ऋजवएव दर्भाभवन्ति। बौधायनोऽप्याह।

"प्रदक्षिणन्तु देवानां पितॄणामप्रदक्षिणम्।
देवानामृजवोदर्भाः पितॄणां द्विगुणाः स्मृताः"।

इति। तदनेन, यत् किञ्चित् पित्र्ये उत्स्रष्टव्यं तदपि द्विगुणैर्दर्भैः कर्त्तव्यम्,—इत्यर्थादुक्तं भवति। तथाच हारीतः।

"दर्भैरद्भिस्तिलैर्दत्तं तूष्णीमप्याप्नुते दिवम्।
विधिना त्वानुपूर्व्व्येण अक्षयं परिकल्पते"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। तुशब्दोविशेषार्थः। कथं नाम?। सपिण्डीकरणादूर्द्धं यत् क्रियते, तत्रैव पित्र्ये द्विगुणाः दर्भाः भवन्ति, सपिण्डीकरणान्तेषु तु ऋजवएव दर्भाः,—इति। तथाच शालङ्कायनः।

"सपिण्डीकरणं यावदृजुदर्भैः पितृक्रिया।
सपिण्डीकरणादूर्द्धं द्विगुणैर्विधिवद्भवेत्"।

इति ॥०॥ २४ ॥०॥

पवित्रपाणिर्द्द्याद।सीनः ॥ २५ ॥

सर्व्वत्र,—इति वक्ष्यमाणमिहापि संबध्यते। मध्यपठितस्य विशेषाभावात्। यत् किञ्चिदिह कर्म्मणि दैवे पित्र्ये च देयं, तत् सर्व्वं पवित्रपाणिरासीनश्च दद्यात्। कात्यायनोप्याह।

"सव्ये पाणौ कुशान् कृत्वा कुर्य्यादाचमनक्रियाम्।
ह्रस्वाः प्रवरणीयाः स्युः कुशादीर्घाश्च वर्हिषः।
दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्म्मणि।
सव्यः सोपग्रहः कार्य्योदक्षिणः सपवित्रकः"।

इति। अत्रच,—

"द्वयोस्तु पर्व्वणोर्मध्ये पवित्रं धारयेद् बुधः"।

इत्यादिकः स्मृत्यन्तरोक्तोविशेषोयथासम्भवं द्रष्टव्यः। केचित्तु, "पवित्रपाणिर्द्दद्यात्"—इति, "आसीनः सर्व्वं करोति"—इति च सूत्रद्वयमत्र पठन्ति। तत्र, व्यक्तएवार्थः ॥०॥ २५ ॥०॥

सर्व्वत्र प्रश्नेषु पंक्तिमर्द्धन्यं पृच्छति ॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्व्वत्र—दैवे पित्र्ये च प्रश्नेषु कर्त्तव्येषु पंक्तिश्रेष्ठं ब्राह्मणं पृच्छति॥ ॥०॥ २६ ॥०॥

सर्व्वान् वा ॥ २७ ॥

सर्व्वत्र प्रश्नेषु सर्व्वान् वा ब्राह्मणान् पृच्छति ॥०॥ २७ ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ श्राद्धकल्पभाष्ये प्रथमा काण्डिका ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धकल्पः ।

द्वितीया कण्डिका ।

आसनेषु दर्भानास्तीर्य्य ॥ १ ॥

येष्वासनेषु श्राद्धिब्राह्मणाः पूर्व्वमुपविष्टाः, तेष्वासनेषु दर्भानास्तीर्य्य । तदिदमासनेषु दर्भदानं तन्त्रेण करणीयम् । नैयायिकी हि तन्त्रता-नोपेक्षितुं युक्ता । कात्यायनोऽपि,—

"अर्घ्येऽक्षय्योदके चैव पिण्डदानेऽवनेजने ।

तन्त्रस्य विनिवृत्तिः स्यात् स्वधावाचनएवच" ।

इत्यर्घ्यादावेव तन्त्रनिषेधमुपदिशन्नन्यच तन्त्रमनुजानाति । तदूमे-कुशाः दैवे ब्राह्मणदक्षिणपार्श्वे पित्र्ये तु वामपार्श्वे दातव्याः,—इति महायशाः । वचनमप्युदाहरति ।

"पितृणामासनं दद्याद्वामपार्श्वे कुशान् सुधीः ।

दक्षिणे चैव देवानां सर्व्वदा श्राद्धकर्म्मसु" ।

इति । तानिमान् दर्भान् दैवे, विश्वेभ्योदेवेभ्यः स्वाहा,—इति वा, वषट्,—इति वा, नमः,—इति वा, पित्र्ये च "पितृभ्यः स्वधा"—इत्युत्सृज्य दत्त्वा, तेषु ब्राह्मणानुपवेशयेत् । तथाच कात्यायनः ।

"स्वाहाकार-वषट्कार-नमस्कारादिवौकसाम् ।

स्वधाकारः पितृणाञ्च हन्तकारोनृणां मतः" ।

इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"पितृभ्यइति दत्तेषु उपवेश्य कुशेषु तान्।
गोत्रनामभिरामन्त्र्य पितृनर्घ्यं प्रदापयेत्"।

इति च। तथा व्यासः।

"चतुर्थी चासने नित्यं सङ्कल्पे च विधीयते।
प्रथमा तर्पणे प्रोक्ता संबुद्धिमपरे जगुः"।

इति। तदिदं वचनमस्माकमपि भवति। कथं ज्ञायते?। अस्मत् परिशिष्टकृता कात्यायनेनैतस्यार्थस्य सुस्पष्टमुपदेशात्। 'संबुद्धिमपरे' —इत्यभिधानाच्च। तर्पणे हि संबुद्धिरन्येषां भवति। अस्माकन्तु प्रथमैव तत्र प्रयुज्यते। 'गोत्रस्तु तर्पणे प्रोक्तः'—इति गोभिलीय-वचनात्।

तदेवम्, पितृभ्यः,—इति दत्तेषु कुशेषु,—इत्यभिधाय, गोत्रनामभिः पितृनामन्त्र्य अर्घ्यं दद्यादिति ब्रुवाणः कात्यायनः कुशदाने पितॄणां गोत्रनामभिरामन्त्रणं नानुजानाति,—इत्यवगच्छामः। 'पितृभ्यइति दत्तेषु'—इति च 'इति' करणेन सुव्यक्तमेवमुपदेशात्।

"आसनावाहने पाद्ये अन्नदाने तथैवच।
अक्षय्ये पिण्डदाने च षट्सु नामादि कीर्त्तयेत्"।

इति श्लोकसंग्रहकारवाक्यमस्मत्प्रयोगव्यतिरिक्तविषयम्। कुतः?। अस्मत्परिशिष्टविरोधात्। षण्णामन्यत्राप्यर्घ्यादावस्माकं नामादि-कीर्त्तनस्योपदेशाच्च। यत्तु,—

"उपवेश्य कुशान् दद्यादृजुनैव हि पाणिना"।

इत्युक्तप्रकारेण पितृभ्योदत्तेषु कुशेषु,—इति नारायणोपाध्यायवर्णनम्। तदसङ्गतम्। यथाश्रुतार्थपरित्यागे मानाभावात्। व्यवहित

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योजनया खल्वेषोऽर्थः परिचिकल्पयिषितः,—'इति उक्तप्रकारेण पितृभ्योदत्तेषु',—इति। न चैषोऽर्थोलब्धुमात्मानं पारयति, शब्दस्य श्रवणमात्रात् योऽर्थोऽवगम्यते, तं बाधित्वा। अनर्थकत्वापत्तेश्च। आनर्थक्यं खल्वेवमितिकारस्यापद्येत। कथम्?। ऋजुना पाणिना कुशानां प्रदानं खल्वनेनैव पूर्व्वमुपदिष्टम्। तदर्थं पुनरितिकरणमिति कोनाम सचेतनोऽभिदध्यात्। त्यागवाक्योपदेशपरत्वे त्वितिकारस्योपादानमर्थवत् स्यात्। नचार्थवत् शास्त्रमनर्थकं कर्त्तुमुचितम्। तस्मान्न किञ्चिदेतत्।

यच्च रघुनन्दनेनोक्तम्,—'इति इत्यनेन गोत्रनामभिरामन्त्र्य इति प्रकंस्यमानप्रकारेण पितृभ्योदत्तेषु',—इति। तदपि न समीचीनम्। इति शब्दस्य प्रक्रान्तपरामर्शकतयैवोपपत्तौ सम्भवन्त्यां प्रकंस्यमानपरामर्शकत्वस्यासम्भवात्। यथाश्रुतार्थस्यैवमुपलभ्यते। तत्र च प्रमाणं नास्तीत्यवोचाम।

यच्चापरमुक्तम्,—'अत्रार्घ्योदकदानेतरत्र कुशासनदानादौ सर्व्वत्रच्छन्दोगानां येचात्रत्वेति पाठः'—इति। तदप्यसङ्गतम्। तत्रभवता गृह्यकारेण दर्भदानमतिक्रम्य तत्र तत्र तिलोदकादिदाने विशिष्य येचात्रत्वेतिमन्त्रस्योपदेशादासनदानादावप्रसक्तेः। गृह्यकारः खल्वस्माकं तेषु तेषु बहुष्वेव येचात्रत्वेतिमन्त्रमुपदिश्य कुत्रचिदेव दर्भदानादौ नोपदिदेश। अयमपि तत्र भवान् सूत्रकारोगृह्यानुक्ते कुत्रचित् तन्मन्त्रमुपदिशन्नपि दर्भदानादौ नोपदिशति। नचैवं सति, दर्भदानादावपि येचात्रत्वेतिमन्त्रपाठः,—इति साध्वी कल्पना भवति।

यदप्युक्तम्,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"बहूनामेकधर्म्माणामेकस्यापि यदुच्यते ।
सर्व्वेषामेव तत् कुर्य्यादेकरूपाहि ते स्मृताः" ।

इति बौधायनोक्ताकाङ्क्षया प्रसक्तेः,—इति। तदप्ययुक्तम् । कस्मात्?। यस्माद्बहूनां लब्धात्मनामेकं सिद्धवदनूद्य यत्र यत् किञ्चिदुच्यते, तत्र तथाविधानां सर्व्वेषामेव तद्भवतीत्यर्थोबौधायनवचनस्य। न खल्वत्र बहूनां लब्धात्मनामेकं सिद्धवदनूद्य येचात्रत्वेतिमन्त्रोविधीयते, किन्तु येचात्रत्वेतिमन्त्रविशिष्टमेव तत्तदङ्गं विशिष्य विधीयते। तच्च तथा विहितं सद्बहूनामेकं भवति,—इति नात्र बौधायनवचनस्यावसरः ।

यच्चापरमुक्तम्,—

"अचय्योदकदानञ्च अर्घ्यदानवदिष्यते ।
षष्ठ्यैव नित्यं तत् कुर्य्यान्नचतुर्थ्या कदाचन" ।

इति छन्दोगपरिशिष्टवचनेनापि तथा ज्ञाप्यते । न चतुर्थ्या,—इति तस्मै ते इत्यन्तस्य निषेधः। षष्ठ्यैव,—इत्यनेन गोत्रसंबन्धनाम्नां षष्ठ्यन्तताप्रतीतेः,—इति । तदपि न सुन्दरम् । वचनस्य तथार्थत्वे-प्रमाणाभावात् । षष्ठ्यैव इत्यनेन गोत्रसंबन्धनाम्नां षष्ठ्यन्तताप्रतीतेश्च । येचात्रत्वेतिमन्त्रोहि संबोध्यमानविषयएव भवितुमर्हति, न सर्व्वत्र । कथं ज्ञायते?। ते,—इति युष्मदः संबोध्यमानार्थ वाचितया षष्ठ्यन्तस्थलेऽप्रसक्तेः । भवानपि नात्र विप्रतिपद्यते । सोऽयं भवदीयएव बाणोभवन्तं प्रहरति। आह। न चतुर्थ्या कदाचन,—इति तर्हि वचनमनर्थकं स्यात्। षष्ठैव, इत्यनेनैव सिद्धेः । नैषदोषः। यदेव सिद्धं तदेवात्रानूद्यते सुखावबोधार्थम्। परेषां वा मतमनेन प्रतिषिध्यते । तस्मात् नित्यानुवादोविहितप्रतिषेधोवा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽयम्। विहितं केषाञ्चित् चतुर्थ्यां अक्षय्योदकदानम्। तदिह प्रतिषिध्यते। तथाच ब्राह्मे पुराणे।

"नान्दीमुखेभ्यस्त्वाक्षय्यं पितृभ्यइदमस्त्विति"।

इति। तथा चोक्तम्। "परोनित्यानुवादः स्यात्"—इति। "विहित-प्रतिषेधो वा"—इति च। एवकारेणैव तद्व्यवच्छिद्यते,—इति चेत्, तद्देवैतेन दर्शयति। "तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते ऽनाय"—इति, "महेश्वरस्त्र्यम्बकएव नापरः"—इति चैव-मादिवत्। अथाक्षय्योदकदानेऽपि ये चात्रत्वेति मन्त्रस्य प्रसङ्गं, तस्यैव च 'न चतुर्थ्यां'—इत्यनेन निषेधं विना न तुष्यसि। तर्हि 'अर्घ्यदानवत्'—इत्यतिदेशेन तत्र मन्त्रस्य प्रसङ्गः तस्यैवच निषेधः,—इति सन्तुष्यताम्। आसनादिदानेऽप्यनेन वचनेन समन्त्रः कथं ज्ञाप्यते,—इति न खल्वधिगच्छामि।

अथ, मा तावत् बौधायनवचनेनासनदानादौ मन्त्रः प्रसञ्जि, च्छन्दोगपरिशिष्टवचनेनचासौ मा विज्ञापि, तथापि भूयःसु प्रदेशेषु गोभिलीयं विशिष्योपदेशं प्रदर्शकमभ्युपगम्य येष्वन्येषु स मन्त्रोनो-पदिष्टः, तेष्वपि स कल्पनीयः,—इति ब्रवीमि,—इति चेत्। निरङ्कुश-त्वात्ते तुण्डस्यैवं ब्रवीषि, न तु प्रमाणोपेतं ब्रवीषि। परिशिष्टकारः खल्वस्माकं दर्भासनदाने चतुर्थ्यन्तं वाक्यमुपदिशति, त्वन्तु कल्पना-रसिकस्तत्रापि येचात्रत्वेतिमन्त्रं कल्पयसि, तत् किमत्र ब्रूमः। ननु,

"सर्व्वत्रैव पितः प्रोक्तं पिता तर्पणकर्म्मणि।

पितुरक्षय्यकाले च कर्त्ता एवं न मुह्यति"।

इति स्नानसूत्रपरिशिष्टवचने 'सर्व्वत्र' ग्रहणेन व्याप्त्यवगमात् आसन

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दानेऽपि संबोधनविभक्त्या वाक्यरचना प्राप्नोति? । सत्यं प्राप्नोति, 'पितृभ्यइति दत्तेषु'—इति कात्यायनीयविशेषवचनानुरोधात्तु नैवं क्रियते । न हि सामान्यवचनव्यपाश्रयेण विशेषवचनमुपरोद्धव्यं भवति । यदाहवनीयादौ हि सामान्यस्य विशेषपरत्वमुक्तम् । न सामान्यव्यपाश्रयेण विशेषस्योपरोधः । 'पदार्थान्तरसाकाङ्क्षविशेषमपहाय तदितरत्र सामान्यमन्वेति'—इति भवानेवाह । अपिच । स्नानसूत्रपरिशिष्टकारः खल्वासनादौ संबोधनविभक्तिं नोपदिदेश, किन्त्वर्घ्यादावेव । कथं ज्ञायते? ।

"शर्म्मन्नर्घ्यादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि ।
शर्म्मणोऽक्षय्यकाले तु कर्त्ता एवं न मुह्यति" ।

इति तत्परवचने तेनैव सुव्यक्तमस्यार्थस्योपदेशात् । इत्यस्तु किं विस्तरेण ॥०॥ १ ॥०॥

यवानादायोङ्कारं कृत्वा विश्वान् देवानावाहयिष्य इति पृच्छति ॥ २ ॥

यवानक्षतान् दक्षहस्तेनादाय । कुतः? ।

"कर्म्मोपदिश्यते यत्र कर्त्तुरङ्गं न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः" ।

इति छन्दोगपरिशिष्टवचनात् । एवमन्यत्रापि । निगदव्याख्यातमन्यत् । ॐकारश्चात्र सन्ततः करणीयः । तथाच गृह्यासंग्रहः ।

"सन्ततः प्रणवः कार्य्यः पितृयज्ञेषु ब्राह्मणैः ।
उपांशुकरणञ्चापि सह कर्त्रा समस्वरैः" ।

इति ॥०॥ २ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आवाहयेत्यनुज्ञातो विश्वेदेवासआगत शृणुताम इमᳲहवमेदं वर्हिर्निषीदत, विश्वेदेवाः शृणुतेमᳲहवम्मे ये अन्तरीक्षे ये उपद्यविष्ठ ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन् वर्हिषि मादयध्वम्, ओषधयः संवदन्ते सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसीति ॥ ३ ॥

आवाहय,—इति ब्राह्मणैरनुज्ञातः कृतानुज्ञः कर्त्ता, विश्वेदेवासः,—इत्यादिभिस्त्रिभिर्मन्त्रैः, 'आवाहयेत्'—इति सूत्रशेषः। तत्र खल्वाद्यौ द्वौ मन्त्रावावाहनप्रकाशनसामार्थ्यादावाहने समवेतार्थावेव, तृतीयस्त्वसमवेतार्थतया सर्व्वथैवादृष्टार्थः। यद्यपि, पूर्व्वमादत्तानां यवानां विनियोगविशेषोन सूचितः, तथापि इदानीं तैरन्ववकिरणं करणीयम्। कृतार्थाः खल्विमे यवाः अवश्यं केनचित् प्रकारेण त्यक्तव्याः। तच्चेत्थं कर्त्तव्यम्। किं कारणम्?। पित्रावाहने खल्वावाहनात् परतस्तिलैरन्ववकिरणं सूचयिष्यति। तदत्रापि तथैव वर्णयितुं युक्तम्,—इति। स्मृतिष्वप्येवं पश्यामः। तथाच याज्ञवल्क्यः।

"यवैरन्ववकीर्य्याथ भाजने सपवित्रके"।

इत्यादि बहुलम्। यवैरन्ववकिरणञ्चेदं मन्त्रस्यानुपदेशादमन्त्रकं करणीयम्,—इति पितृदयितापितृभक्तिमहायशःप्रभृतयः। यवोऽसीतिमन्त्रेण,—इति कल्पतरुकृत्यप्रदीपादयः। अत्र केचित् शाख्यायनीयं कात्यायनश्राद्धसूत्रञ्च पश्यन्तः, विश्वेदेवासः,—इति प्रथममन्त्रेणा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाह्य यवान् विकीर्य्य, विश्वेदेवाः शृणुतेमं हवम्,—इत्यादिमन्त्रद्वयं जप्तव्यम्,—इति वर्णयन्ति। तदसङ्गतम्। उत्तरमन्त्रयोर्जपे विनियोजकप्रमाणाभावात्। अस्मत्सूत्रकारेण मन्त्रत्रयपाठानन्तरम् 'इति' कारकरणान्मन्त्रत्रयस्यैवावाहने विनियोगावगतेः। जपस्याप्यनुपदेशाच्च। "तत उत्तरजतं जपति"—इत्यभिधाय, शाख्यायनस्योत्तरमन्त्रद्वयोपदेशः तच्छाखिनां भविष्यति। कात्यायनोऽपि माध्यन्दिनीयानां सूत्रकारः,—इति तदुपदेशोऽप्यस्माकं न भवति। यच्च रघुनन्दनेन,—एदं वर्हिर्निषीदत,—इत्यनन्तरम्,—"इत्यावाह्य विकिरेत्"—इति लिखितम्। तत् न सूत्रप्रतीकम्, अपितु सूत्रस्य स्वाभिमतं व्याख्यानम्,—इति लिख्यते। कुतः?। सूत्रग्रन्थे तदभावात्। तन्मतत्रादिनापि भाष्यकारेण शाख्यायनवचनावष्टम्भेन तथा वर्णनाच्च। यदपि, "आवाहयेत्यनुज्ञातोविश्वेदेवासआगत दाश्वेसो दाशुषः सत इति वा यवैरवकीर्य्य विश्वेदेवाः शृणुतं हवं मे ये अन्तरीक्षे यउपद्यविष्ठ ये अग्निजिह्वा उतवा यजत्रासद्यास्मिन् वर्हिषिमादयध्वम्"—इतिच्छन्दोगापरसूत्रम्। तदपि नैतत्प्रयोगे विनिशते। तदुक्तस्य वैकल्पिकमन्त्रान्तरस्यात्रानुपदेशात्। अत्रोपदिष्टस्य 'ओषधय'—इत्यादि मन्त्रान्तरस्य तत्रानुपदेशाच्च। 'विश्वेदेवाः'—इति मन्त्रोऽप्येतस्मादिलक्षणएव तत्र पठितः ॥•॥ ३ ॥०॥

अथ पितृनावाहयिष्यइति पृच्छति ॥ ४ ॥

अथेत्यानन्तर्य्यार्थम्। कथं नाम?। दक्षहस्तेन तिलानादाय ॐकारं कृत्वा पितृनावाहयिष्ये,—इति पृच्छति,—इति। कथं ज्ञायते?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवानामावाहने यवानामिव पितृणामावाहनेऽपि तिलानामादानस्य ॐकारकरणस्य चोचितत्वात्। परतस्तिलविकरणस्य सूत्रणाच्चैवमवगच्छामः। "तिलानादायोङ्कारं कृत्वाऽथ पितृनावाहयिष्यइति पृच्छति"—इति तत्वकारपाठे व्यक्तोऽयमर्थः। छन्दोगापरसूत्रेऽप्येवमेव सूत्रपाठः। पितृन्,—इत्याद्युपादानात् पितृनावाहयिष्ये,—इत्येव वक्तव्यम्, न तु तेषां नामगोत्राद्युल्लेखः,—इत्युक्तप्रायम् ॥०॥४॥०॥

आवाहयेत्यनुज्ञातउशन्तस्त्वा निधीमह्युशन्तः समिधीमहि उशन्नुशत आवह पितॄन् हविषे अत्तवे, एत पितरः सोम्यासोगम्भीरेभिः पथिभिः पूर्व्विणेभिर्दत्तास्मभ्यं द्रविणेह भद्रꣳ रयिञ्च नः सर्व्ववीरं नियच्छत, आयन्तु नः पितरः सोम्यासोऽग्निस्वात्ताः पथिभिर्देवयानैरस्मिन् यज्ञे स्वधयामदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मानिति ॥५॥

'इति' एतैर्मन्त्रैः, पितृनावाहयेत्,—इति सूत्रशेषः। अत्र च, 'एत पितरः,—इत्यनन्तरं उशन्तस्त्वेति मूलभूतगोभिलगृह्ये तद्भाष्यद्वये च पितृदयितायाञ्च लिखितेन मैथिलानामेतद्विपरीतलिखनं हेयम्'—इति तत्वकारेणोक्तम्। वयन्तु मूलभूतश्राद्धकल्पे उशन्तस्त्वेत्यनन्तरमेव एत पितरइति मन्त्रं पश्यामः। तद्भाष्यकृता महायशसाऽपि तथैव क्रमेण मन्त्रावेतौ पठितौ। गृह्ये च गोभिलीये न खल्वावाहनं सूचितं न वैतौ मन्त्रौ पठितौ,—इति ॥०॥ ५ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपहता असुरारक्षांसि वेदिषद इति तिलैरन्ववकीर्य्यापउपस्पृशति ॥ ६ ॥

स्पष्टार्थं सूत्रम्। तदत्र, अपामुपस्पर्शे पितृमन्त्रोच्चारणं वीजम्। तस्मादन्यत्राप्येवंविधस्थले अपामुपस्पर्शः करणीयः। तथाच छन्दोगपरिशिष्टम्।

"पितृमन्त्रानुहरणे आत्मालम्भे अवेक्षणे।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे।
मार्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे।
निमित्तेष्वेषु सर्व्वेषु कर्म्म कुर्व्वन्नपः स्पृशेत्"।

इति। तदिदमावाहनं पितृपक्षे मातामहपक्षे च पृथक् पृथक् करणीयम्। कथं ज्ञायते?। 'मातामहानाञ्चैवम्'—इति सूत्रेण मातामहपक्षेऽपि कृत्स्नविध्यतिदेशात् पृथगेव करणं वर्णयितुमुचितम्,—इति। तन्त्रं वा वैश्वदेविकम्'—इति च सूचयन् वैश्वदेविकादन्यत्र तन्त्रं नानुजानात्याचार्य्यः,—इत्यवगच्छामः। अलसास्त्वत्रापि तन्त्रमनुतिष्ठन्ति ॥०॥ ६ ॥०॥

अथेदानीमर्घं वक्तुमुपक्रमते,—

यज्ञियवृक्षचमसेषु पवित्रान्तर्हितेषु ॥ ७ ॥

यज्ञेभ्योहिताः ये वृक्षास्तइमे यज्ञियवृक्षाः। ते खल्विमे खादिराः पालाशाश्च भवन्ति। अभावे पुनरमीषां विभीतकादिवर्ज्जं सर्व्वे वनस्पतयः। कथं ज्ञायते?। अस्मद्गृह्यकारेणामीषां यज्ञकर्म्मण्युपदेशात्। तथाच गृह्यसूत्रम्। "अथेध्मानुपकल्पयते खादिरान् वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पालाशान् वा"—इति। "खादिरपालाशालाभे विभीतक-तिल्वक-बाधक-नीव-निम्ब-शाल्मल्यरलुदधित्थ-कोविदार-श्लेष्मातकवर्ज्जं सर्व्व-वनस्पतीनामिध्मोयथार्थं स्यात्"—इति च। स्मरन्ति च।

"पालाशे ब्रह्मवर्च्चः स्यादाश्वत्थे राजयोग्यता।
सर्व्वभूताधिपत्यञ्च प्लक्षे नित्यमुदाहृतम्"।

इत्यादि। पलाशविकङ्कतकाश्मरीविल्वखदिरोडुम्बरानपरे यज्ञिय-वृक्षान् मन्यन्ते। "ते वै पालाशाः स्युरथवा वैकङ्कतविल्वाः खादि-रौडुम्बराः काश्मर्य्यमयाः एते हि वृक्षाः"—इत्यपि निगमो भवति।

यज्ञियवृक्षाणां चमसेषु। यज्ञियवृक्षशाखाभिर्निर्म्मिताः अविषमाः प्रादेशदीर्घाश्चतुरङ्गुलविस्तृताश्चतुरङ्गुलोर्द्धाश्चतुरस्राः मध्यविलाश्च पात्र-विशेषाश्चमसाः भण्यन्ते। तथा चोक्तम्।

"तच्छाखाश्च समादीर्घाः प्रादेशाश्चतुरङ्गुलाः।
तथैवोत्सेधतोज्ञेयाश्चतुरस्रास्तइत्यपि"।

इति। तेषु खल्वित्थम्भूतेषु चमसेषु पवित्रान्तर्हितेषु। पवित्रैः,

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेवच।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्"।

इत्युक्तलक्षणैः, अन्तर्हितेषु व्यवहितेष्वित्यर्थः। पवित्राणि उक्तलक्ष-णानि अन्तर् मध्ये हितानि निहितानि वा येषां तेषु पवित्रान्तर्हितेषु, यज्ञियवृक्षचमसेषु,—'अप आसिञ्चति'—इति वक्ष्यमाणेन संबन्धः। एतदुक्तं भवति। चमसान् स्थापयित्वा तेषु दैवे प्रागग्रं पित्र्ये च दक्षिणाग्राणि पवित्राणि स्थापयेत्,—इति। तानि खल्वेतानि पवि-त्राणि 'पवित्रे स्थोवैष्णव्यौ'—इत्यनेन छित्वा, 'विष्णोर्मनसा पूते स्थः'—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यनुमार्ष्टव्यानि। ततश्चमसेषु स्थापयितव्यानि। कथमनुक्तं क्रियते?। उच्यते। प्रादेशमात्रं हि पवित्रमुपदिशन्ति। न खल्वच्छिन्नानां भवति प्रादेशमात्रता। न च विनैवानुमार्जनं कर्म्मार्हता युक्ता। तदेवं छेदनमनुमार्जनञ्चैषमार्थप्राप्तम्। एवमनुक्तमपि करिष्यते। पवित्र-विधौ च खल्वस्माकमित्थमुपदेशः। तथाच गृह्यसूत्रम्। "ततएव वर्हिषः प्रादेशमात्रे पवित्रे कुरुते" "ओषधिमन्तर्धाय छिनत्ति न नखेन पवित्रे स्थोवैष्णव्याविति" "अथैने अद्भिरनुमार्ष्टि विष्णोर्मनसा पूते स्थ इति"—इति ॥०॥ ७ ॥०॥

एकैकस्मिन्नप आसिञ्चति-शन्नोदेवीरिति ॥ ८ ॥

एकस्मिन् एकस्मिन् चमसे अपउदकम् आसिञ्चति शन्नोदेवीरिति-मन्त्रेण दैवपूर्व्वम्। एकैकस्मिन्,—इति वीप्सया प्रतिपात्रं मन्त्रा-वृत्तिं दर्शयति। तेनात्र तन्त्रमनुष्ठानं न भवति। कात्यायनोऽपि, 'अर्घ्येऽवत्योदके चैव'—इत्यादिना तन्त्रस्य निवृत्तिमाह॥०॥ ८ ॥०॥

एकैकस्मिन्नेव यवानावपति यवोऽसि यवयास्मद्-द्वेषो यवयारातीरिति ॥ ९ ॥

एकैकस्मिन्नेव पात्रे यवानावपति यवोसीतिमन्त्रेण। तदिदं दैवार्घ्य-पात्राभिप्रायं सूत्रम्। कथं ज्ञायते?। यवावपनस्योपदेशात्। उत्तरत्र 'पितॄन्'—इति करणाच्च। वीप्सा तर्ह्यनर्थिका भवत्यसङ्गता च। किं कारणम्?। एकं खल्वर्घ्यपात्रं दैवे भवति,—इति। कथं पुनर्ज्ञायते,—एकमर्घ्यपात्रं दैवे भवति?—इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"यवैरन्ववकीर्य्याथ भाजने सपवित्रके"।

इति याज्ञवल्क्यादि स्मृतिष्वेकवचनोपदेशात्,—इति चेत्। किमत्र भवतः सूत्रकारस्य 'एकैकस्मिन्'—इति वीप्सां न पश्यसि ?। याज्ञवल्क्यस्तु नास्मत्प्रयोगस्योपदेष्टा। तथापि तद्वचनस्थमेकवचनं दृष्ट्वा पात्रमेकं निश्चिनोषि। अस्मत्सूत्रकारोक्तां वीप्सां पश्यन्नपि तत्र सन्देग्धि। सेयं पितरमुपेक्ष्य श्वशुरे गाढ़ा भक्तिः। अव्यवस्था तर्हि प्राप्नोति? न खलु ज्ञायते,—कियत्सु पात्रेष्वेषा वीप्सा विश्रमिष्यति,—इति। एवन्तर्हि सामर्थ्याद्व्यवस्था भविष्यति। पात्रे खल्वेकस्मिन् अचरितार्था वीप्सा पात्रद्वयं कल्पयिष्यति,—इति। ननु त्रिचतुरादीन्यपि शक्नोति कल्पयितुम्?। शक्नोति। द्वयोः कृतार्थत्वात्तु न कल्पयति। या हि वीप्सा त्रिचतुरादीनि पात्राणि कल्पयति,—कल्पयत्यसौ द्वे अपि पात्रे। कल्पयति चेत्, तत्र चरितार्था सती नाधिककल्पनायै भवति,—इति। अथ, शास्त्रान्तरदर्शनं विना न ते परितोषः, दृश्यतां तदपि। यथा मत्स्यपुराणम्।

"विश्वान् देवान् यवैः पुष्पैरभ्यर्च्चासनपूर्व्वकम्।
पूरयेत् पात्रयुग्मन्तु स्थाप्य दर्भपवित्रके।
शन्नोदेवीत्यपः कुर्य्यात् यवोऽसीति यवांस्तथा"।

इति। पुष्करखेमाद्रवसोरुभयत्वादर्घ्योभयत्वं प्रीत्यतिशयार्थम्,—इति शूलपाणिः। विश्वदेवस्थाने अर्घ्यपात्रमेकं देवा,—इति मदनपारिजातः।

केचित् इदं सूत्रम्, उत्तरसूत्रे 'पितॄन्'—इति च, न पठन्ति। तेषां दैवेऽपि पात्रे उत्तरसूत्रानुसारात् तिलानामावपनं स्यात्, यवानां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा?—इति विचारणीयम्। यवानाम्—इति ब्रूमः। कुतः?। यतः,—

"सदा परिचरेद्भक्त्या पितॄनप्यत्र दैववत्"।

इति कात्यायनेन वृद्धिश्राद्धे पितॄणां देववत् परिचरणमुक्तम्। "यवैस्तिलार्थः"—इत्यनेन वृद्धिश्राद्धे यवैस्तिलार्थः करणीयः,—इति सूत्रकारोऽप्युपदेक्ष्यति। अस्मात् कारणादवगच्छामः,—पितॄणां योऽर्थस्तिलैः क्रियते, देवानां सोऽर्थोयवैः करणीयः,—इति। अपरे पुनरेतदविद्वांसः सूत्रञ्चेदमपठन्तः,—दैवेऽपि पात्रे तिलानावपन्ति। ॥०॥ ९ ॥०॥

पितॄनेकैकस्मिन्नेव तिलानावपति,—तिलोऽसि सोमदेवत्योगोसवोदेवनिर्म्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहेति॥ ॥ १० ॥

पितॄन्,—इति व्यत्ययात् षष्ठ्यर्थे द्वितीया। पितॄणामेकैकस्मिन्नेव पात्रे,—इत्यर्थः। पितॄन् उद्दिश्य,—इति वा वर्णनीयम्। केचित् 'पितॄन्'—इति न पठन्ति। आह। एकैकस्मिन्,—इत्यनुवर्त्तिष्यते, किमर्थं पुनर्निर्दिश्यते?। उच्यते। तिलावपनमन्त्रे बहुवचनान्तपितृपदश्रवणात् सकृन्मन्त्रपाठेन एकैकस्मिन् पात्रे तिलवपनं कश्चिदाशङ्कीत, तन्माशङ्काङ्क्षीदित्येतदर्थं पुनरिह निर्देशः ॥०॥ १० ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौवर्णराजतौदुम्बरखड्गमणिमयानां पात्राणा-मन्यतमेषु वा ॥ ११ ॥

औदुम्बरं ताम्रमयम्। कथं ज्ञायते?। सौवर्णादिसाहचर्य्यात्। वृक्ष-मयानां 'यज्ञियवृक्षचमसेषु'—इत्यनेनैव गतार्थत्वाच्च। खड्गमयं गण्डकशिरोऽस्थिनिर्म्मितम्। मणिमयानि मारकतस्फाटिकादीनि। तेषां खल्वेषां पात्राणामन्यतमेषु पात्रेषु वा 'पवित्रान्तर्हितेषु'—इत्यादिगतेन संबन्धः। वाशब्दो विकल्पार्थः। तानि खल्वेतानि पात्राणि वैकल्पिकानि,—इत्येकजातीयान्येव सर्व्वाण्यर्घ्यपात्राणि कर्त्त-व्यानि। न पुनः कानिचित् सौवर्णानि, कानिचित् राजतानि, कानिचिच्चापरापराणि। किं कारणम्?। 'विकल्पे हि नोभयः शास्त्रार्थः'—इत्युक्तम्॥०॥ ११ ॥०॥

पत्रपुटेषु ॥ १२ ॥

वाशब्दोऽत्र लुप्तवत् द्रष्टव्यः, पूर्व्वस्माद्वा अनुषञ्जनीयः। यज्ञियवृक्षाणां पत्रपुटेषु वा पवित्रान्तर्हितेषु,—इत्यादिपूर्व्ववदर्थः ॥०॥ १२ ॥०॥

यानि वा विद्यन्ते ॥ १३ ॥

यानि वा अनिषिद्धानि कदलीवृक्षत्वगादीनि लभ्यन्ते, तेषु वा पवि-त्रान्तर्हितेषु,—इत्यादिगतेन संबन्धः ॥०॥ १३ ॥०॥

एकैकस्यैकेकेन ददाति सपवित्रेषु हस्तेषु ॥ १४ ॥

एकैकस्य पित्रादेः एकैकेन प्रत्येकेन ददाति उत्सृजति। सपवित्रेषु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पवित्रसहितेषु ब्राह्मणानां हस्तेषु सत्सु,—इत्यर्थः। एतदनेनोक्तं भवति। ब्राह्मणानां हस्तेषु प्रथमं पवित्राणि दत्त्वा पश्चादर्घमुत्स्रष्टव्यम—इति।

एवं वा—

एकैकस्य पितृब्राह्मणादेः सपवित्रेषु हस्तेषु सत्सु, प्रत्येकेनार्घ्यं ददाति। तस्मात्, प्रत्येकब्राह्मणहस्तेषु पवित्राणि दातव्यानि, न त्वाभ्युदयिकवत् मिलितेषु हस्तेषु,—इति सिद्धं भवति।

इदमिदानीं सन्दिह्यते। सपवित्रेषु हस्तेषु,—इत्यनेन ब्राह्मणहस्तेषु पवित्राणां प्रदानं तावद्गम्यते, न ज्ञायते,—किमर्घपात्रस्थान्येव पवित्राणि ब्राह्मणानां हस्तेषु इदानीं दातव्यानि, अथवा तेभ्योऽन्यानि?—इति। तेभ्योऽन्यानि,—इति प्रतिपद्यामहे। कुतः?। सपवित्रेषु हस्तेषु अर्घ्यं ददाति,—इत्युक्ते पवित्रान्तरस्यैवावगतेः। न खल्वर्घ्यं पवित्ररहितं देयमिति युक्तमभ्युपगन्तुम्। पवित्रसहितं ह्यर्घ्यं भवति। पवित्रं खल्वेतदर्घ्यस्योपकरोति,—इत्यत्र न विवादः। उपकरोति चेत्, नूनं पवित्रसहितमेवार्घ्यं भवति। तदेवं सति न युज्यते विनैव वचनं तद्रहितमर्घ्यमुत्स्रष्टुम्। शक्यं हि सपवित्रेषु हस्तेषु,—इति वचनमन्यथाऽपि वर्णयितुम्। उत्सर्गात् पूर्वमेव चेत् पवित्राणि प्रतिपाद्यन्ते, अर्घ्यार्थतैवामीषां न स्यात्। कात्यायनोऽपि,—

"गोत्रनामभिरामन्त्र्य पितॄनर्घ्यं प्रदापयेत्"।

इत्यर्घोत्सर्गमभिधाय,

"ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्रपवित्रकान्।
कृत्वाऽर्घ्यं संप्रदातव्यं नैकैकस्यात्र दीयते"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति परतो ब्रुवन् उत्सर्गानन्तरमेव अर्घ्यीयपवित्राणां ब्राह्मणेषु प्रतिपादनमनुजानाति। अपरे पुनरेतदविद्वांसोभाषन्ते,—दर्भाणां निर्म्माल्यत्वाभावात् अर्घ्यपात्रीयाण्येव पवित्राणि इदानीं ब्राह्मणहस्तेषु दत्त्वा ततोऽर्घ्यमुत्सृष्टव्यम्,—इति ॥०॥ १४ ॥०॥

केन मन्त्रेण ददाति?। उच्यते,—

याद्दिव्यापः पयसा संवभूवुर्या अन्तरिक्षा उतपार्थिवीर्या हिरण्यवर्णा यज्ञियास्तानआपः शिवाः शंस्योनाः सुह वा भवन्तु असावेतत्ते अर्घ्यं येचात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति ॥ १५ ॥

यादिव्या इति मन्त्रं पठित्वा असावित्यादिना दद्यात्। अत्रासाविति संबोधनान्तनामाद्युल्लेखाभिप्रायं वचनम्। तथाच कात्यायनः।

"गोत्रनामभिरामन्त्र्य पितृनर्घं प्रदापयेत्"।

इति।

"गोत्रं स्वरान्तं सर्व्वत्र गोत्रस्याक्षय्यकर्म्मणि।
गोत्रस्तु तर्पणे प्रोक्तः कर्त्ता एवं न मुह्यति।
सर्व्वत्रैव पितः प्रोक्तं पिता तर्पणकर्म्मणि।
पितुरक्षय्यकाले च कर्त्ता एवं न मुह्यति।
शर्म्मन्नर्घ्यादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि।
शर्म्मणोऽक्षय्यकाले च कर्त्ता एवं न मुह्यति"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति चास्मदीये स्नानसूत्रपरिशिष्टे। निर्देशक्रमश्चामीषामस्मादेव पाठक्रमात् कल्पनीयः। तेन, यादिव्या,—इति मन्त्रमुच्चार्य्य, अमुकगोत्र पितरमुकशर्म्मन्नेतत्ते अर्घ्यं येचात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा,—इत्ययमस्माकमुत्सर्गवाक्यप्रयोगः। यत् पुनः स्मरणम्,—

"संबन्धं प्रथमं ब्रूयाद्गोत्रं नाम तथैव च।
पश्चाद्रूपं विजानीयात् क्रमएष सनातनः"।

इति। तदस्मत्प्रयोगव्यतिरिक्तविषयम्। अस्मच्छास्त्रे रूपोल्लेखस्याननुशासनात्। वह्वृचानां खल्वसावस्ति। "गोत्रनामरूपाणां पितॄणामिदमासनम्"—इत्याद्याश्वलायनगृह्यपरिशिष्टदर्शनात्। गोत्रादीनामेतद्विपरीतक्रमेणास्मत्परिशिष्टे पाठाच्च। अनयैव युक्त्या,—

"सकारेणैव कर्त्तव्यं गोत्रं सर्व्वत्र धीमता।
सकारः कुतपो ज्ञेयस्तस्मात् यत्नेन तं वदेत्"।

इति वचनोपदिष्टं सगोत्रपदमप्यस्माभिर्नोल्लेखनीयम्। किन्त्वस्मत्परिशिष्टकारोक्तं गोत्रपदमेव। एवमस्मत्परिशिष्टे पितृपदमात्रकीर्त्तनात् पितरित्यादिकमेव वक्तव्यं नत्वस्मत्पितरित्यादि। संबन्धिशब्दः खल्वेष स्वमेव संबन्धिनमुपस्थापयति,—इति सुकरोयजमानपित्रादीनामवगमः। कथमन्यथा अस्मदन्नमित्यपि नोल्लिख्यते। अतएव "पदपांशुना यूपमनक्ति" "सप्तमं पदं गृह्णाति"—इत्यत्र सोमक्रयार्थमुपस्थितायाअरुणायाएव पदप्रतिपत्तिरिति सिद्धान्तः। सोऽयं पदिन्यायोऽत्र शरणम्। अस्मत्पितरित्याद्युल्लेखे तु शब्दाध्याहारनयोमूलम्। तदेवं नयभेदादुभयमप्युपपन्नम्। तथाचोभययथादर्शनम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'एत पितरः'—इति। 'आ यन्तु नः पितरः'—इति च। परिशिष्टकारोक्तः पितरित्याद्युल्लेखएव त्वस्माकमादरणीयः।

स खल्वयं पित्र्यर्घ्यदानप्रकारः। दैवार्घ्यन्तु या दिव्या—इति मन्त्रं पठित्वा विश्वेदेवाएतत्तेऽर्घ्यं स्वाहा,—इति वा, नमः—इति वा, वषट्—इति वा दद्यात्। पितॄणामेव स्वधाकारस्य कात्यायनेनोक्तत्वात् स्वधापदयुक्तयेचात्रत्वेतिमन्त्रस्य दैवेऽनभिनिवेशात्। अस्तु तर्हि मन्त्रस्यस्वधापदएव स्वाहादिपदोहः?। नैतत् शक्यम्। विकृतावेवोहस्य अध्वरमीमांसायां सिद्धान्तितत्वात्। नचात्र प्रकृतिविकारभावोऽस्ति। असमवेतार्थत्वाच्च। दैवे खल्वयं मन्त्रोन समवैति। किं कारणम्?।

"सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते।
सर्व्वंशहरा माता इति धर्मेषु निश्चयः"।

इत्यादिवचनैर्यथा पितॄननु सन्ति भोक्तारः, नैवं देवाननु केऽपि भुञ्जते। तस्मादसमवेतार्थोमन्त्रोकथमिव दैवेऽप्यङ्गभावमुपगच्छतु। अर्थाभिधानसामर्थ्याद्धि मन्त्राणामङ्गभावं तत्रभवन्तोमन्यन्ते। तथा चोक्तम्। "अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यात्"—इति। अथ, मन्त्रस्यादृष्टार्थत्वे किं बाधकम्?। अदृष्टार्थत्वे च दैवेऽपि पठनीयो भविष्यति। बाधकमपि वक्ष्यामः। साधकमपि शृणुमः। सामान्येनाभिधानमिति चेत्। इति चेत् पश्यसि,—सामान्येनाभिधान दैवेऽपि मन्त्रपाठस्य साधकम्—इति। तत्र ब्रूमः। सामान्येनाभिधानमर्थोविशेक्ष्यति। अर्थाभिधानसामर्थ्याद्धि मन्त्राणामङ्गभावमवोचाम। एवन्तावत् साधकं नास्तीत्युक्तम्। बाधकमपि शृणु। यस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हि मन्त्रस्य क्वचित् दृष्टार्थतासम्भवः, तस्य नादृष्टार्थतामनुमन्यन्ते मीमांसकाः। तथा चोक्तम्।

"यस्य दृष्टं न लभ्येत तस्यादृष्टप्रकल्पनम्।
लभ्यतेऽर्थस्मृतिर्दृष्टा मन्त्रोच्चारणतस्त्विह।
अर्थस्मृतिः प्रयोगार्था प्रयोगाच्च फलोदयः।
इति दृष्टार्थसम्पत्तौ नादृष्टमिह कल्प्यते।

इति। अपिच। यस्मादयं सूत्रकारोऽनुपदमेव, "अपउपस्पृश्यैव-मेवेतरयोः"—इति करोति, तस्मादवगच्छामः,—पित्रर्थमभिप्रेत्यैव येचात्रत्वामिति मन्त्रः पठितः,—इति। या दिव्या,—इति मन्त्रोऽपि तर्हि दैवे न प्राप्नोति?। प्राप्नोति,—इति पश्यामः। समवैति खल्वयमाशंसामन्त्रो दैवेऽपि। समवैति चेत्,—प्राप्नोत्यपि। अनयैव युक्त्या एतत्ते अर्घ्यमित्यपि दैवे प्रयोच्यते। कथमर्द्धजरतीयं वर्ण्यते,—एतत्ते अर्घ्यमित्यन्तं दैवसाधारणं ये चात्रत्वामिति मन्त्रः पुनरसाधारणः पित्र्ये,—इति?। किं क्रियतां यत्रान्या गतिर्न सम्भवति। भवतामप्येतत समानम्। कथमन्यथा मन्त्रस्थः स्वधाशब्दोऽपि दैवे न प्रयुज्यते। प्रयुज्यतामिति चेत्। न। यस्मादेवं सति,—

"स्वाहाकारवषट्कारनमस्कारा दिवौकसाम्।
स्वधाकारः पितॄणान्तु हन्तकारो नृणां मतः"।

इति। छन्दोगपरिशिष्टवचनविरोध आपद्येत। सर्व्वे च परीक्षका व्याकुप्येरन्। न चैवं त्वयाऽपि दृश्यते। तस्मात् सामर्थ्यादेषा व्यवस्था भविष्यतीत्यकामेनापि वाच्यम्। अतएव महायशसा दैवेऽपि यादिव्या इति मन्त्रोल्लिखितः न येचात्रत्वामिति। अथवा। प्राधान्यात् पित्र्यं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पक्षमभिप्रेत्यैव इयमावृत् सूचिता। दैवेऽपि यावत् शक्यं पितृदृष्टं करिष्यामः। ये चात्रत्वामिति मन्त्रस्तु दैवे न शक्यते कर्त्तुम्। असमवेतार्थत्वात्। तस्मात् कात्यायनोक्तयैव रीत्या दैवे उत्सर्गवाक्यं रचयितव्यं भवति ॥०॥ १५ ॥०॥

अप उपस्पृश्यैवमेवेतरयोः ॥ १६ ॥

अप उदकमुपस्पृश्य स्पृष्ट्वा एवमेव पूर्व्वोक्तयैवावृता इतरयोः पितामहप्रपितामहयोरप्यर्घ्यं ददाति,—इति गतेन संबन्धः। मातामहादीनामपि "मातामहानाञ्चैवम्"—इति वचनात् सर्व्वमेवैतत् कर्त्तव्यम्। तदिदमुत्सृष्टमर्घ्यमिदानीं ब्राह्मणेषु प्रतिपादयितव्यं भवति। पित्रर्थं खल्वेतदुत्सृष्टं पितृस्थानीयाश्चेमे ब्राह्मणा भवन्ति। उत्तरत्र संस्रवसमवनयनसूत्रणाच्चैवमवगच्छामः। संस्रवशब्दो हि "संस्रवान् प्राश्नाति"—इत्यादौ स्रुवादिपात्रलग्नप्रतिपादितावशिष्टाज्यादिद्रव्यवचनो दृष्टः। स इहापि ग्रहीतव्यो भवति। अविरोधात्। प्रतिपादनप्रकारमाह कात्यायनः।

"गोत्रनामभिरामन्त्र्य पितॄनर्घ्यं प्रदापयेत्।

* * * * * * * * * *

ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्रपवित्रकान्।

कृत्वाऽर्घ्यं संप्रदातव्यं नैकैकस्यात्र दीयते"।

इति। तदत्रादौ 'गोत्रनामभिः'—इत्यादिना अर्घ्यदानमुपदिश्य, परतः—'ज्येष्ठोत्तरकरान्'—इत्यादिना तत्प्रतिपादनप्रकारोऽभिहितः।

For Private and Personal Use Only

करायाग्रपवित्रकान् कृत्वा अर्घ्यं दातव्यमिति ब्रुवन् प्रथमं पवित्राणि ब्राह्मणेषु प्रतिपाद्य पश्चाज्जलादिकं प्रतिपादयितव्यमिति भङ्ग्यन्तरेणोपदिशति। 'नैकैकस्यात्र दीयते'—इत्याभ्युदयिके कुर्व्वन् पार्व्वणे एकैकस्य दानं दर्शयति। तेषां खल्वेषां पवित्राणामुत्तराग्राणामेव ब्राह्मणहस्तेषु दानं करणीयम्। कुतः?। 'करायाग्रपवित्रकान्'—इत्यनेन तथाऽवगतेः। न हि शब्दस्य श्रवणमात्रात् योऽर्थोऽवगम्यते, स युज्यते विनाकारणमुत्स्रष्टुम्। नचाभ्युदयिकविषयत्वात् वचनस्य पार्व्वणे तदुक्तं नस्यादितिवाच्यम्।

"अन्यत्राप्येषएव स्याद् यवादिरहितोविधिः।

इति तेनैव यवादिव्यतिरेकेणाभ्युदयिकोक्तस्य सर्व्वस्यैव पार्व्वणेऽपि करणोपदेशात्। अथ,—

"वशिष्ठोक्तोविधिः कृत्स्नोद्रष्टव्योऽत्र निरामिषः।
अतः परं प्रवक्ष्यामि विशेषइह योभवेत्"।

इत्युपक्रमात्, 'करायाग्रपवित्रकान्'—इति विशेषाभिधानमेव किमिति नोपेयते?। शृणु यथा नोपेयते। आमिषमन्तरेण वशिष्ठोक्तस्य कृत्स्नस्य विधेरतिदेशात् वशिष्ठोक्तस्यैव योविशेषः—'प्रातरामन्त्रितान् विप्रान्'—इत्यादिः, तस्यैव तन्मात्रविषयत्वं गम्यते। न वशिष्ठानुक्तस्यापि विशेषस्य। 'अन्यत्राप्येषएव स्यात्'—इत्यस्यानर्थकत्वापत्तेः। अतएव, 'प्रागग्रेष्वथ दर्भेषु'—इत्यादि विशेषाणामपि पार्व्वणे करणप्रसक्तौ, तदपवादार्थम्,—

"दक्षिणाप्लवने देशे दक्षिणाभिमुखस्य च।
दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः"।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति वचनारम्भोघटते । इतरथा खल्वयमारम्भोऽनर्थकः स्यात् । नचै देवं, तत्रोक्तानां भूयसामपि विशेषाणां तन्मात्रपरत्वापत्त्या पार्व्वणे करणं न स्यात् । क्रियन्ते च । तस्माद् यथोक्तमेवास्तु । यस्य हि विशेषस्य पार्व्वणे करणं नाभिप्रैति, कयाचिद्भङ्ग्या तमवबोधयति । कृत्यप्रदीपेऽप्युक्तम्,—"कराग्राग्रपवित्रत्वमाभ्युदयिके विशेषः—इत्याचाति, तथा चैतद्वैपरीत्यं पार्व्वणे स्यात्?-इति चेत् । नैवम् । मिलितहस्तोपरि दानमभिधाय, 'नैकैकस्यात्र दीयते'–इति यत् पुनरभिधत्ते, तेन ज्ञापयति,—इदमेवात्र विधीयते, कराग्राग्रपवित्रत्वन्त्वनूद्यते"—इति । यच्चोक्तं रघुनन्दनेन,—'नैकैकस्यात्र दीयते,—इत्यभिधानं विना पित्रादित्रयब्राह्मणानां मिलितहस्तोपरि दानानुपपत्त्या नैकैकस्यात्र दीयते,—इत्यस्य पुनरभिधानानुपपत्तिः'—इति । तदयुक्तम् । ज्येष्ठोत्तरकरत्वेनैव मिलितहस्तलाभात् । यदप्युक्तम्,—"ज्येष्ठोत्तरकरत्वस्य पित्रादिप्रत्येकब्राह्मणापेक्षयाऽपि सम्भवेन तथात्वानुपपत्तेः'—इति । तदप्यसङ्गतम् । ज्येष्ठोत्तरकरान् युग्मान्,—इति बहुवचनेन बहूनामपि युग्मानां ज्येष्ठोत्तरकरत्वकथनात् पित्रादि प्रत्येकब्राह्मणापेक्षया वर्णनस्यानुचितत्वात् । निषिद्धो हि ब्राह्मणानां निस्तारः । तन्मात्रपरत्वे प्रमाणाभावाच्च । यच्चापरमुक्तम्,—'कराग्राग्रपवित्रत्वस्य पार्व्वणेऽनुक्तत्वादनुवादानुपपत्तेः'—इति । तदपि नास्ति । अस्मादेवानुवादात्तत्र विधेरनुमानोपपत्तेः । तथा चोक्तम् ।

"लिङ्गादपि विधिर्ज्ञेयोदर्भेषु विकिरोयथा" ।

इति । अनुवादोवा मा उपपादि । तथापि, 'अन्यत्राप्येषएव स्यात्'—इति वचनात् पार्व्वणेऽप्येतत् प्राप्नोति । 'नैकैकस्यात्र दीयते'

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

—इत्यपि तर्हि प्राप्नोतु?। न,—इति ब्रूमः। किं कारणम्?। अत्रेति विशेषोपदेशात्। 'एकैकस्यैकैकेन ददाति'—इति सूत्रणाच्च। द्वैतनिर्णयेऽप्युक्तम्,—'करात्राग्रपवित्रत्वमाभ्युदयिकएव, छन्दोगपरिशिष्टे विशेषाभिधानस्वरसादिति न वाच्यम्। नैकैकस्यात्र दीयते,—इति तदुपसंहारात् मिलितदानस्यैव विशेषस्य तत्राभिधानात्। एषोऽन्यत्र विधिः स्मृतः,—इति पश्चादभिधानाच्च'—इत्यन्तेन ॥०॥ १६ ॥०॥

प्रथमे पात्रे संस्रवान् समवनीय पात्रं न्युब्जं कृत्वा शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि पितृभ्यः स्थानमसीति ॥ १७ ॥

प्रथमे पात्रे,—इति पितृपात्रं ब्रूमः। 'अप उपस्पृश्यैवमेवेतरयोः'—इति सूत्रणात् तत्रैवप्राथम्यावगतेः। मन्त्रलिङ्गे पितॄणां श्रवणाच्चैवमवगच्छामः। तेन, दैवे न्युब्जकरणं नास्ति। 'पैतृकं प्रथमं पात्रम्'—इत्यपि स्मर्त्तारोभवन्ति। अपरे पुनरेतदविद्वांसोभाषन्ते,—प्रथमं पात्रमत्र दैवपात्रम्,—इति। दैवे अमन्त्रकं न्युब्जीकरणमिच्छन्त्यन्ये।

तदस्मिन् प्रथमेपात्रे संस्रवान् अर्घ्यपात्रलग्नजलादीन्, समवनीय सम्यगवनीतान मिश्रितान् कृत्वा, यत्रावनीताः संस्रवाः, तत् पितृपात्रं न्युब्जमधोमुखं करोति शुन्धन्तामित्यादिमन्त्रेण। तदेवं न्युब्जं कृत्वा वक्ष्यमाणं कर्म्म कुर्य्यात्। 'शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि'—इति प्रतीकं केचिन्न पठन्ति।

तदिदं पितृपक्षे न्युब्जीकरणं सूचितम्। मातामहपक्षेऽपि माता-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महपात्रे संस्रवान् समवनीय तत् पात्रं न्युब्जं कर्त्तव्यम्। कुतः?। 'मातामहानाञ्चैवम्'—इत्यतिदेशस्यार्थवत्तोपपत्तेः। 'तन्त्रं वा वैश्वदेविकम्'—इति च कुर्व्वन् वैश्वदेविकादन्यत् पृथगेव करणीयमित्युपदिशतीत्यवोचाम।

तेषां खल्वेषां संस्रवाणां समवनयनं कथं करणीयम्?—इति वक्तव्यम्। उच्यते। संस्रवोऽर्घ्यपात्रस्थं दत्तशेषजलम्, तच्चादौ पितामहपात्रस्य पितृपात्रे प्रक्षेप्तव्यं ततः प्रपितामहपात्रस्य, प्रावर्त्तिकक्रमस्वरसात्,—इति वाचस्पतिमिश्रप्रभृतयः। तदस्य पितृपात्रस्य अपिधानमस्माकं नास्ति। अनुपदेशात्। न खल्वनुपदिष्टमपि करणीयं भवति। यच्च शौनकवचनम्,—"प्रपितामहपात्रेण निधाय प्रतिष्ठापयति"—इति। तदपि वह्वृचानामेव नास्माकम्। कथं ज्ञायते?। तस्य तत्सूत्रकारत्वात्। शौनकीये च प्रयोगे पितृपात्रस्य प्रतिष्ठापनमात्रमेवकरणीयम्, न न्युब्जीकरणमपि। प्रतिष्ठापनमात्रस्यैव तेनोपदेशात्। अस्माकन्तु न्युब्जीकरणमुपदिश्यते। तत् कोऽयमनयोः संबन्धः। येन शौनकीयमपिधानमस्माकमपि करणीयं भवेत्। आश्वलायनगृह्यपरिशिष्टेऽपि,—"तत् पात्रं शुचौ देशे पितृभ्यः स्थानमसीति निधाय प्रपितामहार्घ्यपात्रेण निदध्यात्, न्युब्जं वा तत् कुर्य्यात्"—इति निधानन्युब्जीकरणयोर्वैकल्पिकत्वमुक्तम्। तदत्र, न्युब्जं वा तत् कुर्य्यात्,—इति वचनात् न्युब्जकरणपक्षे प्रपितामहपात्रेण न तत्पात्रस्य निधानम्, प्रपितामहपात्रेण निधानपक्षे च न न्युब्जीकरणमिति व्यक्तमवगम्यते। रघुनन्दनस्त्वेतदबुद्धा आश्वलायनगृह्यपरिशिष्टमजानानः,—शौनकवचनात् प्रपितामहपात्रेणाधःकृतं पितृपात्र

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूर्द्धमुखावस्थितं न्युब्जमधोमुखं करोति,—इति प्रलपति। एवम्,—

"पैतृकं प्रथमं पात्रं तत्र पैतामहं न्यसेत्।
प्रपितामहं ततोऽन्यस्य नोद्धरेन्न च चालयेत्।
स्पृष्टमुद्धृतमन्यत्र नीतमुद्घाटितन्तथा।
पात्रं दृष्ट्वा व्रजन्त्याशु पितरस्तं शपन्ति च"।

इति यमोक्तेऽपि कल्पे नास्त्येव न्युब्जीकरणम्। पितृपात्रे पितामह प्रपितामहपात्रयोर्न्यासानन्तरमेव स्पर्शस्योद्धरणस्यान्यत्र नयनस्य चालनस्य च निषेधात्। न खल्वन्तरेण स्पर्शमुद्धरणं चालनञ्च शक्यं न्युब्जं कर्त्तुम्। रघुनन्दनस्त्वाज्ञापयति,—'यमवचनेन पितामह प्रपितामहपात्रद्वयपिधानमुक्त्वा वचनान्तरात् न्युब्जीकृतस्य तत्पात्रस्य उद्धरणादिनिषेध उक्तः'—इति। यदपि,—

"पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः"।

इति याज्ञवल्क्यस्मरणम्। तदपि तदुक्तप्रयोगविषयम्। तस्यापि, पात्रमधोभूमौ न्युब्जं करोतीत्ययमर्थः। 'अधःशायी'—इत्यादौ यथा। न पुनरधःस्थितं पात्रं न्युब्जं करोति,—इत्यर्थः। येनापिधानमनेनाक्षिप्येत। नह्यधःपदमधःस्थितं शक्नोति वक्तुम्। तत्रास्य सामर्थ्यविरहात्। कथमन्यथा, 'अधःशायी'—इत्यादावप्यपिधानं नाक्षिप्येत। तस्मात्,—'अधःस्थितं पात्रं न्युब्जं करोति,—इत्यन्वयानुपपत्त्या पिधानमत्राक्षिप्यते, अन्यथा अधःपदवैयर्थ्यापत्तेः'—इति ब्रुवाणः शूलहस्तोपि परस्तोभवति। अधोभूमावित्यर्थतयाऽन्यथोपपत्तेराक्षेपायोगाच्च। यदप्युक्तम्,—'अधोभूमावितिकल्पतरुव्याख्यानमयुक्तं साङ्गप्रधानार्थतया वेदैः प्राप्तत्वात्'—इति। तदेवायुक्तम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधोभूमावेव न्युब्जं करोति, न कुशोपरि,—इत्यभिप्रायेणार्थं वत्त्वोपपत्तेः। केचित् किल भूमौ तिलकुशान् निःक्षिप्य तेषामुपरि न्युब्जं कुर्व्वन्ति। 'अधः'—इति कुर्व्वन् तत् नानुजानाति। "दक्षिणाग्रकुशस्तम्बं भूमौ निधाय तस्योपरि * * तत् पात्रं न्युब्जमधोमुखं करोति"—इति व्याकुर्व्वाणोविज्ञानेश्वरोऽविज्ञानवानपि पिधानं नोवाच। रघुनन्दनस्तु छन्दोगोऽपि, 'याज्ञवल्क्येन तत् पात्रस्याधःस्थलाभिधानात् पात्रान्तरेण पिधानमाक्षिप्तम्'—इति तदुपजीव्यस्थूलपाण्डुकमेवोक्तवान्। तदश्रद्धेयम्। यदि नाम याज्ञवल्क्यीये पिधानमाक्षिप्येतापि, तावता कथमस्मदीयेऽपि प्रयोगे तत् शक्यं कल्पयितुम्। नह्ययमनारभ्यविधिः। न वा अस्मत्प्रयोगमसावुपदिशति। काण्डानुसमयोर्हि कियाननेनोपदिष्टः। पदार्थानुसमयस्यात्र भवतः सूत्रकारस्याभिप्रेतः,—इत्यवोचाम। "प्रथमे पात्रे संस्रवान् समवनीय पितृभ्यः स्थानमसीति पात्रं न्युब्जं करोति"—इति कातीयेऽपि कल्पे न्युब्जीकरणमेवोपदिष्टं न पिधानम्। तदेवम्,—पिधानपक्षे न न्युब्जीकरणम्, न्युब्जीकरणपक्षे च न पिधानम्,—इति तत्रभवतामृषीणां समयः। निबन्धारएव केचिदत्रापरितुष्यन्तः प्रयोगान्तरविशेषान् प्रयोगान्तरे निवेशयन्ति।।

यच्चापरमुक्तं तत्त्वकारेण,—"गोभिलसूत्रे, पितृपात्रे—इत्यभिधानात्, संस्रवान्,—इति बहुवचनात्, मन्त्रे पितृभ्यइति पितृत्वेन,

"आहृतास्तत्र तिष्ठन्ति पितरः शौनकोऽब्रवीत्"।

इत्याश्वलायनगृह्यपरिशिष्टवचनेऽपि पितृत्वेन षडुपस्थितेरावाहनवत् षट्स्थितिमुद्दिश्य सकृदेव न्युब्जीकरणम्, न तु मातामहानां भेदि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोक्तं पृथक् करणम्"—इति। तदप्यसङ्गतम्। 'पितृपात्रे'—इति तावदस्माकं सूत्रपाठो न भवति। 'प्रथमे पात्रे'—इति खल्वत्र भवान् सूत्रकारः पठति। सोऽप्येवमेव सूत्रमिदं पपाठ। 'प्रथमे-पात्रे पितृपात्रे'—इति व्याचक्रे च। स खल्वेवं सूत्रं लिखन् व्याकुर्वंश्च, कथं पुनरन्यथा लिखति,—इति न खल्वधिगच्छामि। संस्रवान्,—इति बहुवचनमपि पात्रत्रयसंस्रवपरतया नानुपपन्नम्। तथाच, समवनयनं पात्रत्रयसंस्रवानामेव, प्रथमपात्रन्तु तस्याधारः,—इति न किञ्चिदनुचितम्। अथ, 'प्रथमे पात्रे संस्रवान् समवनीय'—इत्युक्ते प्रथमपात्रातिरिक्तसंस्रवानामेव समवनयनं गम्यते?। गम्यमानोऽप्ययमर्थो मिथ्या,—इति ब्रूमः। कस्मात्?। अस्यामवगतौ प्रमाणविशेषस्याभावात्। यथा, "यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोति"—इत्यत्र, पालाश्यां जुह्वां जातायां ततएव तत् फलं भवति,—इति जायमानमपि विज्ञानमप्रमाणमूलत्वान्मिथ्याविज्ञानम्,—इति चतुर्थाध्याये सिद्धान्तितम्। तद्वदत्राप्यवगन्तव्यम्। अशक्यत्वाच्च। न खलु प्रथमपात्रसंस्रवेणासमवनीय पात्रद्वयसंस्रवौ शक्यौ समवनेतुम्। किं कारणम्?। पात्रद्वयसंस्रवावपि हि प्रथमे पात्रे निःक्षेप्तव्ये। योहि प्रथमे पात्रे पात्रद्वयसंस्रवौ समवनयति, समवनयत्यसौ पात्रत्रयसंस्रवानवश्यम्। अपरिहार्य्यत्वात्। पितृत्वेन षडुपस्थितिसम्भवेऽपि, 'मातामहानाञ्चैवम्'—इति वचनागतं पृथक् करणं न शक्यते वारयितुम्। आवाहनवत्,—इत्यपि नोदाहरणम्। आवाहनेऽपि पृथक्करणस्योक्तत्वात्। सोऽयं स्वयमेवावाहने सकृदनुष्ठानं वर्णयति, स्वयमेव च तत् दृष्टान्तयति,—इति किमत्र ब्रूमः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'पैतृकं प्रथमं पात्रम्'—इत्यादि यमवचनविरोधोऽपि तस्यापरिहार्य्यः स्यात्। कथम्?। तद्धिवचनं न्युब्जकरणपरतया स्वयं वर्णितम्। तत्र च पितृपितामहप्रपितामहपात्राण्युक्तानि। यत्रां युगपत्करणे कथं न विरोधः।

तदिदं न्युब्जीकरणं कर्त्तुर्वामपार्श्वे करणीयम्। सौकर्य्यात्। प्रयोगान्तरेऽप्येवं पश्यामः। "न्युब्जमुत्तरतोन्यसेत्"—इति हि स्मरन्ति। उत्तरशब्दश्च,—

"उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति"।

इति भारते, "तस्मात् यस्य दक्षिणतोलक्ष्म भवति, तं पुण्यलक्ष्मीकमित्याचक्षते, उत्तरतः स्त्रियाउत्तरायणा हि स्त्री"—इति शतपथीये च ब्राह्मणे, वामवचनोदृष्टः। सदृहापि ग्रहीतव्योभवति। अविरोधात्। पित्र्ये च कर्म्मणि प्राचीदिगुत्तरा भवति। "या दक्षिणा सा प्राची, या पूर्व्वा सोत्तरा"—इति हि पित्र्यामिष्टिमुपक्रम्य ब्राह्मणं भवति।

अस्मिन्नवसरे तूष्णीमुदकं दत्त्वा तिलोदकञ्च मन्त्रेण दातव्यम्। कुतः?। "दर्भान् प्रदायोदकपूर्व्वं तिलोदकं ददाति पितुर्नाम गृहीत्वाऽसावेतत्ते तिलोदकं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति" "अप उपस्पृश्यैवमेवेतरयोः"—इति गृह्यकारवचनात्।

"तूष्णीं पृथगपोदद्यान्मन्त्रेण तु तिलोदकम्।

गन्धोदकञ्च दातव्यं सन्निकर्षक्रमेण तु"।

इति कर्म्मप्रदीपवचनाच्च। तदत्र, मन्त्रेण तिलोदकं गन्धोदकञ्च दातव्यम्,—इति वदन् गन्धोदकमपि तिलोदकवत् ये चात्र त्वाम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति मन्त्रेण दातव्यम्,—इत्युपदिशति। यच्च 'अनुलेपनेयोग्या-गन्धो गन्धोदकम्'—इति नीलाम्बरेण वर्णितम्। तदसङ्गतम्। उदकपदस्यानर्थकत्वापत्तेः। घृष्टोहि मलयजोगन्धोभवति। न च घृष्टानां विशुष्कानां नास्त्यनुलेपनयोग्यतेति तन्निरासार्थमुदकपदमिति वाच्यम्। यातयामतयैव तस्य निरासात्। न चादृष्टार्थं घर्षणम्, येनैवमापाद्येत। दृष्टोहि तस्यार्थोऽनुलेपनयोग्यता नाम। अन्यथा भूयःसु प्रदेशेषु गन्धमात्रोपादानादेवं प्रसज्येत। तस्मादसङ्गतैषा कल्पना। यद्यप्यन्वष्टक्यकर्म्मणि तदुपदिष्टम्, तथाप्यन्वष्टक्यधर्म्माणां पिण्डपितृयज्ञे, पिण्डपितृयज्ञधर्म्माणाञ्चात्र प्रदेशादत्रापि करणीयं भवति। नह्यत्र तन्निषिद्धम्। तदिदं तिलोदकदानं पात्रेषु करणीयम्। तथाच कात्यायनः।

"आसनाद्यर्घ्यपर्य्यन्तं वशिष्ठेन यथोदितम्।

कृत्वा कर्म्माथ पात्रेषु उक्तं दद्यात्तिलोदकम्"।

इति। महायशास्त्वाह,—"नात्र तिलोदकदानं पृथक्कार्य्यं विधेरभावात्। * * पिण्डपितृयज्ञेतिकर्त्तव्यताविधानात्तत्र चाप्रतिषेधादिति चेत्। न। अर्घ्यान्तराभावात्तत्राप्रतिषेधः। किञ्च यदि तत्राप्रतिषिद्धमत्र क्रियते, तदा सकृदाच्छिन्नदर्भमुष्टिस्तरणमष्टमदेशपरिवारणं मांसचरुश्रपणञ्च स्यात्"—इति। तदश्रद्धेयम्। अर्घ्यपर्य्यन्तकर्म्मानन्तरमेव तत्र तिलोदकदानं—कात्यायनः स्मरति। त्वं पुनरात्थ,—तत्रार्घ्यान्तराभावः,—इति। "सकृदाच्छिन्नं दर्भमुष्टिं स्तृणाति"—इति, "कर्षूश्च"—इति चैताभ्यां सूत्राभ्यां भगवता गृह्यकारेण कर्षूणामभितोदर्भमुष्टिस्तरणस्योपदेशात् कर्ष्वाश्चात्र निवृत्ते-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वक्ष्यमाणत्वात् तस्यापि निवृत्तिर्विज्ञायते। अग्निमतामग्निप्रणयनं यद्यत्रापि भवति, स्तरणमपि दर्भमुष्टेस्तदभितः कर्त्तुमुचितम्। अष्ट-प्रदेशपरिवारणमपि यद्यत्र क्रियते,—किन्नाम तत्रानिष्टं भवति,—इति न खल्वधिगच्छामि। विशेषं विना परिवृतएव पित्र्यं कर्म्म सर्व्वैरनुमन्यते। तथा हि हविषः श्वादिदृष्ट्युपघातोन भविष्यतीति।

"षण्डापविद्धचाण्डालपाषण्डुन्मत्तरोगिभिः।
कृकवाकुश्वनग्नैश्च वानरग्रामसूकरैः।
उदक्याद्धतकाशौचिम्टताहारैश्च वीक्षिते।
श्राद्धे, सुरान पितरोभुञ्जते पुरुषर्षभ!।
तस्मात् परिश्रिते कुर्य्यात् श्राद्धं श्रद्धासमन्वितः।
उर्व्यां च तिलविक्षेपाद्यातुधानान् निरासयेत्"।

इति च स्मरन्ति पौराणिकाः। पिण्डपितृयज्ञएव तावन्मांसचरु-र्नास्ति। "अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञोवाख्यातः"—इति सूत्रे स्थालीपाकग्रहणात्। कथमसौ अत्र अपेत। परन्तु, तत्राहृत्य-हप्तेः सूत्रयिष्यमाणत्वात् मांसमप्यत्रेच्छया पच्यते। तदिदं तिलोदक-दानम्,—

"आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम्।
पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च।
कुलालचक्रनिष्पन्नमासुरं मृण्मयं स्मृतम्।
तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत्"।

इति कात्यायनोक्तपात्रेण करणीयम्। तिलोदकञ्चेदम्,—'अमुक-गोत्र पितरमुकशर्म्मन् असावेतत्ते तिलोदकं येचात्र त्वामनु यांश्च

For Private and Personal Use Only

त्वमनु तस्मै ते स्वधा'—इत्यन्वष्टक्योक्तेनैव प्रकारेण दद्यात्। तत्र हि भगवता गृह्यकारेण, 'पितुर्नाम गृहीत्वा'—इत्युपदिश्य, 'असावेतत्ते'—इत्यसावित्यस्य पुनरुपदेशात् इयमेव प्रयोज्यं भवत्यदृष्टार्थम्। प्रत्यक्षोपस्थितेनादःपदार्थेन ब्राह्मणेन पित्रादीनामभेदबुद्ध्यर्थञ्च। 'एतत्ते',—इति, 'तस्मै ते'—इति च इयं यथा प्रयुज्यते। सर्व्वत्र चैवं पिण्डपितृयज्ञातिदेशस्थले असावित्यस्य पुनरुल्लेखोद्रष्टव्यः। महायशसाऽपि पिण्डदाने नामोल्लेखानन्तरमसाविति लिखितम्। अर्घ्यादाने त्वत्रभवता सूत्रकारेण नाम गृहीत्वा'—इत्यकरणात् असावित्यस्यैव नामोल्लेखतात्पर्य्यकत्वान्न तत्रासावित्यस्य पुनरुल्लेखः ॥०॥ १७॥०॥

अथ गन्धपुष्पधूपदीपाच्छादनानां प्रदानम् ॥ १८ ॥

अत्रेत्यवसरानुवादकम्। तेन तिलोदकादिदानं कृत्वा,—इति ज्ञापयति। एवं ह्यवसरानुवादोऽर्थवान् भवति। इतरथा अर्घ्यदानावसरस्य पाठादेव लाभेनानर्थक्यमस्यापद्येत। अत्रेतिवचनाद्‌च गन्धादीनामेवप्रदानं, तेन गोहिरण्यादीनां श्राद्धान्ते दक्षिणारूपेण प्रदानं कार्य्यम्',—इति गार्ग्यनारायणः। तथा च दक्षिणामुपक्रम्य स्मरन्ति पौराणिकाः।

"सौवर्णरौप्यपात्राणि मनोज्ञानि शुभानि च
हस्त्यश्वरथयानानि समृद्धानि गृहाणि च।
उपानत्पादुकां छत्रचामरव्यजनानि च।
यज्ञेषु दक्षिणामुख्यादति संचिन्तयन् हृदि।
दरिद्रोऽपि यथाशक्त्या दद्याद्विप्रेषु दक्षिणां"

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। अन्येत्वाहुः,—

"यथोपदिष्टांस्तान् सर्व्वानलङ्कुर्य्याद्विभूषणैः।

स्रग्दामभिः शिरोवेष्टैर्धूपवासोऽनुलेपनैः"।

इति देवलादिवचनात् अलङ्कारादिकमप्यत्रैव दातव्यम्। अत्रेत्यर्था-भावादवसरानुवादमात्रम्,—इति। देवलादिवचनानां स्वोक्तप्रयोग-विषयत्वात् प्रयोगान्तरविषयत्वं नास्ति। येतु कञ्चित् प्रयोगमनार-भ्यैवाधीताः, तेष्वेव परं पूर्व्वोक्तं द्वैतमुपतिष्ठते। तदत्रभवन्तोभूमि-देवाः प्रमाणम्।

"चामरं तालवृन्तञ्च श्वेतच्छत्रं च दर्पणम्।

दत्त्वा पितॄणामेतानि भूमिपालो भवेदिह"।

इति।

"यः कञ्चुकं तथोष्णीषं पितृभ्यः प्रतिपादयेत्।
ज्वरोद्भवानि दुःखानि स कदाचिन्न पश्यति॥
स्त्रीणां श्राद्धे तु सिन्दूरं दद्युश्चण्डान्तिकानि च।
निमन्त्रिताभ्यः स्त्रीभ्योये ते स्युः सौभाग्यसंयुताः" ॥१९॥

इति।

"अलङ्काराः प्रदातव्यायथाशक्ति हिरण्मयाः।

केयूरहारकटकमुद्रिकाकुण्डलादयः।

स्त्रीश्राद्धेषु प्रदातव्याअलङ्काराश्च योषिताम्।

मञ्जीरमेखलादामकर्णिकाकङ्कणादयः"।

इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"आदर्शव्यजनं छत्रशयनासनपादुकाः।
मनोज्ञाः पटवासाश्च सुगन्धाश्चूर्णमुष्टयः।
अङ्गारधानिकाः शीते योगपट्टाश्च यष्टयः।
कटिसूत्राणि रौप्याणि मेखलाश्चैव कम्बलाः।
कर्पूरादेश्च भाण्डानि ताम्बूलायतनं तथा।
भोजनाधारयन्त्राणि पतद्ग्राहांस्तथैवच।
तथाञ्जनशलाकाश्च केशानाञ्च प्रसाधनम्।
एतान् दद्यात्तु यः सम्यक् सोऽश्वमेधफलं लभेत्"।

इति चैवमादीनान्तु युक्तमस्मिन्नवसरे दानमिति। पितॄणां दत्त्वेत्यभिधानाच्चैवं गम्यते। आच्छाद्यते अनेनेत्याच्छादनं वस्त्रम्। तदभावे यज्ञोपवीतं देयमित्युक्तं ब्रह्मवैवर्त्ते।

"यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता।
पितृभ्योवस्त्रदानस्य फलं तेनाश्नुतेऽखिलम्"।

इति। पाद्मे तु,—

"निष्क्रयोवा यथाशक्ति वस्त्राभावे प्रदीयते"।

इति वस्त्रमूल्यमपि दातव्यम्—इत्युक्तम्। आदित्यपुराणे तु यज्ञोपवीतस्यावश्यकत्वमुक्तम्। यथा।

"पितॄन् सत्कृत्य वासोभिर्दद्याद्यज्ञोपवीतकम्।
यज्ञोपवीतदानेन विना श्राद्धन्तु निष्फलम्"।

इति। एतद्यतिस्त्रीशूद्रश्राद्धेष्वपि देयम्,—इति हेमाद्रिः। पुष्पादिविधिनिषेधाश्च स्मृत्यन्तरेभ्योयथासम्भवमवगन्तव्याः। ग्रन्थगौरवभयादुपारम्यतेऽस्माभिः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां खल्वेषां गन्धादीनां द्वन्द्वनिर्देशात्, लाघवात्,

"अर्घेऽक्षय्योदके चैव पिण्डदानेऽवनेजने ।

तन्त्रस्य विनिवृत्तिः स्यात् स्वधावाचनएवच" ।

इति छन्दोगपरिशिष्टे, अर्घ्यादिविशेषोपादानमहिम्ना तदितरत्रासतिबाधके तन्त्रानुष्ठानाभ्यनुज्ञानाच्च तन्त्रेणैव प्रदानं करणीयम् । तदेवं द्रव्यतन्त्रतैवामीषां भवति, न पुनरुद्देश्यतन्त्रताऽपि । एतदनेनोक्तं भवति । पितरमुद्दिश्य गन्धादिपञ्चकं तन्त्रेणोत्स्रष्टव्यम् । एवं पितामहम् । एवं प्रपितामहम् । मातामहपक्षेऽप्येवम्,—इति । कथं ज्ञायते? । शृणु यथा ज्ञायते । "उदकपूर्व्वं तिलोदकं ददाति पितुर्नाम गृहीत्वा असावेतत्ते तिलोदकं ये चात्र त्वामनु यांश्च त्वमनु तस्मैते स्वधेत्यप उपस्पृश्यैवमेवेतरयोः, तथा गन्धान्"—इति तावदन्वष्टक्यकर्म्मणि गृह्यकारेण सूचितम् । तदत्र, तिलोदकस्य प्रत्येकेन प्रदानं सूचयित्वा, 'तथा गन्धान्'—इति सूचयन् गन्धादीनां मिलितानामपि, पित्रादिप्रत्येकोद्देशेनैव दानमतिदिशति । अन्वष्टक्यधर्म्माः पिण्डपितृयज्ञे, तद्धर्म्माश्चात्र प्रदिश्यन्ते,—इत्यवोचाम । अस्मादेव कारणात् संबोधनान्तनाम्ना ये चात्र त्वाम्,—इति मन्त्रेणचामीषां गन्धादीनामुत्सर्गः कर्त्तव्यः,—इत्यवगच्छामः । तदिमे मिलिता गन्धादयः प्रत्येकं पित्रादिमुद्दिश्य पूर्व्वोक्तप्रकारेणोत्सृज्य ब्राह्मणेषु प्रतिपादयितव्याभवन्ति । प्रतिपादनञ्चामीषामेकैकशः करणीयं न मिलितानाम् । कुतः? ।

"गन्धान् ब्राह्मणसात् कृत्वा पुष्पाण्यृतुभवानि च ।

धूपञ्चैवानुपूर्व्व्येण अग्नौ कुर्य्यादतः परम्" ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति कात्यायनेन तथोपदेशात्। 'धूपश्चैव'—इत्यनेन दीपाच्छादनयोरपि परिग्रहः। हरिहरस्त्वेतद्वचनमात्रदर्शी ब्राह्मणोद्देशेन गन्धादीनामुत्सर्गमाह। तदसङ्गतम्। पश्चिमप्रतिपत्त्यभिप्रायकत्वादस्य। 'तथा गन्धान्'—इति सूचयता गृह्यकारेण खल्वमीषां पित्राद्युद्देशेन दानमनुशिष्टम्।

इदमिदानीं सन्दिह्यते। किमेतद्गन्धादिपञ्चकमेव आदौ पितृब्राह्मणाय प्रतिपाद्य, तथैव पितामहब्राह्मणाय प्रतिपादनीयम्,—इत्येवंक्रमेणामीषां प्रतिपत्तिः करणीया, आहोस्वित् पित्रादिप्रत्येकब्राह्मणेभ्यएवादितोगन्धान् प्रतिपाद्य, तथैव पुष्पादीनां प्रतिपादनं करणीयम्?—इति। पित्रादिप्रत्येकब्राह्मणेभ्यएवादितो गन्धान् प्रतिपाद्य, तथैव पुष्पादीनां प्रतिपादनं कर्त्तव्यम्,—इति ब्रूमः। कस्मात्?। यस्मादानुपूर्व्येण इति वचनात् विनिगमनाविरहेण ब्राह्मणानामिव गन्धादिप्रतिपादनस्यापि भवति प्रतीतिः। भवति चेत्, कथमुल्लङ्घ्यते। तस्मात् सर्व्वेएव ब्राह्मणेभ्यआदौ गन्धान् प्रतिपाद्य, तथैव क्रमेण पुष्पादयोऽपि प्रतिपादयितव्याः। यथा हि वाजपेये सप्तदशानां प्राजापत्यानां पशूनां क्रमेण प्रोक्षणं कृत्वा, तेनैव क्रमेणान्येऽपि चोदकप्राप्ताधर्म्माः कर्त्तव्याः आलम्भाश्च, न सर्व्वे प्रोक्षणादयएकस्मिन् पशौ अनुष्ठाय पुनरन्यस्मिन्ननुष्ठातव्याः,—इति पञ्चमाध्याये सिद्धान्तितम्। तद्वदत्रापि पित्रादिब्राह्मणेभ्यः क्रमेण गन्धान् प्रतिपाद्य तेनैवक्रमेण पुष्पादीनामपि प्रतिपादनं करणीयम्, न पुनः सर्व्वमेव गन्धपुष्पादिकमेकस्मै ब्राह्मणाय प्रतिपाद्य पुनरन्यस्मै प्रतिपादयितव्यम्,—इति। नारायणोपाध्यायोऽप्याह,—"प्रथम गन्धं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पित्रादित्रयब्राह्मणेभ्यः, पश्चात् पुष्पाणि,—इत्येवंक्रमेण ब्राह्मणनिष्ठान् कृत्वा"—इति। तस्मात्,—'एकस्य सकलं गन्धादिकं प्रदायापरस्य देयम्'—इत्यसङ्गतम् वचनम्। प्रतिपादनञ्चामीषाममन्त्रकं करणीयम्। तत्रमन्त्रस्यानुपदेशात्। तत्त्वकारस्त्वाह। 'गन्धादीनां मिलितानां तन्त्रेणैवोत्सर्गः, निवेदनन्तु प्रत्येकशः। तथा च शाख्यायनः। "एषते गन्धः, एतत्ते पुष्पम्, एषते धूपः, एषते दीपः, एतत्त आच्छादनमिति"—इति। तदसङ्गतम्। शाख्यायनेन ह्ययमुत्सर्गप्रकारोगन्धादीनामुपदिष्टः। न निवेदनप्रकारः। प्रतिपत्तौमन्त्रसंयोगस्यानावश्यकत्वात्। 'एषते पिण्डः'—इत्यपि अनुपदं तस्य सूत्रणमस्ति। न हि पिण्डोऽप्युत्सृज्य प्रतिपाद्यते। तस्मात् पिण्डे तावदुत्सर्गप्रकारोऽयमित्यविवादम्। तत्सामान्याद्गन्धादीनामपि तथैवास्तु। अलंप्रतिपत्तौ मन्त्रान्वयवर्णनेन। तस्मात्, प्रत्येकममीषामुत्सर्गः शाख्यायनस्यानुमतः। सोऽयं तदीयएव प्रयोगे निविशते न पुनरस्मदीयेऽपि। एतेन,—

"एतद्वःपुष्पमित्युक्ता पुष्पाणि च निवेदयेत्"।

इति ब्रह्मपुराणादिवचनान्यपि व्याख्यातानि। भवदप्येतत् प्रतिपादनमन्त्रं तत्तत्प्रयोगएव भविष्यति,—इत्यनुदाहरणम्।

अस्मिन्नवसरे भूमिशोधनमण्डलकरणभोजनपात्रस्थापनमिच्छन्ति। कृतशेषदानानन्तरमेव पात्रालम्भनोपदेशेन पूर्व्वं पात्रस्थापनस्यावगतेः। मण्डलमन्तरेण भोजने दोषश्रवणाच्च। एतत् सर्व्वं स्मृत्यन्तरेभ्योयथासम्भवमवगन्तव्यम् ॥ ० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्यामीति॥ १९॥

स्पष्टार्थः। घृताक्तमिति कुर्व्वन् व्यञ्जनक्षारादेरननुज्ञां दर्शयति। घृताक्तमेवान्नमुद्धृत्य,—इत्यर्थः। तदेतद्गुणविधानार्थं पिण्डपितृयज्ञ-प्रदेशप्राप्तोऽपि प्रश्नोऽनूद्यते ॥०॥ १९ ॥०॥

कुर्व्वित्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा॥ २०॥

स्पष्टार्थः। पिण्डपितृयज्ञप्रदेशप्राप्तस्यापि कुर्व्वित्यनुज्ञानस्य पुन-रुपादानम्,—"प्रत्याङ्गः क्रियतामित्यर्थकामं कुरुष्वेति पशुकामं कुर्व्विति पुत्रकामं"—इति छन्दोगापरसूत्रोक्ताधिकारिविशेषाननु-ज्ञानार्थम्। 'पिण्डपितृयज्ञवदुपचारः'—इति सिद्धे पिण्डपितृयज्ञधर्म्म-प्रदेशे, 'पिण्डपितृयज्ञवद्धुत्वा'—इति पुनर्व्वचनं तन्त्रान्तरानुमतानां मन्त्रदैवतप्रकाराणां निरासार्थमादरार्थं वा। अनग्निमता खल्वत्र पितृब्राह्मणहस्ते होतव्यम्। तथाचान्वष्टक्यकर्म्मणि कात्यायनः।

"पित्र्ये यः पङ्क्तिमूर्द्धन्यस्तस्य पाणावनग्निमान्।
हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निःक्षिपेत्"।

इति। यः पंङ्क्तिमूर्द्धन्यस्तस्य पाणौ मन्त्रवद्धुत्वा, अन्येषां पाणौ तूष्णीं हुत्वा,—इत्यर्थः। नचानुषङ्गे मानाभावादन्येषां पात्रेषु तूष्णीं निःक्षिपेत्। एवञ्च, अन्येषामित्यभिधानात् तत्पात्रे हुतशेषं न देयमिति व्याख्यानं युक्तमिति वाच्यम्। मन्त्रवदित्यस्यानर्थकत्वापत्तेः। तत्पात्रे हुतशेषदानाभावस्यादृष्टार्थतापत्तेश्च। शाखान्तरेऽपि सर्व्वेषां पाणौ होमो दृश्यते। किन्तु तत्र सर्व्वत्रैव मन्त्रसम्बन्धः,—इति विशेषः। यथा शौनकः।

11

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"सर्व्वेषामुपविष्टानां विप्राणामथ पाणिषु।

विभज्य जुहुयात् सर्व्वं सोमायेत्यादिमन्त्रतः"।

इति। तथा आश्वलायनः। "अभ्यनुज्ञायां पाणिष्वेव वा"—इति।

यदा पुनर्ब्राह्मणालाभात् कुशमयब्राह्मणे श्राद्धं क्रियते, तदा तत्रैव श्राद्धवदग्नौकरणहोमोऽपि कर्त्तव्यः। ब्राह्मणकार्य्ये तस्य विधानात्। अग्नौकरणहोमोहि गुणभावेन श्राद्धस्योपकरोति। तस्यापि विप्रपाणिः। मुख्यं कथं सगुणं स्यादिति खल्वसौ गुणेषु प्रवर्त्तते। स यदि गुणस्य गुणं विनिपातयति, नास्य किञ्चिद्धीयते। अथ तु गुणस्य गुणमनुरुन्धानो मुख्यं विनिपातयति, स्वार्थोऽस्य हीयते। नचैतदुचितम्। तन्त्रान्तरदृष्टं जलादिकमत्रेच्छन्त्यन्ये।

इदमिदानीं सन्दिह्यते। किमयमग्नौकरणहोमः उपवीतिना प्राङ्मुखेन करणीयः, आहोस्वित् प्राचीनावीतिना दक्षिणामुखेन?—इति। उभयथा,—इत्याह। तथाचोभयथा दर्शनम्। "स उद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यः"—इति माध्यन्दिनीये ब्राह्मणे। "प्राचीनावीती भूत्वा दक्षिणासीनः * * स उद्वास्य द्वे आहुती जुहोति"—इति च शातपथीये ब्राह्मणे। सोऽयं विकल्पः। आह। गृह्यकारविरोधस्तर्हि स्यात्। स खल्वग्नौकरणहोममुपदिश्य, "अत ऊर्द्धं प्राचीनावीतिना वाग्यतेन कृत्यम्"—इति सूचयन्नग्नौकरणहोमे उपवीतित्वमभिप्रैति,—इति गम्यते। नायं दोषः। परतः प्राचीनावीतित्वोपदेशस्य पुरस्तादनियमाभिप्रायकतयैवोपपत्तेर्नित्यवदुपवीतित्व प्रापकत्वे मानाभावात्। तस्मादग्नौकरणहोमे प्राचीनावीतित्वोपवीतित्वयोर्विकल्पमभिप्रैति गृह्यकारः—इत्यवगच्छामः। स खल्वयमस्पष्टः सूत्रकारस्याभिप्रायः परिशिष्टकारेण स्पष्टीकृतः। यथा।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अग्नौकरणहोमस्तु कर्त्तव्यउपवीतिना।
प्राङ्मुखेनैव देवेभ्योजुहोतीति श्रुतिश्रुतेः।
अपसव्येन वा कार्य्योदक्षिणाभिमुखेन च।
विरुप्य हविरन्यस्मात्रन्यस्मै न हि इयते"।

इति। तथा चास्मदीये गृह्यसूत्रे। "तस्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च मांसचरुञ्च"—इति। "सर्व्वस्यत्वेवान्नस्यैतान् बलीन् हरेत् पित्र्यस्य वा"—इति च। तदत्र पित्र्यस्य चरोरभिधानान्निर्व्वापोपि पितृभ्य एव ज्ञायते।

अपरे पुनरेतदबुद्धा विभिन्नशाखिविषयाणां परस्परविरुद्धानामुच्चावचवचनानां समन्वयं कर्त्तुमिच्छन्तोयेभ्यो यथाऽरोचिषत, ते तथैव बहुप्रकारं प्रालपिषन्त। तदुपेक्षणीयम्। प्रत्यादेशश्चामीषामेकैकशोगृह्यभाष्ये प्रदर्शितोऽस्माभिरित्युपारम्यते ॥०॥ २० ॥०॥

हुतशेषं ब्राह्मणाय दत्त्वा ॥ २१ ॥

ऋजुरक्षरार्थः। 'ब्राह्मणाय'—इत्युद्देश्यगतमेकत्वं ग्रहैकत्वमिव न विवक्षितम्। एवञ्च, ब्राह्मणाय,—इति सामान्येनोपदेशात् देवब्राह्मणायाप्येतत् देयम्। सोऽयं वैकृतोविशेषोपदेशः प्राकृतं पात्रेषु दानं निवर्त्तयति। शरमयबर्हिरुपदेशइव कुशमयं वर्हिः। कात्यायनः खल्वन्वष्टक्यकर्म्मणि हुतशेषस्य पात्रेषु दानमुपदिशति। चोदकाश्चात्रैतत् प्रापयति। तच्च वचनेनोपरोद्धव्यं भवति। "पिण्डपितृयज्ञवद्भुत्वा हुतशेषं पाणिषु दद्यात् पाणिमुखाः पितरइति श्रुतेः"—इति च छन्दोगापरसूत्रम्। रघुनन्दनस्त्वेतदजानानोऽत्रापि पात्रेषु हुत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेषदानमाह। समुच्चयरसिकोह्यसौ प्रयोगान्तरविशेषानपि प्रयोगान्तरे समुच्चिनोति। स खल्वयं "कृतोच्छिष्टं ब्राह्मणेभ्यः प्रदाय"— इति यमवचनं लिखन्नपि कथं पुनः पात्रेषु कृतशेषदानमाह,—इति न खल्वधिगच्छामि।

तदिदं ब्राह्मणेभ्योदत्तं कृतशेषमन्नमर्थादुपकल्पितैरन्नैर्मिश्रीकृत्य तैरुपयोक्तव्यमित्याहुः। श्लोकमप्युदाहरन्ति।

"अन्नं पाणितले दत्तं पूर्व्वमश्नन्त्यबुद्धयः।
पितरस्तेन तृप्यन्ति शेषान्नं न लभन्ति ते।
यच्च पाणितले दत्तं यच्चान्नमुपकल्पितम्।
एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते।

इति। अस्मिन्नवसरे, अन्नादिपरिवेशनं कर्त्तव्यमिति वक्ष्यामः। तद्विधिनिषेधाश्च यथासम्भवं स्मृत्यन्तरेभ्योऽवगन्तव्याः॥०॥ २१॥०॥

पात्रमालभ्य जपेत्,—पृथिवी ते पात्रं द्यौः पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहेति॥ २२॥

पात्रमित्येकवचनमविवक्षितम्। भोजनपात्राण्यालभ्य स्पृष्ट्वा पृथिवी ते पात्रमित्यादि मन्त्रं जपेत्। स चायमालम्भोदक्षिणहस्तेन कर्त्तव्यः। कुतः?। अङ्गानभिधानात्। यच्च,—

"दैवेऽनुत्तानपाणिभ्यामुत्तानाभ्याञ्च पैतृके"।

इति यमवचनम्। तत् तदुक्तप्रयोगविषयमित्यसकृदावेदितम्।

स खल्वयं पात्रालम्भोऽन्नं परिविश्य करणीयः। कथमसूचितमन्नपरिवेशनं क्रियते?। अर्थतोऽवगतेरित्याह। अनुपदं खल्वाचार्य्योऽन्ने-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽङ्गुष्ठनिवेशनमशनञ्च ब्राह्मणानां सूचयिष्यति। तदेवं साक्षादसूचितमप्यर्थादवगतमन्नपरिवेशनं कर्त्तव्यं भवति। यदि कर्त्तव्यम्, विशेषाभावात् जपात् परतएव क्रियताम्?। न,—इत्युच्यते। अन्नसंस्कारार्थोहि जपो न पात्रसंस्कारार्थः। अन्नेन हि संस्कृतेन नः प्रयोजनम्। तद्धि ब्राह्मणाउपयोच्यन्ति। संस्कृतमपि हि पात्रं गुणभावेनान्नस्यैवोपकरिष्यति। करिष्यति चेत्, तस्यैवोपकारः कल्प्यताम्। अलं पात्रस्याप्युपकारान्तरकल्पनया। न हि जपेन दृष्टः कश्चिदुपकारः क्रियते,—इत्यवश्यमदृष्टं कल्पनीयम्। यचेदन्नस्योपकरोति, एकमेवादृष्टं कल्पयितव्यं भवति। अथ तु, पात्रस्योपकुर्व्वन्नस्योपकरोति,—इति कल्प्यते, द्वे तावददृष्टे कल्पयितव्ये भवतः। नचैतत् न्याय्यम्। अपूर्व्वप्रयुक्ताः खल्वालम्भजपादयः पदार्थाः प्रधानस्यैवाङ्गम्। तत्र, 'पात्रमालभ्य'—इति वचनात् आलम्भः पात्रस्योपकारद्वारा प्रधानस्योपकरोतु। जपे तु नैतदस्ति। प्रमाणाभावात्। मन्त्रो ह्यस्य अन्नार्थतां गमयति। 'पृथिवी ते पात्रम्'—इति ह्याह! अन्नं हि ब्राह्मणस्य मुखे जुहोति, न पात्रम्। अन्नेऽपि तर्हि नायं मन्त्रार्थोघटते। न खल्वन्नस्य पात्रं पृथिवी, द्यौर्व्वा तस्य पिधानम्, ब्राह्मणस्य मुखं वा अमृतम्, न वा अन्नमप्यमृतं नाम। नैष दोषः। पञ्चाग्निविद्यादिवदुपपत्तेः। यथा हि पञ्चाग्निविद्यादिषु योषिदादिष्वग्न्यादिबुद्धिः, तथैवात्र पात्रादिषु पृथिव्यादिबुद्धिरभिप्रेयते। अन्नेचामृतबुद्धिः। संस्कारार्थम्। एवं खल्वेतदनुध्यातं सत् संस्कृतं भविष्यति। संस्कृतञ्च सत् ब्राह्मणानामुपयोगेन महते कल्याणायोपकल्पिष्यते,—इति। अमरणहेतुः खल्वन्नं शक्यममृतमिति वक्तुम्। तथाच ब्राह्मे पुराणे।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"पृथिवी पात्रमित्यन्नममृतं चिन्तयेत् पठन्"।

इत्यन्नेऽमृतचिन्तामुपदिशति। रघुनन्दनस्त्वेतदबुद्धा, परिवेशनात् परतोजपे मन्त्रलिङ्गविरोधमाह। यच्चापरमुक्तम्,—मन्त्रे अमृतमित्यनेन यज्ञशेषमात्रावगतेस्तत्प्रक्षेपानन्तरमेव पात्रालम्भोजपश्च, ततः परिवेशनम्,—इति। तदप्यसङ्गतम्। मन्त्रलिङ्गविरोधात्। कथम्?। हुतशेषस्यात्र ब्राह्मणाय दानेन पात्रे प्रक्षेपाभावात् पृथिवी ते पात्रमित्याद्यनुपपत्तेः। जुहोमि,—इत्यनुपपत्तेश्च। यद्धि पूर्व्वं ब्राह्मणाय दत्तं, कथमिदानीं तद्धूयेत। अन्नं खल्विदानीं हूयेत। अमृतशब्दस्य यज्ञशेषवचनत्वेऽपि तन्मात्रवचनत्वे न प्रमाणम्। तस्मात् परिवेशनात् परतोजपेऽपि न कश्चिद्विरोधः। न खल्वपरिवेशितेऽन्ने तत्रामृतबुद्धिस्तत्पात्रादिषु वा पृथिव्यादिबुद्धिर्युक्ता। तस्मात् परिवेशनात् परं पात्रालम्भोजपश्च कर्त्तव्यः।

आह। परिवेशनात् परतः पात्रालम्भे, हुतशेषं दत्त्वा पात्रमालभ्य,—इति वचनं विरुध्यते?। न। यस्मादेवमपि हुतशेषदानस्य पूर्व्वकालता न विरोत्स्यते। तत्र हि क्त्वा स्मर्य्यते न आनन्तर्य्यं। न हि 'भुक्त्वा गच्छति'—इत्युक्ते भोजनानन्तर्य्यं गमने गम्यते, किन्तु भोजने गमनात् पूर्व्वकालता। न हि भुक्त्वा अनाचम्यैव कश्चिद्गच्छति। अस्तु तर्ह्यालम्भस्य पात्रार्थत्वात् पात्रालम्भात् परतः परिवेशनम्, ततो जपः?। तदपि नास्ति। कुतः?। यतः परिवेशनात् परमप्यालम्भे न तस्य पात्रार्थता हीयते,—इत्यनैकान्तिकोहेतुः। अपिच। आलभ्य जपेत्,—इति वचनात् आलम्भानन्तरं पात्रमत्यजन्नेव जपति,—इति गम्यते। तदपि कथम्? इति चेत्। किमनेन प्रसक्तानुप्रसक्तेन?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गम्यते तावदेवम् । गम्यते चेत्,—न युज्यते विनाकारणमुत्स्रष्टुम् । आलम्भात् परतश्चेत् परिविश्यते, नूनमवगतिरियमुत्सृज्येत । तथाच, यथा 'उपविश्य भुङ्क्ते'—इत्युपवेशनं भोजनकालमनुवर्त्तते, तथा 'आलभ्य जपेत्'—इत्यालम्भोऽपि जपकालमनुवर्त्तते । तस्मात् परिवेशनात् परं पात्रालम्भः, ततोजपः,—इति सिद्धम् । तन्त्रान्तरकारा अप्येवं स्मरन्ति । यथा याज्ञवल्क्यः ।

"दत्त्वाऽन्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम्" ।

इति । पात्राभिमन्त्रणं पात्रस्थान्नाभिमन्त्रणम् । तथाच ब्रह्मपुराणम् ।

"देवपूर्व्वं पितृभ्योऽन्नमाज्ययुक्तं मधुप्लुतम् ।
मन्त्रितं पृथिवीत्येवं मधुवातेत्यृचं जपेत्" ।

इति मन्त्रितमन्नमित्यन्नस्य मन्त्रणमाह । यद्यप्येतत् सर्व्वं तत्तत्प्रयोगविषयम्, तथापि न्यायागतस्यार्थस्योपोद्बलकं भवतीति तदुदाहरणार्थतयोपन्यस्तं परोक्तसमुच्चयवादिनां प्रत्यादेशार्थञ्च । यच्च मार्कण्डेयपुराणवचनम्,—

"हुतशेषं प्रदद्यात्तु भाजनेषु द्विजन्मनाम् ।
भाजनालम्भनं कृत्वा दत्त्वाचान्नं यथाविधि ।
यथासुखं जुषध्वं भोरितिवाच्यमनिष्ठुरम्" ।

इति । तत्रान्नस्य दानमुत्सर्गेण परिवेशनमिति समुच्चयवादिभिः सन्तोष्टव्यम् । अनुपदम्, 'यथासुखं जुषध्वम्'—इति वचनोपदेशाच्चैतदेवं प्रतिपत्तव्यम् । अन्नोत्सर्गात् परं हि तद्वचनं तैरिष्यते । परमार्थतस्त्वेतदपि वचनं तदुक्तप्रयोगविषयमित्यस्माकं नास्त्यनुपपत्तिः । भाजनेषु हुतशेषप्रदानञ्चैतदुपोद्बलयति । न च तत्र जपोऽप्यस्ति, अनुपदेशात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समुच्चयवादिनान्वियमनुपपत्तिरवर्जनीया स्यात्। 'मन्त्रितं पृथिवीत्येवम्'—इत्यनन्यगतेर्वचनात्,—इत्यास्तां विस्तरः। सोऽयं न्यायलभ्योऽर्थः,—इति कृत्वा न खल्वत्र भवान् सूत्रकारः परिवेशनमन्त्रस्य सूत्रयाञ्चकार,—इति लिख्यते ॥०॥ २२ ॥०॥

वैष्णव्यर्चा यजुषावाऽङ्गुष्ठमन्नेऽवधाय ॥ २३ ॥

वैष्णवी ऋक्,—'इदं विष्णुर्विचक्रमे'—इत्यादिका। यजुः,—'विष्णो! हव्यं रक्षस्व'—इति केचित्। 'कृष्ण! कव्यमिदं रक्षस्व मदीयम्'—इति केचित्। उभयत्रैव, दैवे 'हव्यम्'—इति, पित्र्ये च 'कव्यम्,—इति पठन्ति। तदत्र भवन्तो भूमिदेवाः प्रमाणम्। वाशब्दोविकल्पार्थः। अङ्गुष्ठमन्नेऽवधाय निधाय। इदञ्चाङ्गुष्ठनिवेशनमन्नसंस्कारार्थतया कुशमयब्राह्मणपक्षेऽपि करणीयं भवति। स्मरन्ति च।

"निरङ्गुष्ठञ्च यत् श्राद्धं वहिर्जानु च यत् कृतम्।
वहिर्जानु च यद्भुक्तं सर्व्वं भवति चासुरम्"।

इति। अन्ने,—इति वचनाच्चान्न एवाङ्गुष्ठावधानं न जलादाविति द्रष्टव्यम्। अस्मिन्नवसरेऽन्ने तिलविकरणं करणीयम्। कथं ज्ञायते?।

"त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः"।

इति।

"प्राचीनावीतमुदकं तिलाः सव्याङ्गमेव च"।

* * * * * * * * *

वल्लभानि प्रशस्तानि सदैवैतानि पैतृके"।

इति च कश्चित् प्रयोगमनारभ्य सामान्यतः स्मरणात्। "यद्गृह्याय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दद्यात्तद्धविष्यैरुपसिच्य”—इति च परिभाषितम्। ‘हविष्य’—इति तिलानामाख्या,—इति महायशाः। दैवे च यवविकरणं कर्त्तव्यम्। यः कश्चिदर्थः पित्र्ये तिलैः क्रियते, स हि दैवे यवैः करणीयोभवति। यवविकरणञ्चेदं ‘यवोऽसि’—इति मन्त्रेण स्यात्। कुतः?। मन्त्रविशेषस्यानुपदेशेन अर्घ्यपात्रीययवकिरणमन्त्रस्यादर्त्तुमुचितत्वात्। कथम्?। यवविकरणसामान्यात्। मन्त्रलिङ्गाच्च। तस्मात्, सूत्रानुपात्तत्वात् समन्त्रकयवविकरणं न,—इत्यसङ्गतं वचनम्। यवविकरणस्याप्येवमकरणापत्तेश्च। क्रियते च। तस्मात् मन्त्रोऽपि पूर्व्वोक्तयुक्त्या पठ्यताम्। पित्र्यइव दैवेऽपि समन्त्रकत्वस्योचितत्वात्। विहिताविहितत्वसन्देहेचाविहितकरणमेव न्याय्यम्,—इति भवानेवाह। पित्र्ये तिलविकरणञ्च ‘तिलोऽसि’—इति मन्त्रेण स्यात्। कुतः?। मन्त्रलिङ्गात्। ‘प्रत्नः स्वधया’—इति ह्याह। ‘स्वधा’—इति पितॄणामन्नं ब्रूमः। ‘स्वधा वै पितॄणामन्नम्—इति हि निगमोभवति।

मध्वप्यन्ने देयम्। एवं हि मधुमन्त्रपाठोमधुजपश्च दृष्टार्थौ भविष्यति।

“यो दद्यादन्नमस्माकं तत् सर्व्वं मधुना सह”।

इत्यपि पितृगीता गाथा भवति।

अस्मिन्नवसरेऽन्नस्योत्सर्गः करणीयः। कथं ज्ञायते?। अन्नसंस्कारो ह्यङ्गुष्ठनिधानान्तेन परिसमाप्यते। न च तावतैव नः कृतकृत्यता। अतोऽन्नमिदानीमुत्स्रष्टव्यम्। उत्सृष्टं खल्वन्नं ब्राह्मणैरुपयुक्तं महते कल्याणाय कल्पिष्यति,—इति। अनर्थकस्तर्ह्युत्सर्गः, ननु ब्राह्मणानामुपयोगेनैव कृतार्थता नः सम्पत्स्यते। वाढ़मेवं सम्पत्स्यते कृता-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्थता। तथापि, तत्रभवन्तो ब्राह्मणाः कथमनुत्सृष्टं परस्वान्नमुपयोक्ष्यन्ति। तस्मात्तदर्थमन्नोत्सर्गः।

"श्रद्धासमन्वितैर्दत्तं पितृणां नामगोत्रतः।
यदाहारास्तु ते जातास्तदाहारत्वमेति तत्"।

इति च स्मरन्ति। अनुपदमापोशानार्थानामपां प्रदानस्य सूत्रणाच्चास्मिन्नेव क्रमे तत्करणमवगच्छामः। उत्सर्गस्य वृत्तत्वे खल्विदानीमुपयोगोब्राह्मणानामापततीत्यनुपदमापोशानार्थानामपां प्रदानमुपपन्नतरं भवति। दत्ते खल्वन्ने पूर्व्वं पाणिषु दत्तं कृतशेषमन्ने निःचिप्यापोशानं कृत्वा ब्राह्मणाश्नमुपयोक्ष्यन्ति,—इति। कात्यायनोऽप्यस्मिन्नवसरेऽन्नोत्सर्गमुपदिशति। तथाच कात्यायनसूत्रम्। "वैष्णव्यर्चा यजुषा वाऽङ्गुष्ठमन्नेऽवगाह्यापहताइति तिलान् विकीर्य्योष्णं स्विष्टमन्नं दद्यात्"—इति। तथा छन्दोगापरसूत्रम्। "अङ्गुष्ठमन्नेऽवधायासावेतत्तेऽन्नमिति, सकृत्सकृदपः प्रचिप्य"—इति। सोऽयं न्यायावगतोऽर्थइति कृत्वा न खल्वत्रभवान् सूत्रकारउत्सर्गमन्नस्य सूत्रयाञ्चकार,—इति श्लिष्यते। रघुनन्दनस्तु,—"वैष्णव्यर्चा यजुषा वाऽङ्गुष्ठमन्ने निधायापहतेति तिलान् विकीर्य्योष्णमन्नं दद्यात्"—इति सूत्रं पठति। क्वचिद्गौडीये सूत्रग्रन्थेऽप्येवमेव सूत्रपाठोदृश्यते। तदा व्यक्तमस्मिन्नवसरेऽन्नस्योत्सर्गः,—इति। परन्तु पाश्चात्यसूत्रग्रन्थेष्वदर्शनात् भाष्यकृता महायशसाऽपठितत्वाच्च तत्र नात्यन्तमास्थेत्यन्यथैतदस्माभिर्व्यवस्थापितम्। रघुनन्दनोक्तसूत्रपाठस्य प्रामाणिकत्वे तु तदुक्तापहताइति मन्त्रेणैव तिलविकरणमिति द्रष्टव्यम्।

स खल्वयमन्नस्योत्सर्गः संबोधनपदेनामन्त्र्य स्वधापदेन करणीयः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथं ज्ञायते?। 'असावेतत्तेऽन्नम्'—इति दर्शनात्। 'गोत्रं स्वरान्तम्'—इति, 'स्वधाकारः पितृणाम्'—इति चैवमादिवचनात्। ये चात्र त्वाम्,—इति मन्त्रस्यात्रोपदेशाभावाच्च। अर्घ्यादिविशेषेषु तन्त्रतानिषेधेन च पित्रादीनां त्रयाणां युगपदेव करणीयोभवति। तत्र, 'विश्वेदेवाइदमन्नं यद्दत्तं यच्च दास्यामि तत्तृप्तिपर्य्यन्तं तत्सर्व्वं ते स्वाहा'—इत्यादिकं त्यागवाक्यं महायशसा लिखितम्। 'इदमन्नं परिविष्टं परिवेच्यमाणञ्चातृप्तेः'—इति विज्ञानेश्वरोप्याह। नैतत् न्याय्यम्। 'असावेतत्ते'—इति सर्व्वत्रास्मच्छास्त्रे त्यागप्रकारसूचणादत्रापि तावन्मात्रस्यैव वक्तुमुचितत्वात्। दास्यमानान्यपि ह्यन्नानि बुद्धा सन्निकृष्यैतच्छब्देन निर्द्देष्टुं शक्यन्ते। कथं भविष्यदन्नमिदानीं त्यक्तुं शक्यते?। शक्यते,—इति पश्यामः। न हि दानमिदं येन 'तर्ह्यदानमफलम्'—इति वचनं विरुध्येत। यागोऽयमिति ह्यवोचाम। यागे च भविष्यन्तीनामपि समिधां त्यागोदृश्यते। अपिच। भवदेवान्नमिह त्यज्यते, प्रतिपत्तिरेव परं भविष्यन्ती,—इत्यदोषः॥०॥ २३॥०॥

सकृत् सकृदपोदत्त्वा॥ २४॥

ब्राह्मणानां हस्तेषु दैवादिक्रमेण सकृत् सकृदुदकं दत्त्वा। इदञ्चोदकदानं भोजनात् पूर्व्वमापोशानार्थम्। कथं ज्ञायते?। 'अश्नत्सु'—इति वक्ष्यमाणसूत्रेणाशनममीषां तावद्गम्यते। अशनञ्चापोशानं कृत्वैव शिष्टाः कुर्व्वन्ति,—इति।

"दत्त्वाऽऽपोशानमासीनः सावित्रीं त्रिर्जपेदथ।
मधुवाता इति त्र्यृचं मध्वित्यन्तेन भोजयेत्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति च स्मृत्यन्तरम्। तदिदमुदकदानं संबोधनविभक्त्या गोत्रादिक-मुल्लिख्य स्वधाकारेण करणीयम्। कुतः?। 'गोत्रं स्वरान्तम्'—इति वचनात्। 'स्वधाकारः पितॄणाम्'—इति वचनाच्च। ब्राह्मणाश्च, 'अमृतस्योपस्तरणमसि स्वाहा'—इति मन्त्रेणापोशानं कुर्य्युः॥ ॥०॥ २४ ॥०॥

मधुवाता इति तृचं जपित्वा मधु च त्रिर्जप्त्वाऽश्नत्सु जपेत्॥ २५॥

तृचम्,—इति, "ऋचि त्रेरुत्तरपदादिलोपश्च च्छन्दसि"—इति सिद्धं भवति। 'छन्दोवत् सूत्राणि कवयः कुर्व्वन्ति'—इति ह्यभियुक्तानां समयः। तथाच, मधुवाता—इति ऋक्त्रयं जपित्वा, मधु—इति च वारत्रयं जप्त्वा, अश्नत्सु ब्राह्मणेषु वक्ष्यमाणं जपेत्। अश्नत्सु,—इति वचनादशनसमकालत्वं जपस्य। सोऽयं मधुमन्त्रजपो गायत्रीजपाद-नन्तरं करणीयः। कथं ज्ञायते?।

"मधुमध्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम्।
गायत्र्यनन्तरं, सोऽत्र मधुमन्त्रविवर्जितः"।

इति छन्दोगपरिशिष्टवचनेनात्र तथा प्रतीतेः। 'गायत्रीं मधुवाताश्च जपित्वा'—इति गौडीयपाठे व्यक्तएवायमर्थः ॥०॥ २५ ॥०॥

अश्नत्सु जपेत्,—इत्युक्तम्। किं जपेत्?। उच्यते,—

व्याहृतिपूर्व्वांᳬसावित्रीं तस्याश्चैव गायत्रं पित्र्याश्च सᳬहितां माधुच्छन्दसीश्च॥ २६॥

जपेत्। व्याहृतयोभूराद्यास्तिस्रः। ताः पूर्व्वाः यस्याः, तां सावित्रीम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐकारोऽपि व्याहृतीनां पूर्व्वं प्रयोक्तव्यः। कस्मात्?। अस्माकं सन्ध्याकर्म्मणि तथैव साविचीजपोपदेशात्। अत्रापि जपतिचोदनासाम्यात्। तथाच कात्यायनः।

"प्रणवोभूर्भुवः स्वश्च साविची च तृतीयिका"।

इति। "पूर्व्वचिकं जपन्"—इति च। 'व्याहृतिपूर्व्वां साविचीं सप्रणवाम्'—इति गौडीयपाठे व्यक्तएवायमर्थः। रघुनन्दनस्तु छन्दोगोऽपि,—

"प्रणवं पूर्व्वमुच्चार्य्य भूर्भुवः स्वस्ततः परम्।
गायची प्रणवश्चान्ते जपएवमुदाहृतः"।

इति योगियाज्ञवल्क्यवचनादन्तेऽपि प्रणवमाह। तदनादरणीयम्। 'पूर्व्वचिकम्'—इति वचनविरोधात्। अन्ते प्रणवकरणे तु चतुष्कापत्तिः। न च, 'प्रणवत्वेन द्वयोरैक्याद्विरुद्धम्,'—इति तदुक्तसमाधानं युक्तमिति वाच्यम्। अस्मच्छास्त्रे आदितः प्रणवस्यैव पूर्व्वमुक्तत्वात् 'पूर्व्वचिकम्'—इत्येतावन्माचोक्तेश्चान्ते प्रणवकल्पनाया असम्भवात्। योगियाज्ञवल्क्यस्तु तैत्तिरीयइति तद्वचनमवष्टभ्य स्वशास्त्रस्यान्यथावर्णनमयुक्तम्।

'तस्याञ्चैव' साविच्यां ऋच्युत्पन्नं यत् 'गायचं' नाम साम। गायचस्य साम्नः ऋगन्तरेऽपि गीयमानत्वात् 'तस्याञ्चैव'—इत्युक्तम्। तदिदं गायचं साम दैवतब्राह्मणे गानग्रन्थारम्भे च गीयते।

"यद्वाउ विश्वपतिः"—इति, "सनादग्ने"—इति, "अचन्नमीमदन्त हि"—इति, "अभिचिपृष्ठम्"—इति, "अक्रांत्समुद्रः"—इति, "कनिक्रन्ति"—इति चैतासु ऋक्षु गीयमानानि सामानि पिच्या नाम संहिता

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भण्यन्ते। तथाच सामविधाने ब्राह्मणे। "यद्वाउ विश्पतिः सनाद्ग्नेऽत्वन्नमीमदन्तह्यभिचिपृष्ठमक्रांत्समुद्रः कनिक्रन्तीति द्वे एषा पित्र्या नाम संहिता, एतां प्रयुञ्जन् पितॄन् प्रीणाति"—इति। सर्व्वाणि चैतानि सामानि गेयगाने पठ्यन्ते। ऋचश्चैताः सर्व्वाएव च्छन्दस्यार्च्चिके।

"इदं ह्यन्नोजसासुतम्"—इत्यस्यामृच्युत्पन्ने द्वे सामनी, "त्वाविदाह्योनरोपीप्यन्"—इत्यस्यां ऋच्युत्पन्नमेकं साम, "स पूर्व्यो महोनाम्"—इत्यस्यां ऋच्युत्पन्नमेकं साम, "पुरां भिन्दुर्युवाकविः"—इत्यस्यामृच्युत्पन्नमेकं साम, "उपप्रक्षे मधुमति क्षियन्तः"—इत्यस्यामृच्युत्पन्नमेकं साम, "परस्व सोम मधुमाऽ ऋतावा"—इत्यस्यामृच्युत्पन्नमेकं साम, "सुरूपकृत्नुम्"—इत्यस्यामृच्युत्पन्नमेकं साम। तानि खल्वेतानि सामानि 'माधुच्छन्दसी' संहितेत्युच्यन्ते। यथा सामविधाने ब्राह्मणे। "इदं ह्यन्नोजसेति प्रथमोत्तमे, त्वाविदाह्योनरः, स पूर्व्यो महोनां, पुरांभिन्दुर्युवाकविरुपप्रक्षेमधुमति क्षियन्तः, परस्व सोम मधुमाऽऋतावा, सुरूपकृ,—राद्यं माधुच्छन्दसमेषा माधुच्छन्दसी नाम संहिता"—इति। सामानि चैतानि गेयगान एव प्रायोगीयन्ते। एकमारण्यकेऽपि। ऋचश्च सर्व्वाएव च्छन्दस्यार्च्चिके समाम्नायन्ते।

तदेतत् सर्व्वं स्वशास्त्रोक्तं जपित्वा स्मृतिपुराणादिषु सामान्यतः श्राद्धतया विहितान्यपि इच्छया पठितव्यानि। रघुनन्दनस्तु, 'तस्याश्चैव गायत्रम्'—इत्यादि सूत्रप्रतीकमलिखन् स्वशास्त्रोक्तान्यपि जप्यानि सामान्यनुपदिश्य स्मृतिपुराणादिविहितेषु श्राद्धेष्वेव यथा रुचि कतिचिल्लिलेख। सेयं पितरमुपेक्ष्य श्वशुरे गाढ़ा भक्तिः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदमिदानीं सन्दिह्यते। किमयं जपः उपवीतिना प्राङ्मुखेन करणीयः, आहोस्वित् प्राचीनावीतिना दक्षिणामुखेन? इति। कुतः पुनरयं संशयः?। यतोजपोऽयं पितृदत्तस्याक्षयत्वाय, आत्मनश्चाभ्युदयाय भवति,—इति वक्ष्यति। ततः संशयः। उच्यते। प्राचीनावीतिना दक्षिणामुखेन,—इति ब्रूमः। कस्मात्?। यस्मात् प्राधान्येन पितृदत्तस्याक्षयत्वफलकोऽयं जपः पित्र्यमेव कर्म्म। प्रकरणाच्च। तत्र खल्वस्माकं प्राचीनावीतित्वमेव प्राप्तं। पिण्डपितृयज्ञे च योजपः,—'नमोवः पितरोजीवाय'—इत्येवमादिः, सोयं नियमतः प्राचीनावीतिनैव क्रियते। "अतऊर्द्धं प्राचीनावीतिना वाग्यतेन कृतम्'—इति गृह्यकारसूत्रणात्। तच्चेहापि चोदकः प्रापयति। यत् पुनर्जमदग्निवचनम्,—

"अपसव्येन कर्त्तव्यं सर्व्वं श्राद्धं यथाविधि।
सूक्तस्तोत्रजपं मुक्त्वा विप्राणाञ्च विसर्जनम्"।

इति। तदपि नैतद्विषयम्। सूक्तस्तोत्रजपविषयत्वात्तस्य। न खल्वत्र सूक्तजपः स्तोत्रजपो वा विहितः। किन्तु साम्नामेव। तस्मात् यथोक्तमेवास्तु ॥०॥ २६ ॥०॥

जपफलमाह,—

स्वर्गे लोके महीयते दत्तञ्चास्याक्षयं भवति ॥ २७ ॥

तान्येतानि जपन् स्वयमपि स्वर्गे लोके महीयते। जपतश्चास्य पितृभ्योदत्तमन्नादिकमक्षयं भवति। अस्येति संबन्धलक्षणा षष्ठी ॥०॥ ॥ २७ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृप्तिं ज्ञात्वाऽन्नं प्रकीर्य्य ये अग्निदग्धाजीवा येप्य-दग्धाः कुलेमम भूमौदत्तेन तृप्यन्तु तृप्तायान्तु परांगतिमिति ॥ २८ ॥

ब्राह्मणानां तृप्तिमवधार्य्य प्रकृतं किञ्चिदन्नं 'ये अग्निदग्धाः'—इति मन्त्रेण प्रकीर्य्य, न सर्व्वमेव भुक्तावशिष्टमन्नम्। कथं ज्ञायते?। पिण्डदानस्याप्यनेनैवान्नेन वक्ष्यमाणत्वात्। 'ये अग्निदग्धाजीवाः'—इत्यत्र, 'अग्निदग्धाश्च ये जीवाः'—इति केचित् पठन्ति।

कथं पुनरिदानीं तृप्तिर्ज्ञातुं शक्या, परतोहि तृप्तिप्रश्नं सूचयिष्यति?। उच्यते। यदा दीयमानमन्नं नेच्छन्ति, बहु चान्नं पात्रे विद्यते, भवति तदा विज्ञानम्—इमे तृप्ताः,—इति। तृप्तिप्रश्नस्तर्ह्यनर्थकोभवति?। किं क्रियताम् यस्यार्थोनास्ति। अनर्थकेऽप्रवृत्तिरिति चेत्। भवेदेतदेवं यदि वचनमचार्थं न स्यात्। "किमिव हि वचनं न कुर्य्यात् नास्ति वचनस्यातिभारः"—इति खल्वाहुः शास्त्रतात्पर्य्यविदः। अपि च। न तदेवानर्थकं यस्य दृष्टोऽर्थोनास्ति। अदृष्टमपि ह्यर्थोभवति। तस्मात् तदेव तृप्तिप्रश्नस्यार्थोभविष्यति।

तदिदमन्नं भूमावेवास्माकं प्रकरितव्यं भवति, न कुशोपरि। कुतः?। 'भूमौ दत्तेन'—इति मन्त्रलिङ्गात्।

"दीयमानं न गृह्णन्ति अन्नञ्च बहु विद्यते।
ज्ञात्वा तृप्तिं ततोदद्योदर्भेषु विकिरञ्च यः"।

इति बृहस्पतिवचनं तदुक्तप्रयोगविषयम्। एवं मत्स्यपुराणादुक्तं 'येषां न माता'—इत्यादि मन्त्रान्तरमपि तत्तत्प्रयोगविषयमेव।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिला अयन्ने मिश्रयितव्याः । पित्र्ये कर्म्मणि सर्व्वत्रैव तिलानाम-भ्यर्हितत्वात् । तथाचाभ्युदयिके छन्दोगपरिशिष्टम् ।

"यस्तत्र प्रकरोऽन्नस्य तिलवत्, यववत्तथा ।
उच्छिष्टसन्निधौ सोऽत्र तृप्तेषु विपरीतकः" ।

इति । अस्माच्च वचनादुच्छिष्टसन्निधावयमन्नप्रकरः स्यात् । "सतिल-मन्नं विकीर्य्य"—इति तत्त्वकारपाठे सूत्रोपात्त एवायमर्थो भवति ।

सोऽयमन्नप्रकरः प्राधान्यात् पित्र्य एव सूचितः । स खल्वयं दैवेऽपि करणीयः । कुतः ? । "दैवपूर्व्वं श्राद्धं कुर्व्वीत"—इति वचनात् । पिण्डोऽपि तर्हि दैवे दीयताम् ? । न दास्यते । किं कारणम् ? । उत्तरत्रैव तत् वक्ष्यामः । सचायं 'ये अग्निदग्धा जीवाः'—इति मन्त्रोलिङ्गात् पित्र्यएवान्नप्रकरे विनियुज्यते । दैवे मन्त्रस्तु,—

"असोमपाश्च ये देवायज्ञभागविवर्जिताः ।
तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकम्" ।

इति गोभिलपरिशिष्टोक्तोग्राह्यः । गोभिलस्यैतदिति हेमाद्रिप्रभृतयः ॥
॥०॥ २८ ॥०॥

सकृत् सकृदपोदत्त्वा पुनर्म्मधुवातां मधुच त्रिर्जप्त्वा तृप्ताः स्थेति पृच्छति ॥ २९ ॥

'सकृत् सकृत्'—इति वीप्सया सर्व्वेषां ब्राह्मणानां हस्तेषु जलदानं दर्शयति । सर्व्वेषां ब्राह्मणानां हस्तेषु अपः उदकं दत्त्वा । उदकदानञ्चेदं प्रत्यापोशानार्थम्,—पूर्व्ववत् सम्बोधनविभक्त्या गोत्रादिकमुल्लिख्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वधापदेन करणीयम्। ब्राह्मणाश्च,—'अमृतस्यापिधानमसि स्वाहा'—इति मन्त्रेण तदुदकं पिबेयुः।

तदेवमपोद्त्वा 'मधुवाताम्' मधुवाताइति ऋचं 'मधुच' त्रिर्व्वारचयं जप्त्वा, तृप्ताःस्थ,,—इति पृच्छति। कथं पुनरत्र ऋचलाभः?। "तृचसूक्तानामादिग्रहणेन विधिरनादेशे"—इति लाट्यायनसूत्रात्। तदीयस्य विधिर्गृह्येऽपि ग्रहीतव्योभवति। तदुक्तमग्निस्वामिना,—"तत्रापि (गृह्येपि) एषएवविधिः कृत्स्नमन्त्रप्रयोगस्य"—इति। पुनःशब्दाच्च। यथा हि पूर्व्वं मधुवाताजपस्तथेदानीमपि,—इत्येतत् पुनःशब्दस्य सामर्थ्यम्। पूर्व्वञ्च न केवलस्य मधुवाता इत्यस्य जपः, अपितु ऋचस्यैव। तस्मादिदानीमपि ऋचस्यैव जपः,—इति सिध्यति। अजपश्च गायत्र्याः। विहितं केषाञ्चिदिदानीमपि गायत्रीजपः। सोयमस्माकं नास्ति,—इति ज्ञापयितुं 'पुनर्मधुवाताम् मधुच त्रिर्जप्त्वा'—इत्याह। अनयोरेव पुनर्जपो न गायत्र्याअपि,—इत्यर्थः।

सोयं तृप्तिप्रश्नोऽदृष्टार्थोन तृप्त्यवगमार्थः। पूर्व्वं खल्वियमवगता। स खल्वयमदृष्टार्थइति कुशमयब्राह्मणपक्षेपि करणीयो भवति। रघुनन्दनस्त्वेतदबुद्धा,—'कुशमयब्राह्मणपक्षे तृप्तिप्रश्नोनास्त्ययोग्यत्वात्'—इत्याह। 'तृप्तिस्तावत् सर्व्वसाधारणी सा सर्व्वान् प्रति प्रष्टव्या'—इति ब्रुवाणोमहायशाअप्यदृष्टार्थतामस्य तावन्न वेद। यावत् "प्रश्नेषु पंक्तिमूर्द्धन्यं पृच्छति सर्व्वान् वा"—इति सूत्रमपि न स्मरति ॥०॥ ॥ २९ ॥०॥

तृप्ताःस्म इत्युक्ते शेषमन्नमनुज्ञाप्य ॥ ३० ॥

ऋजुरक्षरार्थः। कथं पुनरिदमनुज्ञापनं भवति, तदेव परंवक्ष्यमवशिष्यते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तच, 'अन्नशेषैः किं क्रियताम्'—इति प्रष्टव्यम्। इष्टैः सहोपभुज्य-ताम्'—इति चानुज्ञातव्यम्। कस्मात्? । स्वशाखाभेदे पठितत्वात्। तथाच छन्दोगापरसूत्रम्। "शेषमन्नमनुज्ञाप्यान्नशेषैः किं क्रियता-मिष्टैः सहोपभुज्यतामिति"—इति ॥०॥ ३० ॥०॥

पितरोऽगृह्यादयस्तेष्टाभवन्ति,—इति प्राधान्यात् पितॄणामुपयोगं ताव-दाह,—

सर्व्वमन्नमेकचोद्धृत्योच्छिष्टसमीपे दर्भेषु चींस्त्रीन् पिण्डानवनेनिज्य दद्यात् ॥ ३१ ॥

सर्व्वमनुज्ञापितं शेषमन्नं एकचैकस्मिन्पात्रे उद्धृत्य। 'एकतः'—इति पाठेऽपि सएवार्थः। उच्छिष्टसमीपे दर्भेषु चींस्त्रीन् पिण्डान् दद्यात्। किं कृत्वा? । अवनेनिज्य। अवनेजनं कृत्वा। अच, "दर्भेषु"—इत्यनन्तरम्, "मधुमध्वित्यन्नमीमदन्तेति जपित्वा"—इत्येवाधिकः पाठः क्वचिद्गौड़पुस्तके दृश्यते। नैवं पाश्चात्यपुस्तके पठ्यते। महा-यशसाप्येतन्न पठितम्। समुच्चयरसिकोरघुनन्दनोऽपि, "मधुवाता इति त्र्यृक्चयं मधु मधु मधु च जपित्वा पितुर्नाम गृहीत्वा गृह्योक्तविधिना पिण्डं दद्यात्"—इत्येतावन्मात्रमाह।

सर्व्वमिति द्रव्याभिप्रायेण वचनं न निरवशेषार्थम्। कथं ज्ञायते? । "यो वा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात्"—इत्यन्वष्टक्यकर्म्मणि गृह्यकारेण शेषभोजनस्याप्युपदेशात्। न खल्वबाधेन सम्भवति शास्त्रार्थे, बचनम्—इति कृत्वा सामान्यस्यापि शास्त्रस्य बाधः कल्पयितुमुचितः, —इति हि चमसिनां शेषभक्षाधिकरणे निर्णीतम्। पिण्डाश्चास्माकं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विल्वप्रमाणाभवन्ति। न चैतत् शेषान्नानां प्रभूततरत्वे, निरवशेषेण शेषान्नेन पिण्डदानमित्यस्यां वर्णनायामुपपद्यते। 'इष्टैः सहोपभुज्यताम्'—इत्यनुज्ञानाच्चैतदेवं प्रतिपत्तव्यम्। तस्मात्,—यत् किञ्चिदन्नव्यञ्जनादिकमवशिष्टं तस्मात् सर्व्वस्मादेव किञ्चित् किञ्चिद्गृहीत्वा एकस्मिन् पात्रे कृत्वा, तेन पिण्डदानं कर्त्तव्यम्,—इति सिद्धम्। तथाचान्वष्टक्यकर्म्मणि कात्यायनः।

"यावदर्थमुपादाय हविषोऽर्भकमर्भकम्।
चरुणा सह सन्नीय पिण्डान् दातुमुपक्रमेत्"।

इति। तस्मात्,—अवशिष्टं मधुतिलादिकमपि पिण्डार्थं ग्रहीतव्यं भवति। 'दर्भेषु'—इति वैकृतोविशेषोपदेशश्चोदकप्राप्तां प्राकृतीं कर्षूं निवर्त्तयति। अन्यत्तु सर्व्वं प्राकृतमिहापि प्रवर्त्तते। 'दर्भेषु'—इति वचनात् दर्व्वीनिवृत्तिरित्यसङ्गतैषा कल्पना। आधाराः खल्विमेदर्भाः प्राकृतमाधारान्तरमेव निवर्त्तयन्ति, न करणभूतामतिदेशागतां दर्व्वीमपि। तस्मादन्वष्टक्यवदत्रापि कर्म्मणि चोदकप्राप्तया दर्व्व्यैव पिण्डादातव्याः।

त्रींस्त्रीन्—इति वीप्सा मातामहपक्षापेक्षया। तेन, "देवपूर्व्वं श्राद्धं कुर्व्वीत"—इति वचनात् दैवेऽपि पिण्डदानं स्यादासनादिवत् —इति पर्य्यनुयोगोपि निरस्तः। "मातामहानाञ्चैवम्"—इति वचने सत्यपि यदयं सूत्रकारस्त्रींस्त्रीनिति वीप्सामभिधत्ते, तद्बोधयति षडेवात्र पिण्डाभवन्ति, न पुनर्दैवेऽपि पिण्डोदातव्यः—इति। तथाच छन्दोगपरिशिष्टम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"कर्षूसमन्वितं मुक्त्वा तथाऽऽद्यं श्राद्धषोड़शम्।
प्रत्याब्दिकञ्च शेषेषु पिण्डाः स्युः षड़िति स्थितिः"।

इति। दैवेऽपि चेत् पिण्डो दीयते, सप्तैव पिण्डाः स्युः। विकिरस्तु न पिण्डः, येन संख्यावचनमिदमुपरुद्ध्येत।

अत्र च, चोदकबलात् प्राप्तं रेखोल्लेखनं कृत्वा, तत्र दर्भानास्तीर्य्य, चोदकप्राप्तं पितॄणामावाहनं कृत्वा, अवनेजनं कर्त्तव्यम्। अथेदानीमन्नमुद्धृत्य, अन्वष्टक्योक्तरीत्या पिण्डदानं करणीयमित्ययं कर्म्मक्रमः। 'उद्धृत्य'—इति 'अवनेनिज्य'—इति च द्वयमेव पिण्डान् दद्यादित्यनेनान्वेति। "अव्यक्तं प्रधानगामि"—इति वचनात्। नत्वनयोरपि परस्परमस्त्यभिसंबन्धः। कस्मात्?। द्वयोरपि पिण्डदानार्थतया समत्वात्। प्रमाणाभावाच्च। तस्मादुद्धरणावनेजनयोः पिण्डदानपूर्व्वकालतामात्रमत्रोच्यते, न पुनस्तयोरपि पूर्व्वापरीभावः। अतः कथं प्राकृतमनयोः पौर्व्वापर्य्यं चोदकप्राप्तमुत्सृज्येत। अथ, वैकृतात् पाठक्रमादनयोः क्रमः कल्प्यते?। नैतत् शक्यते। परिचिकल्पयिषितो ह्यनयोः पाठक्रमात् क्रमः। क्लृप्तस्तु प्राकृतः क्रमोऽस्ति तेन च विरुद्धः परिचिकल्पयिषितः क्रमोन खल्वपि सेद्धुमर्हतीति। नचाविरोधेन सम्भवति वचनार्थे विरोधः कल्पयितुमुचितः। कात्यायनोपि,—

"प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्व्ववत्।
अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निश्चिताः।
द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः।
मातामहप्रभृतीं स्त्रीनेतेषामेववामतः।
सर्व्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्ततः।
अवनेजनवत् पिण्डान् दत्त्वा विल्वप्रमाणकान्।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत्।

इत्यवनेजनात् परतोऽन्नस्योद्धरणं पिण्डदानञ्चाह। यद्यप्येतदाभ्युदयिके कात्यायनेनोक्तं, तथापि,—

"अन्यत्राप्येषएव स्यात् यवादिरहितोविधिः।
दक्षिणाप्लवने देशे दक्षिणाभिमुखस्य च।
दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः"।

इत्यनुपदं तेनैवान्यत्रापि तस्य विधेरतिदेशादत्राप्येतत् सिध्यति। यस्मान्यत्र विशेषोदक्षिणाप्लवनदेशादिस्तस्य विशेषतोऽभिधानाच्चैतदेवं प्रतिपत्तव्यम्। एषएव,—इति चैवकारेण तस्यार्थस्य व्याप्तेर्ज्ञापनात्। तस्मादवगच्छामः,—उपदिष्टविशेषव्यतिरेकेण सर्व्वमन्यदन्यत्र भवतीति। नचेदेवम्, 'अन्यत्राप्येषएव स्यात्'—इत्यनर्थकमापद्येत। तस्माद्यथोक्तमेवास्तु।

एतदनन्तरं वृद्धप्रपितामहादिभ्यः लेपोदातव्यः। "लेपभाजश्चतुर्थाद्याः"—इति वचनात्। स चायं लेपः, संबोधनपदेनामन्त्र्य स्वधापदेन करणीयः। मातामहपक्षे पृथक् करणमुक्तम्। अथेदानीं कात्यायनोक्तमवनेजनं चोदकप्राप्तानि जप-गृहावेक्षण-पिण्डावेक्षण-वासोनिधानानि च कर्त्तव्यानि। तत्प्रकारस्तु गृह्यसूत्रादुपलब्धव्यः। तदिमे अतिदेशागताः,—इति कृत्वा, तत्रभवान् सूत्रकारोनैतान् सूत्रयाम्बभूवेति लिख्यते॥०॥ २१ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आचान्तेषूदकं पुष्पाण्यक्षतानक्षय्योदकञ्च दद्यात् ॥ ॥ ३२ ॥

आचान्तेषु ब्राह्मणेषु सत्सु उदकादिकं दद्यात्। तस्मादाचमनमिदानीं दातव्यम्। तच्चैतत् पिण्डेषु तूष्णीं गन्धादिकं निःक्षिप्य करणीयम् कुतः?।

"गन्धादीन् निःक्षिपेत्तूष्णीं तत आचामयेत् द्विजान्"।

इति छन्दोगपरिशिष्टवचनात्। पिण्डप्रदानं प्रस्तुयैतस्याभिधानात् पिण्डेष्वेव गन्धादीनां निःक्षेपः। पिण्डस्था हि पितरो भवन्ति। "पिण्डानवेक्षते सदैवः पितरोदेश्च"—इति ह्युक्तम्। 'गन्धादीन्'—इत्यनेन च यथासम्भवं गन्धपुष्पादयोगम्यन्ते। पूजार्थत्वादस्य। वासस्तु पूर्व्वमेवप्रदत्तम्। तस्माद्गन्धपुष्पधूपदीपाः इदानीं दातव्याः। "तथा गन्धान्"—इतिवत्पुंसा निर्देशात् पूर्व्वोक्ताएव गन्धादयोह्यद-यमागच्छन्ति। आगच्छन्ति चेत्, किमित्युत्सृज्येरन्। तत्र वाससः पूर्व्वं प्रदानादवशिष्टानामिदानीं दानम्। तदमीषां पिण्डेषु निःक्षेप-विधानात् दैवेच पिण्डाभावात् पितृमातामहपक्षयोरेव करणमिति द्रष्टव्यम्।

तदेवं गन्धादीन् निःक्षिप्य, पित्रादीनां त्रयाणां गोत्रादिकमुल्लिख्य एतत्ते आचमनं स्वधा,—इति तन्त्रेणाचमनं देयम्। एवं मातामह-पक्षेऽपि। नह्यत्र गन्धादिष्विव तूष्णीमिति करोति। येनामन्त्र-कमस्य प्रदानं स्यात्। तदिदं दैवपूर्व्वमेव देयं भवति। कस्मात्। "दैवपूर्व्वं श्राद्धं कुर्व्वीत"—इति वचनात्। देवत्वाद्युक्तस्तु क्रमव्यत्यय-स्तत्तत्प्रयोगविषयः। आचान्तेषु यदिदमुदकदानं, तदासेचनरूपम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तच्चैतदविशेषात् ब्राह्मणाग्रभूमेर्ब्राह्मणानाञ्च भवति। अक्षतायवाः। कुतः?।

"अक्षतास्तु यवाः प्रोक्ताभ्रष्टाधानाभवन्ति ते"।

इति वचनात्। मन्त्रस्योदकादीनां कात्यायनोक्तोग्राह्यः। तथाच कात्यायनः।

"अथाग्रभूमिमासिञ्चेत् सुसुप्रोक्षितमस्त्विति।

शिवाआपः सन्त्विति च युग्मानेवोदकेन तु।

सौमनस्यमस्त्विति च पुष्पदानमनन्तरम्।

अक्षतञ्चारिष्टञ्चास्त्वित्यक्षतानपि दापयेत्"।

इति। युग्मानेव,—इत्याभ्युदयिकविषयम्। पुष्पाक्षतयोर्ब्राह्मणहस्त एवदानम्। कस्मात्?। युग्मानेव,—इत्यनेन तेषामेव सन्निहितत्वात्। अत्र, 'अस्तु'—इति 'सन्तु'—इति च यथासम्भवमुत्तरम्। योग्यत्वात्।

"प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः"।

इति कात्यायनवचने सर्व्वशब्देन व्याप्यवगतेश्च। एतदनन्तरं श्राद्धस्याक्षय्यार्थमुदकं दद्यात्। तच्च,—

"अक्षय्योदकदानञ्च अर्घ्यदानवदिष्यते।

षष्ठेव नित्यं तत्कुर्य्यान्न चतुर्थ्या कदाचन"।

इति कात्यायनवचने, 'अक्षय्योदकदानञ्च'—इति चकारेण 'अक्षतञ्चारिष्टञ्चास्तु'—इति पूर्व्ववचनोपात्तमस्तु—इत्यनुषञ्जनीयम्। अर्घ्यदानवदितिविशेषाभिधानात् एतदपि अर्घ्यवत् प्रत्येकब्राह्मणहस्तेषु देयम्। तच्चैतत् 'अमुकगोत्रस्य पितरमुकशर्म्मणः एतदक्षय्यमस्तु'—इत्यादिना उदकं दद्यात्। "दैवे दत्तं श्राद्धं देवानामक्षय्यमस्त्विति ब्रूतेति पृथक्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यवाम्बु दत्त्वा"—इत्यादि आश्वलायनीये गृह्यपरिशिष्टे दृश्यते। "अक्षय्यमस्त्विति वाचयित्वा"—इति च छन्दोगापरसूत्रे। एवञ्च "उपतिष्ठतामित्यक्षय्यस्थाने"—इति वक्ष्यमाणसूत्रमाञ्जस्येनोपपत्स्यते—इति। "दत्तमिदमन्नपानादिकमक्षय्यमस्तु"—इति गौड़ाः। "येषामुद्दिष्टं तेषामक्षय्यमस्तु"—इति महायशाः। ब्राह्मणाश्च अस्तु,—इति ब्रूयुः। तदेतत् सर्व्वमेवोदकाह्निकं दैवपूर्व्वं करणीयम्। न हि पिण्डसंबन्धेनामीषां विधानम्। येन दैवे पिण्डाभावान्निवर्त्तेरन्॥०॥ ३२ ॥०॥

अघोराः पितरः सन्तु, सन्त्वित्युक्ते, गोत्रं नोवर्द्धतां, वर्द्धतामित्युक्ते, स्वधा निनयनीयान् दर्भान् सपवित्रानास्तीर्य्य, स्वधां वाचयिष्यइति पृच्छति ॥ ३३ ॥

स्वधा,—इत्युदकमाचक्षते। कस्मात्?। 'स्वधास्थ'—इति मन्त्रलिङ्गात्। सेयं स्वधा निनीयते येषु दर्भेषु, तइमे स्वधानिनयनीयाः, तान् स्वधानिनयनीयान्। स्वधानिनयनीयेषु हि दर्भेषु वारिधारां सूचयिष्यति। रघुनन्दनस्त्वेतदजानानश्राह,—'स्वधानिनयनीयान् स्वधावाचनमात्रार्थान्'—इति। तदशब्दम्। न हि निनयतिर्वाचनमभिधत्ते। तस्मान्निरङ्कुशत्वात्तुण्डस्यैवमुक्तं। नत्वेवं शब्दस्यार्थोभवति। दर्भानास्तीर्य्य,—इति सिद्धे, यत् स्वधानिनयनीयान्,—इति करोति, तद्बोधयति—स्वधानिनयनमात्रममीषामर्थोनान्यत् किञ्चिदिति। तस्मादकृतप्रयोजनान्तराश्चान्यएव दर्भाइदानीमास्तृतव्याः। तानिमान् दर्भान् विशिनष्टि। सपवित्रान् पवित्रसहितान्। तदेतत् पवित्र-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिदानीमुत्पादयितव्यम्। न खल्वनुत्पाद्य पवित्रं शक्यन्ते दर्भाः अपवित्राः कर्त्तुम्। ननु, सन्ति पवित्राण्यर्घ्यपात्रसंबन्धीनि?। सत्यं सन्ति। ब्राह्मणाय प्रतिपादितानि तु तानि कथमत्रापि नियुज्येरन्। पितरोऽहि तैस्तर्पिताः। अपिच। किमेतत् पवित्रमर्घ्यसंबन्धि, आहो-स्विदन्यदित्यस्मिन् संशये, अन्यदिति प्रतिपद्यामहे। किं कारणम्?। स्वधानिनयनार्थाह्यन्ये दर्भाः सन्निकृष्यन्ते। स्वधानिनयनीया दर्भा-गृह्यन्ते। तस्मात् पवित्राण्यपि तेभ्यएव कर्त्तव्यानि भवन्ति। व्यपेतानि खल्वर्घ्यपवित्राणि न बुद्धिमागच्छन्ति। आगच्छन्ति त्वितरे दर्भाः; येभ्यः स्वधानिनयनीयागृह्यन्ते। यथा दर्शपौर्णमासयोर्विधृती पवित्रे च न वेदिस्तरणार्थाद्बर्हिषः क्रियेते, किन्त्वव्यक्तत्वात् ततोऽन्यस्मात् परिभोजनीयाद्बर्हिषः। तथाऽत्रापि नार्घ्यपात्रसंबन्धि पवित्रमादेयं किन्त्वव्यक्तत्वात् स्वधानिनयनार्थाद्दर्भात्। नचेदेवम्, पिण्डदानार्थ-रेखाऽप्यर्घ्यसंबन्धिना पवित्रेण क्रियताम्। नचैवं क्रियते। तस्मात्,—तदर्थमिव एतदर्थमपि पवित्रमुत्पादयितव्यम्। तथा चोक्तम्। "विरोधे च श्रुतिविशेषादव्यक्तः शेषे"—इति।

आह। दर्भानास्तीर्य्य,—इत्युक्तम्। न ज्ञायते,—कुत्र इमे दर्भा आस्तृतव्याः—इति। पिण्डेषु,—इति ब्रूमः। कुतः?। "पवित्रान्तर्हि-तान् पिण्डान्,"—इति कात्यायनवचनात्। अतएव दैवे नैतत् स्यात्। तत्र पिण्डाभावात्। 'स्वधां वाचयिष्ये'—इत्ययञ्च प्रश्नः पितृपक्षे मातामहपक्षे च सकृदेव भवति। कथं ज्ञायते?। यदयं सूत्रकारः अत्र प्रश्नं सूत्रयित्वा उत्तरत्र षण्णामेव स्वधावाचनं सूत्रयिष्यति, ततो-ऽवगच्छामः,—षण्णामुद्देशेन सकृदेव प्रश्नोऽयं भवतीति। अन्यथा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मातामहानां स्वधावाचनसूत्रणमनर्थकं स्यात्। "मातामहानाञ्चैवम्" —इति हि सूचितम्। 'अघोराः पितरः सन्तु'—इत्येषा तु प्रार्थना उभयत्रैव कर्त्तव्या। गोत्रं नोवर्द्धताम्'—इति त्रिष्वपि पक्षेषु। सा खल्वियमाशीःप्रार्थना पित्र्ये दक्षिणामुखेन प्राचीनावीतिना कर्त्तव्या। "पिण्डपितृयज्ञवदुपचारः"—इत्यनेन सर्व्वत्र तथाऽवगतेः।

"दत्त्वाऽऽशीः प्रतिगृह्णीयात् द्विजेभ्यः प्राङ्मुखोबुधः।
अघोराः पितरः सन्तु सन्त्वित्युक्तः स तैः पुनः"।

इति मत्स्यपुराणवचनं तदुक्तप्रयोगविषयम्। समुच्चयमुपपिपादयिषु-र्वाचस्पतिस्तु,—

"दक्षिणां दिशमाकाङ्क्षन् याचेतेमान् वरान् पितॄन्"।

इति मनुवचनं मत्स्यपुराणवचनञ्च पूर्व्वोक्तं पश्यन्, 'पूर्व्वाभिमुखोदक्षिणां दिशं मनसा पश्यन् कुर्य्यात्'—इति कल्पयन् वाचोयुक्त्यनभिज्ञ एव। 'दक्षिणां दिशम्'—इत्यनन्तरञ्च मनुना 'दातारो नोभिवर्द्धन्ताम्' —इति पठितं, नत्वघोराः पितरः सन्तु—इति। मत्स्यपुराणे तु,—

"अथ पुष्पाक्षतान् पश्चादक्षय्योदकमेव च।
सतिलं नामगोत्रेण दद्याच्छक्त्या च दक्षिणाम्।
* * * * * * * * * *
ततः स्वधावाचनिकं विश्वदेवेषु चोदकम्।
दत्त्वाऽऽशीः प्रतिगृह्णीयात् द्विजेभ्यः प्राङ्मुखोबुधः।
अघोराः पितरः सन्तु सन्त्वित्युक्तः पुनर्द्विजैः।
गोत्रं तथा वर्द्धतां नस्तथेत्युक्तश्च तैः पुनः।
दातारोनोऽभिवर्द्धन्तामिति चैवमुदीरयेत्"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति तस्मादन्यादृशमेव पठितम् । तदेतदपि मतद्वयं कथं समुच्चिचीषति,—इति न खल्वधिगच्छामि । समुच्चयरसिको रघुनन्दनस्त्वनयोः समुच्चयमुपपादयितुमपारयन् साधारणत्वञ्च मत्स्यपुराणीयप्रयोगस्याजानानः कल्पनाकुशलः शाखान्तरीयत्वं तस्य कल्पयाञ्चकार । तदश्रद्धेयम् । साधारणाभ्युदयकीर्त्तनाध्याये खल्वयं प्रयोगस्तत्रोपदिष्टः सर्व्वसाधारणएव भवति । स कथं शाखान्तरीयः शक्यः कल्पयितुं ऋते निरङ्कुशत्वं मनसः । शाखान्तरीयत्वे च नास्य साधारणत्वं स्यात् । शाखान्तरीयत्वकल्पना चैवंविधस्थले भवतामवलम्बनम् । सा त्विह न सम्भवतीत्यकामेनाप्यस्मत्सिद्धान्तोऽत्राभ्युपगन्तव्यः,—इत्यस्तु किं विस्तरेण ॥०॥ ३३ ॥०॥

वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्योवृद्धप्रमातामहेभ्यश्च स्वधोच्यतामिति ॥ ३४ ॥

ऋजुरक्षरार्थः । चशब्दात् 'स्वधोच्यताम्'—इत्यस्य प्रत्येकमतिसंबन्धः । तेन, 'पितृभ्यः स्वधोच्यताम्'—इत्यादिकं वक्तव्यं भवति । अतोनात्र तन्त्रता । तथाच कात्यायनः ।

"अर्घ्येऽक्षय्योदके चैव पिण्डदानेऽवनेजने ।
तन्त्रस्य विनिवृत्तिः स्यात् स्वधावाचनएवच ।

इति । अत्र, मातामहाद्युपादानस्याभिप्रायः पूर्व्वसूत्रे वर्णितोऽस्माभिः ॥ ॥०॥ ३४ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्तु स्वधेत्युक्ते स्वधानिननीये धारां दद्यादूर्जंवह-न्तीरित्युत्तानं पात्रं कृत्वा ॥ ३५ ॥

अस्तु स्वधेति प्रत्येकं ब्राह्मणैरुक्ते, स्वधानिनयनीये पूर्व्वास्तृतदर्भे । जात्यभिप्रायेणैकवचनम् । स्वधानिनयनीयेषु,—इत्यर्थः । क्वचित्तथैव पाठः । रघुनन्दनस्तु 'स्वधानिनयने'—इति पठित्वा 'स्वधावाचने कृते'—इति व्याचष्टे । तदशब्दमित्युक्तम् । तत्पाठेऽपि, अधिकरणे ल्युटा दर्भ एवार्थः । तदेतेषु दर्भेषु उदकधारां दद्यात्,—ऊर्जं वहन्तीरिति मन्त्रेण । किं कृत्वा? । यत् पात्रं पूर्व्वं संस्रवान् समवनीय न्युब्जं कृतं, तत् पात्रमुत्तानमूर्द्धमुखं कृत्वा । तथाच कात्यायनः ।

"प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः ।
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत्" ।

इति । भट्टनारायणोऽपि, उत्तानपात्रकृदिति परिषेचनकर्त्तृविशेषण-तयैव व्याचष्टे । यच्च, 'अत्रोत्तानपात्रकृदिति यथाश्रुतदर्शनात् परि-षेचनकर्त्तृविशेषणतया भट्टेन यद्व्याख्यातं तद्गोभिलश्राद्धसूत्रादर्श-नात् । तथाच प्रागुक्तपरिषेचनसूत्रानन्तरं गोभिलः । उत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्यादिति'—इति रघुनन्दनेनोक्तम् । तदस-ङ्गतम् । यस्मादुत्तानं पात्रं कृत्वा,—इत्यस्य परसूत्रप्रतीकत्वे खल्वेतदेवं स्यात् । पूर्व्वसूत्रप्रतीकत्वे पुनर्नैवं भवति । न चैतस्योत्तरसूत्रप्रतीकत्वे किञ्चित् प्रमाणमस्ति । कात्यायनस्त्वेतत्सूत्रप्रतीकत्वमेव तस्य स्पष्टं ज्ञापयति । स खल्वस्पष्टानां प्रदीपवत् स्पष्टमुपदेष्टा । तस्मादुत्तानं पात्रं कृत्वेत्येतदेतत्सूत्रप्रतीकमेव, नोत्तरसूत्रप्रतीकमिति स्थिप्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु, उत्तरसूत्रप्रतीकत्वमस्य गम्यते?। सत्यं, गम्यते भवताम्, न कात्यायनस्य। तस्य त्वेतत्सूत्रप्रतीकत्वमेवैतस्यागमिषत। भवतामपि कथमेतद्गम्यते,—इति वक्तव्यम्। उभयथा हि दर्शनं भवति। यथा खल्वभ्युदिते तरणौ देवदत्तः प्रातराशं भुङ्क्ते चंक्रमणं कृत्वा मध्याह्ने स्नात्वा वाससी परिधायापूपान् भक्षयति,—इति। अत्र यदि अभ्युदिते तरणौ देवदत्तः प्रथमं चंक्रमणं करोति, ततः प्रातराशं भुङ्क्ते, तदा 'चंक्रमणं कृत्वा'—इत्येतत् पूर्व्वस्यैव वाक्यस्य प्रतीकं भवति। अथ, आदौ प्रातराशं भुङ्क्ते, ततश्चंक्रमणं करोति अथ स्नाति, तदोत्तरवाक्यस्यैव प्रतीकं। तत्रैवमुभयथा दर्शने सति, 'उत्तानं पात्रं कृत्वा'—इत्येतदुत्तरस्यैव सूत्रस्य प्रतीकं, नैतस्य—इत्यस्यां कल्पनायां न किञ्चित् कारणं पश्यामः। पक्षपातेन हि भवानेवं मन्यते। परतन्त्रप्रज्ञा हि जनाः स्वयं शास्त्रार्थं निर्णेतुमशक्नुवन्तः प्रख्यातवर्णनाखवलम्बेरन्। स्वतन्त्रप्रज्ञानान्तु नैवमकस्मात् पक्षपातो युक्तः। पुरुषमतिवैश्वरूप्येण तत्त्वाव्यवस्थानप्रसङ्गादित्यस्तु किं विस्तरेण?।

न च, 'उत्तानपात्रकृदित्यस्य,—

"युग्मानेव स्वस्तिवाच्यानङ्गुष्ठग्रहणं सदा।
कृत्वा धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः"।

इत्युत्तरश्लोकेनान्वयः'—इति नारायणोपाध्यायमतं युक्तमिति वाच्यम्। यथा श्रुतार्थपरित्यागे मानाभावात्। शब्दस्य श्रवणमात्रात् योऽर्थोऽवगम्यते, सोऽयं श्रुत्याऽवगम्यते। अवगम्यते चेत्, कथं परित्यज्येत।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेतत् स्वधानिनयनीये धारादानम्,—अन्वष्टक्योक्तप्रकारेण वामान्वारब्धदक्षिणहस्तेन करणीयम्। यच्च,—

"श्राद्धे सेचनकाले तु पाणिनैकेन दापयेत्।
तर्पणे तूभयं कुर्य्यादेषएव विधिः स्मृतः"।

इति स्नानसूत्रपरिशिष्टे 'पाणिनैकेन'—इत्युक्तम्। तदञ्जलिकरणाभावाभिप्रायेण, नत्वन्वारम्भनिषेधार्थम्। कथं ज्ञायते?।

"देवतानां पितॄणाञ्च जले दद्याज्जलाञ्जलीन्।
असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलीन्"।

इत्यनुपदमेव तर्पणे अञ्जलिविधानस्वरसात्। तदस्य परिषेचनस्यातिदेशलभ्यत्वेपि सूत्रणमाशीःप्रार्थनानन्तरं दर्भास्तरणानन्तरञ्चैतत् करणीयमित्येतदर्थम्। न पुनर्वारिधारान्तरविधानार्थम्। कल्पनागौरवापत्तेः ॥०॥ ३५ ॥०॥

विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा पिण्डपात्राणि चालयित्वा यथाशक्ति दक्षिणां दद्यात् ॥३६॥

'विश्वेदेवाः प्रीयन्ताम्'—इति दैवे ब्राह्मणं वाचयित्वा। 'वाचयित्वा'—इति कुर्व्वन्, 'विश्वेदेवाः प्रीयन्तामिति ब्रूहि'—इति वाचयितुरध्येषणाऽर्थायातेति दर्शयति। 'विश्वेदेवाः प्रीयन्ताम्'—इति प्रश्नः, 'सुप्रीता भवन्तु'—इत्युत्तरमिति महायशाः। तदेतत्सूत्रम्। 'पिण्डपात्राणि चालयित्वा'। पिण्डाश्च पात्राणि च पिण्डपात्राणि, तानि चालयित्वा,—इत्यर्थः। 'पात्राणि'—इति भोजनपात्राणि परामृशति। कथं ज्ञायते?। पिण्डपात्रस्यैकत्वाद्बहुवचनानुपपत्तेः। 'सर्व्वमन्नमेक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चोद्धृत्य'—इति हि सूचितम्। अन्वष्टक्येऽपि एकस्मिन् पात्रे हवींषि समनीय तस्मादवदाय पिण्डदानं ग्टह्यकारेणोक्तम्। ननु, व्यक्तिभेदाद्बहुवचनमुपपत्स्यते?। सत्यमुपपत्स्यते, अगतिरियमितित्वेतदुपेक्षणीयं भवति; सम्भवन्त्यां गतौ। अतएव, पिण्डानां पात्राणि,—इत्यपि न वर्ण्यते। तस्मात् यथोक्तमेवास्तु।

इदानीं 'यथाशक्ति' शक्त्यनतिक्रमेण दक्षिणां दद्यात्। 'हतोयज्ञस्त्वदक्षिणः'—इति हि स्मरन्ति। "यज्ञोगन्धर्व्वस्तस्य दक्षिणा अप्सरसः"—इत्यपि निगमोभवति। तस्मादत्यन्ताशक्तावपि पणं काकिनीं फलं पुष्पमपि वा दक्षिणां दद्यात्। एवमपि सदक्षिणेयज्ञेन खल्वात्मानं धक्ष्यति,—इति। शक्तौ तु, पित्र्ये रजतस्याभ्यर्हितत्वात् तद्देयम्। दैवे पुनरमङ्गलं रजतं न देयं, किन्तु हिरण्यादिकमेवेत्यादिकं यथासम्भवमूहनीयम्।

सेयं दक्षिणा दैवपूर्व्वं दातव्या। कुतः?। "दैवपूर्व्वं श्राद्धं कुर्व्वीत"—इति वचनात्। दक्षिणाऽपि खल्वङ्गं श्राद्धस्य। तस्मात् सापि दैवपूर्व्वमेव करणीया भवति। विष्णुपुराणोक्तस्तु क्रमविपर्य्ययस्तदुक्तप्रयोगविषयः। यच्च,—

"ब्रह्मणे दक्षिणा देया यत्र या परिकीर्त्तिता।
कर्म्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत्"।

इति छन्दोगपरिशिष्टवचनेन दक्षिणादानस्य कर्म्मान्तत्वाभिधानात्,—

"दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत्।
पित्राद्यन्तन्त्वीहमानः क्षिप्रं नश्यति सान्वयः"।

इति मनुवचनाच्च आदौ पितृपक्षे दक्षिणा,—इति तत्त्वकारेणोक्तम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदयुक्तम्। परतोपि कर्म्माभिधानादिदानीं कर्म्मान्तत्वानुपपत्तेः। छन्दोगपरिशिष्टवचनस्य सामान्यस्यापवादविषयेऽप्रवृत्तेश्च। मनुवचनञ्च तदुक्तप्रयोगविषयमित्यनुदाहरणम्।

सा खल्वियं दक्षिणा,—पित्र्ये प्राचीनावीतिना दक्षिणामुखेन कर्त्तव्या, पित्र्यकर्म्माङ्गत्वात्,—इति नीलाम्बरोपाध्यायाः। मदनपारिजाते तु,—

"सर्व्वं कर्म्मापसव्येन दक्षिणादानवर्जितम्"।

इति जमदग्निवचनादुपवीतिना प्राङ्मुखेन कर्त्तव्या,—इत्युक्तम्॥०॥

॥ ३६ ॥०॥

अथेदानीम्,—

दातारोनोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च श्रद्धा च नोमा विगमद्बहुदेयञ्च नो अस्तु अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च याचिष्म कञ्चनेत्येताएवाशिषः सन्तु॥ ३७॥

'इति' एतं मन्त्रं पठित्वा, 'एताएवाशिषः सन्तु'—इति प्रार्थयेत्। 'वेदाः,'—इति बहुवचनान्तमेव पदम्,—अत्र, छन्दोगापरसूत्रे, कातीयकल्पादौ च पठ्यते। मन्वादिभिरप्येवमेवेदं पठितम्। विज्ञानेश्वरकुल्लूकभट्टादिभिरपि तथैव व्याख्यातम्। दीपकलिकामात्रदर्शी रघुनन्दनस्त्वाह,—'वेदस्याध्ययनाध्यापन-तदर्थबोध-तदर्थानुष्ठानैर्वृद्धिमेतु'—इति याज्ञवल्क्यदीपकलिकायां व्याख्यानात् वेद-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्येवपाठो न तु वेदादिति,—इति। तदेतदुपजीव्यशूलपाणिभक्त्यतिशयख्यापनमित्युपेक्षणीयं भवति।

'माव्यगमत्'—इति केचित् पठन्ति। 'बहुदेयञ्च नोऽस्त्विति'—इति मन्वादौ इतिकारस्य स्वरूपार्थत्वमबुद्ध्वा तदेव पठन्त्यन्ये॥

॥०॥ ३७ ॥०॥

सन्त्वित्युक्ते स्वस्तिवाच्याशिषः प्रतिगृह्य ॥ ३८ ॥

सन्तु,—इति ब्राह्मणैरुक्ते, सर्व्वानेव ब्राह्मणान् स्वस्ति—इति वाचयित्वा पूर्व्वोक्ताएवाशिषः प्रतिगृह्य इदानीं मनसा स्वीकृत्य। स्वस्तिवाच्य,—इति वचनात् स्वस्ति ब्रूहि,—इति ब्राह्मणेषु वाचयितुः प्रश्नोऽर्थायातः,—इति। सर्व्वे च ब्राह्मणाः खल्वेतत् स्वस्ति वाचयितव्याः। कुतः?। "युग्मानेव स्वस्तिवाच्य"—इति कात्यायनदर्शनात्। युग्मान्,—इत्याभ्युदयिकाभिप्रायं वचनम्।

रघुनन्दनस्त्वन्यथेमं ग्रन्थं पठति,—'उत्तानं पात्रं कृत्वा'—इत्यादिम्। "उत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्यात्, विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा, दातारोनोऽभिवर्द्धन्तां वेदाः सन्ततिरेवच श्रद्धा च नो माव्यगमद्बहुदेयञ्च नोस्त्विति अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च याचिष्म कञ्चन अन्नं प्रवर्द्धतां नित्यं दाता शतं जीवतु येभ्यः सङ्कल्पिता द्विजास्तेषामक्षया तृप्तिरस्तु एताः सत्याश्चाशिषः सन्तु इत्याशिषः प्रतिगृह्य"—इति। सहायशःप्रभृतयो यथा पठन्ति, तथैव त्वस्माभिः पठितोव्याख्यातश्च ग्रन्थः ॥०॥ ३८ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाजेवाजे वतवाजिनोधनेषु विप्राश्रमृताऋतज्ञा अस्य मध्वः पिवत मादयध्वं तृप्तायात पथिभिर्देवयानैरित्येतया विसृज्य ॥ ३९ ॥

वाजेवाजे,—इत्येतया ऋचा ब्राह्मणान् विसृज्य। विसर्ज्जनप्रकारश्च छन्दोगपरिशिष्टोक्तोग्राह्यः। यथा,—

"युग्मानेव स्वस्तिवाच्यानङ्गुष्ठग्रहणं सदा।
कृत्वा, धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः"।

इति। अस्माद्वचनादवगच्छामः,—मन्त्रमुच्चार्य्य धूर्य्यस्य विप्रस्यानङ्गुष्ठं पाणिं गृह्णीयात्। तावतैव सर्व्वे ब्राह्मणाविसृष्टाभवन्ति,—इति। सोयं धूर्य्याविप्रः पित्र्यएव भवति। किं कारणम्?। पित्रर्थं हि श्राद्धं देवास्तु तदङ्गतयेज्यन्ते। तत्रैवं सति, ब्राह्मणेषु यः श्रुतादिभिरन्यानत्येति, सोयं धूर्य्यः पित्र्यएव नियोक्तव्योभवति, न खल्वपि दैवे। न हि प्रधानमतिक्रम्य तच्छेषे विशेषस्याभिनिवेशः प्रधाने तु सामान्यस्येति साध्वी कल्पना भवति। तस्मात् पित्र्यएव विप्रोधूर्य्यः। तस्य च पाणिं गृहीत्वोत्थापनं करणीयम्। तावता न केवलमयमेवैकः, यावत् सर्व्वेपि श्राद्धिब्राह्मणाउत्थापिताविसृष्टाश्च भवन्ति। तदेवं धूर्य्यं ब्राह्मणमनु परेषामुत्थानावगतेः पश्चादेव दैवब्राह्मणः समुत्थितोविसृष्टश्च भवति,—इत्यर्थात् सिद्धम्। अथात्रापि दैवपूर्व्वत्वमिष्येत, धूर्य्यस्येतिवचनमनर्थकं स्यात्। कथम्?। धूर्य्यस्येतिवचने धूर्य्यस्यान्यस्य च हस्तग्रहणं प्राप्नोति। अवचनेपि तथैव प्राप्नोति। किमिति धूर्य्यस्येति करोति। तस्मात्,—परिसंख्यानार्थमेवैत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वचनमिति प्रतिपद्यामहे। पित्रधीनः खल्वन्येषां यागः,—इति पितृ-ब्राह्मणे विसृष्टे सर्व्वएवैते सुतरां विसृष्टाभवन्ति,—इति। तदिदं दैवान्तत्वं श्राद्धस्य। तदेवं धूर्य्यं ब्राह्मणमुत्थाप्य, समुत्थितान् सर्व्वान् ब्राह्मणान् तन्त्रेण प्रणमेत् ॥०॥ ३९ ॥०॥

आमा वाजस्य प्रसवोजगम्यादेमे द्यावापृथिवी-विश्वरूपे अमा गन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यादित्यासीमान्तमनुव्रज्याभिवाद्य प्रदक्षिणीकृत्य वामदेव्यं गीत्वा प्रविशति ॥ ४० ॥

आमा वाजस्य,—इति मन्त्रेण सकृत्पठितेनैव सर्व्वान् ब्राह्मणान् सीमापर्य्यन्तमनुव्रज्य सर्व्वानभिवाद्य प्रदक्षिणीकृत्य च वामदेव्यं नाम साम गीत्वा अथ प्रविशति गृहम्। 'कयानश्चित्रआभूवत्'—इति ऋचे सूक्ते गीयमानं साम वामदेव्यम्। रघुनन्दनस्त्वन्यथेमं ग्रन्थं पठति पितरा मातरा'—इत्यादिम्। "पितरा मातरा युवमामा सोमोऽमृतत्वाय गम्यादित्येतयाऽनुव्रज्य प्रदक्षिणीकृत्याभिवादयेत् ततोवामदेव्यं गीत्वा गृहं प्रविशति"—इति।

एतत्पर्य्यन्तं कृत्वा, "मध्यमं पिण्डं पत्नी पुत्रकामा आश्नीयादाधत्त पितरोगर्भमिति, योवा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात्" —इति, "द्वन्द्वं पात्राणि प्रक्षाल्य प्रत्यतिहारयेत्"—इति च चोदकप्राप्तं कर्त्तव्यम्। तत्र, 'योवा तेषाम्'—इति सूत्रेण श्राद्धशेषभोजनमुक्तम्। तच्चैतत् स्वभोजनकाले स्यात् न पुनरेतस्मिन्नेव क्रमे, —इति। पिण्डप्रतिपत्तिस्त्वान्वष्टक्योक्ता ग्राह्या।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धदिने बलिवैश्वदेवौ च श्राद्धोत्तरकाले श्राद्धशेषेण करणीयौ। कुतः?।

"श्राद्धान्ते श्राद्धशेषेण वैश्वदेवं समाचरेत्"।

इति स्मरणात्। अपिच। पितृभ्योहविर्निरूप्य तेभ्योऽदत्त्वा न खल्वन्येभ्यस्तस्य दानमुचितम्। तदुक्तं निरुक्ते नैगमकाण्डे। "अगस्त्य इन्द्राय हविर्निरूप्य मरुद्भ्यः सम्प्रदित्साञ्चकार, स इन्द्रएत्य परिदेवयाञ्चक्रे"—इति। तस्मात् श्राद्धशेषेणैतयोःकरणं न ततः पूर्व्वम्,—इति। विस्तरेण चैतदस्माभिर्गृह्यसूत्रभाष्येऽभिहितमित्युपारम्यते।

अथैतस्मिन् कर्म्मणि किं प्रधानमित्यस्य निरूपणार्थं संक्षेपतो विचारणां करिष्यामः। किं भवति प्रयोजनम्?। यत् प्रधानं तावन्मात्रे निर्वृत्ते अतिपतितेष्वन्यस्मिन् कस्याञ्चिदवस्थायां पुरुषोन प्रत्यवैष्यति,—इति। तत्र, इदं तावत् नः परीक्ष्यम्,—किं ब्राह्मणनिमन्त्रणादि सर्व्वं प्रधानम्, उत एषु मध्ये किञ्चित्,—इति। सर्व्वं तावन्न भवति प्रधानम्। किं कारणम्?। प्रत्यक्षं खल्वेषु कस्यचित् परार्थत्वम्। यथा निमन्त्रणादेर्भोजनाद्यर्थत्वम्। रेखाकरणादेश्च पिण्डदानाद्यर्थत्वम्। वचनमत्रार्थे नास्ति,—इति चेत्। मासीद्वचनं प्रत्यक्षं तावदेतत्। यच्च परार्थं न तत् प्रधानम्। शेषः खल्वसौ। तथाचोक्तम्। "शेषः परार्थत्वात्"—इति। न च, सर्व्वत्र तत्र भवन्तः फलमामनन्ति। फलवतः सन्निधौ च यदफलं श्रूयते, तत् फलवतो भवत्यङ्गमिति। तस्मात् किञ्चिदेषु प्रधानं न सर्व्वम्,—इति स्थितम्। एवं स्थिते चिन्ता। किं ब्राह्मणभोजनं प्रधानम्, आहोस्वित् पिण्डदानम्, उताहो उभयम्?—इति। कुतः संशयः?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उभयत्रैव फलश्रुतिदर्शनात्। ननु, शेषेण पिण्डदानविधानाद्युक्तं प्रतिपत्तिरियम्। नैषदोषः। अर्थकर्म्मणि प्रतिपादनोपपत्तेः। बलिहरणवत्। यथा खल्वर्थकर्म्मणि बलिहरणे वैश्वदेवशेषस्य प्रतिपादनं, तथा अर्थकर्म्मणि पिण्डदाने शेषोयं प्रतिपाद्यते,—इति। कथं ज्ञायते?। फलवादोपपत्तेः। पिण्डे फलवादः खल्वेवमुपपत्स्यते। अफलायां प्रतिपत्तौ नैतस्योपपत्तिः। तस्मादर्थकर्म्मैतत् पिण्डदानमिति पश्यामः। इतश्चैतदेवं पश्यामः। अभावेऽपि दर्शनात्। शेषस्याभावेऽपि पिण्डदानं दृश्यते। क्व?। पिण्डपितृयज्ञादौ। ब्राह्मणभोजनं तत्र नास्ति। ब्राह्मणभोजनस्य चाभावे कस्य शेषः प्रतिपादयिष्यते। तस्मादर्थकर्म्मैवासौ न प्रतिपत्तिः। तत्रैव शेषः प्रतिपाद्यते। प्रतिपत्त्यर्थकर्म्म वैतत् स्यात् न प्रतिपत्तिरेव। ब्राह्मणभोजनात् पुरस्तादपि केषाञ्चित् पिण्डदानदर्शनाच्चैवमवगच्छामः।

तत्र, उभयं प्रधानम्,—इति भट्टनारायणप्रभृतयोमन्यन्ते। श्लोकानप्युदाहरन्ति।

"प्राधान्यं पिण्डदानस्य केचिदाहुर्मनीषिणः।
गयादौ पिण्डमात्रस्य दीयमानस्य दर्शनात्।
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः।
ब्राह्मणस्य परीक्षायां महायत्नप्रदर्शनात्।
आमश्राद्धविधानस्य विना पिण्डैः क्रियाविधेः।
तदालभ्याप्यनध्यायविधानश्रवणादपि।
विद्वन्मतमुपादाय मम त्वेतत् हृदि स्थितम।
प्राधान्यमुभयोर्यस्मात्तस्मादेष समुच्चयः"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति । तदिमे श्लोकाः छन्दोगपरिशिष्टस्यान्तिमे खण्डे पठ्यन्ते । गृह्यसूत्रभाष्ये भट्टनारायणेन च पठिताः । परिशिष्टप्रकाशकृता तु नारायणोपाध्यायेन छन्दोगपरिशिष्टस्य तृतीयप्रपाठकस्यान्तिमाः कतिचित् खण्डा न पठिताः न च व्याख्याताः । तदत्र भवन्तोभूमि-देवाः प्रमाणम् । अत्रच, निमित्ततोब्राह्मणभोजनस्य पिण्डदानस्य चाननुष्ठानेऽप्युभयोः प्राधान्यं नानुपपन्नम् । असोमयाजिपचे दधि-पयोयागवत् । फलश्रुतिश्चोभयत्राप्यस्ति । तदेवं न्यायोऽप्यनुगृहीतो भवति ।

यत्त,—'नित्यश्राद्धादौ पिण्डनिषेधात् ब्राह्मणभोजनमात्रं प्रधा-नम् । निषेधोहि प्राप्तस्य, प्राप्तिश्चातिदेशात्, स चाङ्गानामेव,— इति । अङ्गे च पिण्डदाने फलश्रुतिरर्थवादएव । पिण्डदानमात्रविधि-स्त्वङ्गभूतपिण्डदानात् कर्मान्तरम्'—इति शूलपाणिनोक्तम् । तत्र ब्रूमः । 'मासमग्निहोत्रं जुह्वति'—इति कौण्डपायिनामयने, अग्नि-होत्रवत् जुह्वति इति वचनव्यक्त्या यथा नैयमिकस्याग्निहोत्रस्य धर्म्मा अतिदिश्यन्ते, प्रधानञ्च होमोयोऽग्नये च प्रजापतये च, इत्यादिः, यथा वा 'उद्भिदा यजेत'-इत्येवमादौ अव्यक्तयजतौ सौमिकधर्म्मादव प्रधानान्यपि यजतयः प्रदिश्यन्ते, तयोरूपान्तराभावात् । तद्वदत्रापि स्यात् । प्रधानस्यातिदेशे न कश्चिदर्थः,—इति खल्वसौ न प्रदिश्यते । यथाचावोचाम,—महानर्थस्तस्य भवति,—इति कथमसौ न प्रदिश्येत ।

अथ मन्यसे,—नासौ प्रधानस्यातिदेशः किन्त्वङ्गस्यैव । प्रधानं खल्वत्र जुहोतिना यजतिनाच विहितम् । द्रव्यदेवते पुनरङ्गे एव प्रदिश्येते अङ्गान्तरवत्,—इति । एवन्तर्हि प्रकृतेऽपि श्राद्धचोदनया

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रधानं विहितम्,—इत्यङ्गमेवेतिकर्त्तव्यता प्रदेक्ष्यते। कथन्तर्हि नित्य-श्राद्धादौ पिण्डदानस्य निषेधः?। इतिकर्त्तव्यतानिषेधाभिप्रायेण,—इति गृहाण। इतिकर्त्तव्यतायाश्च निषेधात् पिण्डोपि न दीयते। उत्तरवेदेर्निषेधात् वश्वदेवे सुनासीरीये च यथा न अग्निः प्रणीयते। न हि विहितमपि इतिकर्त्तव्यताभिरनुपकृतमर्थाय कल्पते। यस्य चार्थोनास्ति, सोपि किमिति क्रियेत। अपिच। न चोदकएव प्रापयति, किन्तर्हि चोदनापि। तस्मादुभयोः प्राधान्यपक्षे चोदकेन पिण्डोमा प्रापि। चोदनया तु प्राप्स्यते। तत्र, चोदनया प्राप्तः पिण्डः प्रतिषिध्यमानस्तदितरत् चोदनाप्राप्तं कर्त्तव्यमनुजानीते। सोयं पर्य्युदासेन निषेधः।

पिण्डदानमात्रविधिस्त्वङ्गभूतपिण्डदानात् कर्म्मान्तरम्,—इति यदुक्तम्। तत्र पृच्छामः। तस्य श्राद्धत्वमस्ति न वा?। अस्ति चेत्, विफलः प्रयासः। कर्म्मान्तरञ्चैतदेवं न स्यात्। सति ब्राह्मणभोजने पिण्डदानमङ्गम्, असति तस्मिन् प्रधानमिति चेत्। न। रूपभेदाभावात्। यदेव खल्वस्य रूपमङ्गस्य तदेव प्रधानस्यापि। तत्रैवं सति, सति ब्राह्मणभोजने तदङ्गं विपरीतमन्यथा,—इत्यत्र न खलु कारणमस्ति। अपिच। एवमपि पिण्डदानस्य श्राद्धत्वमभ्युपगतं भवति। तथा चासतीव ब्राह्मणभोजने सत्यपि तस्मिन् प्रधानमेवैतत् स्यात्।

अस्तु तर्हि, पिण्डदानस्य श्राद्धत्वं नास्ति,—इति। तदपि नास्ति। यतः तत्र भवान् गृह्यकारः 'तत् श्राद्धम्'—इति सूत्रयन् पिण्डपितृयज्ञस्य श्राद्धत्वमाह। पिण्डप्रधानस्तु सः। पिण्डैरेव तत्र पितरइज्यन्ते। न पुनर्ब्राह्मणभोजनमस्ति। तस्मात्, पिण्डमन्तरेणैव ब्राह्मण-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजनादृतेपि श्राद्धनिष्पत्तिदर्शनात् नैतदेकतरस्मिन्नेव पक्षे चोदयितव्यं भवति। द्वयोः समानत्वात्। समुच्चयपक्षः खल्वेवमुपोद्वलितोभवति। अथ, अनयोरेकतरस्यैव प्राधान्यमिति निर्बन्धः; पिण्डदानमात्रं तर्हि प्रधानमुच्यताम्। पिण्डदानएव तत्र भवतोग्टह्यकारस्य महायत्नदर्शनात्। तथा मनुरपि।

"सहपिण्डक्रियायान्तु कृतायामस्य धर्मतः।
अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः"।

इति पिण्डदानस्य प्राधान्यमाह। सर्व्ववचनसामञ्जस्यकरणाभिमानिनान्त्वेतन्मनुवचनविरोधादुष्परिहरः स्यात्। अस्माकन्तु नैषविरोधः। विभिन्नविषयत्वाद्वचमानाम्। यच्च,—पिण्डनिर्व्वपणं पित्रे दानमिति वर्णितम्। तदसङ्गतम्। यथाश्रुतार्थपरित्यागे हेत्वभावात्। पित्रुद्देश्यकदानमात्रस्यैव तदितिकर्त्तव्यतापत्तेश्च। 'अस्य',—इति करणाच्चैवमवगच्छामः।

"एवं निर्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्"।

इति तस्यैव वचनान्तरदर्शनाच्चैवं गम्यते। 'न निर्व्वपति यः पिण्डम्'—इति चैवमादौ तथैव निर्दिश्यते। प्रसिद्धिश्चैवमनुग्रहीष्यते। तस्मादपवर्णितं तत्। तदेवं कस्यचित् पिण्डदानस्य कस्यचिच्च ब्राह्मणभोजनस्य प्राधान्ये स्वरसः,—इत्यतः कारणात् समुच्चयपक्षः प्रादुर्भवति। अतः एकतरप्राधान्यावेदकानि वचनानि न खल्वेतत्पक्षे चोदयितव्यानि भवन्ति। सोयमलङ्कारो न दोषः। परेषां पुनरयं पर्य्यनुयोगोऽवर्जनीयः स्यात्। तथाचोभयथादर्शनम्। अन्वष्टक्यादौ तत्र भवान् ग्टह्यकारः पिण्डदानं महता प्रबन्धेनोपदिदेश, न ब्राह्मणभोजनम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अप्येकमाशयेद्विप्रम्"—इति च नित्यश्राद्धे कात्यायनश्चाह। तस्मात्,—क्वचित् पिण्डमात्रं प्रधानम्, यथा पिण्डपितृयज्ञादौ। क्वचिद्ब्राह्मणभोजनमात्रम्, यथा नित्यश्राद्धादौ। क्वचिच्चोभयम्, यथा सपिण्डीकरणादौ। इत्यस्तु किं विस्तरेण ॥०॥ ४० ॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ श्राद्धकल्पभाष्ये द्वितीया काण्डिका ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धकल्पः ।

तृतीया कण्डिका ।

एवन्तावत् पार्व्वणश्राद्धप्रयोगोऽभिहितः। अथेदानीं तद्विकृतीभूतमेकोद्दिष्टं वक्तुं प्रतिजानीते,—

अथैकोद्दिष्टम् ॥ १ ॥

वर्त्तिष्यते,—इति सूत्रशेषः। अथ पार्व्वणश्राद्धानन्तरम्। एकउद्दिष्टो यत्र, तदेकोद्दिष्टम्,—इति कर्म्मणोनामधेयम्। तदेतदादिकं श्राद्धजातं पार्व्वणेन विक्रियते। कथं ज्ञायते। शृणु यथा ज्ञायते। सपरिकराभिहिता प्रकृतिर्विकृतिरन्या,—इति तावन्मीमांसकसमयः। पार्व्वणश्चात्र सपरिकरमभिहितं नत्वेकोद्दिष्टादिकम्,—इति। अपिच। आवाहनादिकं तावदत्र निषेत्स्यते। नचाप्राप्तस्य निषेधः। नचात्र-वचनात् प्राप्तिः। तस्मात् चोदकप्राप्तमावाहनादिकं निषिध्यते,—इति गम्यते। एतस्मात् कारणात् पश्यामः,—पार्व्वणस्य धर्म्मात्र प्रदिश्यन्ते,—इति। दीक्षणीयादिषु 'अप्रयाजास्ताः'—इति निषेधस्यान्यथानुपपत्त्या तासु दर्शपौर्णमासधर्म्मप्रदेशोयथा। "उपतिष्ठतामित्यक्षय्यस्थाने"—इति सूत्रणाच्चैवमवगच्छामः। पार्व्वणे खल्वक्षय्योदकं विहितं, तस्य स्थाने चाचोपतिष्ठतामिति विदधत् पार्व्वणस्य धर्म्माणां प्रदेशमत्र बोधयति।

तदिदमेकोद्दिष्टं द्विविधं भवति, प्रेतैकोद्दिष्टं प्रत्याब्दिकैकोद्दिष्टञ्च। तदुभयमिह लाघवार्थमेकेन ग्रन्थेनाभिधीयते। अतः प्रेत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदप्रयोगोऽत्र नोपदिष्टः। एवं खल्वसौ प्रत्याब्दिकेपि प्रसज्येत। कथं नु स मा प्रसञ्जि,—इति यदुभयसाधारणं तदेवोपदिष्टम्। प्रेतैको-द्दिष्टे तु शास्त्रान्तरात् प्रेतपदप्रयोगः स्यात्। तेन, प्रत्याब्दिकमप्ये-कोद्दिष्टमेव। न पुनरेतेन तद्वि क्रियते। तस्मात्, तस्याप्येकोद्दिष्टतयै-वोल्लेखोनत्वेकोद्दिष्टविधिकतया,—इति द्रष्टव्यम्। "अथैकोद्दिष्टं तत् त्रेधा भवति नवं मिश्रं पुराणञ्च"—इति शाखान्तरेपि प्रत्याब्दिक-स्यैकोद्दिष्टत्वमुक्तं नत्वेकोद्दिष्टविधिकत्वम्,—इति।

गौड़ास्तु एतत्प्रकरणशेषे "एतत् प्रेतश्राद्धम्"—इति, एतत् काण्डिकापरिसमाप्तौ, "अत ऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात्; यस्मिन्नहनि प्रेतः स्यात्"—इति च सूत्रद्वयमधिकं पठन्तः, प्रेतैकोद्दिष्ट-मेवैतत् प्रत्याब्दिकेऽप्यस्यैव धर्म्मप्रदेशः,—इति मन्यमानाः प्रत्याब्दिकमे-कोद्दिष्टविधिकतयोल्लिखन्ति। पाश्चात्यसूत्रग्रन्थे तु नैतत् सूत्रद्वयं पठ्यते। भाष्यकारैरपि चिरन्तनैर्नपठितं न खल्वपि व्याख्यातम्। छन्दोगापरसूत्रेऽपि न तादृशं किञ्चित् पठ्यते। पारस्करोपि नैवं किञ्चित् सूत्रयाञ्चकार। कात्यायनएव सपिण्डीकरणात् परम्,— "अत ऊर्द्ध्वं प्रेतायान्नं दद्यात्; यस्मिन्नहनि प्रेतः स्यात्"—इति सूत्रयाम्बभूव। परमसावपि, "एतत् प्रेतश्राद्धम्"—इति नोवाच। यदापि तत् पठ्यते, तदापि प्रेतश्राद्धमिति प्रेतपदस्य, 'प्रेतायान्नं दद्यात्'—इतिवत् प्रमीतोऽर्थः,—इति द्वयमेकेनैव ग्रन्थेनोच्यते,—इति न किञ्चिदनुचितम् ॥०॥ १ ॥०॥

एकं पवित्रम् ॥ २ ॥

पार्व्वणवत् पवित्रबहुत्वप्राप्तौ, एकमित्यनेन तस्यैकत्वं विधत्ते। तदिदं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यायमूलं सूत्रम्। तत्रोद्दिश्यानां बहुत्वादर्थवत् पवित्रबहुत्वम्, अत्र-तूद्दिश्यस्यैकतया न खल्वर्थोऽस्तीति निवर्त्तते,—इति न्यायोऽत्र मूलम्। 'स्वयं कृता वेदिर्भवति'—इति उद्धननखननपरिलेखनानि यथा निवर्त्तन्ते। सौर्य्ये वा चरौ पेषणादीनि यथा लुप्यन्ते। तथा चोक्तम्। अपिचाभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात्"—इति। एककरणसाध्यं खल्वेकोद्दिष्टापूर्व्वमेककरणधर्म्मानेवाकाङ्क्षति,—इत्येकमेव पवित्रमत्रप्रदिश्येत। सौर्य्यचरोरपूर्व्वस्यैककरणसाध्यतया, प्रकृतौ दर्शपूर्णमासापूर्व्वस्य षट्करणसाध्यत्वेऽप्येकस्यैव करणस्य धर्म्मास्तत्र प्रदिश्यन्ते,—इति यथा।

वैकृतोवाऽयं विशेषोपदेशः स्यात्। सोयं श्रुत्या पदार्थं प्रापयति,—इति शीघ्रप्रवृत्तः चोदकं बाधते। चोदकेन हि विप्रकृष्टाधीतः पदार्थोऽन्वीयते,—इति विलम्बेनासौ पदार्थानतिदिशति। यथा वाजपेये सप्तदशशरावनैवारचरोरुपदेशात् चोदकप्राप्ता मुष्टिर्निवर्त्तते। यथा वा चित्रायां तण्डुलानामुपदेशात् चोदकप्राप्ताव्रीहयोनिवर्त्तन्ते; —व्रैहा अव्रैहाश्च तण्डुलाउणादातव्याः,—इति। साद्यस्क्रे च 'खलेवाली यूपोभवति'—इत्युपदेशात् चोदकप्राप्तः खादिरोनिवर्त्तते—खादिरो अखादिरो वा खलेवाली स्यात्,—इति। तद्वदत्रापि, 'एकं पवित्रम्'—इत्युपदेशात् प्राकृतं पवित्रबहुत्वं निवर्त्तते। किं कारणम्?। प्रत्यक्षा हि श्रुतिः, परोक्षश्च चोदकः,—इति। अतएव, —अर्घ्यस्यैकत्वादेव पवित्रस्यैकत्वं प्राप्नोति,—इत्यस्यापि पर्य्यनुयोगस्यानवकाशः। नचाचार्य्योऽर्घ्यस्यैकत्वं सूत्रयित्वा पवित्रस्यैकत्वं सूत्रयाञ्चकार। कात्यायनोहि तथा सूत्रयति। एतेन, तद्दृष्ट्वा, 'एको-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽर्घ्यः एकं पवित्रम्'—इति यद्विपर्य्यस्य पठितं रघुनन्दनेन, तदनाकरम्। भाष्यकारैरपि चिरन्तनैः, 'एकं पवित्रमेकोऽर्घ्यः'—इति क्रमवदेवैतत् सूत्रद्वयं पठितम्। तथात्वेपि वा, अर्घ्यस्यैकत्वेऽपि, एकस्मिन्नेवार्घ्ये चोदकप्राप्तं पवित्रबहुत्वमदृष्टार्थं स्यादित्यधिकाशङ्कानिरासार्थमस्य सूत्रणं नानुपपन्नम्।

यच्चापरमुक्तम्,—अर्घ्यैक्यात् द्विदलरूपसङ्केतितपवित्रैक्यप्राप्तौ एकं पवित्रमिति पुनरभिधानसार्थक्याय तदवयवपरम्,—इति। तदपि न सुन्दरम्। यतो न्यायमूलं विशेषोपदेशपरं वा वचनम्। उभयथापि,—

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेवच।

प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्"।

इति स्वशास्त्रोक्तं विशिष्टमेव पवित्रं पार्व्वणवदत्रापि प्राप्नोति। 'यत्र कुत्रचित्'—इति व्याप्त्यवगतेस्तैवमवगच्छामः। "ततएव वर्हिषः प्रादेशमात्रे पवित्रे कुरुते"—इति गृह्यसूत्रे, "पवित्रेस्थोवैष्णव्यौ"इत्युपपत्त्यर्था दलसंख्या तु,—

"आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु"।

इति कात्यायनेनैव स्पष्टीकृता। अत्र तु तत्परिग्रहे न किञ्चित् कारणमस्ति। इतरथा पार्व्वणेप्येकदलं पवित्रं स्यात्। नचैवमिष्यते। द्विवचनान्तः खलु पवित्रशब्दोदलं लक्षयति, नत्वेकवचनान्तोऽपि। कथं ज्ञायते?। "पवित्रेस्थोवैष्णव्यौ"—इति, "पवित्रे कुरुते"—इति चैवमादिषु तथा दर्शनात्। "अच्छिद्रेण पवित्रेण"—इति, "पवित्रमन्तरा कृत्वा"—इति चैवमादिषु तथाऽदर्शनाच्च। तदेवं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विवचनमेवास्य लक्षणायां तात्पर्य्यग्राहकमित्यवधार्य्यते। तस्मात्, प्रमाणाभावान्नात्र द्लक्षणा। प्रमाणान्तरविज्ञेयत्वात्तस्याः। तथा चोक्तम्।

"गौणे सदपि सामर्थ्यं न प्रमाणान्तरं विना।
आविर्भवति मुख्ये तु शब्दादेवाविरस्ति तत्।
तात्पर्य्यञ्च स्वतोमुख्ये गौणार्थपरता पुनः।
प्रमाणान्तरविज्ञेया तद्भावान्न सिध्यति"।

इति। तस्मात्,—एकं पवित्रमिति पुनरभिधानसार्थकत्वाय,—इति रिक्तं वचः। एकोऽर्घ्यः,—इति एकः पिण्डः,—इति चैतयोरनर्थकत्वापत्तिश्चैवमत्रर्ज्जनीया स्यात्। तदनयोर्न्यायमूलत्वं विशेषविधित्वं वा अकामेनापि वाच्यम्। तत्सामान्यात् अस्यापि तथात्वमेवोच्यताम्। कृतमर्द्धजरतीयेन। यत्तु भार्गवनाम्ना वचनं पठन्ति,—

"पार्व्वणेषु तु सर्व्वेषु पवित्रं द्विदलं स्मृतम्।
नैकोद्दिष्टे तु तत् प्रोक्तं पवित्रं द्विदलं नृप!"।

इति। तदस्मत्प्रयोगव्यतिरिक्तविषयम्। अस्मच्छास्त्रे, 'यत्र कुत्रचित्" —इति व्याप्त्यवगतेस्तद्विरोधेनैतस्यादरणासम्भवात्। स्वशास्त्रविरुद्धं खल्वपरशास्त्रं नादर्त्तव्यमिति परोक्तसमुच्चयवादिनोपि मन्यन्ते। तस्मात्,—पार्व्वणवदेव द्विदलरूपमत्र पवित्रमिति वाचस्पतिमिश्राद्युक्तमादरणीयम्॥०॥ २ ॥०॥

एकोऽर्घ्यः॥ ३॥

पूर्व्ववद्व्याख्यानम्। पवित्रस्यैकत्वविधानेऽपि तद्रहितमेवान्यदर्घ्यपात्रं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यात्,—इतीमामधिकाशङ्कां निरसितुमिदं सूत्रं प्रवृत्ते। तदन्त्रैको-ऽर्घ्य इत्यनेन प्राकृतयोर्द्वितीयतृतीयार्घ्ययोर्व्युदासं कृत्वा प्रथममवस्थापयति। तथाच, 'वैष्णव्यएककपालः'—इत्यत्र प्रथमोपस्थितत्वात् प्रथमकपालधर्म्मानुष्ठानवत् अत्रापि प्रथमपात्रधर्म्मानुष्ठानमिति। तस्मात्, चोदकप्राप्तं न्युब्जकरणमत्रापि कर्त्तव्यं भवति। यच्च,—संस्रवसमवनयनाभावात् प्रथमपात्राभावाच्च नात्रार्घ्यपात्रन्युब्जता,—इति वर्णितम्। तदसङ्गतम्। चोदकप्राप्तस्य विनावचनं वारयितुमशक्यत्वात्। संस्रवसमवनयनञ्च प्रतिपत्तिः,—इति तदभावोऽकिञ्चित्करः। संस्रवाः खल्वेवं प्रतिपाद्यन्ते। सेयं प्रतिपत्तिः प्रतिपाद्याभावात् मा भवतु, कथं नु न्युब्जतापि न कर्त्तव्या। प्रकृतौ खल्वेतत् न्युब्जकरणमुपस्थितत्वात् प्रथमपात्रपर्य्यवसितं भवति। इह तु पात्रान्तराभावात् संशयोनास्ति। अतो यदेवात्र पात्रं तदेव न्युब्जं कर्त्तव्यम्। चोदको हि न पात्रं प्रापयति, किन्तु तस्य न्युब्जकरणमात्रम्। तत् कथं न क्रियेत। तदेवं वैकृतविशेषपरत्वेप्यस्य, न्युब्जकरणं कर्त्तव्यम्,—इत्युक्तं भवति। प्राकृतस्य प्रथमपात्रस्यावस्थानमनेनोच्यते,—इत्येतस्मिंस्तु पक्षे न किमपि चोदयितव्यं भवति।

ननु, 'पात्रं न्युब्जं करोति'—इति वचनात् न्युब्जकरणं पात्रार्थं गम्यते। वैकृतविशेषपरत्वे तु सूत्रस्यैतन्निवर्त्तेत। नैषदोषः। वैकृतस्यापि पात्रविशेषस्य प्राकृतवत् संस्कारोपपत्तेः। चोदको हि तत् प्रापयति। अपिच। नैतत् न्युब्जकरणं पात्रार्थं किन्त्वपूर्व्वार्थम्। कृतप्रयोजनं खल्विदानीं पात्रम्। न तेन संस्कृतेन किञ्चित् प्रयोजनम्। तदर्थञ्चेत् न्युब्जकरणं तदप्यनर्थकं भवति। नचार्थवत् शास्त्रमनर्थकं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्त्तव्यम् । तस्मादपूर्व्वार्थं न्युब्जकरणं न पात्रार्थम्। ननु पात्रार्थेपि न्युब्जकरणे अवश्यमदृष्टं कल्पयितव्यम् । सत्यं कल्पयितव्यम् । पात्रसंस्कारद्वारं तत् । तेन च प्रयोजनं नास्तीत्युक्तम् । तथाच, 'उत्तानं पात्रं कृत्वा'—इति श्राद्धार्थतामस्य ज्ञापयति । तस्मात् 'सक्तून् जुहोति'—इत्यादिवदिदमप्यदृष्टार्थं न द्रव्यार्थम्। तस्मात् ,—नैवं विज्ञायते,—न्युब्जकरणेन पात्रं संस्कुर्य्यात् ,—इति। कथं तर्हि ?। पात्रस्य न्युब्जकरणेनादृष्टं साधयेत् ,—इति ॥ ३ ॥

एकः पिण्डः ॥ ४ ॥

पूर्व्ववद्वर्णनीयम्। तदत्र, पिण्डस्यैकत्वविधानादन्नप्रकरस्य न निषेधः। न ह्यसौ पिण्डः,—इत्यवोचाम। यत्तु पठन्ति,—

"एकोद्दिष्टे पिण्डमेकं विकिरन्तु न कारयेत्" ।

इति। तदस्मत्प्रयोगव्यतिरिक्तविषयम्। समुच्चयरसिकास्तत्त्वकारादयस्तु, वचनमेतदजानन्तएवात्र विकिरमभ्युपगच्छन्तीति स्थिते॥ ४॥

नावाहनम् ॥ ५ ॥

तत्र पितृणामावाहनं यदिहितं तदत्र न कर्त्तव्यम्। तत्रैष सांशयिकोऽर्थः। किं श्राद्धसंबन्ध्यावाहनमनेन निषिध्यते, पिण्डदानसंबन्धि वा?—इति। तत्र, "नावाहनं नाग्नौकरणमिति निषेधयोः पौर्व्वापर्य्यादग्नौकरणपूर्व्वकालीनं प्रधानसंबन्धि श्राद्धसूत्रोद्दिष्टं श्राद्धार्थावाहनमेव निषिध्यते, नत्वप्रधानसंबन्धि पिण्डपितृयज्ञवदित्यतिदेशप्राप्तं पिण्डार्थावाहनम्"—इति तत्त्वकारः । तदसङ्गतम्। 'एकः पिण्डः'—इत्यभिधाय, आवाहननिषेधात् पिण्डार्थावाहनस्यैवायं निषेधो न

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रधानार्थस्य,—इति वैपरीत्यस्यापि वक्तुं शक्यत्वात्। प्रधानार्थस्यैव निषेधो नत्वङ्गार्थस्य,—इत्यस्यामपि कल्पनायां प्रमाणं न पश्यामः। उपदेशातिदेशकृतोऽपि विशेषोनास्ति। चोदकः खल्वत्र सर्व्वं प्रापयति। चोदकप्राप्तस्यैव निषेधो नतूपदिष्टस्य,—इति न किञ्चिदेतत्। अङ्गसंबन्धिनआवाहनस्य बाधेनोपपत्तौ संभवन्त्यां न पुनः प्रधान संबन्धिनोऽपि बाधः,—इत्यपि शक्यं कल्पयितुम्। अस्तु तर्हि पिण्डार्थावाहनस्यैवायं निषेधोन प्रधानार्थस्य,—इति। न,—इत्युच्यते। चोदक प्राप्तस्य खल्वयं निषेधो न वचनप्राप्तस्य। वचनञ्चैतत् निषेधति। न च निषेधतोवचनस्य कश्चिदतिभारोऽस्ति। तस्मात् विनिगमनाविरहात् अग्नौकरणपूर्व्वकालीनस्यैव पिण्डार्थावाहनस्याप्ययं निषेधः,—इत्यास्थेयम्॥ ५॥

नाग्नौकरणम्॥ ६॥

अनुरत्तरार्थः। अत्राग्नौकरणनिषेधेन कृतशेषदानाभावात् कृतशेषं ब्राह्मणाय दत्त्वा पात्रमालभ्य जपेत् पृथिवीत्यादि सूत्रप्राप्तपात्रालम्भनस्यापि बाधः, आनन्तर्य्याभावादमृतत्वाभावादमृतमिति मन्त्रलिङ्गविरोधाच्च,—इति रघुनन्दनः। नैतदेवम्। कस्मात्?। 'गुणलोपे च मुख्यस्य'—इति सिद्धान्तविरोधात्। क्रमोहि पात्रालम्भं गुणभावेनोपकरोति। न च गुणानुरोधात् पदार्थएव न कर्त्तव्योभवति। गुणोहि नाम स भवति, यः पदार्थस्योपकारे वर्त्तते नापकारे। स खल्वयं क्रमोगुणभूतोन पदार्थं निवर्त्तयितुमुत्सहते। चोदकोहि पदार्थं प्रापयति। नासौ गुणस्यानुरोधादुत्स्रष्टव्यइति। यथा महापितृयज्ञे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विहितासु धानासु यदि चोदकप्राप्तोऽवहन्तिः क्रियेत, धानात्वं विहन्येत;—सक्तवोहि तदा भवेयुः। यदि वा न क्रियेत, चोदकप्राप्तोगुणोऽस्य लुप्येत, शक्यते हि स कर्त्तुम्। तस्मात्, यथा धानात्वस्य न विघातः यथा च चोदकप्राप्तस्य न लोपः, तथा क्रियते,—पूर्व्वं हन्तिं कृत्वा पाकः क्रियते, ततोहि धानाभवन्ति। एवं धानात्वं न विहनिष्यते चोदकस्यानुग्रहीष्यते,—इति। विपर्य्यासे हि क्रममात्रं न कृतं भवति, पदार्थस्तु न निवर्त्तते,—इति दशमाध्याये सिद्धान्तितम्। तद्वदत्राप्यवगन्तव्यम्। तथा चोक्तम्। "अर्थेन च विपर्य्यासे तादर्थ्यात्तत्त्वमेव स्यात्"—इति। अपिच। क्त्वा हि पूर्व्वकालतामाचष्टे, नत्वानन्तर्य्यम्,—इति शास्त्रतात्पर्य्यविदां समयः। तत्रैवं सति, कृतशेषदाने पात्रालम्भनपूर्व्वकालतां क्त्वाप्रत्ययोबोधयति, न पात्रालम्भे कृतशेषदानानन्तर्य्यम्। तदेवं कृतशेषदानएव पात्रालम्भनपूर्व्वकालता गुणोभवति, न तु पात्रालम्भेपि कृतशेषदानानन्तर्य्यम्। प्रमाणाभावात्। इतरथा, उत्तानं पात्रं कृत्वा दक्षिणा दातव्येति स्वयं वर्णितत्वात् संस्रवसमवनयनाभावेन न्युब्जकरणाभावस्यचाभ्युपगमात् दक्षिणाप्यत्र न स्यात्। दृश्यते च। तस्मादमीमांसकवचनमेतदित्युपेक्षणीयम्। 'आर्द्रारहिते बोधने मन्त्रान्तरस्यानुपदेशात् तद्युक्तमन्त्रः प्रणवयुक्तत्वेन प्रयुज्यते'—इति भवानेवाह। तत् किमिति मन्त्रलिङ्गविरोधात् बाधं वर्णयसि,—इति न खल्वधिगच्छामि। परमार्थतः पुनरत्र मन्त्रलिङ्गविरोधोनास्ति। अन्नसंस्कारार्थः खल्वयं जपोऽन्ने चेयममृतबुद्धिः संस्कारार्था,—इत्यवोचाम। एवं खलु तत् स्तूयते,—इति नैष दृष्टमर्थं वदति। तस्मान्न किञ्चिदेतत्। यत्तु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रचेतोनाम्ना वचनं पठ्यते,—"नावाहनं नाग्नौकरणं न पात्रमालभ्य जपति"—इति । तत् तदुक्तप्रयोगविषयमस्मत्प्रयोगव्यतिरिक्तविषयं वा ॥ ६ ॥

नात्र विश्वेदेवाः ॥ ७ ॥

सूत्रमुत्तरार्थं ।

"यस्मिन्नेव पुराणे वा विश्वेदेवा न लेभिरे ।
आसुरं तद्भवेत् श्राद्धं वृषलं मन्त्रवर्ज्जितम्" ।

इति वचनं बह्वृचविषयम् । तत्परिशिष्टोक्तत्वात् । महायशास्तु,—"असपिण्डीकृतैकोद्दिष्टविषयमेतत् सपिण्डीकृतानां विश्वेदेवाभावात्"—इति प्रलपति । तदसङ्गतम् । इदं हि पूर्व्वमुक्तम् ।

"नवश्राद्धं दशाहानि नवमिश्रन्तु षडृतून् ।
अतः परं पुराणं स्यात् त्रिविधं परिकीर्त्तितम्" ।

इति । तस्मात् बह्वृचानामपि नवसंज्ञके दशाहपर्य्यन्तक्रियमाणे पुराणसंज्ञके च सपिण्डनोत्तरं क्रियमाणे एकोद्दिष्टएव विश्वेदेवाभवन्ति, न नवमिश्रसंज्ञकेषु मासिकेषु,—इति । अस्माकन्तु न कुत्राप्येकोद्दिष्टे विश्वेदेवाः सन्तीति ॥ ७ ॥

स्वदितमिति तृप्तिप्रश्नः ॥ ८ ॥

पार्व्वणे तृप्ताःस्थ,—इति तृप्तिप्रश्नः । सोऽत्र न भवति । किन्त्वत्र, स्वदितम्,—इति तृप्तिप्रश्नः कर्त्तव्यः । योग्यत्वात् सुस्वदितमित्युत्तरम् ॥०॥ ८ ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपतिष्ठतामित्यक्षय्यस्थाने ॥ ६ ॥

अक्षय्यमस्तु,—इत्यक्षय्यशब्दस्थाने, उपतिष्ठताम्,—इति वक्तव्यम् । अस्तुपदमप्यर्थान्निवर्त्तते । "प्रेतायाक्षय्यमस्तु"—इति ब्रह्मपुराण वचनम्,—

"ततोवदेत् पुनर्धीमानक्षय्यमुपतिष्ठताम्" ।

इति मार्कण्डेयपुराणवचनञ्च तत्तत्प्रयोगविषयम् । तदत्राक्षय्यस्थान-मात्रे, उपतिष्ठतामिति विधानात् "सर्व्वत्रार्घ्यादौ उपतिष्ठतामित्य-नेनोत्सर्गः"—इत्यसङ्गतैषा कल्पना । यच्च,—

"प्रेतान्तनामगोत्राभ्यामुत्सृजेदुपतिष्ठताम्" ।

इति शातातपवचनम् । तत् तदुक्तप्रयोगविषयम् । बह्वृचानां प्रेत-श्राद्धे चोपतिष्ठतामित्यनेनोत्सर्गस्तत्परिशिष्टे लिखितः । एतदजा-नानएव शूलपाणिराश्वलायनीयानामपि हविस्त्यागवाक्ये स्वधापद-मिच्छति ।

"प्रेतश्राद्धेषु सर्व्वेषु न स्वधा नाभिरम्यताम्" ।

इत्याश्वलायनगृह्यपरिशिष्टान्तरेपि प्रेतश्राद्धेषु स्वधाप्रयोगोनिषिद्धः । अस्माकन्तु प्रेतश्राद्धे स्वधापदस्य निषेधाभावात् तेनैवोत्सर्गः । "स्वधाकारः पितृणाम्"—इत्यत्र पितृपदं प्रमीतमात्रपरम् । इत-रथा प्रेतश्राद्धे त्यागप्रकारस्यानुपदेशादनध्यवसायः प्रसज्येत । छन्दोग-गृह्येऽपि ।

"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके" ।

इत्यत्र दशाहिकग्रहणं कुर्व्वन्नन्यत्र स्वधाप्रयोगमनुजानाति । समुच्चय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रमिकोरघुनन्दनस्तु, शातातपवचनोक्त 'उपतिष्ठताम्'—इत्यनेनोत्सर्ग-प्रसङ्गादिभ्यत् एकोद्दिष्टप्रकरणे तद्वचनस्य 'उपतिष्ठतामिति'—इति प्रतीकमपह्नुवान:, प्रेतश्राद्धे संबन्धोल्लेखाभावसाधकरूपेण, 'प्रेतान्त-नामगोत्राभ्यामुत्सृजेत्'—इति पूर्व्वप्रतीकमात्रं लिलेख। सोऽयमेकस्यैव वचनस्य स्वाभिमतमंशं प्रमाणयति, स्वानभिमतञ्चांशमपह्नुते,—इति किमत्र ब्रूम:॥ ९ ॥

अभिरम्यतामिति विसर्गः ॥ १० ॥

वाजे वाजे,—इति मन्त्रेण पार्व्वणे विसर्जनमुक्तम्। अत्र तु, 'अभि-रम्यताम्'—इत्यनेन तत् कर्त्तव्यम्। योग्यत्वात् 'अभिरतोऽस्मि'—इति, 'अभिरताः स्म'—इति वा प्रतिवचनं द्रष्टव्यम्। यत्तु,—

"प्रेतश्राद्धेषु सर्व्वेषु न स्वधा नाभिरम्यताम्।
स्वस्त्यस्तु विसृजेदेवं सकृत् प्रणववर्जितम्"।

इत्याश्वलायनगृह्यपरिशिष्टवचनात् 'अभिरम्यताम्'—इति विसर्ग: प्रत्या-ब्दिकैकोद्दिष्टविषय:। प्रेतैकोद्दिष्टे तु 'स्वस्त्यस्तु'—इत्यनेनैव विसर्ग:,—इति श्रीदत्तादिभिर्वर्णितम्। तदसङ्गतम्। आश्वलायनगृह्यपरि-शिष्टस्य बह्वृचपरतयाऽस्मत्प्रयोगपरत्वाभावात्। अस्मत्सूत्रकारेण विशेषस्यानुपदेशाच्च। तदेवं सूचितविशेषव्यतिरेकेणान्यत् सर्व्वं पार्व्वण-वदेव कर्त्तव्यं भवति। चोदकोहि तत् प्रापयति। यच्च प्रचेतोनाम्ना वचनं पठन्ति। "नाशिष: प्रति गृह्णीयात्"—इति। तदपि तदुक्तप्रयोगविषयम्। इतरथा प्रत्याब्दिकैकोद्दिष्टेप्येतन्नस्यात्। इष्यते च। तस्माद् यथोक्तमेवास्तु। "स्वधोच्यतामिति वाचं विसृजेत्"—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्याश्वलायनवचनमपि बह्वृचमात्रविषयम् । तदत्रैकोद्दिष्टे मन्त्रस्योहापोहेषु अभिलापवाक्ये च बहु वक्तव्यमस्ति । ग्रन्थगौरवभयादुपारम्यते ॥ १० ॥

प्रकरणान्तरमाह,—

अथ सपिण्डीकरणम् ॥ ११ ॥

वर्त्तिष्यते,—इति सूत्रशेषः । समानः पिण्डोयस्य, असौ सपिण्डः प्राप्तपितृलोकोभण्यते । तस्य हि पिण्डः समानः साधारणोभवति । कथम्? । सपिण्डीकरणात् परतः खल्वयं पार्व्वणभागी भवति । तत्र च पितामहादिभिः सममस्य पिण्डदानं भवति । तदानीञ्च यदस्मै-दास्यते मात्रादीनामपि तत्र भाग इति । सोयं पिण्डो न परमस्यैव । समानोहि स मात्रादीनां भवति । तेषामपि तत्र भोगस्याविशेषात् । पूर्व्वञ्च सपिण्डकरणात् न पितामहादिभिः समानोऽस्य पिण्डोभवति, न वा तत्रान्यस्य भोगइति । तस्मादसपिण्डस्य सपिण्डस्य करणं सपिण्डीकरणमिति कर्म्मणोनामधेयम् ।

पार्व्वणमेकोद्दिष्टञ्चाभिधायैतस्याभिधानात् पार्व्वणैकोद्दिष्टाभ्यामेतद्विक्रियते,—इत्यवगच्छामः । स्मरन्ति च ।

"श्राद्धद्वयमुपक्रम्य कुर्व्वीत सहपिण्डताम् ।
तयोः पार्व्वणवत् पूर्व्वमेकोद्दिष्टमथापरम्" ।

इति ॥ ११ ॥

अथास्य कालमाह,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्णे संवत्सरे षण्मासे त्रिपक्षे वा ॥ १२ ॥

पूर्णे संवत्सरे मृततिथावेव। कथं ज्ञायते?।

"पितुः सपिण्डीकरणं वार्षिके मृतवासरे"।

इत्युशनसोक्तेः। यच्च,—

"ततः सपिण्डीकरणं वत्सरात् परतः स्थितम्"।

इति भविष्यपुराणवचनम्। तत्, यस्यां तिथौ मृतस्तां तिथिमादाय वर्षगणनया बोध्यम्। आचार्य्यस्तु प्रायणतिथिमवधिंकृत्वा तत्परवर्त्तिनीं तिथिमादाय वर्षगणनामभिप्रयन् 'पूर्णसंवत्सरे'—इत्याह। एतदभिप्रायेणैव,—

"पितुः पितृत्वप्राप्त्यर्थं पूर्णे संवत्सरे सुतः।
मृताहात् परतः कुर्य्यात् सपिण्डीकरणं बुधः।

इति वचनमुपपद्यते। कथं नाम?। मृताहात् मरणदिनात् परतः-परां तिथिमादाय वर्षगणनया संवत्सरे पूर्णे सपिण्डीकरणम्—इति। शूलपाणिस्त्वसुमर्थमबुद्धा विरोधभिया वचनमेतदनाकरमाह।

षण्मासे,—इत्यपरः कालः एकवचनसंयोगादेकएवायं कालः। पूरणप्रत्ययस्चात्र लुप्तवत् द्रष्टव्यः। तेन षष्ठमासे इत्यर्थः सिद्धोभवति। अत्रापि मृततिथिरेवकालोबोद्धव्यः। त्रिपक्षे,—इत्यन्यः कालः। अयमपिकालोमृततिथिरेवावधार्य्यते। किं कारणम्?। पूर्णसंवत्सरादिसाहचर्य्यादयमपि चान्द्रएवावगम्यते। गणना चास्य तद्वदेव प्रायणतिथिमवधिं कृत्वा तत्परवर्त्तिनीं तिथिमारभ्य,—इति। वाशब्दोविकल्पार्थः। अत्रच,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत् ।
सश्राद्धी नरके घोरे पितृभिः सह मज्जति" ।

इत्युशनोवचनात् संवत्सरमध्ये वृद्धिसम्भावनायामेव षण्मासत्रिपक्षकल्पाविति केचित् । नैतदस्माकं भवति । कस्मात्? । यस्मादत्र भवान् सूत्रकारः 'पूर्णे संवत्सरे षण्मासे त्रिपक्षे वा'—इति सूत्रयित्वा, 'यदहर्वा वृद्धिरापद्येत'—इति विकल्पेन पृथगेव सूत्रयति, ततोऽवगच्छामः—विनापि वृद्धिसम्भावनामेतौ कल्पौ भवतः,—इति । सोऽयं तुल्यवद्विकल्पः,—पूर्णे संवत्सरे षण्मासे त्रिपक्षे वा कुर्य्यात्, यदहर्वृद्धिरापद्येत तदहर्वा कुर्य्यादिति । कुतः? । उभयत्रैव वाशब्दोपादानात् ॥ १२ ॥

यदहर्वा वृद्धिरापद्येत ॥ १३ ॥

वृद्धिरभ्युदयो मङ्गलमित्यनर्थान्तरम् । तच्च पूर्त्तादन्यदभिधीयते । कथं ज्ञायते? । "वृद्धिपूर्त्तेषु युग्मानाशयेत्"—इति गृह्यसूत्रे तत्रैव वृद्धिपदप्रयोगात् । वृद्धिः पुरुषसंस्कारः,—इति भट्टनारायणः । वृद्धिराशास्यमानं—पुंसवनादिकं कर्म्म इत्यपरे । यदहर्यस्मिन्नहनि वृद्धिरापद्येत;—'गत्यर्थाः प्राप्त्यर्थाः ज्ञानार्थाः',—इत्युक्तेः, आ—सम्यक्; अवश्यकर्त्तव्यतया उत्कटकोटिकतया च प्राप्येत ज्ञायेत—यस्मिन्नहनि आवश्यकवृद्धिप्राप्तिरुत्कटकोटिकतया सम्भाव्यते इत्यर्थः । सम्भावनायां लिङ् । 'तदहस्तिलायुदकपात्राणि',—इति वक्ष्यमाणेन, तदहः सपिण्डीकरणमिति गतेन वा सम्बन्धः । तेन यस्मिन् दिने आवश्यकवृद्धेरुत्कटकोटिका सम्भावना भवति, तद्दिने सपिण्डी-

18

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

करणम्। न तु तत्पूर्व्वदिने। तस्याशब्दत्वात्। निमित्तनैमित्तिकयोः समानदिनत्वस्यौत्सर्गिकत्वाच्च। वृद्धिर्हि निमित्तमपकर्षस्य। तथा च मदनरत्ने पुलस्त्यः।

"निरग्निकः सपिण्डत्वं पितुर्मातुश्च धर्म्मतः।
पूर्णे संवत्सरे कुर्य्याद्वृद्धिर्व्वा यदहर्भवेत्।

इति यदहर्वृद्धिर्भवेत् तदहः सपिण्डीकरणमभिधत्ते, न तत्पूर्व्वदिने। अत्रापि, भवेत्,—इति सम्भावनायां लिङ्। तथा चतुर्विंशतिमते।

"सपिण्डीकरणं चाब्दे संपूर्णेऽभ्युदयेऽपि वा"।

इति। तदेतेषु वचनेषु वृद्ध्यव्यवहितपूर्व्वदिनस्य कुत्राप्यनभिधानात् वृद्धिदिनपूर्व्वदिने सपिण्डीकरणमिति व्यामोहएव। एवञ्च, अपकर्षात् परतएव नान्दीमुखश्राद्धं करणीयं भवति।

आपद्येत,—इति कुर्वन् वृद्धेरुत्कटकोटिकसम्भावनैवापकर्षनिमित्तमिति दर्शयति। तेन, तादृशसम्भावनया सपिण्डीकरणे कृते पश्चात् विघ्नेन वृद्धेरभावेऽपि न सपिण्डीकरणमावर्त्तनीयम्। वृद्धिसम्भावनया करणेन यथाकालकृतत्वात्। कृतेऽपि त्वपकर्षे प्रथमवत्सरे काम्यकर्म्मणां निषेधात् तेषामपकर्षनिमित्तत्वं नास्ति। तथा च स्मृतिसागरे बृहस्पतिः।

"प्रत्यवायो भवेद् यस्मिन्नकृते वृद्धिकर्म्मणि।
तन्निमित्तं समाकृष्य पित्रोः कुर्य्यात् सपिण्डनम्।
प्रत्यवायाश्रया वृद्धिः पुनश्च निपतेद् यदि।
प्रेताब्दे सापि कर्त्तव्या नान्यत् कर्म्म कदाचन।
मठोद्यानप्रतिष्ठादि यज्ञदानव्रतानि च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न कुर्य्यात् सावकालानि आकृष्टेऽपि सपिण्डने।
सपिण्डीकरणं यत्र समाकृष्टं समासिकम्।
तत्राप्यब्दं न कुर्व्वीत यज्ञोद्वाहव्रतानि च"।

इति। यच्च,—"अनावश्यकस्येष्टापूर्त्तादेरपकर्षनिमित्तता नास्ति, आवश्यकनिमित्तेन त्वपकर्षे अनावश्यकमिष्टापूर्त्तादिकमपि वत्सरमध्ये कर्त्तुमर्हति"—इति रघुनन्दनेनोक्तम्। तदुक्तवचनानवलोकनेन।

"सहपिण्डक्रियां कृत्वा कुर्य्यादभ्युदयन्ततः।
तथैव काम्यं यत् कर्म्म प्रथमाद्वत्सरादृते"।

इति तद्धृतलघुहारीतवचनविरोधश्च तस्यावर्ज्जणीयः स्यात्। एवमपकर्षात् परमपि तदब्दे व्रतोद्वाहनिषेधात्तदर्थमप्यपकर्षो न कर्त्तव्यः। अनन्यगतेर्वचनात्। तस्मात् समयाशुद्धिवत् तदब्दे नैतयोः करणमिति। न च 'नकुर्य्यात् सावकाशानि'—इत्यभिधानात् निरवकाशव्रतोद्वाहार्थमपकर्षो भवत्विति वाच्यम्। तत्परवचनेन व्रतोद्वाहयोर्निरवकाशयोरपि निषेधावगतेः। अन्यथा तदनर्थकं स्यात्। परमार्थतस्तु यज्ञदानव्रतानां विशेषणतयैव सावकाशत्वस्योपादानात् व्रतोद्वाहप्रतिष्ठादेर्निरवकाशस्यापि निषेधः सिध्यति। पुनरुपादानञ्चाग्नेयद्विरुक्तिवत् स्तुत्यर्थं भविष्यति। 'व्रतोद्वाहप्रतिष्ठादि'—इत्यत्र व्रतपदमुपनयनव्रताभिप्रायम्। उद्वाहसाहचर्य्यात्। 'यज्ञदान व्रतानि च'—इत्यत्र व्रतपदन्त्वनन्तादिव्रतपरम्। यज्ञदानसाहचर्य्यात्।

यच्च,—

"व्रतबन्धोत्सवादीनि व्रतस्योद्यापनानि च।
विवाहादि भवेन्नैव मृते च गृहमेधिनि।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिक्षुर्भिक्षां न गृह्णाति हन्तकारो न गृह्यते ।
नित्यं नैमित्तिकं लुप्येत् यावत् पिण्डं न मेलितम् ।
कर्म्मलोपात् प्रत्यवायी भवेत्तस्मात् सपिण्डनम् ।
निरग्निकः साग्निकोवा द्वादशाहे समाचरेत्” ।

इति गारुड़ेऽभिहितम् । तत्र, व्रतबन्धादेः सर्व्वथैव निषेधः, अन्यस्य तु सपिण्डनात् पूर्वमिति बोद्धव्यम् । अतएव व्रतबन्धादिनिषेधे 'नैव भवेत्'—इति 'गृहमेधिनि मृते'—इति चाभिहितम् । कः पुनरभिप्रायः ? । गृहमेधिमरणनिमित्तएवामीषां सर्वथा निषेधः, न पुनः सपिण्डनाकरणनिमित्तः,—इति । 'भिक्षुर्भिक्षां न गृह्णाति'—इत्यादौ च, 'यावत् पिण्डं न मेलितम्'—इत्युक्तम् । सपिण्डनात् परतः करणममीषां यथा स्यात्,—इति । न चेदेवम्, काम्यानामप्युत्सवादीनामविशेषात् सपिण्डनात् परतः करणं प्रसज्येत । तच्चानिष्टम् । पूर्वोक्तलघुहारीतवचनविरोधात् । तस्मात् यथोक्तएवार्थः । अथात्रापरिस्पष्टन् सपिण्डनात् परतो व्रतबन्धादीनामपि करणस्य प्रतीतिं मन्यसे, तथापि सैव प्रतीतिर्बाधितव्या भवति । किं कारणम्? । आनुमानिकी हि तादृशी प्रतीतिः, प्रत्यक्षस्तु निषेधः । न खल्वनुमानं प्रत्यक्षविरुद्धमादर्त्तव्यं भवति । स्मृतिपुराणयोश्च विरोधे दुर्बलत्वं पुराणस्यावोचाम । तस्मात् व्रतोद्वाहव्यतिरिक्तसंस्कारार्थमपकर्षः कर्त्तव्यइति सिद्धम् । मृतमातृकस्य पुत्रस्य चूड़ान्तसंस्कारं कुर्वता च पित्रा तदर्थं पुत्रमातुः सपिण्डनं नापकर्ष्टव्यम् । तथा च स्मृतिसागरे वृद्धवशिष्ठः ।

“मृतमातृकपुत्रस्य पिता संस्कारमाचरेत् ।
अपकृष्य न कर्त्तव्यं पुत्रमातुः सपिण्डनम्” ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति।

"जातकर्म्मादि चूड़ान्तं किन्तु कुर्वीत नाधिकम्।
महागुरुनिपाते तु यस्मात्तत्र सुतोऽशुचिः"।

इति च तत्रैव वचनान्तरम्। न च जातकर्म्मादिचूड़ान्तसंस्कारकलापोऽपि कथं कर्त्तव्यः, तत्रापि सुतस्याशुचित्वाविशेषादितिवाच्यम्।

"शिशोः पञ्चाब्दपर्य्यन्तं नाशौचं नैव पातकम्।
न चास्य राजदण्डोऽस्ति प्रायश्चित्तं न विद्यते"।

इति वृद्धमनुवचनेन तदानीं तस्याशौचाभावात्। यच्च स्मरन्ति,—

"जाते पुत्रे तु पुत्रस्य माता यदि विनश्यति।
तन्मातरमसंस्कृत्य न संस्कुर्य्यात् पिता सुतम्।
न स्यात् यद्यपि तन्मातुर्वृद्धिश्राद्धे प्रवेशनम्।
तथाप्यवश्यं संस्कार्य्या महागुर्व्वी हि सा शिशोः"।

इति। तन्निर्मूलमिति स्मृतिसागरः। तस्य समूलत्वे तु विधिप्रतिषेधसन्निपातादिकल्पएव मन्तव्यः। मृतपितृकस्य पुनरेवंविधस्य चूड़ान्तसंस्कारार्थमपि पितुः सपिण्डीकरणमपकर्ष्टव्यम्। कुतः?।

"स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्म्मसु।
पिण्डनोद्वहनात्तेषां तस्याभावे तु तत्क्रमात्"।

इति छन्दोगपरिशिष्टवचनेन तस्य तदानीं नान्दीमुखश्राद्धार्हत्वात्। अन्तरेण च सपिण्डीकरणं तदयोगात्। तथा च स्मृतिसागरे गर्गः।

"वृद्धौ नान्दीमुखश्राद्धे प्रवेशो यस्य विद्यते।
तस्यैवाकृष्य कुर्व्वीत मासिकञ्च सपिण्डनम्"।

इति। तदेवमस्माकं चत्वारः सपिण्डीकरणकालाः—पूर्णः संवत्सरः,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षण्मासस्त्रिपक्षोऽर्द्धदिनञ्चेति । ते खल्विमे कालाः साग्निनिरग्नि-साधारणा भवन्ति । वाक्यादिशेषानवगमात् ।

अत्र च, सपिण्डीकरणस्यापकर्षविधानादेव तत्पूर्व्वमासिकानामप्यपकर्षः सिध्यति । अग्निषोमीये पशौ प्रयाजस्यापकर्षविधानात् प्रयाजान्तकर्म्मकलापस्यापकर्षः,—इति यथा । तथाचोक्तम् । "तदादि वाऽभिसंबन्धात्तदन्तमपकर्षं स्यात्"—इति ।

तथा च,—

"सपिण्डीकरणं यत्र समाकृष्टं समासिकम्" ।

इति स्मरन्ति । तथा गर्गः ।

"तस्यैवाकृष्य कुर्व्वीत मासिकञ्च सपिण्डनम्" ।

इति । तथा चतुर्वर्गचिन्तामणौ शाट्यायनिः ।

"प्रेतश्राद्धानि शिष्टानि सपिण्डीकरणं तथा ।
अपकृष्यापि कुर्व्वीत कर्त्तुं नान्दीमुखं द्विजः" ।

इति मासिकानां सपिण्डीकरणस्य चापकर्षमुपदिशति । विज्ञानेश्वरस्त्वेतदविज्ञाय, मासिकानि सपिण्डनादूर्द्धं स्वकालएव कार्य्याणि, अपकर्षस्त्वनुकल्पः,—इत्याह । निषेधमप्याह गोभिलपरिशिष्टम् ।

"श्राद्धानि षोड़शादत्त्वा नैव कुर्य्यात् सपिण्डनम्" ।

इति । गोभिलस्यैतदिति मदनपारिजातः । तथा लोगाक्षिः ।

"श्राद्धानि षोड़शापाद्य विदधीत सपिण्डनम्" ।

इति । आभ्यां यत् षोड़शश्राद्धेभ्यः परतः सपिण्डीकरणमुक्तं, तत्—

"द्वादशाहे त्रिपक्षे च षण्मासे मासिकाब्दिके ।
श्राद्धानि षोड़शैतानि संस्मृतानि मनीषिभिः" ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति व्यासाद्युक्तकल्पे बोद्धव्यम्। तत्रैव कल्पे सपिण्डीकरणस्य तत्रानन्तर्भावात्।

"द्वादशप्रतिमास्यानि आद्यं षाण्मासिके तथा।
सपिण्डीकरणञ्चैव इत्येतत् श्राद्धषोड़शम्"।

इति छन्दोगपरिशिष्टोक्ते तु कल्पे षोड़शश्राद्धेष्वेव सपिण्डीकरणमन्तर्भवति। पूर्व्वकल्पे, द्वादशाहे क्रियमाणमूनमासिकमिति द्रष्टव्यम्। तथा च गोभिलपरिशिष्टम्।

"मरणात् द्वादशाहे स्यान्मास्यूने वोनमासिकम्"।

इति। गोभिलस्यैतदितिमदनपारिजातः। तदस्माकं द्वावप्येतौ कल्पौ भवतः। द्वयोरेवास्मत्परिशिष्टानुमतत्वात्।

यदा त्वपकृष्य षोड़शश्राद्धानि सपिण्डीकरणञ्च करोति, तदा सपिण्डीकरणात् परं पुनरपि षोड़शश्राद्धानां यथाकालमनुष्ठानं कर्त्तव्यं प्रेतशब्दोल्लेखस्तु तत्र न करणीयः। तदाह कात्यायनः।

"द्वादशाहेऽथ सर्व्वाणि संक्षेपेण समापयेत्।
तान्येव तु पुनः कुर्य्यात् प्रेतशब्दं न कारयेत्"।

इति। प्रेतशब्दकरणनिषेधात् द्वादशाहसपिण्डीकरणात् परं तदानीमेव प्रेतत्वनिवृत्तिरवगम्यते। कालमाधवीये गोभिलपरिशिष्टम्।

"यस्य संवत्सराद्व्वाक् विहिता सुसपिण्डता।
विधिवत्तानि कुर्व्वीत पुनः श्राद्धानि षोड़श"।

इति। गोभिलस्यैतदिति माधवाचार्य्यः। तत्रैव गालवः।

"अर्व्वाक् संवत्सराद् यस्य सपिण्डीकरणं कृतम्।
षोड़शानां द्विरावृत्तिं कुर्य्यादित्याह गौतमः"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति। षोड़शानां द्विरावृत्तिश्चैकादशाहसपिण्डनपचे। तत्रोनमासिकस्य कालसत्वात्। अन्ये पचे तु यथासम्भवं द्रष्टव्यम्। तथा च कार्ष्णाजिनिः।

"अर्व्वागब्दाद्यत्र यत्र सपिण्डीकरणं भवेत्।
तदूर्द्धमासिकानां स्याद्यथाकालमनुष्ठितिः"।

इति। मदनरत्ने अङ्गिराः।

"यस्य संवत्सरादर्व्वाक् सपिण्डीकरणं भवेत्।
मासिकञ्चोदकुम्भञ्च देयं तस्यापि वत्सरम्"।

इति। पैठिनसिः।

"सपिण्डीकरणादर्व्वाक् कुर्व्वन् श्राद्धानि षोड़श।
एकोद्दिष्टविधानेन कुर्य्यात् सर्व्वाणि तानि तु।
सपिण्डीकरणादूर्द्धं यदा कुर्य्यात्तदा पुनः।
प्रत्यब्दं योयथा कुर्य्यात्तथा कुर्य्यात् स तान्यपि"।

इति। तदेवं व्यासाद्युक्तकल्पेऽपकर्षपचे यथासम्भवं षोड़शश्राद्धानां द्विरावृत्तिर्नियता। प्रत्याब्दिकवच्चामीषां पुनः करणम्। छन्दोगपरिशिष्टोक्ते तु कल्पे मासिकानां पुनरनुष्ठानं न नियतम्। एकोद्दिष्टविधानेन चैषां पुनरनुष्ठानं भवति न प्रत्याब्दिकवत्। तथा च च्छन्दोगपरिशिष्टं कात्यायनः।

"सपिण्डीकरणादूर्द्धं न दद्यात् प्रतिमासिकम्।
एकोद्दिष्टविधानेन दद्यादित्याह शौनकः"।

इति। 'नदद्यात् प्रतिमासिकमेकोद्दिष्टविधानेनेति संबन्धाद्दद्यादित्याह शौनक इत्यनेनैकोद्दिष्टस्यैवापकृष्टसपिण्डीकरणादूर्द्धं विकल्पो दर्शितः'

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

—इति शूलपाणिः। यत्तु स च विकल्पोऽप्राप्तप्रेतभावविषयइति शूलपाणिः; यच्च,—अप्राप्तप्रेतभावविषयवद्गमपतितमासिकविषयोपीति मन्तव्यमिति रघुनन्दनश्चाह। तदुभयमपि प्रमाणाभावादुपेक्षणीयम्। वृद्धिनिमित्तेन त्वपकर्षे वृद्धेरर्व्वागेव पुनरपकृष्य षोड़शश्राद्धानां पुनरनुष्ठानम्। यथा कार्ष्णाजिनिः।

"सपिण्डीकरणादर्व्वागपकृष्य कृतान्यपि।
पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात्"।

इति। निषेधमाह कात्यायनः।

"निर्वर्त्त्य वृद्धितन्त्रन्तु मासिकानि न तन्त्रयेत्।
अयातयामं मरणं न भवेत् पुनरस्य तु"।

इति ॥ १३ ॥

अथेदानीमितिकर्त्तव्यतायां योविशेषः, सोऽभिधीयते,—

तदहश्चत्वार्य्युदकपात्राणि सतिलगन्धोदकानि पूरयित्वा ॥ १४ ॥

तदहस्तस्मिन्नहनि, तिलगन्धोदकसहितानि चत्वार्य्यर्घ्यपात्राणि पूरयित्वा तथा च भविष्यपुराणम्।

"गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्"।

इति। गन्धोऽत्र वैकृतोविशेषः। तद्विशेषात् प्राकृतस्य तिलोदकस्य निवृत्तिं मा प्रशाङ्क्षीदिति 'सतिलगन्धोदकानि,'—इत्याह। पवित्रन्तु न निवर्त्तते। कथं कृत्वा?। प्राकृतानि पात्राण्यनूद्य तत्र चतुष्ट्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सतिलगन्धोदकत्वञ्च वैकृतोविशेषद्दृश्योच्यते। पात्राणि च तत्र पवित्रान्तर्हितानि भवन्ति। तस्मात् पात्रस्य विशेषः पवित्रान्तर्हितत्वमत्रापि भवत्येव। नचेदेवम्, यज्ञियवृक्षचमसत्वादिकमपि तद्विशेषोऽत्र न स्यात्। दृश्यते च। तस्माद्यथोक्तमेवास्तु।

तदत्र, पात्राणां चतुष्ट्वविधानात् मातामहपक्षोऽत्र न भवति। तथा च च्छन्दोगपरिशिष्टम्।

"कर्षूसमन्वितं त्यक्त्वा तथाऽऽद्यं श्राद्धषोड़शम्।
प्रत्याब्दिकञ्च, शेषेषु पिण्डाः स्युः षड़िति स्थितिः"।

इति। देवपक्षस्त्वत्रापि भवत्येव। प्रकृतस्य दैवपूर्व्वत्वस्य बाधायोगात्। तस्यारत्वभूतत्वाच्च। चतुष्टं खल्वर्घ्यपात्राणां प्रेतपितृपक्षाभिप्रायेण वक्ष्यति। तथा च शातातपः।

"सपिण्डीकरणश्राद्धं दैवपूर्व्वं नियोजयेत्।
पितॄनेवाशयेत्तत्र पुनः प्रेतं न निर्दिशेत्"।

इति॥ १४॥

चत्वारि पात्राणि,—इत्युक्तम्। तदिदानीं विशेषेणाभिधत्ते,—

त्रीणि पितृणामेकं प्रेतस्य॥ १५॥

त्रीणि पात्राणि पितॄणां शिष्टमेकं पात्रं प्रेतस्य, 'पूरयित्वा'—इति गतेन सम्बन्धः। तदत्र, पाठक्रमात् प्रथमं पितॄणां पार्व्वणमनुष्ठेयं ततः प्रेतस्यैकोद्दिष्टम्,—इति। तथाचोक्तम्। "क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात्"-इति॥ १५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रेतपात्रं पितृपात्रेष्वासिञ्चति,—ये समानाः समनसः पितरोयमराज्ये तेषां लोकः स्वधा नमो यज्ञोदेवेषु कल्पतां । ये समानाः समनसोजीवा जीवेषु मामकास्तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समाइति ॥ १६ ॥

प्रेतपात्रं प्रेतपात्रस्थमुदकं पितृपात्रेषु आसिञ्चति—ये समानाइति मन्त्रद्वयेन । अत्र किञ्चिद्वक्तव्यमस्ति । पाठक्रमानुरोधात् पदार्थानुशयेन पितृणामर्घ्यमुत्सृज्य प्रेतस्यार्घ्यमुत्स्रष्टव्यम् । ततः पितृणामर्घ्यपात्रस्थानि पवित्राणि पितृब्राह्मणेभ्यः प्रतिपाद्य, प्रेतार्घ्यपात्रस्थमपि पवित्रं तद्ब्राह्मणाय प्रतिपादनीयम् । अथ पित्रर्घ्यपात्रस्थमुदकं पितृब्राह्मणेभ्यः प्रतिपाद्य, प्रेतार्घ्यपात्रस्थमुदकं त्रिधा विभज्य तेषामेकैकं भागं ये समाना इत्यादिमन्त्रद्वयेन प्रत्येकं पितृपात्रेषु सिञ्चेत् । कुतः ? । "आगन्तुकानामन्तेऽभिनिवेशः"—इति न्यायात् । आसेचनञ्चोपदिशन् प्रेतार्घ्यपात्रस्थं पवित्रं तद्ब्राह्मणाय प्रतिपाद्य उदकमात्रस्य पितृपात्रेषु प्रक्षेपं ज्ञापयति । कथं कृत्वा ? । उदकमात्रस्यैव खल्वासेचनं सम्भवति न पवित्रस्य । 'एकैकस्मिन्नप आसिञ्चति'—इति पूर्व्वत्राप्याप एवासेचनकर्म्मतया श्रूयन्ते । इदानीमप्यासेचने सूचिते आपएव हृदयमागच्छन्ति । तस्मादियमेवावधारणा,—प्रेतार्घ्यपात्रीयं पवित्रमात्रं तद्ब्राह्मणाय प्रतिपाद्य तदुदकं पितृपात्रेष्वासेक्तव्यम्, अथेदानीं चोदकप्राप्तं संस्रवसमवनयनादिकं करणीयम्,—इति । प्रेतपात्रस्थस्य तिलोदकस्य तु न भवति ब्राह्मणाय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिपादनम्। 'प्रेतपात्रं पितृपात्रेष्वासिञ्चति'—इति वचनेन तस्यान्यथा प्रतिपादनोपदेशात्। सोयं वैकृतोविशेषोपदेशस्योदकप्राप्तां प्रतिपत्तिं वाधते। तदत्र प्रत्यासेचनमन्त्रावावर्त्तेते। तौ हि गुणभावेनासेचनमुपकुर्व्वाते। गुणानाञ्च यावत् प्रधानमावृत्तिरित्यविवाद एव। आह। प्रेतपात्रपदं खल्वेतत् प्रेतपात्रस्योदकपरमित्यत्र न विवादः। तत्सामान्यात् पितृपात्रपदेऽपि भवति तथा प्रतीतिः। भवति चेत्, न युज्यते विना कारणमुत्स्रष्टुम्। तस्मात् पितृपात्राणामुदकस्य प्रतिपादनात् प्रागेव तत्र प्रेतपात्रस्यासेचनमस्तु। नैतत् शक्यम्। किं कारणम्?। आनुमानिकं तावत् पात्रस्थमुदकं परिचिकल्पयिषितम्। प्रत्यचन्तु पात्रमासेचनाधिकरणम्। पात्रपदं खल्वेतत् पात्रं वदति, न पात्रस्थमुदकम्। यदि तु तेन प्रयोजनं भवति, शक्नोति पात्रसम्बन्धं तत् लचयितुम्। आसेचनकर्म्मत्वं तावत् पात्रस्य नोपपद्यते-इति तत् सम्बन्धमुदकं—तेन लच्यते। आसेचनाधिकारणत्वन्तु पितृपात्राणां न खल्वपि नोपपद्यते। येनैतदुदकं लचयेत्। अगतिः खल्वेषा यासौ लचणा नाम। तस्मात् यथोक्तमेवास्तु। तदस्य प्रेतपात्रस्थस्योदकस्य पात्रत्रयेष्वासेचनं विभागमन्तरेणानुपपद्यमानं त्रिधा विभागमेव तस्याचिपति, न पुनश्चतुर्द्धा। त्रिधा विभागस्याचेपेणैवानुपपत्तिनिरासेनाधिककल्पनानुपपत्तेः। येयमनुपपत्तिश्चतुर्धा विभागमाचिपति,—इति मन्यसे, आचिपत्यसौ त्रिधापि विभागम्। तत्रैवं सति, त्रिधा विभागमाचिप्य चरितार्थं शास्त्रं न पुनरधिकमाचेप्तुमर्हति। तदत्र विभागे, ये समाना इति मन्त्रद्वयं न संभत्स्यते। कल्पितस्य मन्त्रसम्बन्धानुपपत्तेः। यत्तु शातातपवचनम्,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"निरूप्य चतुरः पिण्डान् पिण्डदः प्रतिनामतः ।
ये समानाइति द्वाभ्यामाद्यन्तु त्रिभजेत् त्रिधा ।
एषएव विधिः पूर्व्वमर्घ्यपात्रचतुष्टये" ।

इति । तत्र विभजते—विभागपूर्व्वकं मिश्रणमर्थः । कथं ज्ञायते ? । यदयं विभजेदित्यभिधाय तमेव विधिमर्घ्यपात्रेष्वतिदिशति, ततः प्रतिपद्यामहे,—विभागपूर्व्वकमिश्रणं तस्यार्थः,—इति । न हि विभागमात्रं करणीयं न मिश्रणमिति शक्यं वक्तुम् । तदुक्तप्रयोगविषयश्चेदमित्यनुदाहरणम् । एवमसावपि त्रिधा विभागमाह न चतुर्धा । यत् पुनर्ब्रह्मपुराणवचनम्,—

"चतुर्भ्यस्त्वार्घ्यपात्रेभ्यएकं वामेन पाणिना ।
गृहीत्वा दक्षिणेनैव पाणिना सतिलोदकम् ।
संसृजतु त्वा पृथिवी ये समानाइति स्मरन् ।
प्रेतविप्रस्य हस्ते तु चतुर्भागं जलं क्षिपेत् ।
ततः पितामहादिभ्यस्तन्मन्त्रैश्च पृथक् पृथक् ।
ये समानाइति द्वाभ्यां तज्जलन्तु समर्पयेत् ।
अर्घ्यन्तेनैव विधिना प्रेतपात्राच्च पूर्व्ववत् ।
तेभ्यस्त्वार्घ्यं निवेद्यैव पश्चाच्च स्वयमाचमेत्" ।

इति । तदपि तदुक्तप्रयोगविषयम् । न हि 'संसृजतु त्वा पृथिवी'-इत्ययमपि मन्त्रोऽस्माकं भवति । तस्मात् नैतदस्मत्प्रयोगविषयमित्यतिरोहितमेतत् । केचित् पुनः स्वशास्त्रमात्रात् कर्म्मक्रमं निर्णेतुमशक्नुवन्तोऽर्द्धजरतीयकुशलाः प्रयोगान्तरविषयस्य वचनस्यैकमंशमुपादत्ते, परश्चांशं शाख्यन्तरीयं वदन्ति । तदश्रद्धेयम् ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतेनैव पिण्डो व्याख्यातो व्याख्यातः ॥ १७ ॥

एतेनार्घ्यमिश्रणप्रकारेणैव पिण्डमिश्रणप्रकारोऽपि व्याख्यातो वेदितव्यः। एतदनेनोक्तं भवति। प्रेतपिण्डं त्रिधा विभज्य ये समाना इति मन्त्राभ्यां पितृपिण्डेषु मिश्रयेत्,—इति। मन्त्रावृत्तिरुक्ता। द्विर्वचनं प्रकरणसमाप्तिप्रज्ञापनार्थमादरार्थञ्च। तदत्र सपिण्डीकरणे बहुवक्तव्यमस्ति। तत्सर्व्वं छन्दोगपरिशिष्टादौ ज्ञेयम्। ग्रन्थगौरवभयादुपारम्यतेऽस्माभिः। एतत्सूत्रान्तरम्,—"अतऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात्"—इति सूत्रं रघुनन्दनः पठति। तदनाकरमित्युक्तम् ॥ १७ ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ श्राद्धकल्पभाष्ये तृतीया काण्डिका समाप्ता ॥

For Private and Personal Use Only

श्राद्धकल्पः ।

चतुर्थी कण्डिका ।

अथाभ्युदयिके श्राद्धे ॥ १ ॥

अथेदानीमाभ्युदयिके श्राद्धे योविशेषः सोऽभिधीयते। अभ्युदयो मङ्गलं विवाहादिकमित्येतत्। यत्र यत् क्रियते श्राद्धं तदिदमाभ्युदयिकं श्राद्धमितिकर्म्मणोनामधेयमेतत्। तेनाभिलापे आभ्युदयिक-श्राद्धमित्युल्लेख्यम्। तदिदं श्राद्धं मातृपूजा-वसोर्धाराऽऽयुष्यमन्त्रजपं कृत्वा करणीयम्। तथा च छन्दोगपरिशिष्टे कात्यायनः।

"कर्म्मादिषु च सर्व्वेषु मातरः सगणाधिपाः।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः।
प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु।
अपिवाऽक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः।
कुड्यलग्नां वसोर्धारां सप्तवारान् घृतेन तु।
कारयेत् पञ्चवारान् वा नातिनीचां न चोच्छ्रिताम्।
आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्"।

इति। तदिदं श्राद्धं यत्र यत्र न भवति, तदपि तत्रैव द्रष्टव्यम्॥ १ ॥

युग्मानाशयेत् ॥ २ ॥

पितॄणामप्यत्र युग्मान् ब्राह्मणानाशयेत्। ब्राह्मणानाञ्चात्रापि कर्म्मणि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दैवे प्राङ्मुखत्वं पित्र्ये चोदङ्मुखत्वं पार्व्वणवदेव भवति। तत्रापवादक-वचनाभावात्। तथा च कात्यायनः।

"प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा।
उपवेश्य, कुशान् दद्यादृजुनैव हि पाणिना"।

इति तथा—पार्व्वणवद्देवोपवेशनं ब्राह्मणानामाह। कर्त्ता पुनरत्र प्राङ्मुखः स्यात्। कथं ज्ञायते?। तत्र पित्र्ये कर्म्मणि दक्षिणामुखत्वं दक्षिणायादिशः पित्र्यत्वादुपपन्नतमम्। इह तु,—

"सदा परिचरेद्भक्त्या पितॄनप्यत्र देववत्"।

इति कात्यायनेन पितॄणां देववत् परिचरणस्योपदेशात् अमाङ्गलिकं दक्षिणामुखत्वं न युक्तं वर्णयितुम्—इति। तथा च, पिण्डदाने प्राङ्मुखत्वस्य तेनाभिधानात् सर्व्वत्र तथात्वमवगच्छामः॥ २॥

प्रदक्षिणमुपचारः॥ ३॥

प्रदक्षिणं यथा भवति, तथोपचारः कर्त्तव्यः। अस्माच्च विशेषाभिधानात् तत्राप्रादक्षिण्यमुपचारस्यावगम्यते। अन्येऽपि विशेषाः,—

"निपातो न हि सव्यस्य जानुनोविद्यते क्वचित्।
सदा परिचरेद्भक्त्या पितॄनप्यत्र देववत्"।

इत्येवमाद्याः कात्यायनोक्ताः च्छन्दोगपरिशिष्टादुपलब्धव्याः॥ ३॥

ऋजवोदर्भाः॥ ४॥

दर्भा अत्र ऋजवोभवन्ति, न द्विगुणभुग्नाः॥ ४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यवैस्तिलार्थः ॥ ५ ॥

तत्र तिलैर्योऽर्थः प्रयोजनं क्रियते, सोऽत्र यवैः कर्त्तव्यः । तेन 'तिलोसि,'—इति मन्त्रे, 'यवोसि,'—इत्युहितव्यं भवति ॥ ५ ॥

सम्पन्नमिति तृप्तिप्रश्नः ॥ ६ ॥

'तृप्ताः स्थ,'—इति तृप्तिप्रश्नस्थाने 'सम्पन्नम्'—इति वक्तव्यम् । ते च, 'सुसम्पन्नम्'—इति ब्रूयुः । तथा च कात्यायनः ।

"सम्पन्नमिति 'तृप्ताःस्थ' प्रश्नस्थाने विधीयते ।
सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत्" ।

इति । केचिदत्र,—

"मधु-मध्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम् ।
गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्ज्जितः" ।

इति च्छन्दोगपरिशिष्टे मधुमन्त्रजपनिषेधात् मधुनो वर्ज्जनमाहुः । तदसङ्गतम् । कस्मात् ? ।

वशिष्ठोक्तोविधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः" ।

इति च्छन्दोगपरिशिष्टे आमिषव्युदासेन वशिष्ठोक्तस्य कृत्स्नस्य विधेरतिदेशात् मधुनः प्राप्तेः । मधुमन्त्रजपनिषेधात् मधुनो निषेध,—इत्यसङ्गतैषा कल्पना । प्रमाणाभावात् । मधुमन्त्रजपनिषेधाच्च मधुनोऽस्तित्वावगतेः । इतरथा मधुनोऽभावादेव मन्त्रोपि तत्प्रकाशको निवर्त्स्यति किमित्यसौ निषिध्यते । ननु गुणस्य मन्त्रस्य वर्जनोपदेशादेव द्रव्यस्य वर्जनमिति नायमनर्थकोनिषेधः । नैतदस्ति । कुतः ? । "गुणलोपे च मुख्यस्य"—इति सिद्धान्तविरोधात् । अथ,

20

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मा तावत् मन्त्रवर्जनोपदेशात् द्रव्यस्य वर्जनं बोधि, किन्तु मन्त्रवर्जनोपदेशात् द्रव्यवर्जनमनुमास्यामहे। एवं खल्वसौ निषेधोन्यायमूलोभविष्यति,—इति। तदपि नास्ति। मन्त्रवर्जनस्य न्यायमूलत्वोपपिपादयिषया तावत् द्रव्यवर्जनमनुमित्सति भवान्। तत्रैवं सति क्व ते लाघवम्?। तद्वरं सति द्रव्ये मन्त्रवर्जनं वाचनिकमिष्यताम्। अलं द्रव्यस्य वर्जनानुमानेन। यतोऽवश्यमेकस्य वाचनिकत्वं भवताऽप्यभ्युपगन्तव्यम्। एवं खलु सिद्धान्तोऽप्यनुगृहीष्यते। अनैकान्तिकञ्चैतत् लिङ्गं न खल्वपि द्रव्यस्य वर्जनं शक्नोत्यनुमापयितुम्। 'मधु'—इत्येतस्य त्रिर्जपोपदेशोऽप्येवं सति न स्यात्। तस्मात् यथोक्तमेवास्तु ॥ ६ ॥

दधिवदराक्षतमिश्राः पिण्डाः ॥ ७ ॥

दधिवदरे प्रसिद्धे। अक्षतोयवः। कुतः?। "अक्षतास्तु यवाः प्रोक्ताः" —इति स्मरणात्। तैर्मिश्राः पिण्डाभवन्ति। तथा च कात्यायनः।

"सर्व्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च।
संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्ततः।
अवनेजनवत् पिण्डान दत्त्वा विल्वप्रमाणकान्।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत्"।

इति। तदनेन शेषद्रव्यघटितपिण्डानां दधिवदराक्षतमिश्रत्वरूपगुणमात्रविधानात् नात्र ब्राह्मणभोजने दध्यादिकमवश्यं प्राप्नोति। फलचमसन्यायवैषम्यात्। राजन्यवैश्यकर्तृकज्योतिष्टोमे हि संस्कारस्य तदर्थत्वात् होमविशेषवचनात्, दमसेलुत्वकालत्वात् लिङ्गदर्शनाच्च फल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चमसस्येज्याविकारत्वम्, इह तु न तद्वत् किञ्चित्कारणमस्ति दध्यादीनां ब्राह्मणभोजनेऽप्यवश्यं प्राप्तौ। राजन्यवैश्यकर्तृकज्योतिष्टोमे भक्षणं प्रतिपत्तिः, तत्र फलचमसविधानात् यागावशिष्टस्य च ऋत्विजां भक्ष्यत्वात् यागेऽपि फलचमसप्राप्तिरिति तु मीमांसानभिज्ञानां भ्रम एव। हविः—संस्कारार्थं खल्वेतद्भक्षणं न प्रतिपत्तिरित्यध्वरमीमांसायास्तृतीयेऽध्याये द्रष्टव्यम्। पिण्डदानन्तु,—

"प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्व्ववत्।
अपः क्षिपेन्मूलदेशेऽवनेनिच्वेति निखिलाः।
द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः।
मातामहप्रभृतींस्तु एतेषामेव वामतः"।

इति कात्यायनोक्तप्रकारेणावनेनिज्य करणीयम्। 'एतेषामेव वामतः'—इत्यभिधानादावाहितानां पित्रादीनामेव वामतो न कर्त्तुरिति। तदनेन पितृपक्षास्तृतदर्भाणां दक्षिणतोमातामहपक्षदर्भास्तरणं कर्त्तव्यं भवति। एवं किल प्रदक्षिणोपचारत्वमुपपत्स्यते,—इति ॥ ७ ॥

नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने ॥ ८ ॥

"उपतिष्ठतामित्यक्षय्यस्थाने"—इति वदर्णनीयम्। एवञ्च,—

"अक्षय्योदकदानञ्च अर्घ्यदानवदिष्यते।
षष्ठ्यैव नित्यं तत्कार्य्यं न चतुर्थ्या कदाचन"।

इति छन्दोगपरिशिष्टवचनात् षष्ठ्यन्तं पितुर्नामादिकमुल्लिख्य "नान्दीमुखाः पितरः प्रीयन्ताम्"—इत्युच्चार्य्य उदकं दद्यात्। एवं पितामहादिष्वपि। 'नान्दीमुखाः पितरः'—इत्यत्र, पितृपदस्य प्राप्तपितृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकपरतया न तत्र पितामहादिपदप्रयोगः। केचित्तु, षष्ठेऽव नित्यं तत्कार्य्यम्-इति कात्यायनवचनं पठन्तोपि नान्दीमुखाः पितरः प्रीयन्ताम्'—इत्येतावन्मात्रेणाक्षय्योदकदानं इच्छन्ति। ये तु 'अक्षय्यमस्तु'—इत्यन्तं वाक्यमुच्चार्य्य 'नान्दीमुखाः पितरः प्रीयन्ताम्'—इति वदन्ति। ते खल्वेकोद्दिष्टेऽपि तथैव वाक्यमुल्लिख्य 'उपतिष्ठताम्'—इति किमिति न वदन्तीति प्रष्टव्याः। तुल्यं खल्वनयोः सूत्रणम्—'उपतिष्ठतामित्यक्षय्यस्थाने'—इति, 'नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने'—इति च। तच्चैतद्वाक्यं वैकल्पिकं मन्तव्यम्। कुतः ? । 'अक्षय्योदकदानञ्च'—इति च्छन्दोगपरिशिष्टवचनादत्रैव कर्म्मणि 'अक्षय्यमस्तु'—इत्यस्यापि प्राप्तेः।

अत्र किञ्चिद्वक्तव्यमस्ति। तत्र तावत्, नान्दीमुखाः पितरः,—इति वचनात् नान्दीमुखानां पितॄणामत्र देवतात्वं गम्यते। तदेवं वैकृताद्विधेरनुमानात् प्राकृतानां केवलपित्रादीनां देवतात्वमत्र निवर्त्तते। यथा चातुर्मास्येषु साकमेधे तृतीये पर्व्वणि "अग्नयेऽनीकवते प्रातरष्टाकपालोमरुद्भ्यः सान्तपनेभ्योमध्यन्दिने चरुः मरुद्भ्यो गृहमेधिभ्यः सर्व्वासां दुग्धे सायमोदनम्"—इति प्रातर्मध्यन्दिने सायमित्यह्नः कालेषु इष्टीनां समाम्नानात्—यथा देवदत्तः प्रातरपूपान् भक्षयति मध्यन्दिने विविधमन्नमश्नाति अपराह्णे मोदकान् खादति,—इत्येकस्मिन्नहनि,—इति गम्यते, तथाऽत्रापि गम्यते,—इत्येकस्मिन्नहनि इष्टीनामवगमात् सद्यस्कालता विकृतीनाममूषामिष्टीनामिति चोदकप्राप्तं द्वैयहकाल्यं वाध्यते,—इति पञ्चमेऽध्याये सिद्धान्तितम्, तद्वदत्रापि बोद्धव्यम्। तथाचोक्तम्। "अपि वा क्रमकालसंयुक्ता सद्यः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रियेत तत्र विधेरनुमानात् प्राकृतधर्म्मलोपः स्यात्"—इति। तस्मात् नान्दीमुखविशेषणविशिष्टानां पित्रादीनामत्र देवतात्वावगमात् चोदकप्राप्तं केवलानां पित्रादीनां देवतात्वं निवर्त्तते। तेनाभिलापे नान्दीमुख पितरित्यादिकं प्रयोज्यम्। मन्त्रेष्वपि, 'आवह नान्दीमुखान् पितॄन्'—इति 'एत नान्दीमुखाः पितरः'—इति चैवमादिकं यथासम्भवमूहनीयम्। न चागन्तुकानामन्तेऽभिनिवेशः,—इति न्यायात् पित्रादिनाम्नः परतोनान्दीमुखपदमुल्लेखनीयमिति वाच्यम्। प्राकृतदेवतावाधेनात्रामीषां देवतात्वेनागन्तुकत्वाभावात्। नान्दीमुखाः पितरः—इति सूत्रोपात्तक्रमस्यान्यथाकरणस्यानुचितत्वाच्च। ननु, अर्घ्योदकदाने स्वधावाचने च विशिष्य नान्दीमुखपदोपादानादितरत्र नान्दीमुखपदोल्लेखो नास्ति—इति गम्यते। अन्यथा द्वयोर्विशिष्योपादानमनर्थकं स्यात्। नैष दोषः। तस्यार्थवत्त्वोपपत्तेः। कथम्?। वैकृतः खल्वसौ विशेषोपदेशोऽर्घ्यस्थाने,—इति अत्र तावदेतत् वक्तव्यमेव। उच्यतां तर्ह्येव, स्वधावाचने च 'नान्दीमुखेभ्यः'—इत्यनर्थकं वचनम्; नन्वस्मादेव वचनात् नान्दीमुखानां पितॄणां देवतात्वमनुमास्यते। उच्यते। स्वधावाचने यद्येतत् न पुनरुच्येत, न तत्र नान्दीमुखपदस्योल्लेखोभवेत्। किं कारणम्?। नान्दीमुखपदस्य खल्ववचने, "पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वाहोच्यताम्"—इत्येतावन्मात्रं तत्रोच्येत। सोऽयं वैकृतोविशेषोपदेशः स्यात्। तत्कथं नान्दीमुखपदमधिकं तत्र प्रयोक्ष्यते। आनुमानिकं खल्वेतत् प्रयुयात्तम्! प्रत्यक्षोपदेशः। एतस्मात् कारणात् द्वयोविशिष्योपदेशोऽर्थवानेव भवति, न त्वनर्थकः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथापि स्यात्,—'आवह पितॄन्'—इति, 'एत पितरः'—इति चैव-मादिकमपि प्रत्यक्षमुपदिश्यते। कथं तत्रानुमानिकस्य नान्दीमुख-पदस्य प्रयोगः?। नायं दोषः। पार्व्वणे हि तत् प्रत्यक्षमुपदिश्यते, नत्वाभ्युदयिके। चोदकः खल्वत्र तत् प्रापयति। तस्मात् तदप्यानु-मानिकमेव,—इति न किञ्चिदनुचितम्।

सूत्रद्वयं चैतत्,—'नान्दीमुखाः पितरः',—इति, 'प्रीयन्तामित्य-क्षय्यस्थाने'—इति च। तत्रापि, 'नान्दीमुखाः पितरः'—इति द्वयी-गतिः स्यात्;—नान्दीमुखानां वा पितृत्वम्, पितॄणां वा नान्दीमुख-त्वमनेन सूत्रेणोच्यते,—इति। तत्र, प्रथमस्तावत् पक्षो न सम्भवति। कुतः?। यतो नो खल्वपि ज्ञायते,—कइमे नान्दीमुखानाम्? इति। यद्धि नैव ज्ञायते, कथं तदनूद्य विशेषस्य विधिर्भविष्यति। अथ, तदपि विधास्यसि, भेत्स्यसि तर्हि वाक्यम्। अन्यत् खलु रूपमस्य विधीयमानस्य, अन्यच्चानूद्यमानस्य स्यात्। अथ मन्यसे,—तन्त्रान्तर-सिद्धान् नान्दीमुखाननूद्य पितृत्वममीषां विधास्यते,—इति। तदपि नास्ति। कस्मात्?। अन्यशास्त्रसङ्केतस्यान्यत्रानुपयोगात्। स्वशास्त्र-विरोधश्चैवमापत्स्यते। तच्च वक्ष्यामः। विधित्सितं पितृत्वमपि कि-मिहाभिप्रेयते, तदपि वक्तव्यम्। तच्च यदि प्राप्तपितृलोकत्वं, यदि वा परम्परया जनकत्वम्; उभयथापि प्रज्ञातमेव तदिति न पुनर्वि-धातव्यं भवति। पितॄणामिव श्राद्धोद्देश्यत्वं विधीयते,—इति चेत्, नैषा साध्वी कल्पना भवति। लक्षणाशब्दः खल्वेवमसौ स्यात्। श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसीत्याचक्षते। विधौ च न परः शब्दार्थ-स्तान्त्रिकानामनुमतः। तस्मात् पारिशेष्यात् चोदकप्राप्तान् पितृननूद्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां विशेषोनान्दीमुखत्वमनेन विधीयते,—इति वक्तव्यं भवति । तदेवं नान्दीमुखविशेषणवन्तः पितरइह देवताभवन्ति,—इति न किमपि विरोत्स्यते । कथं पराचीनमुद्दिश्य प्राचीनस्य विधिरिति चेत् । किं क्रियतां, यत्र प्राचीनमुद्दिश्य पराचीनस्य विधिर्न सम्भवति । न चैवमत्रैव केवलं भवति । "मधुरः सुधावदधरः"—इत्यादौ बहुत्र तदुपलम्भात् । किं भवति प्रयोजनं व्यत्यस्योपदेशस्य ?। नान्दीमुखपदस्य पित्रादिपदात् पूर्व्वं प्रयोगप्रज्ञापनमिति ब्रूमः । तस्मात्,— 'नान्दीमुखाः पितरः'—इत्यनेन वृद्धप्रपितामहादीनामत्र देवतात्वम् , स्वधावाचने पित्रादिपदमेव वृद्धप्रपितामहादिबोधकम् ,—इत्यसङ्गतं वचनम् । 'पितृभ्यः पितामहेभ्यः'—इत्यादिस्पष्टार्थपराणां वाक्यानामन्यार्थपरत्ववर्णनस्यानुचितत्वाच्च । तथा कात्यायनः ।

"स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु ।
पिण्डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात्" ।

इति 'स्वपितृभ्यः—इति ब्रुवाणः पित्रादीनामेवात्र देवतात्वं ज्ञापयति । "स्वपदस्य प्रपितामह-पित्रादिव्यावर्त्तकतयैव सार्थकत्वात्"—इति नारायणोपाध्यायाः । यत्पुनर्ब्रह्मपुराणीयं वचनम्,—

"पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयोह्यश्रुमुखाह्येते पितरः परिकीर्त्तिताः ।
तेभ्यः पूर्व्वतरायेच प्रजावन्तः सुखोचिताः ।
ते तु नान्दीमुखाः, नान्दी—समृद्धिरितिकथ्यते ।
कर्म्मण्यथाभ्युदयिके मङ्गल्यवति शोभने ।
जन्मन्यथोपनयने विवाहे पुत्रकस्य च ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पितॄन् नान्दीमुखान्नाम तर्पयेद्विधिपूर्व्वकम्"।

इति। यच्च मार्कण्डेयपुराणस्थ,—

"ये स्युः पितामहादूर्द्धं ते स्युर्नान्दीमुखादिति"।

इति। तदुभयमपि तत्तदुक्तप्रयोगविषयम्। अस्मच्छास्त्रविरोधेनैतद्विषयत्वासम्भवात्। अनयोस्तत्तत्प्रयोगविषयत्वादेव,—एकत्र प्रपितामहादूर्द्धानाम्, अन्यत्र प्रपितामहमारभ्य नान्दीमुखसंज्ञाविधानमुपपद्यते। तदनेन,—

"वृद्धमुख्यास्तु पितरोवृद्धिश्राद्धेषु भुञ्जते"।

इति स्मृतिरपि व्याख्याता। अस्माद्वचनात्,—पित्रादिष्वेव वृद्धशब्दप्रयोगः,—इत्यहृदयव्याहृतम्। न ह्यत्र पित्रादीनां वृद्धसंज्ञा विधीयते। वृद्धमुख्यांस्तु पितॄननूद्य भोक्तृत्वं तेषामुच्यते,—इति। अनयैव दिशा—

"नान्दीमुखे विवाहे च प्रपितामहपूर्व्वकम्।

वाक्यमुच्चारयेद्विद्वानन्यत्र पितृपूर्व्वकम्"।

इति वृद्धवशिष्ठादिवचनान्यपि व्याख्येयानि। रघुनन्दनस्त्वेतदजानानोव्याचष्टे,—'नान्दीमुखे पुत्रादिसम्बद्धीनामादिभूते विवाहे। यस्त्वर्थः —अन्यत्रप्राप्तपित्रादिक्रमव्यवच्छेदाय'—इति। तदश्रद्धेयम्। हेमाद्रिस्तु,—

"नान्दीमुखानां श्राद्धन्तु कन्याराशिगते रवौ।

पौर्णमास्यान्तु कर्त्तव्यं वराहवचनं यथा"।

इति प्रौष्ठपदीविषयएव वृद्धप्रपितामहादीनां देवतात्वमित्याह। तदसङ्गतम्। पूर्व्वोक्तब्रह्मपुराणे वृद्धप्रपितामहादीनां नान्दीमुखसंज्ञा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मभिधाय, 'कर्म्मण्यथाभ्युदयिके'—इत्यादिना तेषामेवाभ्युदयिकदेवतात्वाभिधानात्। यदपि,—

"अमावस्यायां पितरः पूज्या नान्दीमुखा अपि"।

इति ब्रह्मपुराणीयकन्यागतापरपक्षविषयं प्रागुक्तनान्दीमुखसंज्ञाविधानम्,—इति। तदप्यसङ्गतम्।

"ये स्युः पितामहादूर्द्ध्वं ते स्युर्नान्दीमुखास्त्विति"।

इति कन्यागतापरपक्षस्थब्रह्मपुराणएव तत्र पृथङ्नान्दीमुखसंज्ञाविधानात्। "स्वजनकादीनां देवतात्वप्रतीतेर्ब्रह्मपुराणीयप्रपितामहपित्रादित्रिकपक्षोजीवत्पित्रादित्रिकयजमानविषयः। यस्य त्रयोजीवन्ति स नैव कुर्य्यादिति विष्णूक्तनिषेधोवृद्धिश्राद्धेप्यतिदेशात् प्राप्तइति चेन्न, उपदेशेनातिदेशबाधात्"—इति कल्पतरुः। "युक्तञ्चैतत्। पित्रादीनां त्रयाणामपि विद्यमानत्वात् चतुर्थादयः प्रजावन्तः, चतुर्थादिसन्निहितत्वेन पित्रादित्रयाणां तद्विषयदुःखभाजनत्वेन सन्निहितमरणधर्म्मकत्वाच्चाश्रुमुखत्वम्"—इति मदनपारिजातः। शूलपाणिस्त्वेतदबुद्ध्वा, यदा त्रयः प्रव्रजिताः पतिता वा मृतास्तदा ब्रह्मपुराणीयवचनमित्याह। तदपि न सुन्दरम्। तदानीं वृद्धप्रपितामहादीनां प्रजावत्त्वाभावात्।

"ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते।

व्युत्क्रमाच्च मृते देयं येभ्यएव ददात्यसौ"।

इति छन्दोगपरिशिष्टवचनेन तन्मते तेषां पार्व्वणादिसकलश्राद्धार्हतया आभ्युदयिकमात्रगोचरोवचनारम्भस्य न पुनराञ्जस्येनोपपद्यते।

एवन्तावत्पर्य्यवसिता पूर्व्वसूत्रवर्णना। 'प्रीयन्तामित्यक्षय्यस्थाने'—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति चोत्तरसूत्रे प्रीयन्तामित्यस्य साकाङ्क्षतया तत्र “नान्दीमुखाः पितरः”—इत्ययमेव परिपूरणसमर्थोवाक्यशेषोभवति। तस्मात्, तस्यानुषङ्गः कर्त्तव्यः। तथाचोक्तम्। “अनुषङ्गोवाक्यसमाप्तिः सर्व्वेषु *तुल्ययोगित्वात्”—इति। तेन, ‘नान्दीमुखाः पितरः प्रीयन्ताम्’—* इति पूर्व्वोक्तएवमन्त्रोभवति॥ ८॥

दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्योमातामहेभ्यः प्रमातामहेभ्योवृद्धप्रमातामहेभ्यश्च स्वाहोच्यताम्॥ ९॥

ऋजुरक्षरार्थः। दैवे वाचयित्वा,—इत्यत्र, किम्?—इत्याकाङ्क्षायां पूर्व्वोक्तमनुषञ्जनीयम्। तेन, इदानीं नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयेत्। प्रीयतामित्युत्तरम्। अथ, ‘स्वाहां वाचयिष्ये—इति पृच्छति। वाच्यतामित्युक्ते, नान्दीमुखेभ्यः पितृभ्यः स्वाहोच्यतामित्यादिकं वदेत्। ते च, अस्तु स्वाहा,—इति प्रत्येकं ब्रूयुः।

स खल्वयं ग्रन्थएवमेव महायशःप्रभृतिभिः पठितोव्याख्यातश्च। अन्ये पुनरन्यथेमं ग्रन्थं पठन्ति,—नान्दीमुखाः पितरः,—इत्यादिम्। “नान्दीमुखाः पितरः, प्रीयन्तामिति दैवे वाचयित्वा, नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्योमातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्ताम्” इति। तेषां नान्दीमुखेभ्यः पितृभ्यः प्रीयन्तामित्यादिवत्, प्रीयन्तां वाचयिष्ये,—इति, अस्तु प्रीयन्ताम्,—इति च, न किमपि समवैति,—इति द्रष्टव्यम्। रघुनन्दनस्तु प्रीयन्तां वाचयिष्ये,—इति, नान्दीमुखेभ्यः पितृभ्यः प्रीयन्ताम्—इति चैवमा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिकम् प्रयोगमभ्युपगच्छन्नपि, अस्तु स्वधेतिवत् अस्तु प्रीयन्तामिति प्रत्युत्तरं नाभ्युपगच्छति, किन्तु प्रीयन्तामित्येतावन्मात्रम् । तदत्र भवन्तोभूमिदेवाः प्रमाणम् ॥ ९ ॥

न स्वधां प्रयुञ्जीत ॥ १० ॥

ऋजुरक्षरार्थः । सोऽयं चोदकप्राप्तस्वधानिषेधः । किं पुनरत्र त्यागवाक्यादौ प्रयोक्तव्यं भवति ?। 'स्वाहा'—इति ब्रूमः। कथम् ? । स्वाहोच्यतामित्यत्र स्वधापदस्थाने स्वाहापददर्शनात् स्वधानिषेधे सर्व्वत्रैव स्वाहेत्येतदागच्छति हृदयम् । आगच्छति चेत्, न सुतरामुत्स्रष्टव्यम् । स्वाहाशब्दः खल्वसौ स्वधाशब्दस्थाने प्रयुक्तः सर्व्वं तत् प्रयोजनमभिनिर्व्वर्त्तयति । अभिनिर्व्वर्त्तयति चेत्, नूनमन्यत्राप्यभिनिर्वर्त्तयिष्यति । न च शब्दान्तरप्रयोगे प्रमाणं पश्यामः । रघूनन्दनस्त्वेतदबुद्धा, श्राद्धे स्वाहाशब्दप्रयोगे प्रमाणं नास्ति,—इत्याह! । यदपि,—

"सदा परिचरेद्भक्त्या पितॄनप्यत्र देववत्" ।

इति छन्दोगपरिशिष्टवचनात् देवपत्नीयं नमएवायाति,—इत्युक्तम् । तदप्ययुक्तम् । देववत्परिचरणमात्राभिधानेन मन्त्रस्य तदीयस्याप्राप्तेः । इतरथा आवाहनादावप्यत्र देवपत्नोक्तएव मन्त्रः स्यात् । न चैवमिष्यते अतएव,—

"निपातो न हि सव्यस्य जानुनोविद्यते क्वचित्" ।

इति पूर्व्वार्द्धेन सव्यजानुपातनिषेधाद्दक्षिणजानुपातादिकमुत्तरार्द्धेनाभिधत्ते । अपि च । एवमपि,—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाहाकारवषट्कारनमस्कारादिवौकसाम् ।

इति छन्दोगपरिशिष्टएव दैवे स्वाहाकारस्योपदेशान्नित्यवत्तन्निषेधानुपपत्तिः। तस्मात् उक्तयुक्तेः स्वाहाशब्दएव प्रयोक्तव्योभवति। उभयमपि खल्वेवमनुग्रहीष्यते। तेन, 'येचात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वाहा,'—इति वक्तव्यम्। एवं 'पृक्ताः स्वधया'—इत्यत्र, 'पृक्ताः स्वाहया'—इति, 'स्वधास्थ'—इत्यत्र, 'स्वाहास्थ'—इति चोहनीयम् ।

"स्वधयेति पदस्थाने पुष्याशब्दं वदेदिह" ।

इति वक्तृचकारिका तु तन्मात्रपरा। तेषामेव गृह्यपरिशिष्टे 'पृक्ताः पुष्या'—इति पठितत्वात्।

तदत्र, ब्राह्मणानामेव युग्मत्वोपदेशात् अर्घ्यपिण्डादीनां न युग्मत्वम्। प्रकृतौ ब्राह्मणबहुत्वेप्येकस्यार्घ्यस्य दर्शनात्। यत्तु,—

"एकं नाम्ना परं तूष्णीं दद्यात् पिण्डान् पृथक् पृथक्" ।

इति चतुर्विंशतिमतवचनम्। तदस्मत्प्रयोगव्यतिरिक्तविषयम्। नचेदेवम्,—

"तिस्रः पूज्याः पितुः पक्षे तिस्रोमातामहे तथा ।
इत्येतामातरः प्रोक्ताः पितृमातृस्वसाऽष्टमी ।
ब्राह्मण्याद्यास्तथासप्त दुर्गाक्षेत्रगणाधिपान्" ।

इति तदुक्तमातरोप्यस्माकं भवेयुः। न त्वेवमिष्यते। अस्माकन्तु,—

"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरोलोकमातरः ।
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ।
गणेशेनाधिकाह्येता वृद्धौ पूज्याश्चतुर्दश" ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति कात्यायनोक्ता एव मातरः पूजितव्या भवन्ति । एतद्विद्वांस एव वकृचगृह्यपरिशिष्टोक्तानां मातृणां पूजनं वदन्ति । तदेतद्वचनं परिशिष्टग्रन्थेषु दृश्यते । मदनपारिजातादावपि कात्यायनीयमिति कृत्वैवैतल्लिखितम् । परन्तु, "गणेशेनाधिकाः"—इत्यर्द्धं तत्र नास्ति । तस्मात्, तदुक्तमातृपूजावत् तदुक्तपिण्डद्वयमप्यस्माकं न भवति । तथा भविष्ये ।

"पिण्डनिर्व्वपणं कुर्य्यान्नवा कुर्य्याद्विचक्षणः ।

वृद्धिश्राद्धे महाबाहो ! कुलधर्मान्यवेक्ष्य तु" ।

इति । "पिण्डनिर्व्वपणमित्युपलक्षणम्, अतो यत्कुले यावती इति—कर्त्तव्यता वृद्धिश्राद्धे तावत्येव कर्त्तव्या, नाधिका"—इति मदनपारिजातः। गोभिलादयः खल्वस्माकं कुलधर्मोपदेशगुरवः,—इत्यवोचाम । गौड़ास्तु प्रत्येकमर्घ्यपात्रादिकं किञ्चित् युग्मं पिण्डादिकञ्च किञ्चिदयुग्ममित्यर्द्धजरतीयं कुर्व्वन्ति ॥ १० ॥

एवन्तावत् सर्व्वोऽपि श्राद्धविधिरभिहितः । तत्र विशेषाभिधित्सयोत्तरो ग्रन्थः प्रवर्त्तते,—

श्राद्धान्वितः श्राद्धं कुर्व्वीत ॥ ११ ॥

श्रद्धा,—

"प्रत्ययो धर्मकार्य्येषु सदा श्रद्धेत्युदाहृता" ।

इत्युक्तलक्षणा । तया अन्वितो युक्तः सन् श्राद्धं कुर्व्वीत । न लोकाचारमात्रबुद्ध्या । न च नास्तिक्यमाश्रित्य न कुर्व्वीत । स्मरन्ति च ।

"उच्छास्त्रवर्त्तिनो ये च पापोपहतबुद्धयः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नास्तिक्यभावमाश्रित्य कर्म्मलोपव्यवस्थिताः।
न तत्र वीरा जायन्ते नारोगा न शतायुषः।
न च श्रेयोऽधिगच्छन्ति यत्र श्राद्धं विवर्ज्जितम्।
न सन्ति पितरश्चेति कृत्वा मनसि योनरः।
श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते।
कर्म्मलोपात् समूढ़ात्मा नरके पच्यते चिरम्।
लोकगर्हा भवेत्तस्य नास्तिक्यपथसंश्रयात्।
तस्माद्विधेरवष्टम्भात् कर्त्तव्यन्त्वौर्द्ध्वदेहिकम्।
प्रेतानामुपकारार्थमात्मनोऽभ्युदयाय च"।

इति। एवं वा—

श्रद्धा आकाङ्क्षेत्यनर्थान्तरम्। यदैव श्राद्धं कर्त्तुमाकाङ्क्षोदेति, तदैव श्राद्धं कुर्व्वीत। तथा च याज्ञवल्क्यः।

"अमावस्याऽष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्।
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्य्यसंक्रमः।
व्यतीपातोगजच्छाया ग्रहणं चन्द्रसूर्य्ययोः।
श्राद्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः"।

इति॥ ११॥

शाकेनापि नापरपक्षमतिक्रामेत्॥ १२॥

शाकेनापि श्राद्धं कुर्व्वीत। अपिकारात् जघन्योऽयं कल्पः। तदेवमपि कुर्व्वीत, न पुनरपरपक्षं कृष्णपक्षमतिक्रामेत्॥ १२॥

कुतएतत्?।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मासि मासि वोऽशनमितिश्रुतेरितिश्रुतेरिति ॥ १३ ॥

हे पितरः ! मासि मासि वोयुष्माकमशनम्—इति पितॄन् प्रतिप्रजापतेरुक्तिरियम् । इति श्रुतेः नापरपक्षमतिक्रामेत्—इति गतेन सम्बन्धः । 'इतिश्रुतेरितिश्रुतेः'—इति द्विर्वचनमादरार्थम् । 'इति' करणं प्रकरणसमाप्त्यर्थम् । केचित् द्विर्वचनमितिकारञ्च न पठन्ति ।

आभ्यां सूत्राभ्यां कृष्णपक्षनिमित्तमपि श्राद्धमवश्यं कर्त्तव्यम्,—इत्युक्तं भवति ॥ १३ ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ श्राद्धकल्पभाष्ये चतुर्थी काण्डिका ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धकल्पः ।

पञ्चमी काण्डिका ।

अथ धर्म्माः ।

अथेदानीमस्मिन् कर्म्मणि यजमानस्य भोक्तुश्च यथासम्भवं धर्म्माः— नियमाः, वर्तिष्यन्ते,—इति सूत्रशेषः ॥ १ ॥

तदहस्तत्परः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यात् ॥ २ ॥

यस्मिन्नहनिश्राद्धं भवति, तदहस्तस्मिन्नहनि । तत्परः तदाचरण चतुरः । शुचिः वाह्याभ्यन्तरशौचवान् । वाह्यं शौचं स्नानादि, आभ्यन्तरं मनःप्रसादादि । अक्रोधनः—यः क्रोधं करोति, स क्रोधनः, स न भवतीत्यक्रोधनः । अत्वरितः,—त्वरा संजाता यस्य सोऽयं त्वरितः, स न भवतीत्यत्वरितः । अप्रमत्तः प्रमादरहितः । प्रमादोऽनवधानतेत्यनर्थान्तरम् । सत्यवादी,—सत्यं वदितुं शीलं यस्य, स भण्यते । 'स्यात्,'—इति सर्व्वत्र संबन्धनीयम् ॥ २ ॥

अध्वमैथुनश्रमस्वाध्यायान् वर्ज्जयेत् ॥ ३ ॥

तदहरित्येव । अध्वनोवर्जनमध्वगमनाभावः । स्वाध्यायोवेदाध्ययनम् ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आवाहनादिवर्ज्जं वाग्यतः ॥ ४ ॥

आवाहनादिप्रश्नप्रत्युत्तरादीन् विहाय, वाग्यतोनियमितवचनः। 'स्यात्' इति पूर्व्वस्मादनुवर्त्तते ॥ ४ ॥

ओपस्पर्शनात् ॥ ५ ॥

आउपस्पर्शनात् ओपस्पर्शनात्। उपस्पर्शनं आचमनमित्यनर्थान्तरम्। आउपस्पर्शनात् आचमनपर्य्यन्तम्,—"आचान्तेषूदकम्"—इत्यादिसूत्रो पात्तब्राह्मणाचमनपर्य्यन्तमित्येतत्। 'वाग्यतोपस्पर्शनात्'—इति सूत्र-पाठे विसर्गलोपे सन्धिरार्षोद्रष्टव्यः।

ते खल्वमी नियमाभोक्तुरपि भवन्ति। अविशेषेणाभिधानात्। कात्यायनोऽप्येतत् सर्व्वमुपदिश्य, "आमन्त्रितास्चैवम्"—इति सूत्र-यन्नेतदेवाह ॥ ५ ॥

अपिचाचोदाहरन्ति ॥ ६ ॥

अपिचात्रैतस्मिन् कर्म्मणि ब्राह्मणप्रशंसामुखेन कतिचिद्भोक्तृधर्म्मानुदाह-रन्त्याचार्य्याः ॥ ६ ॥

यश्च व्याकुरुते शब्दान् यश्च मीमांसतेऽध्वरम्।
सामस्वरविधिज्ञश्च पंक्तिपावनपावनाः,—इति ॥ ७ ॥

यः शब्दान् व्याकुरुते सवैयाकरणः, यश्चाध्वरं यज्ञं मीमांसते सोऽयं मीमांसकः, साम्नः स्वराणां—क्रुष्टादीनां विधिं योजानाति स सामस्वर-विधिज्ञस्चैते पङ्क्तिपावनपावनाः। ये खल्वपात्रोपहतां पङ्क्तिं पुनन्ति त इमे पङ्क्तिपावनाभण्यन्ते। स्मरन्ति च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अपात्रोपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः ।
तान् निबोधत कार्त्स्न्येन ब्राह्मणान् पङ्क्तिपावनान्" ।

इति । ये पुनस्तानपि पङ्क्तिपावनान् पुनन्ति, ते खल्विमे पङ्क्तिपावनपावनाउच्यन्ते । 'इति' उदाहरन्तीतिगतेन संबन्धः ॥ ७ ॥

वागीश्वरोयाज्ञिकश्च पङ्क्तिपावनपावनः,—इति च ॥ ८ ॥

वाचामीश्वरः—संस्कृतां वाचं यः प्रयुङ्क्ते सइहाभिप्रेयते । तस्याः प्रयोगे ह्यभ्युदयमामनन्ति । "एकः शब्दः सुप्रयुक्तः सम्यक्ज्ञातः स्वर्गे लोके च कामधुग्भवति"—इति । 'यश्च व्याकुरुते शब्दान्'—इत्यत्र ज्ञानमात्रं विवक्षितम् । तदपि खल्वभ्युदयहेतुरितिद्वयोरुपादानम् । एतद्वा वचनं ज्ञानमात्रमभिप्रेत्य, प्रयोगञ्चाभिप्रेत्यान्यद्वर्णनीयम् । अथवा । 'यश्च व्याकुरुते शब्दान्',—इति वैयाकरणपरं वचनम् । यस्त्ववैयाकरणोऽपि संस्कृतां वाचं जानाति प्रयुङ्क्ते वा, सोऽयं वागीश्वरः । याज्ञिकोयज्ञानुष्ठाता । सखल्वयं पङ्क्तिपावनपावन इति पूर्ववदर्थः । 'इति च' उदाहरन्तीति गतेनाभिसंबन्धः । केचिदेतत् सूत्रं न पठन्ति । महायशःप्रभृतिभिस्तु पठितं व्याख्यातञ्च ॥ ८ ॥

नियोज्यानामभावेऽप्येकं वेदविदं पङ्क्तिमूर्द्धनि नियुञ्ज्यात् काममितरान् ॥ ९ ॥

ये ब्राह्मणाः श्राद्धे नियोज्यतयाऽभिहिताः, यावद्भिर्ब्राह्मणैः प्रयोजनं यदि तावन्तस्तथाविधान प्राप्यन्ते, तदाऽपि वेदविदमेकं ब्राह्मणं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पङ्क्तेर्मूर्द्धनि प्रधानस्थाने नियुञ्ज्यात्। इच्छया पुनरवेदविदोपि तस्या-मेव पङ्क्तौ नियुञ्ज्यात्। सोऽयं श्राद्धकर्त्तुर्धर्म्मः ॥ ९ ॥

कस्मात्पुनः कारणादेकं वेदविदं नियुज्यावेदविदोपि नियुञ्ज्यादित्यु-च्यते ?।

"यावतोग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
तावतोग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुड़ान्"।

इति तत्रभवन्तो मन्वादयस्तमीषां भोजने दोषमुदाहरन्ति। उच्यते,—

आवेदविद्भिराक्रान्तां पंक्तिं योजनमायताम्।
पुनाति वेदविद्येकोनियुक्तः पंक्तिमूर्द्धनि नियुक्तः
पंक्तिमूर्द्धनि ॥ १० ॥

वेदविदोन भवन्तीत्यवेदविदः। हि यस्मात् अवेदविद्भिराक्रान्तां योजन विस्तृतामपि पङ्क्तिं। पङ्क्तिमूर्द्धनि नियुक्तएकोवेदवित्पुनाति, एतस्मात् कारणात् एकं वेदविदं पङ्क्तिमूर्द्धनि नियुज्य काममितरान् नियु-ञ्ज्यात्। द्विर्व्वचनं प्रकरणसमाप्त्यर्थमादरार्थञ्च ॥ १० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ श्राद्धकल्पभाष्ये पञ्चमी काण्डिका समाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धकल्पः ।

षष्ठी काण्डिका ।

अथ तृप्तीः ॥ १ ॥

वक्ष्यामः,—इति सूत्रशेषः ॥ १ ॥

तत्र हविर्विशेषात् तृप्तिविशेषमाह,—

ग्राम्याभिरोषधीभिर्मासं तृप्तिः ॥ २ ॥

ग्राम्याभिर्ग्रामे भवाभिः । ओषधीभिः,—

"व्रीहयः शालयोमुद्गागोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदोघ्नन्ति धारिताः" ।

इत्युक्तलक्षणाभिः, फलपाकान्ताभिर्वा, मासं व्याप्य पितॄणां तृप्तिर्भवति । तन्त्रान्तरे ग्राम्यतिलनिषेधोऽस्मद्व्यतिरिक्तविषयः ॥ २ ॥

तदलाभे आरण्याभिः ॥ ३ ॥

तासां ग्राम्याणामोषधीनामलाभे, आरण्याभिरोषधीभिः, 'मासं तृप्तिः',—इत्यनुषज्यते । अनुकल्पोऽयम् ॥ ३ ॥

मूलफलैरद्भिर्वा ॥ ४ ॥

मासं तृप्तिः,—इत्यनुवर्त्तते । मूलैः,—

"कशेरुः कोविदारश्च तालकन्दं तथा विसम् ।
तमालं शतकन्दञ्च कह्लारं शीतकन्दकम्" ।

इत्यादिभिर्बहुलं तन्त्रान्तरेषूपदिष्टैः । फलैः,—

"विल्वामलकमृद्वीकापनसाम्रातदाड़िमम् ।
भव्यं यानेरताचोटं खर्जूराम्रफलानि च" ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्येवमादिभिस्तन्त्रान्तरोक्तैरेव । अद्भिर्जलेन वा । अयमप्यनुकल्प एव । तथा च ब्राह्मे पुराणे ।

"पयोमूलफलैः शाकैः कृष्णपक्षे च सर्व्वदा ।
पराधीनः प्रवासी च निर्धनोवाऽपि मानवः ।
मनसा भावशुद्धेन श्राद्धं दद्यात्तिलोदकम्" ।

इति । अपरे पुनरेतदविद्वांसोवक्ष्यमाणेनोत्तरशब्देन मूलादीनां ग्रहणं वर्णयन्तोभाषन्ते,—'मूलादयोऽपि पदार्थाः सहैवान्नेन तर्पयन्ति,'—इति॥४॥

सहान्नेनोत्तरास्तर्पयन्ति ॥ ५ ॥

उत्तराः—वक्ष्यमाणाश्छागादयः पदार्थाः, अन्नेन सहिताः सन्तस्तृप्तिं जनयन्ति, न केवलाः ॥ ५ ॥

तदिमे उत्तराः पदार्थाअभिधीयन्ते,—आकाण्डिकापरिसमाप्तेः,—

छागोस्रमेषा आलभ्याः ॥ ६ ॥

उस्रोवृषोवलीवर्द्दइत्यनर्थान्तरम् । प्रसिद्धावन्यौ । ते खल्विमे च्छागोस्रमेषाआलभ्याः सन्तस्तर्पयन्ति, नत्वन्यथा । आलम्भश्चामीषां शूलाक्तविधिना करणीयः ॥ ६ ॥

शेषाणि क्रीत्वा लब्ध्वा वा स्वयंमृतानां वा ऽऽहृत्य पचेत् ॥ ७ ॥

शेषाणि छागादिभ्योऽन्यानि वक्ष्यमाणानि मांसानीत्यर्थः । "शेषाणीतरेषाम्"—इति पाठे, शेषाणि छागादिभ्योऽन्यानि, इतरेषां मत्स्यादीनां मांसानि,—इति पूर्व्वोक्तएवार्थः । इतरेषां क्रीत्वा लब्ध्वा वा,—इति वा वर्णनीयम् । यदा क्रयलाभाभ्यां संबन्धः, तदा 'इतरे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षाम्'—इति संबन्धलक्षणा षष्ठी। तानि खल्वेतानि मांसानि कुतश्चित् क्रीत्वा वा, लब्ध्वा वा, अथ वा स्वयंमृतानामाहृत्य, पचेत्,—गृह्योक्तप्रकारेण चरुपाकविधिना ॥ ७ ॥

अथेदानीं येन पदार्थेन यावन्तं कालं पितरस्तृप्यन्ति, तदुच्यते,—

मासद्वयं मत्स्यैः ॥ ८ ॥

मत्स्यैः पाठीनादिभिर्मासद्वयं पितॄणां तृप्तिर्भवति ॥ ८ ॥

मासत्रयं हारिणेन मृगमांसेन ॥ ९ ॥

मृगः पशुरित्यनर्थान्तरम्। मृगस्य पशोर्मांसेन मासत्रयं तृप्तिः। तदेव मांसं विशिनष्टि। हारिणेन हरिणसंबन्धिना पशुमांसेन। 'हरिणमृगमांसेन,'—इति पाठेपि, सामान्यवचनोमृगशब्दोविशेषवाचिना हरिणशब्देन विशिष्यते,—इति सएवार्थोभवति ॥ ९ ॥

चतुरः शाकुनेन ॥ १० ॥

चतुरोमासान् तृप्तिः शाकुनेन मांसेन। शकुनः पक्षीत्यनर्थान्तरम्। सच कपिञ्जललावकादिः ॥ १० ॥

पञ्च रौरवेण ॥ ११ ॥

रौरवेण मांसेन पञ्च मासान् तृप्तिः। एवमुत्तरत्रापि। रुरुर्मृगविशेषः ॥ ११ ॥

षट् छागेन ॥ १२ ॥

तृप्तिः ॥ १२ ॥

सप्त कौर्म्मेण ॥ १३ ॥

तृप्तिरित्येव ॥ १३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अष्टौ वाराहेण ॥ १४ ॥

तृप्तिः ॥ १४ ॥

नव मेषमांसेन ॥ १५ ॥

सखल्वयं मेषआलभ्योबोद्धव्यः ॥ १५ ॥

दश माहिषेण ॥ १६ ॥

मांसेन,—इत्येव ॥ १६ ॥

एकादश पार्षतेन ॥ १७ ॥

पृषतोमृगविशेषः ॥ १७ ॥

संवत्सरन्तु गव्येन पयसा ॥ १८ ॥

तृप्तिः ॥ १८ ॥

पायसेन वा ॥ १९ ॥

संवत्सरं तृप्तिः। वाशब्दश्चशब्दार्थः समुच्चये ॥ १९ ॥

वार्द्धीणसस्य मांसेन द्वादशवर्षाणि ॥ २० ॥

तृप्तिरित्येव। वार्द्धीणसश्च,—

"त्रिपिबन्त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्।
वार्द्धीणसन्तु तं प्राहुर्याज्ञिकाः पितृकर्म्मणि।
कृष्णग्रीवोरक्तशिराः श्वेतपक्षोविहङ्गमः।
सवै वार्द्धीनसः प्रोक्तइत्येषानैगमी श्रुतिः"।

इत्युक्तलक्षणः। जरत्च्छागइति मेधातिथिः ॥ २० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ श्राद्धकल्पभाष्ये षष्ठी काण्डिका समाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धकल्पः ।

सप्तमी काण्डिका ।

अथाक्षय्यतृप्तीः ॥ १ ॥

वक्ष्यामः ॥ १ ॥

खड्गः ॥ २ ॥

खड्गआरण्यः पशुविशेषः । सोयमक्षय्यतृप्तिहेतुः पितृणाम् । एवमग्रेऽपि ॥ २ ॥

कालशाकम् ॥ ३ ॥

प्रसिद्धमेतत् । कालशाकः,—इति पाठेऽपि नार्थोभिद्यते ॥ ३ ॥

लोहितच्छागः ॥ ४ ॥

रक्तवर्णच्छागः । "च्छागोवा सर्व्वलोहितः"—इति च स्मृत्यन्तरम् ॥ ४ ॥

मधु ॥ ५ ॥

मधु चौद्रं माध्वीकमित्यनर्थान्तरम् ॥ ५ ॥

महाशल्कः ॥ ६ ॥

महाशल्कोमत्स्यविशेषः । सच रोहितादिरिति वाचस्पतिमिश्रः । रोहितमत्स्यः,—इत्यपरे । तथा च ब्राह्मे पुराणे ।

"रोहितामिषमुत्पन्नं दत्त्वा तु स्वकुलोद्भवाः ।
अनन्तां विप्र ! यच्छन्ति तृप्तिं गौरीसुतस्तथा" ।

इति ।

"एकशल्कोऽर्द्धचन्द्रस्य ललाटे खड्गसंयुतः ।
शुक्लवर्णस्य योमत्स्योमहाशल्कः सउच्यते" ।

इति पुलस्त्यवचनोक्तस्तु युक्तः ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्षासु मघाश्राद्धम् ॥ ७ ॥

ऋजुरत्तरार्थः । 'वर्षासु श्राद्धम्'—इति पाठे, वर्षासु सर्व्वत्रैव श्राद्ध-मचयफलप्राप्तिहेतुरिति मन्तव्यम् । तथा च विष्णुधर्म्मोत्तरे ।

"उत्तरायनात् श्राद्धे श्रेष्ठं स्याद्दक्षिणायनम् ।
चातुर्मास्यञ्च तत्रापि प्रसुप्ते केशवे हितम्" ।

इति ॥ ७ ॥

हस्तिच्छायायाञ्च ॥ ८ ॥

श्राद्धमित्यनुषज्यते । हस्तिच्छाया च कुञ्जरस्य च्छाया, बहुप्रकारं-पारिभाषिक्यपि स्मृतिषूपदिष्टा । कुञ्जरस्य च्छाया तावत्,—

"हस्तिच्छायासु विधिवत् कर्णव्यजनवीजितम्" ।

इति भारते । पारिभाषिकी खल्वपि । प्रचेताः ।

"सूर्य्ये हस्तस्थिते या तु मघायुक्ता त्रयोदशी ।
तिथिर्वै श्रावणी या तु सा च्छाया कुञ्जरस्य च" ।

इति । यमः । हंसे करस्थिते या तु अमावस्या कराग्विता
सा ज्ञेया कुञ्जरच्छाया इति बौधायनी श्रुतिः" ।

इति । वायुपुराणे ।

"वनस्पतिगते सोमे या च्छाया प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्" ।

इति । ब्रह्मपुराणे ।

"सैंहिकेयोयदा भानुं ग्रसते पर्व्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्"

इति । एवमादिकमनुसन्धेयम् ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथेदानीं ब्राह्मणविशेषा अभिधीयन्तेऽचयहप्तिहेतवः,—

मन्त्राध्यायिनः ॥ ९ ॥

मन्त्रब्राह्मणात्मकस्य वेदस्य मध्यात् मन्त्रभागमात्रं ये अधीयते ते मन्त्राध्यायिनः ॥ ९ ॥

पूताः ॥ १० ॥

पूताः पवित्राः श्रुत्युक्ताचारादिभिरित्यर्थः। अथवा। मन्त्राणामध्ययनमकुर्व्वाणा अपि वेदव्रतानुष्ठानं ये कृतवन्तः, तद्दमे पूताः ॥ १० ॥

शाखाध्यायी ॥ ११ ॥

स्वीयां शाखां मन्त्रब्राह्मणात्मिकां योऽधीते, स खल्वयं शाखाध्यायी॥११॥

षड़ङ्गवित् ॥ १२ ॥

षड़ङ्गानि योवेत्ति सोयं षड़ङ्गवित्। तेषां मध्यादेकमपि योवेत्ति, सोऽपि,—इति महायशाः। अङ्गानि च,—

"शिक्षाकल्पोव्याकरणं निरुक्तं ज्योतिषाञ्चितिः।
छन्दसां विचितिश्चैव षड़ङ्गोवेदद्दष्यते"।

इत्युक्तलक्षणानि ॥ १२ ॥

ज्येष्ठसामगः ॥ १३ ॥

ज्येष्ठसामान्यारण्यके गीयन्ते। तानि योगायति, सोऽयं ज्येष्ठसामगः। ज्येष्ठसामव्रतं येन चीर्णं सोऽपि,—इति महायशाः ॥ १३ ॥

अपि गायत्रीसारमात्रः ॥ १४ ॥

अपिर्भिन्नक्रमे। गायत्रीसारमात्रः,—इति व्यत्यासेन प्रयुक्तं। गायत्रीमात्रसारोऽपि,—इत्यर्थः। स्मरन्ति च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"गायत्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितश्चतुर्व्वेदः सर्व्वाशी सर्व्वविक्रयी" ।

इति। गायत्रीव्रतमात्रं सङ्कप्रवचनापरनामधेयं येन चीर्णं स चैव मुच्यते॥१४॥

त्रिणाचिकेतः ॥ १५ ॥

त्रिणाचिकेतोऽध्वर्य्युशाखायां प्रसिद्धः। एतद्व्रतमपि, तद्योगात् पुरुषोऽपि त्रिणाचिकेतः ॥ १५ ॥

त्रिमधुः ॥ १६ ॥

त्रिमधु अध्वर्य्युवेदभागस्तद्व्रतञ्च। तद्योगात् पुरुषोऽपि त्रिमधुः ॥१६॥

त्रिसुपर्णः ॥ १७ ॥

सुपर्णमन्त्रास्तैत्तिरीयके प्रसिद्धाः। बह्वृचां वेदभागस्त्रैवमुच्यते । तद्-व्रतञ्च । तद्योगात् पुरुषोऽपि ॥ १७ ॥

पञ्चाग्निः ॥ १८ ॥

पञ्च—पवनपावनदक्षिणगार्हपत्याहवनीयाश्चाग्नयोयस्य, असौपञ्चाग्निः । तथा च हारीतः ।

"पवनः पावनस्त्रेता यस्य पञ्चाग्नयोगृहे ।
सायं प्रातः प्रदीप्यन्ते सविप्रः पङ्क्तिपावनः" ।

इति । केचिदेतत्सूत्रम,—'त्रिणाचिकेतः'—इत्यतः पूर्व्वं पठन्ति ॥ १८॥

स्नातकः ॥ १९ ॥

विद्यास्नातकोव्रतस्नातकोविद्याव्रतस्नातकश्चेति त्रिप्रकारोगृह्यसूत्रोक्तः ॥ ॥ १९ ॥

मन्त्रब्राह्मणवित् ॥ २० ॥

मन्त्रब्राह्मणात्मकसमग्रवेदवेत्ता। केचिदेतत् सूत्रद्वयं न पठन्ति ॥२०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मज्ञः ॥ २१ ॥

धर्मशास्त्राध्यायी धर्मवेत्ता वा। "धर्मद्रोणपाठकः,"—इति पाठे, 'मनुवशिष्ठयाज्ञवल्क्यगोतमशास्त्राणि धर्मद्रोणशब्देनोच्यन्ते, तेषां मध्ये एकस्यापि पाठकः'—इति महायशाः ॥ २१ ॥

ब्राह्मोढापुत्रश्च ॥ २२ ॥

ब्राह्मेण विवाहेन या विवाहिता स्त्री, तस्याः पुत्रः। च शब्दात् ब्राह्मदेयाप्रदात्रादयोभूयांसः समुच्चीयन्ते। तथा च मात्स्ये पुराणे।

"ब्रह्मदेयाऽऽत्मसन्तानो ब्रह्मदेयाप्रदायकः।
ब्रह्मदेयापतिश्चैव ब्राह्मणः पङ्क्तिपावनः"।

इति। ते खल्वमी बहुलं तन्त्रान्तरेष्वभिहितास्ततएवोपलब्धव्याः ॥२२॥

इति पंक्तिपावनाः ॥ २३ ॥

इत्येते मन्त्राध्यायिप्रभृतयो ब्राह्मणाः पङ्क्तिपावनाः 'पङ्क्तिपावन-पावनाः'—इति केचित् पठन्ति ॥ २३ ॥

कुतः पुनरमीषां पङ्क्तिपावनत्वम्?

आसहस्रात् पंक्तिं पुनातीति वचनादासहस्रात् पंक्तिं पुनातीति वचनात् ॥ २४ ॥

ऋजुरक्षरार्थः। द्विर्वचनमादरार्थं प्रकरणसमाप्त्यर्थञ्च। "वागीश्वरो-याज्ञिकआसहस्रात् पङ्क्तिं पुनातीति वचनादासहस्रात् पङ्क्तिं पुनातीति वचनात्"—इति केचित् पठन्ति ॥ २४ ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ श्राद्धकल्पभाष्ये सप्तमी काण्डिका समाप्ता ॥

For Private and Personal Use Only

श्राद्धकल्पः ।

अष्टमी काण्डिका ।

अथ काम्यानां तिथयः ॥ १ ॥

अथेदानीं काम्यानां फलानां श्राद्धानां वा तिथयोवक्ष्यन्ते इति सूत्रशेषः ॥ १ ॥

पुत्रोऽभिरूपः प्रतिपदि ॥ २ ॥

प्रतिपदि श्राद्धकर्त्तुरभिरूपोविद्वान् रमणीयोवा,—

"यत्र विद्या च वित्तञ्च सत्यं धर्मः शमोदमः ।
अभिरूपः सविज्ञेयः स्वाश्रमे योव्यवस्थितः" ।

इत्युक्तलक्षणो वा, पुत्रोभवति ॥ २ ॥

तृतीयायां स्त्रीजन्मा ॥ ३ ॥

तृतीयायां श्राद्धं कुर्व्वन् पुरुषः स्त्रीजन्मा भवति। स्त्रीणां जन्म यस्मात् सोऽयं स्त्रीजन्मा। स्त्र्यपत्यजनकइत्यर्थः ॥ ३ ॥

अश्वास्तृतीयायाम् ॥ ४ ॥

तृतीयायां श्राद्धकर्त्तुरश्वाभवन्ति। केचिदश्वाइति न पठन्ति। तृतीयायामपि क्षुद्रपशवः फलमितिवदन्ति च ॥ ४ ॥

चतुर्थ्यां क्षुद्रपशवः ॥ ५ ॥

क्षुद्रपशवोऽजादयः ॥ ५ ॥

पञ्चम्यां पुत्रभागी ॥ ६ ॥

पुत्रभागी पुत्रवान्। "पुत्राः पञ्चम्याम्"—इति पाठे, व्यक्तोऽर्थः ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्यूतर्द्धिः षष्ठ्याम् ॥ ७ ॥

द्यूतेन,—

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते"।

इत्युक्तलक्षणेन, ऋद्धिर्धनोपचयः ॥ ७ ॥

कृषिः सप्तम्याम् ॥ ८ ॥

कृषिः कृष्याधनोपचयः। तथाचापस्तम्बः। "सप्तमे कृषिऋद्धिः"—इति ॥ ८ ॥

अष्टम्यां वाणिज्यम्* ॥ ९ ॥

पूर्व्ववदर्थः ॥ ९ ॥

आरोग्यं नवम्याम् ॥ १० ॥

ऋज्वर्थं सूत्रम् ॥ १० ॥

दशम्यां गावः ॥ ११ ॥

इदमपि ऋज्वर्थम् ॥ ११ ॥

परिचारकाएकादश्याम् ॥ १२ ॥

ऋज्वर्थमेव ॥ १२ ॥

द्वादश्यां धनधान्यं कुप्यञ्च हिरण्यञ्च ॥ १३ ॥

धनपदं धान्यादिभिन्नधनपरम्। कुप्यं सुवर्णरजताभ्यामन्यत्। 'कुप्यं रौप्यं हिरण्यञ्च'—इति केचित् पठन्ति ॥ १३ ॥

ज्ञातिश्रैष्ठ्यञ्च त्रयोदश्याम् ॥ १४ ॥

चशब्दात् धनधान्यादिकञ्च ॥ १४ ॥

---

* वाणिज्यमष्टम्याम्,—इति पाठान्तरम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युवानस्तत्र म्रियन्ते ॥ १५ ॥

तत्र त्रयोदश्यां श्राद्धं कुर्व्वाणस्य युवानोम्रियन्ते,—इत्ययमेकोदोषः। तदेतद्दोषवद्विष्णुर्ज्ञातिश्रैष्ठ्यादिफलमर्थयमानस्तत्राधिक्रियते,—इति स्निप्यते। महायशास्त्वाह,—'एतद्दोषपरिहारार्थं पिण्डरहितमत्र श्राद्धं कर्त्तव्यम्'—इति ॥ १५ ॥

शस्त्रहतस्य चतुर्दश्याम् ॥ १६ ॥

शस्त्रेण हतस्य श्राद्धं चतुर्दश्यां कर्त्तव्यम्। स्मरन्ति च।

"शस्त्रेण तु हताये वै तेषां दद्याच्चतुर्दशीम्"।

इति। फलञ्चात्र शस्त्रहतस्य तृप्तिरेवेति मन्तव्यम्।

"पक्षिदंशमृता ये च दंष्ट्रिशृङ्गिनरैर्हताः।
पतनानशनप्रायैरुद्बन्धाग्निबन्धनैः।
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः"।

इत्युक्तलक्षणो वा शस्त्रहतोद्रष्टव्यः। तथाच मरीचिः।

"विषशस्त्रश्वापदाहि तिर्य्यग्ब्राह्मणघातिनाम्।
चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता"।

इति। न च,—

"शस्त्रविप्रहतानाञ्च शृङ्गिदंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत्"।

इति च्छागलेयवचनात् शस्त्रादिहतानां श्राद्धमेव नास्ति,—इति वाच्यम्। बुद्धिपूर्व्वकमृतानामेव तथात्वात्। प्रमादमृतानान्तु श्राद्धमस्त्येव। तथाचाङ्गिराः।

"अथ कश्चित् प्रमादेन म्रियतेऽग्न्युदकादिभिः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया"।

इति। तथा गौतमः। "प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनै-श्चेच्छताम्"—इति। आत्मघातिनोऽपि विशेषमाह वृद्धगार्ग्यः।

"वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः।
आत्मानं घातयेद्यस्तु जलाग्न्यनशनादिभिः।
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते"।

इति।

ननु,—

"ब्राह्मणादिहते ताते पतिते सङ्गवर्ज्जिते।
व्युत्क्रमाच्च मृते देयं येभ्यएव ददात्यसौ"।

इति छन्दोगपरिशिष्टवचनात् ब्राह्मणादिहतस्य श्राद्धानर्हत्वमवगम्यते। नैष दोषः। एतस्यापि बुद्धिपूर्व्वकविषयत्वात्। अथ वा। ब्राह्मणादि-हतानां सामान्यतः श्राद्धाभावेऽपि चतुर्दश्यां श्राद्धं वचनबलाद्भविष्य-ति,—इति न किञ्चिदनुचितम्॥ १६॥

अमावस्यायाꣳ सर्व्वमित्यमावस्यायाꣳ सर्व्वमिति ॥ १७॥

अमावस्यायां श्राद्धकर्त्तुः सर्व्वं पूर्व्वोक्तं फलं भवति। कथं पुन-र्ज्ञायते पूर्व्वोक्तमेव सर्व्वं न त्वन्यदपि,—इति। "सर्व्वत्वमाधिकारिकम्" —इति सिद्धान्तादित्यवेहि। तथा मनुः।

"पत्न्यादिविनिर्दिष्टान् विपुलान् मनसः प्रियान्।
श्राद्धदः पञ्चदश्यान्तु सर्व्वान् कामान् समश्नुते"।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति पत्न्यादिविनिर्द्दिष्टान् सर्व्वान् कामान् समश्नुते,—इत्याह । तदस्य सर्व्वशब्दस्य प्रकृतवाचितया एकैकतिथिफलस्यैव च कामना विषयत्वेन प्रकृततया तस्यैव दर्शेऽपि फलत्वं योगसिद्धिन्यायात् । एवमेके । तत्र, "एकैकस्मै वा कामायान्ये यज्ञक्रतवश्चाह्रियन्ते, सर्व्वेभ्यो दर्शपौर्णमासौ"—इति श्रवणेन एकैकफलस्यैव विशेषतः प्रकृतत्वेनोपस्थितत्वादस्तु तथा, प्रकृते तु तथाविधवचनाभावात् "पत्न्यादि विनिर्द्दिष्टान्"—इति वचनाच्च सकलतिथिफलानां विनाऽपि प्रयोगभेदं दर्शश्राद्धफलत्वम् । एवमपरे । इतिशब्दः प्रकरणसमाप्तिज्ञापनार्थः । सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥ १७ ॥

अत्रैव शिवम् ।

शाण्डिल्यनाम्नोविमलेऽन्ववाये
मुनेरनूचानवरोमुनीनाम् ।
अनूनसत्वोविनयप्रधानः
शाण्डिल्यवद्भक्तिनयप्रवीणः ॥
अभूत् द्विजोभूतदयः स राधा-
कान्तो नितान्तश्रुतिमार्गनिष्ठः ।
सिद्धान्तवागीशइति प्रसिद्धि—
र्यं शिश्रिये तत्त्वतएव धीरम् ॥
केनापि कस्मिन्नपि वा कथञ्चित्
प्रवर्त्तिते विश्वपतेः प्रसङ्गे !

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाष्पप्रपूरः परितः प्रसर्पन्
वपुर्विभोः प्लावयतेस्म यस्य ॥
तस्मादजनि योविप्रश्चन्द्रकान्तोमहात्मनः ।
वसता कैकयेष्वेतत् तेन भाष्यं विनिर्म्मितम् ॥
व्योमाम्बरचन्द्रे शकवर्षे मिथुनमुपगते सूर्य्ये ।
परिपूर्णतामगच्छत् क्वतिरेषा चन्द्रकान्तस्य ॥
प्रीयतां तदनया हरिः स्वयं
धर्म्मकर्म्मनिवहैर्यदिज्यते ।
अप्यबद्धवक्तृला सरस्वती
तस्य काममखिलात्मनः स्तुतिः ॥
साधवोऽन्यगुणलेशहर्षिताः
शोधयन्तु खलु वीचितैरिदम् ।
जातरूपरसभावितं ह्ययो—
जातरूपमिव लक्ष्यते जनैः ॥
स्खलितमिह यदासीद्बुद्धिदोषैर्मदीयै—
स्तदमलमतिमद्भिः शोधनीयं कृपाभिः ।
न खलु कथमपि स्यात् सत्पथस्याध्वनीनः
स्खलितगतिरकस्माद्वाच्यएषोऽनुकम्प्यः ॥
"धर्म्मस्य तत्त्वं निहितं गुहायाम्"—
इत्थं यदि स्पष्टवचोमुनीनाम् ।
तदाऽल्पवागबुद्धिबलोऽल्पदर्शी
काहं बुधास्तत् खलु चिन्तयध्वम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वस्तुनोऽतिगभीरत्वाद्यद्वचोऽभवदन्यथा।
तदीश्वरो मे शमयेत् करुणासिन्धुरच्युतः॥

तत्प्रेरितां खल्ववलम्ब्य बुद्धि-
मिदं मया भाष्यमकारि यस्मात्।
तस्मादहं छन्तुमिहार्हएनो-
न किङ्करे कुर्व्वति भर्त्तुराज्ञाम्॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृता श्राद्धकल्पभाष्ये अष्टमी काण्डिका समाप्ता॥ समाप्तञ्चेदं श्राद्धकल्पभाष्यम्॥

शुभमस्तु॥ श्रीरस्तु॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्राद्धकल्पपरिशिष्टम् * ।

अनधीत्य पदस्तोभानतीषङ्गांश्च पुत्रक ! ।
ऋषभांश्चाज्यदोहांश्च कथं श्राद्धेषु भोक्ष्यसे ॥
आमन्त्रितोजपेद्दोहान् नियुक्तस्त्वृषभान् जपेत् ।
अतीषङ्गांश्च तत्रैव जग्ध्वाऽश्नीयात् द्विजोत्तमः ॥
भुक्त्वाऽऽचम्य पदस्तोभान् जपेत्तत्र समाहितः † ।
गोषूक्तञ्चाश्वसूक्तञ्च इन्द्रशुद्धे च सामनी ॥
तरन्तस्य च यत्साम तत्र जप्त्वैकधीर्बुधः ।
गत्वाऽऽसीनः शुचौ देशे वामदेव्यं ततोजपेत् ॥
एवं सामभिराच्छन्नो भुञ्जानस्तु द्विजोत्तमः ।
श्राद्धभोजनदोषैस्तु महद्भिर्नोपलिप्यते ॥
अन्यथैव हि भुञ्जानो हव्यकव्येष्वमन्त्रवित् ।
आत्मानमन्नदातृंश्च गमयत्यासुरीं गतिम् ॥
यत्नेन भोजयेत् श्राद्धे वह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्युं छन्दोगं वा समाप्तिकम् ॥
यद्येकं भोजयेत् श्राद्धे छन्दोगं तत्र भोजयेत् ।

* अयं ग्रन्थः श्राद्धकल्पभाष्यएव महायशसा व्याख्यातः । एषोऽंशः श्राद्धकल्पस्यैवान्तिमोऽध्यायः,—इति तस्य मतम् । इदं हि तेनोक्तम्,—"इत्येषोऽध्यायश्चिरन्तनभाष्यकारैर्न व्याख्यातोनापि दर्शितः, अस्माभिस्तु सर्व्वास्तु प्रदृश्यमानत्वाद्दर्शितः"—इति । परमत्र सूत्रलक्षणाभावात् चिरन्तनभाष्यकारैरव्याख्यातत्वात् सूत्रग्रन्थशेषे दृष्टत्वाच्च एष ग्रन्थः परिशिष्टतया व्यवहृतोऽस्माभिः ।

† विशेषतः,—इति पाठान्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋचोयजूंषि सामानि त्रैविद्यं तत्र तिष्ठति ॥
ऋग्भिस्तु पितरः प्रीतायजुर्भिस्तु पितामहाः।
सामभिः प्रपितामहास्तस्मात्तं तत्र भोजयेत् ॥
एकस्तु ब्राह्मणः श्राद्धे स्वल्पन्तु प्रकृतं भवेत्।
त्रयस्तु पितरः प्रोक्ताः कथं चाश्नन्ति ते त्रयः? ।
उरसि पितरोभुङ्क्ते वामपार्श्वे पितामहाः ।
प्रपितामहादक्षिणतः पृष्ठतः पिण्डतर्कुकाः ॥
लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सा तृप्तिः साप्तपौरुषी ॥
अटेत पृथिवीं कृत्स्नां सशैलवनकाननाम्।
लभेत यदि पित्रर्थे साम्नामक्षरचिन्तकं साम्ना
मक्षरचिन्तकम् ॥

इति श्राद्धकल्पपरिशिष्टं समाप्तम् ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन्ध्यासूत्रम् ।

गोभिलप्रणीतम् ।

अथातः सन्ध्योपासनविधिं व्याख्यास्यामः* सुप्रक्षालितपाणिपादवदनउपविश्य प्रागग्रेषु दर्भेषु प्राङ्मुखउदङ्मुखोवा बद्धशिखी यज्ञोपवीती तत† ॐ पूर्व्वां‡ भूर्भुवः स्वर्महर्जनस्तपः सत्यमिति सप्त व्याहृतयः सप्रणवा§ गायत्र्यापोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोमिति शिरोदशप्रणवसंयुक्तस्त्रिरभ्यस्तः पूरककुम्भकरेचकाख्यः प्राणायामएवं त्रिः|| कृत्वा सप्त वा षोड़शवाऽऽचामेत्ततोमार्ज्जनं प्रणवेन महाव्याहृतिभिस्तिसृभिर्गायत्र्याऽऽ¶ पोहिष्ठाभिस्तिसृभिरथोदकं हस्ते कृत्वा तत्र नासिकामवधायायतासुरनायतासुर्व्वा सकृत् त्रिर्व्वा जपेदृतञ्च सत्यञ्चेति त्रीनुदकाञ्जलीनादित्यं प्रतिक्षिपेत् ** सावित्र्या ततउपस्थान†† मुदुत्यं चित्रमिति ध्यानयुक्तमावर्त्तयेदोंपूर्व्वां गायत्रीमष्टकृत्वएकादशकृत्वोद्वादशकृत्वः पञ्चदशकृत्वः शतकृत्वः सहस्रकृत्वश्चेत्यष्टकृत्वः प्रयुज्य पृथिवीमभिजयत्येकादशकृत्वोऽन्तरीक्षं द्वादशकृत्वोदिवं पञ्चदशकृत्वः सर्व्वादिशोजयति शतकृत्वः सर्व्वान् कामान् सहस्रकृत्वोयत् किञ्चित् सर्व्वमित्यथेमां सन्ध्यां नोपास्ते नाचष्टे न स जयति‡‡ ये तूपासते श्रोत्रियाभवन्तीत्युपनीताश्छेदनभेदन

---

* वक्ष्यामः,—इति सो॰ पाठः ।

† उपविश्योपस्पृश्य ततः,—इति व॰ ।

‡ पूर्व्वामोङ्कार,—इति सो॰ ।

§ प्रतिप्रणवाद्याः—इति व॰ ।

|| त्रीन्,—इति व॰ ।

¶ महाव्याहृतिभिस्तिसृभिरन्ते वा गायत्र्या वा,—इति मा॰ ।

** प्रक्षिपेत,—इति का॰ ।

†† सावित्र्युपस्थानम्,—इति व॰ ।

‡‡ अथ य इमां सन्ध्यां नोपास्ते न स जयति,—इति व॰ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजनमैथुनस्वप्नस्वाध्यायानाचरन्ति ये सन्ध्याकाले ते श्वसूकरशृगालगर्द्दभसर्पयोनिष्वभिसम्पद्यमानास्तमोभि* सम्पद्यन्ते* तस्मात् सायं प्रातः सन्ध्यामुपासीतोदुत्यं चित्रमुद्वयं तमसस्परि भासं प्राग-न्यदनुवर्त्तते† प्राङ्मुखस्तिष्ठन् जपेदन्त‡ षोड़शाब्दमावृन्दं|| वृचहादद्दे ऋजु तीतिनोवरुणः प्रत्यु अदर्श्यायत्युद्वेदभिश्रुताद्दवमिति वर्गमस्तं गते शतशोधाराश्रवकीर्य्य गायत्र्या तु विसृज्य प्राङ्मुखा¶ उपविश्य जपेन्मध्यन्दिने विभ्राड् वृहदासीनो जपेदासीनो जपेदिति** ॥

इति गोभिलप्रणीतं सन्ध्यासूत्रं समाप्तम् ॥

---

* तमोभिः,—इति मु० ।
† तमसस्तमोभिसंपद्यन्ते,—इति सो० ।
‡ प्रागन्यदनुवर्त्तते उभयं गायत्र्यनुगानं प्रातः,—इति स० ।
§ अत्र,—इति सो० मु० ।
|| एषोड़शा अपूर्व्वा आवृन्दं—इति व० ।
¶ अवकीर्य्य प्रत्यङ्मुखः,—इति व० ।
** विभ्राड् इत्यर्द्धमसनां आसीति वृणसनां आसीति,—इति स० द्विःपाठानास्ति का० मु० ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्नानसूत्रम् ।

गोभिलप्रणीतम् * ।

अथ स्नानविधिं व्याख्यास्यामो† नदीदेवखातगर्त्तप्रस्रवणादीन् गत्वा शुचौ देशे मृत्तिलकुशगोमयाक्षतानुपकल्प्य‡ पारक्यनिपाने§ पञ्च पिण्डानुद्धृत्य|| नमस्कृत्य तीर्थं पावकानः सरस्वतीति पादावारभ्य मृद्भिर्गात्राणि प्रक्षाल्योपविशेद्बद्धशिखी नित्यं यज्ञोपवीतीत्याचम्य¶ प्राङ्मुख** उदङ्मुखो वा कुशहस्तः शुचिः समाहितो†† ऽथ सप्तव्याहृतीः‡‡ सावित्रीञ्च जप्त्वा§§ सप्तकृत्वः सावित्र्यानुमन्त्रितं|||| सकृदुदकमाचामेत्तत आचम्यापो यथाविध्याचम्यापो यथाविधि¶¶ ॥ १ ॥

अथ देवताभिसन्धिं*** कृत्वा सहस्रशीर्षा घृतवत्यश्वक्रान्ताभि-

---

* ग्रन्थोऽयं गोभिलप्रणीत इति प्रसिद्धिः। मुद्रितपुस्तके तथैव लिखितञ्च। वीरमित्रोदये तु "गोभिलीयपरिशिष्टे"—इति कृत्वा ग्रन्थोऽयमुद्धृतः। तेनैतस्य न गोभिलप्रणीतत्वं किन्तु तत्परिशिष्टरूपत्वमिति लक्ष्यते। अतएव ग्रन्थशेषे "इति गोभिलीयाः"—इति साधु संगच्छते। इह तु प्रसिद्धिरनुसृतेति ज्ञेयम्।

† प्रवक्ष्यामो—इति व०।

‡ मृत्तिलगोमयानुपकल्प्य,—इति व०।

§ पारक्यजले,—इति का०।

|| पारक्यनिपाने पञ्चपिण्डानुद्धृत्य,—इति नास्ति मु० व० पुस्तकयोः।

¶ यज्ञोपवीताचम्य,—इति वीरमित्रोदये पाठः।

** प्रक्षाल्योपविश्य बद्धशिखायज्ञोपवीतीप्राङ्मुख,—इति व०।

†† कुशहस्तः समाहितो,—इति व०।

‡‡ सप्तव्याहृतयः,—इति का० मु०। वीरमित्रोदयेऽप्येवं पाठः। व्याख्यानञ्चैतदेवं तत्र,—'सप्तव्याहृतयः सप्तव्याहृतीरित्यर्थः। क्वचित्तथैव पाठः"—इति।

§§ सकृज्जप्त्वा,—इति वीरमित्रोदये पाठः।

|||| सावित्र्यानुमन्त्रितं,—इति व०। सप्तव्याहृतयः सप्तकृत्वः सावित्र्यानुमन्त्रितम्,—इति का० मु० पुस्तकयोः पाठः। वीरमित्रोदयेऽपि।

¶¶ द्विर्वचनं नास्ति व० पुस्तके।

*** देवताभिसन्धिं,—इति वीरमित्रोदये। देवतासन्धिं,—इति व०।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्ऋग्भिर्मृत्तिकामादायेदं विष्णुर्विचक्रम इति षडृचेन संमृज्यो* द्वयं तमसस्परि उदुत्तममिति चोर्द्धौ पाणीकृत्वाऽऽदित्यमवेक्षेतोद्धृतासि† वराहेणामोसीति च प्रतिलोमान्यङ्गान्यभिमृशेरन्‡ द्विरेतयैवावृता-कृत्वा गावश्चिदासः§ मन्यव इत्येतेन|| गोमयं गात्रेषु मृत्तिकावद्द-तञ्च¶ सत्यञ्चेति त्रिः शुष्काघमर्षणं जपेत्ततोदेवताभिसन्धिं** कृत्वा नाभिमात्रेजले स्थित्वा शन्नोदेव्यापोहिष्ठीयाभिः†† पावमानीभिस्तरत् समन्दीभिरेतोन्विन्द्रं तमुष्टवाम न कि इन्द्रत्वदुत्तरमिति‡‡ पवित्रव-तीभिर्मार्ज्जयित्वा त्रिः प्राणायामं कृत्वा त्रिः सुत्य§§ सहस्रशीर्षा इति ऋचेनाघमर्षणं जपेत्ततस्त्रिराप्लुत्य|||| पुनः शन्नोदेव्यादिभिर्मार्ज्जनञ्च मार्ज्जनञ्च¶¶ ॥ २ ॥

अथ नित्यवत् सन्ध्यामुपासीतोदुत्यं चित्रमायं गौरपत्येतातरणि-र्द्यामेध्याभिर्ऋग्भिः सवितु*** रुपस्थानं नमोब्रह्मणइत्युपजाय

* इदं विष्णुर्विचक्रमे इति सद्याचमनं संसृत्यो,—इति व० ।
† उद्धितासि,—इति मु० का० ।
‡ मृद्भिर्गात्राणि प्रतिलोमान्यभिमृशेत्,—इति व० । मृद्भिर्गात्राणि प्रति-लोमान्यङ्गान्यभिमृशेत्,—इति वीरमित्रोदये ।
§ गावश्चिद्वास,—इति मु० का० पुस्तकयोः पाठः ।
|| इत्यनेन,—इति वीरमित्रोदये ।
¶ मृत्तिकां दत्त्वा ऋतस्य,—इति व० ।
** देवतासन्धिं,—इति व०
†† स्थिष्ठीयाभिः,—इति का० । वीरमित्रोदये च ।
‡‡ न कि इन्द्र इत्याभिर्ऋग्भिः, —इति व० ।
§§ 'त्रिः सुत्य' इति नास्ति वीरमित्रोदये ।
|||| त्रिः प्राणायामं कुर्य्यात् सहस्रशीर्षा ऋचेनाघमर्षणं ततस्त्रिराप्लुत्य,—इति व० । सहस्रशीर्षा,—इत्यतः पूर्व्वं 'सवनः'—इत्यधिकं वीरमित्रोदये ।
¶¶ द्विर्वचनं नास्ति व० पुस्तके ।
*** 'सवितुः'—इति नास्ति वीरमित्रोदये ।

For Private and Personal Use Only

चेत्येवमन्ते* नाग्निस्तृप्यत्विति च तृप्यतां वा, सर्व्वत्र सव्येनैतां स्तर्पयेद्-थापसव्येन† राणायणी शटीत्यथ कव्यवालादयोदिव्यान्मनुष्यांश्चा‡-थात्मीयांश्च चीन् पितृतस्त्रीन्मातृतोमातामहांश्च तत्पत्नश्च§ पितृ-तर्पणं‖ सनकादयोनिवीत्यथमनुष्यधर्म्मा¶ स्ततोगायत्र्यष्टशतमादौ-कृत्वा** भासं दशस्तोभमुन्नयं गायत्रीसामैशना:†† शुद्धाशुद्धीये राजनरौहिणके बृहद्रथन्तरे पुरुषगतिर्महानाम्नरोमहादिवाकीर्त्त्य‡‡ ज्येष्ठसामानि§§ देवव्रतानि पुरुषव्रतानुगानं तवश्यावीयमादित्यव्रत-मेकविंशत्यनुगानं पर्क्कादारभ्य यथाशक्त्याहरहर्ब्रह्मयज्ञइति गोभिलीया गोभिलीया:‖‖ ॥ २ ॥

इति गोभिलीयं स्नानसूत्रं समाप्तम्¶¶ ॥

---

* चेत्यन्ते,—इति वीरमित्रोदये पाठः। चेत्यन्त्ये,—इति सयकारः पाठः का० मु०।

† तृप्यत्विति च देवांस्तर्पयेयुरपसव्येन पाणिना, इति व०। वीरमित्रोदये चैवं 'पाणिना' इति विहाय।

‡ दिव्यायमाश्च,—इति व०। वीरमित्रोदये च।

§ मातामहांस्ततः पत्न्यश्च,—इति मु०।

‖ पितॄन् तर्पणम्,—इति का०। मातृतः पत्न्याश्च तर्पणम्,—इति व०। मातृतस्तत्पत्न्यश्चेति पितृतर्पणम्,—इत्युदाहृतत्वादौ। 'इति'शब्दं विहाय, एवमेव वीरमित्रोदये।

¶ सनकादयश्च निवीतमिति मनुष्यधर्म्मः,—इति व०। वीरमित्रोदये चैवम्। किन्तु मनुष्यधर्म्माः,—इति बहुवचनान्तस्तत्र पाठः।

** तत्रोपस्थानं गायत्र्यष्टशतादीन् कृत्वा,—इति व०।

†† सामैसनसं,—इति वीरमित्रोदये।

‡‡ उन्नयं गायत्र्यनुगानं शुद्धशुद्धीयं राजनरौहिणं बृहद्रथन्तरं पुरुषगति-र्महानाम्नो महावैराजं महादिवाकीर्त्त्यं,—इति व०।

§§ ज्येष्ठसामानं,—इति मु०।

‖‖ यथा श्चाणदहरहर्ब्रह्मयज्ञाय इति गोभिलीया गोभिलीयाः,—इति का० मु०। यथाशक्त्याहरहर्ब्रह्मयज्ञं गोभिलीयाः,—इति व०।

¶¶ इति स्नानविधिग्रन्थः समाप्तः,—इति का०।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्नानसूत्रपरिशिष्टम्† ।

आप्लवने तु सम्प्राप्ते तर्पणं तदनन्तरम् ।
गायत्रीञ्च जपेत् पश्चात्‡ स्वाध्यायञ्चैव शक्तितः* ॥
आप्लवने तु सम्प्राप्ते गायत्रीं जपतः पुरा ।
तर्पणं कुर्व्वतः पश्चात् स्नानमेव वृथा भवेत्* ॥
कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत् ।
गायत्र्यग्निमुखी यस्मात्§ तस्मादुत्थाय तां जपेत् ॥
यज्जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा ।
जपहोमौ तथा दानं सर्व्वं तन्निष्फलं भवेत् ॥
गृहेषु तत्समं जप्यं गोष्ठे शतगुणं भवेत् ।
नद्यां शतसहस्रञ्च अनन्तं देवसन्निधौ ॥
दशभिर्जन्मजनितं शतेन तु पुराकृतम् ।
त्रियुगन्तु सहस्रेण गायत्री हन्ति दुष्कृतम् ॥

---

† अयमंशः स्नानसूत्रान्तर्गततयैव व० पुस्तके उपलभ्यते। का० पुस्तके वीरमित्रोदये च *चिह्नाङ्कितौ श्लोकौ स्नानग्रन्थे दृश्येते। अस्यैव केचित् श्लोकाः गोभिलीयतया स्मार्त्तैनोद्धृताः । श्रीदत्तादिभिर्गोभिलीयग्रन्थतया एतदीयवचनं लिखितं। अत्रत्यानां केषाञ्चित् श्लोकानां गोभिलप्रणीतत्वं प्रायः सर्व्वनिबन्धकाराणामनुमतं लक्ष्यते। परमत्र सूत्रलक्षणाभावात् स्नानग्रन्थे दर्शनाच्च तत्परिशिष्टतया व्यवहृतो ग्रन्थोऽयमस्माभिः ।

‡ नित्यं,—इति पाठान्तरम् ।

§ प्रोक्ता,—इति पाठान्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीन्तु जपन् विप्रो न स पापेन लिप्यते ॥
व्याहृतिभिः प्रतिप्रणवां गायत्रीञ्च प्रतिप्रति ।
षट्प्रणवसंयुक्तां गायत्रीजपलक्षणम् ॥
ब्राह्मणं स्नातमायान्तं पथि गच्छन्ति देवताः ।
पितरस्तत्र गच्छन्ति वायुभूताजलार्थिनः ॥
निराशास्ते निवर्त्तन्ते वस्त्रनिष्पीड़ने कृते ।
तस्मान्न पीड़येद्वस्त्रमकृत्वा पितृतर्पणम् ॥
जलमध्ये तु यः कश्चित् द्विजातिर्ज्ञानदुर्व्वलः ।
निष्पीड़यति चेद्वस्त्रं स्नानन्तस्य वृथा भवेत् ॥
ये चास्माकं कुले जाताश्रपुत्रागोत्रिणोमृताः ।
ते तृप्यन्तु मया दत्तं वस्त्रनिष्पीड़नोदकम् ॥
अन्वावब्धेन सव्येन पाणिना दक्षिणेन च ।
तृप्यतामिति सेक्तव्यं* नाम्ना च प्रणवादिना ॥
आपोदेवगणाः सर्व्वं आपः पितृगणाः स्मृताः ।
तस्माद्दापोजले देयाः पितॄणां दत्तमक्षयम् ॥
प्रक्षालितैस्तिलैः कृष्णैस्तर्पयेत्तु पितॄन् सदा ।
जलस्थोजलमध्ये तु त्रिस्त्रिरेकन्तु तर्पयेत् ॥
श्राद्धे सेचनकाले तु पाणिनैकेन दापयेत् ।
तर्पणे तूभयं कुर्य्यादेषएव विधिः स्मृतः ॥
देवतानां पितॄणाञ्च जले दद्याज्जलाञ्जलीन् ।

* वक्तव्यं,—इति पाठान्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलीन् ॥
गोत्रं स्वरान्तं सर्व्वत्र गोत्रस्याक्षय्यकर्म्मणि।
गोत्रस्तु तर्पणे प्रोक्तः कर्त्ताएवं न मुह्यति ॥
सर्व्वत्रैव पितः प्रोक्तं पिता तर्पणकर्म्मणि।
पितुरक्षय्यकाले च कर्त्ता एवं न मुह्यति ॥
शर्म्मन्नर्घादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि।
शर्म्मणोऽक्षय्यकाले च कर्त्ता एवं न मुह्यति ॥
येऽबान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः।
ते तृप्तिमखिलां यान्तु ये चास्मत्तोयकाङ्क्षिणः ॥
उदकएवोदकस्थः स्थलगस्तु शुचिस्थले।
पादौ कृत्वोभयत्रैव आचम्योभयतः शुचिः ॥
कण्ठाधः प्रविशत्यापस्तावत् पूतोभविष्यति।
अन्यथा न भवेत् शौचं मुक्तकण्ठश्च नाचमेत् ॥
पवित्रं न भवेत् पाद्यमाचान्ते न कदाचन।
उच्चारे भोजनस्यान्ते तस्य त्यागोविधीयते ॥
जानुभ्यामूर्द्धमाचम्य जले तिष्ठन्नदुष्यति।
ताभ्यामधस्तथा तिष्ठन्नाचामेत विचक्षणः ॥
वामहस्तकृतैर्दर्भैर्दक्षिणेनोदकं पिवेत्।
रुधिरं तद्भवेत्तोयं पीत्वा चान्द्रायणं चरेत् ॥
दक्षिणेन कुशान् गृह्य दक्षिणेनोदकं पिवेत्।
सोमपानेन तत्तुल्यं यथापाणिस्तथा हि सः ॥
सपवित्रेण हस्तेन ब्राह्मणाआचमन्ति ये।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोमपानं भवेत्तेषामत्रच क्रतुमादिशेत् ॥
कुशापूतं भवेत् स्नानं कुशेनोपस्पृशेत्ततः ।
कुशेन चोद्धृतं तोयं सोमपानेन तत्समम् ॥
अकुशेन तु यत् स्नानं यद्दानं तोयवर्ज्जितम् ।
असङ्ख्यया च यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ॥
अपवित्रकैर्हस्तैर्दत्तं भुक्तं हुतञ्च यत् ।
देवा हव्यं न गृह्णन्ति कव्यञ्च पितरस्तथा ॥
चितिजातं पथिजातं स्वाध्यायं पितृतर्पणम् ।
स्तरणासनपिण्डेषु षट् कुशान् परिवर्ज्जयेत् ॥
जलमध्ये श्मशाने वा वल्मीके मूषिकोत्करे ।
कृतशौचञ्च यच्छेषमग्राह्याः पञ्च मृत्तिकाः ॥
न कुर्य्याद्दन्तसंघर्षं आलूनोदेहभाजनम् ।
अपमृज्य च न स्नायात् गात्रमम्बरपाणिना ॥
स्नातोगात्राणि संमृज्यात् स्नानशाट्या न पाणिना ।
न च निर्धूनयेत् केशान् आचामेच्चैव चोत्थितः ॥
दुःस्वप्नं यदिवा पश्येद्वान्ते वा क्षुरकर्म्मणि ।
मैथुने कटधूमे च स्नानमेव विधीयते ॥
द्विजोयः स्नाति नित्योयं पञ्चाङ्गं विधिपूर्व्वकम् ।
अश्वमेधफलं तस्य गोभिलीयवचोयथा ॥ इति ॥

मन्त्राः,—पावकानइत्यादि, सप्तव्याहृतयः, सावित्रीञ्च सप्रणवामाद्यन्ते, सहस्रशीर्षेत्यादि, घृतवतीत्यादि, अश्वक्रान्तेत्यादि, इदं विष्णुरिति, त्रीणि पदेत्यादि, तद्विष्णोः कर्म्माणीत्यादि, तद्विप्रासइत्यादि, अतो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवाइत्यादि, उदयमित्यादि, उदुत्तममित्यादि, मृत्तिके ब्रह्मदत्ते-त्यादि, अमीमसीत्यादि, गावश्चिदित्यादि, ऋतञ्चेत्यादि, शन्नोदेवी-त्यादि, अपोहिष्ठेत्यादि, तरत्समन्दीत्यादि, एतोन्विन्द्रमित्यादि, तमुष्टवामेत्यादि, सहस्रशीर्षेत्यादि, त्रिपादूर्द्धेत्यादि, पुरुषएवेत्यादि, ऋतञ्चेत्यादि, पुनः शन्नोदेव्यादयः ।

अथ नित्यवत् सन्ध्यामुपासीत । उदुत्यमित्यादि, चित्रमित्यादि, आयं गौरित्यादि, अपत्येतादृत्यादि, तरणिरित्यादि, उद्यामे-सीत्यादि ॥

इति स्नानसूत्रपरिशिष्टं समाप्तम् ॥०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only